शिवादि देवताहरुका मेला जात्रा. पर्व उत्सव. श्राद्ध. तथा तेस्ता अरु सबै पुण्य दिवसहरुमा शिवको विशेष पूजा गर्नु र नैवेद लाउनु. अनि त्यो नैवेद्य शिवयोगीहरुलाइ भोजन गराउनु। यसो गर्दा शिव प्रसन्न हुनु हुन्छ र सबै पितर, सबै देवता. शिवमा आश्रित छन्, शिवमा लीन छन्. शिवका शरणमा छन्, तसर्थ शिव प्रसन्न भयेमा सबै प्रसन्न हुन्छन्। यस्मा कुनै संशय छैन। श्राद्धहरुमा ज्ञान वैराग्य सम्पन्न. शिव भस्मनिष्ठ भस्मोद्धूलित विग्रह, जितेन्द्रिय. शान्त मन भयेका शिवयोगीलाइ भोजन गराउनु। जब योगीमा इडा. पिङ्गला. सुषुम्णा आदि द्वारा सत्त्व. रजः तमः आदि तत्त्वको र २५ तत्त्वको विवेकपूर्वक सांख्य योगज्ञान हुन्छ र साधर्म्य एवं वैधर्म्यले यो यस्तो भनेर छुट्याउन सकिन्छ, त्यो हो ज्ञानको लक्षण। जब योगी न अनिष्टप्राप्तिले द्वेष गर्छ न इष्टप्राप्तिले प्रसन्नै हुन्छ; प्रीति. सन्ताप. विषाद जस्ता विकारहरु देखि विरक्त हुन्छ त्यो हो वैराग्यको लक्षण। सर्वाङ्गमा शिव भस्म लाउने शिवयोगीको दिनमा एक चोटी दर्शनमात्र गर्नाले जुन पुण्यफल पाइन्छ, त्यो गृहस्थले सयकडौं यज्ञ गरेर पनि पाउन सक्तैन। जस्का अन्तःकरण पञ्चक साथै पाँचै कर्मेन्द्रिय र पाँचै ज्ञानेन्द्रिय वशमा छन्. जस्मा आत्मा प्रसन्न स्वात्माराम छ. जो शब्दादि पञ्च विषय भोगहरुको न द्वेष गर्छ. न त कामना गर्छ. त्यो योगी हो जितेन्द्रिय। शिवज्ञान र वैराग्यले सम्पन्न. शिवशान्तिले शान्त चित्त युक्त भयेको आसनं प्राणसंरोधः प्रत्याहारश्च धारणा। ध्यानं समाधिरेतानि योगाङ्गानि भवन्ति षट्। भनेर शिवगोरक्षनाथले भनेका षडङ्ग योगले युक्त योगी शिवयोगी भनिन्छ। पशुपतिमत शिवधर्मबाट ज्ञान हुन्छ, शिवज्ञानबाट वैराग्य हुन्छ यसरी ज्ञान र वैराग्यले युक्त योगीमा शिवयोगको विकास हुन्छ। यसरी प्रवृत्त भयेका शिव (कल्याणकारी शिव) का योगबाट योगीः

शिव झैं सर्वज्ञ हुन्छ। आनी नित्य शुद्ध बुद्ध परिपूर्ण स्वात्मामा
नै अवस्थित स्वात्माराम शिवतुल्य यो योगी पनि शिवै हुन्छ।
ब्रह्मविद् ब्रह्मैव भवति। शिववित् शिव एव भवति। शिवज्ञा
शिवयोगी पनि शिवै हुन्छ। स्थावर जङ्गम सर्व जीव जन्तु हरु मध्
मानव उत्तम छ। मानव मध्ये द्विज (विप्र, क्षत्रिय, वैश्य) उत्तम छ
द्विज मध्ये वेदादि शिव धर्म महाशास्त्र ग्रन्थ पारङ्गत उत्तम छ।
ग्रन्थज्ञ वेद विद्वान् मध्ये ग्रन्थको तत्वार्थ चिन्ता गर्ने गूढ भावा
तात्पर्य जान्ने उत्तम छ। नाना प्रकारका (अभिधेय, लाक्षणि
व्यङ्ग्य, रसनादि) अर्थ हरुका तत्वज्ञ मध्ये प्रतिबुद्ध (पीत्व
मोहमयीं प्रमादमदिरामुन्मत्तभूतं जगत् - मध्ये, बुद्ध, विबुध
प्रतिबुद्ध, बुझेको, विशेष बुझेको र राम्ररी बुझेको) उत्तम छ
यस्ता नाना तत्वज्ञका कोटि संख्या मध्ये विशिष्ट शिवयोगी
हरु उत्तम हुन्छन्। यस्ता शिवयोगी हरुका शतकोटि मध्ये पनि
विशिष्ट परम उत्तम शिव योगिराज हुन्छन्। सबैका सबै पितृ
पनि योगज्ञ हुन्छन्, योगनिष्ठ हुन्छन्, योगसम्भव हुन्छन् र
योगप्रिय हुन्। तसर्थ पितृहरुका श्राद्धमा शिवयोगी हरुले भो
न गर्दा तो सबै पितृ हरु विशेष प्रसन्न हुन्छन्। तेसैले सबै पु
तपस्या: दान गर्दा जुन फल हुन्छ, त्यो सबै पुण्य फल योरा शि
योगीलाइ राम्ररी भोजन गराउँदा पाउँछ। जो अग्नि, रुद्र, काल
त्मा, दक्षिणा हवनीय तथा ऋग्वेद, यजुर्वेद, सामवेदका सं
गले वेदयज्ञ भनियेको छ।

ब्रह्मचर्य्यं तपो मौनं क्षान्तिराहारलाघवं ॥
इत्येतत्तपसां रूपं सुघोरं पञ्चलक्षणं ॥ ५२३॥
यदिष्टञ्च विशिष्टञ्च न्यायपात्रञ्च यद्भवेत् ॥
तत्तद्गुणवते देयमित्येतद्दानलक्षणं ॥ ५२४॥
निर्वर्त्तनसहस्राढ्यां सर्व्वसस्यप्ररोहिणीं ॥
दद्याद्भूमिं जलोपेतां भूमिदानं तदुच्यते ॥ ५२५॥
एकच्छत्रां महीं कृत्वा द्विजेभ्यः प्रतिपादयेत् ॥
सम्पूर्णां यो नृपः कश्चिद् भूमिदानं तदुच्यते ॥ ५२
सर्व्वदोषविनिर्म्मुक्तां तरुणीं सुपयस्विनीं ॥
यो गामलङ्कृतान्दद्याद् गोदानं तदुदाहृतं ॥ ५२
मध्यमोत्तमवस्त्राणि यो दद्यान्नूतनानि च ॥
एतत्समानतो ज्ञेयं वस्त्रदानस्य लक्षणं ॥ ५२
ब्रह्मचर्य्यसमाधिभ्यः क्षान्तिशीलपरायणः ॥

अहोरात्रं न भुञ्जीत चोपवासस्य लक्षणं ॥५२९॥
चत्वारिंशसमायुक्तं पिण्डानां हि शत द्वयं ॥
नियमाद्यद्यथाकाममिति चान्द्रायणं स्मृतं ॥५३०॥
ऋषिभिः सर्व्वशास्त्रज्ञैस्तपोनिष्ठैर्ज्जितेन्द्रियैः ॥
देवैश्च सेवितं तीर्थं क्षितौ तीर्थन्तदुच्यते ॥५३१॥
रुद्रावतारस्थानानि पुण्यक्षेत्राणि निर्द्दिशेत् ॥
मृतानान्तेषु रुद्रत्वं शिवक्षेत्रेषु देहिनां ॥५३२॥
आरामावसथं कूपमुद्यानं देवतागृहं ॥
तीर्थेष्वेतानि यः कुर्य्यात्सोऽक्षयंलभते फलं।५३३।
क्षमाऽस्पृहा दया सत्यं दानं शीलन्तपः श्रुतं ॥
एतदन्ताङ्गमुद्दिष्टं परं पात्रस्य लक्षणं ॥५३४॥
यज्ञोपवासदानानि तपस्तीर्थफलानि च ॥
सम्पूज्य विभवैर्भक्त्या लभते शिवयोगिनं ॥५३५॥
शिवे भक्तिः क्षमा सत्यमशेषेन्द्रियसंयमः ॥
शिवभक्तेषु मैत्री च शिवधर्म्मस्य लक्षणं ॥५३६॥
शिवयोगी शिवज्ञानी शिवधर्म्मरतश्च यः ॥
इत्येतत् त्रिविधं ज्ञेयं शिवपात्रस्य लक्षणं ॥५३७॥
शिवमुद्दिश्य दातव्यमनपेक्ष्य गृणाश्रयं (गुणाश्रयं)॥
वित्तमीश्वरभक्तेन शिवदानस्य लक्षणं ॥५३८॥

ब्रह्मचर्य. तपस्या. मौन. क्षमा. आहारलाघव (युक्ताहार-विहार) यति यो पञ्चलक्षणको सुघोर तपको रूप हो। तपस्याका पञ्चलक्षण इनै हुन्। जो इष्ट (अभीष्ट) र विशिष्ट छ, तथा न्यायोचित पात्र छ. तेस्ता गुणी सुपात्रमा आफ्नु अभीष्ट वस्तु दिनु, यो दानको लक्षण हो। सद्दानको स्वरूप छ। अब भूमिदानको लक्षण – एक गेडो बिउ छरेका ठाउँमा हजार गेडा फलाएर फर्काउने उर्वरा. सवै प्रकारका हिउँदे वर्षे अन्न खेती पाती. फलफुल. कन्दमूल, वृक्षफलादि हुने. बारै मास पानी कुलो लाग्ने. अनिकाल सुकरवा कैल्यैन लाग्ने भूमि दिनु यो हो भूमिदान। जुन सुकै राजाले पनि दिग्विजय गरेर सम्पूर्ण पृथिवीलाइ एकछत्र (यौटै-छत्रपति चक्रवर्ती) भयेकी पारेर द्विजलाइ दान दियेमा सव भन्दा ठूलो भूमिदान हुन्छ। सवैदोषले मुक्त. तरुनी. प्रशस्त दुद दिने. सव प्रकारका अलङ्कारले अलङ्कृत राम्री गाइको दान जो भक्त शिवलाइ वा गुरुलाइ अथवा सुपात्र शिवभक्तलाइ दिन्छ.

त्यो हो गोदान। जो मध्यम, मध्यमोत्तम तथा उत्तम वस्त्र वा यस्तै समानका अरु वस्तुको दान दिन्छ, त्यो हो वस्त्रदानको लक्षण। क्षमा शील, स्वभावमा परायण भएर ब्रह्मचर्य पूर्वक ध्यान समाधिले उपवास बसेर अहोरात्र बिताइन्छ, यो हो उपवासको लक्षण। २४० दुइसय चालीस गास भोजनलाई शुक्ल र कृष्ण पक्षमा चन्द्रकला-वृद्धि क्षय-क्रमैले विभक्त गरेर यम-नियमले यथेष्ट जो सेवन गरिन्छ, यो हो चन्द्रमाको चान्द्रायण व्रत। ऋषि, मुनि, सिद्ध, साधु, सन्त, सज्जन र विद्वज्जनले र सर्वशास्त्रज्ञ तपोनिष्ठ तपस्वी एवं जितेन्द्रियहरुले तथा देवताहरुले निवास गरेको स्थान नदी, नद, दह, कुण्ड मन्दिर गुफादि भूमण्डलमा तीर्थ कहिन्छन्, यो हो तीर्थको लक्षण। शिवका ११ एघार रुद्रका अवतार तथा १०८ शिव अवतारका पवित्र क्षेत्रहरु पृथिवीमा पुण्यक्षेत्र र शिवक्षेत्र भनिन्छन्, र, ती शिवक्षेत्रहरुमा मर्ने समस्त प्राणिहरु रुद्रत्व (शिवसायुज्य मुक्ति) हुन्छ; जस्तै पशुपत क्षेत्र आर्याघाट, देवीघाट, देवघाट, कोशीघाट, कर्णालीघाट आदिमा तथा कैलास मानसरोवरमा हुन्छ। उक्त शिवक्षेत्र तथा अरु शिव तीर्थहरुमा, फुलबारी, गोशाला, यज्ञशाला, पाठशाला, धर्मशाला, पा पौवा, प्याउ, घाट, बिसौना, विश्राम स्थान, कुवा, मन्दिर आदि जस बनाउँछ, त्यो हो शिवभक्त अक्षयफल पाउँछ र शिवलोकमा वा गर्छ। क्षमा, अनिच्छा, दया, सत्य, दान, शील, तप, वेद शिवज्ञान आ धर्मशास्त्र, इत्यादि भएका सज्जन सत्पात्र, परमपात्र वा सुपात्र भ न्छन्। यो हो पात्रको लक्षण। यज्ञ, उपवास, दान, तपस्या, तीर्थया आदिको पुण्यफल, यथा विभव भक्तिसाथ शिवयोगीको राम्र सेवा सत्कार पूजा गरेर पाइन्छ। शिवमा भक्ति, क्षमा, सत्य, अ इन्द्रियहरुको संयम र शिवभक्तहरुमा मित्रता शिवधर्मको लक्ष हो। यस्तै शिवमा भक्ति बढाउने अरु कार्यहरु पनि शिवधर्मका लक्ष हुन्। शिवयोगी, शिवज्ञानी, र शिवधर्ममा सदा सब प्रकार तत्पर जो रहन्छ, ई तीन प्रकारका शिवपात्र हुन्। यो शिवपात्रको लक्ष हो। शिवको उद्देश्य राखेर, शिवको नाम लिएर, प्रत्युपकार आदि आशा नराखेर ईश्वर भक्तले ईश्वर (शिव) का भक्तलाई जो पवि दान गरिन्छ, यो हो शिवदान। शिवदानको लक्षण यस्तो छ। जे गरे पनि सर्वत्र भावशुद्धि हुनु पर्छ।

शिवभक्तं द्विजश्रेष्ठं यः श्राद्धादिषु भोजयेत् ॥
कुलसप्तकमुद्धृत्य शिवलोके महीयते ॥५३५॥
बहुनात्र किमुक्तेन शिवभक्तान्तु भोजयेत् ॥

शिवभक्तो यदा भुङ्क्ते साक्षाद् भुङ्क्ते तदा शिवः ।५४०।
द्विजानां वेदाविदुषां कोटिं सम्भोज्य यत्फलं ॥
मुनये वीतरागाय भिक्षादानेन तत्फलं ॥५४१॥
तस्माच्छ्राद्धे विशेषेण पुण्येषु दिवसेषु च ॥
शिवमुद्दिश्य विप्रेन्द्र शिवभक्तन्तु भोजयेत् ॥५४२॥
असंयतः संयतो वा सर्व्वावस्थाङ्गतोऽपि वा ॥
यो वा सो वा (स वा) शिवे भक्त शिववत्पात्रमुत्तमं ॥५४३॥
सम्पर्कादर्थलाभाद्वा पापी रुद्रं प्रपूजयेत् ॥
गृहे श्राद्धस्य यत्पुण्यमरण्ये तच्छवाधिकं ॥५४४॥
शिवाश्रमेषु विज्ञेयं तत्पुण्यमयुताधिकं ॥
निवेदयीत यः सोम्यमासनं मृदु वेत्रजं ॥५४५॥
नागदन्तमयं वापि सिंहासनपतिर्भवेत् ॥
कौपीनच्छादनं वासो निवेद्य शिवयोगिने ॥५४६॥
युगकोटिसहस्राणि रुद्रलोके महीयते ॥
और्णं प्रावरणं दत्वा विकीर्णं शिवयोगिने ॥५४७॥
लोम्नि लोम्नि सुवर्णस्य दत्तस्य फलमाप्नुयात् ॥
मृगद्वीप्यादिकं चर्म्म तिलपिष्टविमर्द्दितं ॥५४८॥
मृदु रक्तकषायेण निवेद्य शिवयोगिने ॥
यावत्तद्रोमसंख्यानं मृगद्वीप्यादिचर्म्मणि ॥५४९॥
तावद्वर्षसहस्राणि रुद्रलोके महीयते ॥
जलस्थलस्थपत्राणि यो दद्याच्छिवयोगिने ॥५५०॥
त्राणार्थं सर्व्वजन्तूनां सोऽब्दलक्षं वसेद्दिवि ॥
त्रिवेष्टाम्भः समायुक्तं यः प्रदद्यात्कमण्डलुं ॥५५१॥
महासरांसि यत्कृत्वा पुण्यं तत्सकलं लभेत् ॥
मृदमानीय सश्लक्ष्णां प्राणिदोषविवर्ज्जितां ॥५५२॥
निवेद्य शिवयोगिभ्यः क्षितिदानफलं लभेत् ॥
मृद्भस्माधारपात्राणि वंशालाबुकृतानि च ॥५५३॥
निवेद्य शिवयोगिभ्यः सर्व्वतीर्थफलं लभेत् ॥

जसले श्राद्ध आदि पुण्य तिथि पर्व उत्सवहरुमा द्विज श्रेष्ठलाइ भोजन गराउँछ, त्यो सात कुलको उद्धार गरेर शिवलोकमा पूज्य हुन्छ। धेरै आहाँ किन भनौं? जो जस्तो जुन जातको भने पनि मानव मात्र शिवको भक्त छ भने तेस्तालाइ त ती पर्व तिथि शिव तीर्थहरुमा श्रद्धा भक्ति साथ

भोजन गराउनु पर्छ। जब शिवभक्त भोजन गर्छ त साक्षात्
शिवले भोजन गर्नु हुन्छ। तसर्थ जो हृदयै देखि शिवको भक्ति
छ, त्यो मानव मात्र सुपात्र छ, तेस्ता पात्रमा शिवदान दिनु
उत्तम छ। वेदका विद्वान् द्विजहरु एक करोडलाइ भोजन गरा-
उँदा जुन फल हुन्छ, त्यो पुण्य फल, वीतराग वैराग्य शाली
सिद्ध मुनि एक जनालाइ मात्र भिक्षा दिँदा पाइन्छ। तस्मात्
श्राद्धहरुमा। विशेष गरेर पुण्य दिवसहरुमा शिवको उद्देश्य
लियेर तेस्ता सुपात्र शिवभक्तलाइ त अवश्य भोजन गराउनु
संयमी होस् वा असंयमी होस्, जुन सुकै अवस्थामा पुगेको
होस्, जुन सुकै जातको होस्, मानव मात्र होस्, तर शिवभ
छ भने, शिवतुल्य उत्तम पात्र छ। सँगी साथीहरुका सम्पर्कले
वा अर्थलोभले, नै होस्, पापी नै किन न होस्, रुद्र (शिव) को
पूजा गर्छ भने, त्यो पनि शिवदानको पात्र हुन्छ। घरमा श्राद्ध
गरेका पुण्य भन्दा वनमा श्राद्ध गरेको सयगुणा आधिक पुण्य
हुन्छ। त्यै श्राद्ध शिवालय शिवाश्रमहरुमा गर्‍यो भने दशहजा
गुणा आधिक फल हुन्छ। जो शिव भक्त शिवलाइ शिवाश्र
मा सौम्य कमलो बेतको आसन निवेदित (समर्पित) गर्छ, अथ
हात्ती दाँतले बनेको आसन चढाउँछ, त्यो सिंहासन पति हुन्छ। अ
जन्ममा कि राजा हुन्छ, कि त राजा समान सम्मानित उच्च
सिंहासनको अधिपति हुन्छ। कौपीन (लगोटी) वा अरु शरीरा
च्छादन वस्त्र जो शिव भक्त शिवयोगीलाइ समर्पित गर्छ, त्यो
हजारौं कोटि युग सम्म शिवलोकमा पूजित हुन्छ। ऊन
वर्को वा काम्लो आदि राम्रो ऊनी कपडा शिवयोगीलाइ दि
शिवभक्तले, तेस वस्त्रका रौँ रौँमा १/१ एक एक सुनको मु
दान गरेको पुण्य पाउँछ। मृगचर्म वा चितुवा वाघ आदिको छा
तिलका पिनाले मलेको, रातो कषाय आदि औषधीले शोध
शुद्ध कमलो पारी जो शिव भक्त शिवयोगीलाइ दिन्छ, त्यो भ
तेस चर्ममा जति रौँ छन् तेत्ति हजार वर्ष सम्म शिवलोकम
दिव्य सुख भोगेर पूज्य रहन्छ। जलमा कमल आदिका पात
स्थलमा उम्रने, साल, चिउरी, मालु, कुडेती प्रभृतिका पात
पातले बनेका दुना टपरी, छत्री, टोपी आदि सबै जन्तुका त्राण
र्थ जो शिव भक्त शिवयोगीलाइ दिन्छ, त्यो लाख वर्ष सम्म शि
लोकमा वास गर्छ। न खोल्किने बलियो हत्तासी भयेको कमण्ड
जो शिवभक्त शिवयोगीलाइ दिन्छ, त्यो महान् महान् पार

सरोवर बनायेको सकल पुण्य फल पाउँछ। जस्ले कीट, पटङ्ग, धमिरा, कमिला आदि प्राणीहरुका सवै दोष देखि रहित चोखो चिल्लो माटो ल्यायेर शौचार्थ शिवयोगीहरुलाइ दिन्छ, त्यो शिवभक्त भूमिदानको पुण्य फल पाउँछ। जो शिवभक्त, बाँस, लौका, तुम्बा, नरिवल, समुद्रनारिवल आदिले बनेका गाबु आदि शिव भस्म, रुद्र माटो आदि राख्ने पात्र शिवयोगीहरुलाइ दिन्छ, त्यो भक्त भूमण्डलका समस्त तीर्थयात्रा गरेको पुण्य फल पाउँछ।

दन्तधावनमुद्दिष्टं निवेद्य शिवयोगिने ॥५५४॥
दिव्यस्त्रीभोगसंयुक्तं दिवि रम्यं पुरं लभेत् ॥
योगपट्टोपवीतानि निवेद्य शिवयोगिने ॥५५५॥
वस्त्रयुग्मसहस्रस्य दत्तस्य फलमाप्नुयात् ॥
मृण्मयालाबुकाद्याद्यं सम्भृतं भैक्षभाजनं ॥५५६॥
निवेद्य शिवयोगिभ्यः सदासत्रफलं लभेत् ॥
शिवभक्ताय यो दद्यादुपानत्काष्ठपादुके ॥ ५५७॥
स मेध्याश्वसहस्रस्य दत्तस्य फलमाप्नुयात् ॥
काल्माषदण्डं यो दद्यादन्नं वा शिवयोगिने ॥ ५५८॥
बलावष्टम्भयुक्ताभ्यां स स्याद्दण्डप्रणायकः ॥
तालवंशातपत्रं वा यो दद्याच्छिवयोगिने ॥ ५५९॥
एकच्छत्रां स भुञ्जीत पृथिवीञ्च नराधिपः ॥
पात्रान्तराविशेषाणि विशेषाच्छिवयोगिने ॥५६०॥
भवेत् क्षितिपतिः श्रीमान् कुलाधारो गुणान्वितः ॥
शिवज्ञानाभियुक्ताय यो दद्यात्पुस्तकम्महत् ॥५६१॥
युगकोटिशतं दिव्यं रुद्रलोके महीयते ॥
भवेदिहागतः श्रीमान् सद्यो वेदस्य पारगः ॥ ५६२॥
सर्व्वज्ञानार्थवक्ता च बृहस्पतिसमो धिया ॥
शिवयोगी शिवज्ञानी शिवधर्म्मरतश्च यः ॥ ५६३॥
शिवसम्प्राप्तितुल्यत्वात सर्व्वतुल्यगुणाः स्मृताः ॥
स कुर्य्यात्कार्येह्यापि वपनं शिवयोगिना ॥ ५६४॥
वर्षलक्षं महाभोगैः शिवलोके महीयते ॥
रुद्रो रुद्राक्षदानेन भवतीति किमद्भुतं ॥ ५६५॥
तन्माली यः सदा हस्ते रुद्रश्चक्रमते क्षितौ ॥
रुद्राक्षाणि सदा रुद्रो ये च रुद्राक्षधारकाः ॥ ५६६॥
रुद्राक्षधारणात्तस्मादिह रुद्रः परत्र च ॥

धत्ते रुद्राक्षमालां यः शोभायुक्तां सदाकरे ॥५६७॥
शताद्धार्द्धं प्रमाणेन, स रुद्रो नात्र संशयः ॥
पशवोऽपि हि रुद्राक्षैः संयुक्ता यान्ति रुद्रतां ॥ ५६८॥
किं पुनश्चालयन्तिस्म. नरो रुद्राक्षमालिकां ॥
य एवं चालयेन्मालां तज्जप्यान्च न संशयः॥ ५६९॥

उद्धिष्ट (अपामार्ग. वटजटा, वज्रदन्ती, सञ्जीवन. बबूर आदि दाँतमा छितगर्ने र कर्तव्यतया निर्दिष्ट शास्त्रविहित अरु सबै वनस्पतिका) दन्तधावन जो शिवभक्त शिवयोगीहरुलाई दिन्छ; त्यो दाता दिव्याङ्गनासहवाससहित स्वर्गमा राम्रो फल पाउँछ। जो शिवभक्त शिवयोगीहरुलाइ योगपट्ट (जोगपट् योगसाधना गर्ने बेला मृदुलं धवलं प्रोक्तं वेष्टनाम्बरलक्षणम्. इत्यादि भनियेका खेचरीमुद्रासाधन. स्थिर सुखमासनम्. इत्यादि भनियेका आसनादि साधनामा लाग्ने पट्टबन्ध. तथा नेतिधौती प्रभृति र अरु यस्ता योगाभ्यासोपयोगी कपडा, उपवीत आदि आवश्यक वस्त्र वस्तु प्रदान गर्छ, त्यो भक्त वस्त्रयुग्म (अधोवस्त्र र ऊर्ध्ववस्त्र) हजार दान गरेको फल पाउँछ। माटाको. बाँसको. नरिवलको तुम्बा आदि योगि योग्य पात्रमा सात्त्विक भिक्षान्न भरेर जो शिवभक्त शिवयोगिलाइदि त्यो सदासत्र (सर्वदा अन्न क्षेत्र खोलेको) पुण्य फल पाउँछ। शिवभक्त वा शिवयोगिलाइ परादि पवित्र पादुका वा काष्ठपादुका जो शिवभक्त दान गर्छु. त्यो अश्वमेध यज्ञयोग्य मेध्याश्व हजार दान गरेको फल पाउँछ। जो शिवभक्त शिवयोगिलाइ कल्माषदण्ड (खप्तडी निगालाको वा तेस्तै खिरविरे बाँस, रैंस, ढुँगारु आदिको बलिष्ठ लट्ठी) र सत्त्वबलारोग्यपद सात्वि अन्न दिन्छ, त्यो भक्त अर्काजन्ममा उस्तै बल (सेना) र अवष्टम्भ (ओजस्वी खाद्यान्नादि) युक्त दण्डनायक (बलाध्यक्ष, सेनापति, प्रधानसेनानी) हुन्छ। ताडपत्रको वा बाँस निगाला आदिको छत्री, टोपी, घुम स्याँखु आदि घाम पानी छेक्ने साधन शिवयोगिलाइ दिने दात अर्काजन्ममा एकातपत्रा पृथ्वीको राजा हुन्छ। एवम् अरु आवश्यक पात्रहरु शिवयोगीहरुलाइ विशेष गरेर दिने भक्त जन्मान्तरमा कुलको आधार गुणवान् श्रीमान् क्षितिपति (राजा) हुन्छ। शि ज्ञानयुक्त योगी वा अरु विद्वान्लाइ शिवज्ञानको महापुस्तक (शिवधर्मशास्त्र) जो दिन्छ, त्यो दिव्य सय कोटि युग सम्म शि लोकमा पूज्य भैरहन्छ र अन्तमा यहाँ आयेर सद्योवेद पार ग (तत्काल वेदको धुरन्धर विद्वान) हुन्छ एवं सबै ज्ञानका अ तत्त्वको वक्ता बुद्धिले बृहस्पति समान विद्वान् हुन्छ। शिवयो शिवज्ञानी, र शिवधर्ममा नित्य निरन्तर तत्पर, ई तीनजना शि

सम्प्राप्तितुल्य (शिवपदमा पुगेका) हुनाले शिवतुल्य गुणका शिवसमानै सम्झिन्छन्। जो भक्त शिवयोगीहरूको वपन (मुण्डन) नखलनन आदि सेवा गरोस् वा गरावोस्। त्यो शिवभक्त एकलाख वर्षसम्म शिवलोकमा पूज्य भयेर दिव्य सुख भोग्छ। जो शिवभक्त शिवयोगीलाइ रुद्राक्ष दान गर्छ, त्यो अन्तमा रुद्रै हुन्छ। यसमा के अद्भुत छ र? जो केवल रुद्राक्षको माला हातमा राखेर शिवस्मरण गर्छ (सुमेर्नी गर्छ) त्यो पनि पाइला-पाइलामा पवित्र तीर्थ पार्दै पृथ्वीमा रुद्रसमान यात्रा गर्छ (रुद्राक्षको महात्म्य ठूलो छ। रुद्रका आक्षि (आँखा) का आनन्दाश्रुबिन्दुबाट प्रकट भयेका रुद्राक्षवृक्ष र रुद्राक्षफल सदा साक्षात् रुद्र छन् र जो रुद्राक्ष धारण गर्छन्, ती सबै रुद्रै (शिवै) छन्; तसर्थ रुद्राक्ष धारण गर्नुपर्छ। रुद्राक्ष धारणाले इहलोक तथा परलोकमा रुद्रै हुन्छन्। जो सदा हातमा २५ वा २७ दानाको शोभायुक्त रुद्राक्षमाला राख्छ र शिवको (ॐ शिव! ॐ नमः शिवाय! ॐ नमो महामृत्युञ्जयाय) इत्यादि मन्त्र जप गरी रहन्छ; त्यो रुद्रजापी रुद्रै हो। यसमा शङ्का छैन। मनुष्य त के? पशुपक्षी पनि रुद्राक्षले युक्त छन भने, रुद्रै हुन्छन् भने, जो नर (नरनारी) बुद्धिपूर्वक शिवको नाम लियेर रुद्राक्षमाला चलाई रहन्छन (जपी रहन्छन्) तिनको पुण्यफल के भन्नु र? जो यो रहस्य बुझेर सदा रुद्राक्षमाला चलाइ रहन्छ र अन्तर्मुख भयेर शिवको जप गरी रहन्छ, त्यो रुद्र (शिव) हुन्छ हुन्छ!

जपश्च रुद्रमन्त्राणां कोटिकोटिगुणोत्तरं ॥
मूर्ध्नि हस्तोपवीतेन कृत्वा रुद्राक्षमालिकां ॥५७०॥
यश्च भुञ्जीत भस्माङ्गी रुद्रैर्मुक्तन्न संशयः ॥
रुद्राक्षधारणात्तस्मान्नित्यमेव प्रशस्यते ॥५७१॥
परात्मानुग्रहार्थं हि ब्राह्मणस्य विशेषतः ॥
यतिमात्रोपकरणं दत्वाल्पमपि भक्तितः ॥५७२॥
वर्षलक्षं महाभोगैः शिवलोके महीयते ॥
कुर्य्यादावसथं सौम्यं सुगुप्तं शिवयोगिनां ॥५७३॥
शिवालयकृते यावत्तावत्पुण्यं समं भवेत् ॥
यथा शिवस्तथा योगी यथा योगी तथा शिवः ॥५७४॥
तेन योगीन्द्रपात्रेषु दानमप्यल्पमक्षयं ॥
यद्यदस्योपयुज्येत तद्देयन्तत्प्रयत्नतः ॥५७५॥
उपयोगप्रदानाभ्यां श्रेयस्तेनोभयोरपि ॥

व्याख्याने शिवधर्म्मस्य कृत्वा मण्डलकंमहत् ॥५७६॥
शोभितं पुष्पपत्राद्यैः शिवधर्म्मासनं महत् ॥
पुरस्तस्य गुरोः स्थाप्य पूजयेद्भयन्ततः ॥ ५७७॥
शिवधर्म्मप्रवक्तारमाचार्य्यं पूजयेत् सदा ॥
शिववच्छिव धर्म्मश्च तुल्यमेतद्द्वयन्ततः ॥ ५७८॥
य एवन्न्यायतो भक्तः शिवधर्म्मं शृणोति च ॥
आयुर्विद्यां यशः सौख्यं लब्धवान्ते स शिवं व्रजेत् ॥५७९॥
इत्येष वः समाख्यातः शिवधर्म्मः सनातनः ॥
सर्व्वेषां शिवभक्तानामयं वाच्यो विजानता ॥५८०॥
शिवाश्रमेषु यो भक्तः शिवधर्म्मं प्रकीर्त्तयेत् ॥
शृणुयाद्वापि लभते तत्रोक्तमखिलं फलं ॥ ५८१॥
श्रुत्वैवमखिलं धर्म्ममाख्यात ब्रह्मसूनुना ॥
चन्द्रात्रेयसगोत्राय शिवभक्ताय सारवत् ॥ ५८२॥
सारात्सारं समुद्धृत्य चन्द्रात्रेयेण धीमता ॥
उक्तञ्च द्वादशाध्यायं धर्म्मशास्त्रं शिवात्मकं ॥ ५८३॥
यावदस्योपदेशेन शिवधर्म्मं समाचरेत् ॥
तावत्तस्यापि तत्पुण्यमुपदेशान्न संशय ॥ ५८४॥
उपदेशं विना यस्माद्धर्म्मो ज्ञातुं न शक्यते ॥

पुर्वोक्त क्रमले रुद्रमन्त्रहरुको जप गर्दा कोटि कोटिगुणा पुण्यफल दायक छ र जो रुद्रभक्त रुद्राक्षमाला. शिरमा. हात वा उपनीत(जनै)मा राखेर भोजन गर्छ. त्यसले र सर्वाङ्ग शिवभस्म युक्त भस्माङ्गी शिवयोगीले भोजन गरेको त साक्षात् रुद्रले (शिवले नै भोजन गरेको सम्झनु पर्छ। शिवभस्म रुद्राक्षधारीले गरेको भो न रुद्रले नै गरेको हो. यस्मा संशय छैन। तेसैले रुद्राक्ष धारण गर्ने मानिसको सदा सबैले प्रशंसा गर्छन् र रुद्ररूप ठानेर मनै मनल नमस्कार गर्छन्। रुद्राक्षधारी जता जान्छ. तेस्का पाइला-पाइल मा रुद्रतीर्थ हुन्छन्। तसर्थ आफ्नु र अरु दर्शक सबैको कल्या गर्ने अनुग्रह बुद्धिले मानव मात्रले शिवाचारमा रहेर रुद्राक्षधार गर्नु पर्छ। विशेषतः ब्राह्मणादि द्विज (गायत्री दीक्षाद्वारा वा शिव मन्त्रदीक्षाद्वारा दुइ चोटी जन्म हुन्छ ती ब्राह्मण. क्षत्रिय वैश्यादि ले सदा रुद्राक्ष धारण गर्नु पर्छ। यतिमात्र (योगीहरुलाइ योगमा मा आवश्यक) उपकरणाहरु मध्ये अल्पमात्र पनि भक्तिभाव दान गर्ने शिवभक्त. एकलाख वर्ष सम्म दिव्य सुख भोगेर शिव

लोकमा पूज्य हुन्छ। जो शिवभक्त श्रीमान् योगाभ्यास योग्य शिवयोगीहरुका लागि स्वच्छ शान्त एकान्तमा पर्खाल आदिले सुरक्षित तथा सबै आवश्यक उपकरण (साधन) हरुले सम्पन्न सौम्य (हेर्दै शान्ति दिने) आवसथ (योगाश्रम) निर्माण गरेर दिन्छ; त्यो भक्त शिवालय बनाये तुल्य पुण्य फल पाउँछ। जस्तै शिव उस्तै योगी; जस्तै योगी उस्तै शिव; तसर्थ योगीन्द्र शिव पात्रमा अल्पमात्र दान पनि अक्षय (जति खाये व्यय गरे पनि न सकिने अटूट) पुण्य पाइन्छ र शिवलोकको रमाइलो वास पाइन्छ। शिवयोगीहरु वा अरु पात्रमा जस्लाई जुन वस्तुको जस्तो खाँचो छ, उस्तै उइ वस्तु दान गर्नाले र सदुपयोग गर्नाले दुवैको समान श्रेय हुन्छ र दुवैले शिव पाउँछन्। तसर्थ प्रयत्न पूर्वक उपयोगी वस्तुको दान र आदान गर्नु पर्छ। यस पशुपतिमत शिवधर्म महाशास्त्रको व्याख्यान (कथा) गर्ने स्थानमा, सबै श्रोता अटाउने गरी विशाल र सौम्य शोभा सम्पन्न मण्डप बनायेर पत्र पुष्प, माला अलङ्कार देवचित्र, ध्वजा पताका तोरण आदिले युक्त पारेर यथास्थान व्याख्यानमञ्च राखेर महान् शिवधर्मासन राख्नु। तेसैका अगाडी धर्मवक्ता शिवयोगी गुरुको आसन राख्नु। आनि दुवैको पूजा गर्नु। शिवधर्मप्रवक्ता शिवयोगाचार्यको सदा पूजा आदर सत्कार गर्नु। आनि शिवको पूजा गरे झैँ शिवधर्मशास्त्रको (पुस्तकको) पनि सदा पूजा गर्नु। किनाकि शिवको मूर्ति (प्रतिमा तथा शिवलिङ्ग) र शिवधर्मको पुस्तक तुल्य पूज्य छन्। जो शिव भक्त यसरी न्यायोचित विधिले प्रबन्ध मिलायेर भक्तिभावले शिवधर्म कथा श्रवण गर्छ, तेसको आयु, विद्या, यश, बल, सुख-समृद्धि, वढ्दै जान्छ र देहान्तमा शिव पाउँछ-(शिवलोक मा शिवका साथै सारूप्य सामीप्य तथा सालोक्य मुक्ति पाउँछ)।

नन्दिकेश्वर सनत्कुमार आदि सबै श्रोताहरुलाई कैलासमा भन्दै हुनु हुन्छ:—यति सम्म यो सनातन सदातन शिवधर्म मैले तपाइहरुलाई भनेँ। तपाइहरु पनि जानेर सबै शिवभक्त सुपात्र श्रोताहरुमा भन्नु होला। यसै गरी सबै शिवाश्रम (शिवका मन्दिर, आश्रम, मठ, मण्डप, तीर्थ, क्षेत्र आदि) मा जो शिवभक्त शिवधर्मको कथा प्रवचन कीर्तन गर्छ, गराउँछ, सुन्छ, सुनाउँछ वा कुनै प्रकारको सहयोग गर्छ, तेसले यसमा भनेका अविकल सकल पुण्य फल पाउँछ। यसरी नन्दिकेश्वरले ब्रह्माजीका मानसपुत्र सनत्कुमारलाई सम्बोधन गरेर सबैलाई सुनाउनु भयो। सनत्कुमारले शिवभक्त चन्द्रात्रेयलाई भन्नु भयो। तेसको सार स्वरूप यो शिव-

धर्म शिवभक्त चन्द्रात्रेयका गोतियारलाइ चन्द्रात्रेयले भने। बुद्धि
मान् चन्द्रात्रेयले सारको पनि महासार १२ वार अध्यायमा यो शि
को महान् धर्मशास्त्र भनेका छन्। यसै गरी अगाडी जो यसको कथ
भन्ला र सुन्ला, प्रचार गर्ला, ती सबैलाइ यो धर्म लाग्ला। तसर्थ सबै
ले यसको उपदेश गर्नु, सुन्नु, शिवाचारमा रहनु। जो पुण्य नन्दिकेश्
र, सनत्कुमार, चन्द्रात्रेयादिको छ, त्यै पुण्य अगाडी शिवको कथ
भन्ने सुन्ने. प्रचार गर्ने तथा कुनै प्रकारले, यस्मा सहयोग गर्ने सबै
ले पाउँने छन्। धर्मोपदेशको सुविधाजनक प्रवन्ध न भै उपदे
हुँदैन। उपदेश विना धर्मको ज्ञान हुँदैन। शिवधर्म ज्ञान विना शिव
चार हुँदैन। शिवाचार विना शिवगति पनि हुँदैन। तसर्थ सबैके
पुण्य फल तुल्य जानेर शिवधर्म महाशास्त्रको व्यापक उपदेश
गर्ने काममा सबैले सहयोग गर्नु पर्छ।

न चाकर्तुमविज्ञाय तस्मात्तुल्यं फलं तयोः ॥ ५८५॥
उपदेष्टानुमन्ता च कर्ता कारयिता च यः ॥
कृतानुपालकश्चैव पञ्च तुल्य फलाः स्मृताः॥५८
कर्तुरप्यधिकं पुण्यं तत्कृतं योऽनुपालयेत् ॥
यस्मादायतनं क्षिप्रं नाशङ्गच्छत्यपालितं ॥ ५८७॥
भूमिरत्नाश्वनागानां गोहिरण्यादिवाससां ॥
भवेत् पूर्वोपरि स्थानं दानाच्छ्रेयोऽनुपालनं ॥ ५८८॥
दातुरभ्याधिकं पुण्यं दत्तं यश्चानुपालयेत् ॥
अपालितन्तु तद्यस्माच्छीघ्रमेव प्रणश्यति॥५८
तस्मादुपदिशेद्धर्मं स्वयं वापि समाचरेत् ॥
कारयेद्दानमित्येव कृतमन्यैश्च पालयेत् ॥५९
पाशुपतं रुद्रकोटिरविमुक्तं महालयः ॥
गोकर्णो भद्रकर्णश्च सुवर्णाक्षोऽथ दीप्तिमान्॥५
स्थाणवीश्वरश्च विख्यातंस्त्रिषु लोकेषु विश्रुतं ॥
स्थानाष्टकमिदं ज्ञेयं रुद्रक्षेत्रं महोदयं ॥ ५९२॥
पाशुपतादि स्थाणवन्तं रुद्रसायुज्यकारणं ॥
छगरण्डो दुरण्डश्च माकोटम्मण्डलेश्वरं ॥५९
कालञ्जरं शङ्कुकर्णं स्थलेश्वरः स्थूलेश्वरः ॥
पवित्राष्टकमित्येतन्महापुण्याभिवर्द्धनं ॥५९
मृताः प्रयान्ति तत्रैव शिवस्य परमं पदं ॥
देवघट्टं कुरुक्षेत्रं नरवलं कनरवलं तथा ॥५९

विमलेश्वरोऽट्टहासं महेन्द्रं भीममष्टकं ॥
एतद् गुह्याष्टकं नाम सर्व्वपापविमोचनं ॥ ५९६॥
गत्वा तु पुरुषः श्रीमान् प्राप्नोति शिवमन्दिरं ॥
श्रीपर्वतं हरिश्चन्द्रं जल्पमाम्रातकेश्वरं ॥ ५९७॥
मध्यमञ्च महाकालं केदारं भैरवन्तथा ॥
एतद् गुह्यातिगुह्यञ्च. अष्टकं परिकीर्त्तितं ॥ ५९८॥
सन्तर्प्य तु पितॄन् सर्व्वान् शिवं यान्ति परं पदं ॥
आम्रेश्वरं प्रभारञ्च नैमिषं पुष्करन्तथा ॥ ५९९॥
आषाढिं दण्डिमुण्डिञ्च भारभूतिं भवान्तकं ॥
नकुलीश्वरोऽथ विख्यातस्तथा प्रत्यात्मिको महान् ॥

किनकि ? न जानी कन कुनै काम पनि गर्न साकिन्न । जानेर मात्र कुनै कार्य गरिन्छ । अतः ज्ञान मुख्य छ । उपदेश दिने र उपदेशको पालन गर्ने दुवैको फल तुल्य छ । शिवधर्मको उपदेश गर्ने. अनुमति र सुविधा दिने. तदनुसार धर्म गर्ने गराउने तथा अरूले गरेका धर्मकृतिको अनुपालन (पछिबाट संरक्षण) गर्ने पाँचै जनाले तुल्य फल पाउँछन् । अँझ कर्ता भन्दा. तेसको अनुपालन गर्नेको पुण्य फल अधिक हुन्छ । तो दानपालनयोर्मध्ये दानाच्छ्रेयोऽनुपालनम् । ये प्राक्तनानिभुजां जगतीहितानां धर्म्यां स्थितिं स्थितिकृतामनुपालयेयुः । लक्ष्म्या समेत्य सुचिरं निजभार्ययेव प्रेत्यापि वासवसमा दिवि ते वसेयुः । भूयो भूयो भाविनो भूमिपालान् नत्वा नत्वा याचते रामचन्द्रः । सामान्योऽयं धर्मसेतुर्नृपाणां काले काले पालनीयो भवद्भिः । यो यस्मिन् समये राजा जायतेऽत्र तपोबलात् । तेनायं धर्मिणा धर्मः पालनीयः प्रयत्नतः । भनेर जो अनुपालन. प्रतिपालन वा अनुरक्षण गर्छन. तिनलाई झन ठुलो धर्म लाग्छ । किनकि पछाडीबाट रक्षा गर्ने भयेन भने. बनायेका शिवाश्रम आदि आयतन शीघ्र बिग्रन्छन्. भत्कन्छन् । भूमि. रत्न. अश्व. हस्ती. गाई. गुन. वस्त्र आदि वस्तुका पाहिला दाता भन्दा उपर स्थान उसको हुन्छ. जो तिनको अनुपालन गर्छ; किनकि दान भन्दा दानको अनुपालन श्रेय छ । दाता भन्दा पछिल्ला प्रतिपालकको पुण्य अधिक हुन्छ. अरक्षित वस्तु तुरुन्त नष्ट हुन्छ । तसर्थ शिवधर्मको उपदेश गर्नु. स्वयं पनि पालन गर्नु. गराउनु.

शिवदान पनि गर्नु · गराउनु · अनुपालन गर्नु · गराउँनु · शिव -
धर्मोपदेशको प्रचार परम्परा स्थायी राखनु। हिमाली नेपाल पशु-
पतिनाथको पाशुपत क्षेत्र १ रुद्रकोटि २ अविमुक्त ३ महालय ४ गोकर्ण
५ भद्रकर्ण ६ दीप्तिमान् सुवर्णाक्ष ७ स्थाण्वीश्वर ८ शिवका ई आठोटा
स्थानको स्थानाष्टक तीनै लोकमा प्रसिद्ध छ र सबैको महोदय (महान
उदय = अभ्युदय विकास) गर्ने रुद्रक्षेत्र (शिवक्षेत्र) जान्नु पर्छ। ई र
यस्ता अरु सबै शिवका पवित्र क्षेत्रहरु सबैको शिव गर्छन्। पाशुपत
क्षेत्रादि स्थाण्वन्त (थानेश्वर पर्यन्त) यो शिवस्थानाष्टक शिवसायु-
ज्य मुक्तिकारक छ। छगरण्ड १ दुरण्ड २ माकोट ३ मण्डलेश्वर ४ काल-
ञ्जर (काली गण्डकी का दुवै तीर तलै देखि माथि सम्म = हरिहर-
क्षेत्र देखि मुक्तिनाथ क्षेत्र दामोदर कुण्ड सम्म) ५ शङ्कुकर्ण ६ स्थलेश्वर
७ स्थूलेश्वर ८ ई आठोटा शिवका स्थानहरु पवित्राष्टक भनियेका
छन् र महापुण्यको अभिवृद्धि गर्छन्। शिवस्थानाष्टक र शिवपवि-
त्राष्टक तथा सबै शिवस्थानहरुमा मरेका मनुष्यादि प्राणीहरु पनि
शिवका परम पदमा पुग्छन्। सप्तगण्डकी सङ्गम देवघाटधाम १ कुरुक्षेत्र
२ नखल ३ कनखल ४ विमलेश्वर ५ अट्टहास ६ महेन्द्र ७ दोलखा
भीमेश्वर ८ ई आठोटा शिवका गुप्ततम गुह्याष्टक हो र समस्त
पापको नाश गर्छ। इनमा तीर्थयात्री भक्तको सर्वपातक मोचन हुन्छ।
उक्त तीनै प्रकारका शिवतीर्थहरुको यात्रा गर्ने शिवतीर्थयात्रीहरु अन्त-
मा शिवलोकमा जान्छन् र शिवलोकमा दिव्य सुख भोग्छन्। श्रीशैल-
१ हरिश्चन्द्र २ जल्पेश्वर ३ आम्रातकेश्वर ४ मध्यमेश्वर ५ महाका-
लेश्वर ६ केदारनाथ ७ मिथिला भैरवेश्वर ८ ई आठोटा शिवकास्था-
नहरु गुह्यातिगुह्य अष्टक हो। इनमा पितृहरुको तर्पण गर्दा सबै
पितर शिवका परम पदमा पुग्छन्। आम्रेश्वर १ प्रभार २ नैमिषारण्य
३ पुष्कर ४ (पोखरा र पुष्कर क्षेत्र) आषाढि ५ दिण्डिमुण्डि ६ भवा-
न्तक भारभूति ७ विख्यात नकुलीश्वर ८ महान् प्रत्यात्मिक ई आठोटा
शिवका पदमा पत्यार पार्ने प्रत्यात्मिकाष्टक क्षेत्र हुन् र विश्वका सम-
स्त जीवको हित गर्ने कामनाले शिवले बनायेका शिवक्षेत्र हुन्। इन-
को यात्रा पनि उपर्युक्त फल दिन्छ।

प्रत्यात्मिकाष्टकक्षेत्रं रुद्रस्य हितकाम्यया ॥
तत्र यान्ति मृता: सर्व्वे रुद्रस्य परमं पदं ॥ ६०१
दानान्यावसथं कूपमुद्यानन्देवतालयं ॥
तीर्थेष्वेतानि य: कुर्य्यात् सोऽक्षयं फलमाप्नुयात् ॥६०२॥
क्षमा स्पृहा दया सत्यं दानं शीलन्तप: श्रुतं ॥

एतदष्टाङ्गमुद्दिष्टं परं पात्रस्य लक्षणं ॥६०३॥
इति पञ्चप्रकारोऽयं शिवधर्म्मः प्रकीर्त्तितः ॥
धर्म्मार्थकाममोक्षार्थं सर्व्वभूतानुकम्पया ॥६०४॥
सर्व्वस्तरतु दुर्गाणि सर्व्वो भद्राणि पश्यतु ॥
सर्व्वः सुगतिमाप्नोतु सर्व्वस्य च भवेच्छिवं ॥ ६०५॥
ॐ महादेवाय चन्द्रमूर्त्तये नमः ॥ ६०६॥
ॐ ईशानाय सूर्य्यमूर्त्तये नमः ॥ ६०७॥
ॐ उग्राय वायुमूर्त्तये नमः ॥ ६०८॥
ॐ रुद्रायाऽग्निमूर्त्तये नमः ॥ ६०९॥
ॐ भवाय जलमूर्त्तये नमः ॥ ६१०॥
ॐ शर्व्वाय क्षितिमूर्त्तये नमः ॥ ६११॥
ॐ पशुपतये यजमानमूर्त्तये नमः ॥ ६१२॥
ॐ भीमायाऽऽकाशमूर्त्तये नमः ॥६१३॥
मूर्त्तयोऽष्टौ शिवस्यैताः पूर्व्वादिक्रमयोगतः ॥
आग्नेयान्ताः प्रयोज्याः स्युस्ताभ्यः शिवाङ्गपूजनं।६१४।

इति शिवधर्म्मशास्त्रे नन्दिकेश्वरप्रोक्ते शिवभक्त्याद्यशाखोपशाखा द्वादशोऽध्यायः ॥१२॥

श्रीशिवाय नमः ॥ शिवशक्तिभ्यां नमः ॥

माथि भनिएका सबै शिवक्षेत्रहरुमा मृत्यु पाउँने सौभाग्यशाली मनुष्यादि सबै प्राणीहरु समस्त पापवाट मुक्त भएर शिवका परम पदमा पुग्छन्। उक्त शिवतीर्थ तथा यस्ता अरु शिवतीर्थहरुमा जो शिव भक्त दान दिन्छ. धर्मशाला आवसथ बनाउँछ. कुवा खनाउँछ. फुलवारी लाउँछ. देवताका मन्दिर निर्माण गर्छ र यस्ता पुण्य कृत्य अरु गर्छ, त्यो अक्षय पुण्य फल पाउँछ। क्षमा १ अस्पृहा २ (अथवा प्रेम) दया ३ सत्य ४ दान ५ शील ६ तप ७ विद्या ८ ई आठोटा एकत्र वा व्यस्त कसैमा छन् भने, त्यो परम पात्र हो र यो सुपात्रको अष्टाङ्ग हो। यति सम्म यो पाँच प्रकारको शिव धर्म भनियो। धर्म. अर्थ. काम र मोक्षार्थ सबै भूत प्राणीहरु माथि अनुकम्पा राखेर शिवले भनेको नन्दिकेश्वर आदिले प्रचार गरे। सबैको कल्याण होस् भनेर पशुपतिनाथ शिवले उपदेश गरेको यो पशुपति मत शिवधर्ममहाशास्त्र यसै गरी अगाडीका धर्मात्माहरुले चलाउँदै जानु पर्छ। सबै प्राणीहरु दुर्गम दुःख सङ्कट तरुन्, सबैले भद्र (भलै भलो) देखुन्. दुःख देख्नु न परोस्. सबैले सुगति (राम्रो गति) पाउन्. सबैको शिव (कल्याण) होस्।

ॐ चन्द्रमाका मूर्ति महादेवलाइ नमस्कार छ।
ॐ सूर्यका मूर्ति ईशानलाइ नमस्कार छ।
ॐ वायुका मूर्ति उग्रलाइ नमस्कार छ।
ॐ आग्निका मूर्ति रुद्रलाइ नमस्कार छ।
ॐ जलका मूर्ति भवलाइ नमस्कार छ।
ॐ पृथ्वीका मूर्ति शर्वलाइ नमस्कार छ।
ॐ यजमान आत्माका मूर्ति पशुपतिनाथलाइ नमस्कार छ।
ॐ आकाशका मूर्ति भीमेश्वरलाइ नमस्कार छ।

शिवका ई आठ मूर्ति पूर्वादि क्रमैले यथायोग थापेर अन्त्यमा आग्नेयमा थापनु र विश्वविराटरूप शिवको शिवाङ्ग पूजा गर्नु। अर्थात्- पूर्वमा महादेव १ ईशानकोणमा ईशान २ उत्त उग्र ३ वायव्यमा रुद्र ४ पश्चिममा। भव ५ नैरृत्यमा शर्व ६ दक्षिणमा पशुपतिनाथ ७ आग्नेयकोणमा भीमेश्वर ८ लाइ थापनु। अनि त्यै क्रमले विधिवत् भक्तिभावका साथ पूजा गर्नु। यस्मा सर्वको कल्याण छ। ॐ शिव!

यो यति सम्म शिवधर्मका महाशास्त्रमा नान्दिकेश्वरले भनेका शिवभक्ति नामक आद्य (प्रथम) शाखाको उपशाखा बा अध्याय सिद्धियो।

श्रीशिवलाइ नमस्कार। शिव र शक्ति पार्वती दुवैलाइ नमस्का
शिवधर्ममहाशास्त्रे. पशुपतिमते हिते समस्त भूतानाम्।
नरहरिकृतानुवादे. शिवभक्तिशाखा द्वादशोऽध्याय:॥

महादेवश्चन्द्रो भवति रविरीशान उदित:
श्रुतो वायुश्चोग्रो भवति दहनो रुद्र इति वै।
भवस्तोयं पृथ्वी भवति स हि शर्व: पशुपति-
स्तथात्मा भीम: खं भवति जगदष्टात्मनि भवे॥
भव: शर्वो रुद्र: पशुपतिरथोग्र: सह महां-
स्तथा भीमेशानाविति यदभिधानाष्टकमिदम्।
अमुष्मिन् प्रत्येकं प्रविचरति देव: श्रुतिरपि
प्रियायास्मै धाम्ने प्रणिहितनमस्योऽस्मि भवते॥
त्वमर्कस्त्वं सोमस्त्वमसि पनस्त्वं हुतवह-
स्त्वमापस्त्वं व्योम त्वमु धरणिरात्मा त्वमिति च
परिच्छिन्नामेवं त्वयि परिणता बिभ्रतु गिरं
न विद्मस्तत्तत्त्वं वयमिह तु यत्त्वं न भवसि॥
नय-विनय-विशिष्टो नायको धर्मभाग:

रचित-सुकृत-सेतूत्थोत्तमश्लोक एकः ।
ख्याति सादितिहासो यो जनानां जडत्वं
रिपुरिव तिमिराणां गीयते तत्त्वविद्भिः ॥
कार्त्तिकेऽष्टादशागते दिनैर्द्वाशाभिः शनैः ।
अस्वस्थेन शरीरेणानूक्तिः पूर्त्तिमगादियम् ॥
अथ नरहरिनाथः प्रार्थये प्रार्थनीया-
न्निह पशुपतिनाथं साक्षिगोरक्षनाथम् ।
गुह गणपतियुक्तां शक्तिमाद्याञ्च गौरी-
मखिलसुरसमूहान् शुद्धबुद्धिं विदध्युः ॥

अथ पशुपतिमते शिवधर्मे महाशास्त्रे शिवधर्मोत्तरे षडङ्गविधिर्नाम

प्रथमोऽध्यायः

॥ ॐ नमः शिवाय ॥
॥ नमः स्कन्दाय ॥

नमोऽस्तु तस्मै शकलेन्दुधारिणे फणीन्द्ररत्नद्युतिकण्ठरागिणे ॥
हराय शुभ्राभ्रकपालमालिने विभिन्नदैत्यस्फुरितैकशूलिने ॥१॥
ज्ञानशक्तिधरं शान्तं कुमारं शङ्करात्मजम् ॥
देवारिस्कन्दनं स्कन्दमगस्तिः परिपृच्छति: ॥२॥
भगवन् ! दर्शनात्तुभ्यमन्त्यजस्यापि सद्गतिः ॥
सप्त जन्मानि विप्रस्तु स्वर्गाद् भ्रष्टः प्रजायते ॥३॥
तेनासि नाथ ! भूतानां सर्व्वेषामनुकम्पक : ॥
अतः सर्व्वहितं धर्म्मं संक्षेपात् प्रब्रवीहि मे ॥४॥
धर्म्मा बहुविधा देव्याः देवेन कथिता किल ॥
तेच श्रुतास्त्वया सर्व्वे पृच्छामि त्वामहन्ततः ॥५॥
किम्प्रधानाः शिवधर्म्माः शिववाक्यं च कीदृशं ॥
लिङ्गेऽर्च्चितः शिवः केन विधिना सम्प्रसीदति ॥६॥
विद्यादानञ्च दानानां सर्व्वेषामुत्तमं किल ॥
तच्च श्रुतौ द्विजेन्द्राणान्नान्येषां समुदाहृतं ॥७॥
तत्पुण्यं सर्व्ववर्णानां जायते केन कर्म्मणा ॥
ज्ञेयं कतिविधं तच्च विद्यादानमनुत्तमं ॥८॥
कानि पुण्यानि कृत्वेह गृहिणः स्वर्गिणः पुनः ॥
मनुष्यलोकसम्भूता योगं विन्दन्ति शाङ्करं ॥ ९ ॥
कर्म्मयज्ञस्तपोयज्ञः स्वाध्यायो ध्यानमेव च ॥
ज्ञानयज्ञश्च पञ्चैते महायज्ञाः प्रकीर्त्तिताः ॥१०॥
एषाञ्च पञ्चयज्ञानामुत्तमः कतमः स्मृतः ॥
एतद्यज्ञरतानाञ्च प्रदाने कीदृशं फलं ॥११॥
धर्म्माधर्म्मप्रभेदाश्च कीयन्तः परिकीर्तिताः ॥
तत्साधनाः कतिविधा गतयश्च तदात्मिकाः ॥१२॥
स्वर्ग्गनारकिणां पुंसामायातानां पुनः क्षितौ ॥
कानि चिह्नानि जायन्ते भुक्तशेषेण कर्म्मणा ॥१३॥
संसारसागराद् घोराद् धर्म्माधर्म्मोर्म्मिसङ्कुलात् ॥
गर्भादिदुःखफेनाद्यान्मुच्यन्ते देहिनः कथं ॥१४॥

इति सञ्चोदितः स्कन्दः सर्व्वप्रश्नार्थभाषकः ॥
प्रत्युवाच महासेनो नमस्कृत्य महेश्वरं ॥१५॥
स्वर्गापवर्गफलदं नरकार्णवतारकं ॥
शिवधर्म्मोत्तरन्नाम शास्त्रमीश्वरभाषितं ॥१६॥

अव पशुपतिमत: शिवधर्म महाशास्त्रका शिवधर्मोत्तरमा षडङ्ग विधि नामको प्रथम अध्याय प्रारम्भ भयो ।

ॐ कारका वाच्य शिव पशुपतिनाथलाई नमस्कार छ । शिवाशिवपुत्र देवसेनानी स्कन्दकुमारलाई नमस्कार छ । तिनलाई नमस्कार छ जो चन्द्रमाका आधा कला जटाजूटमा धारण गर्छन् । तिनलाई नमस्कार छ-वासुकी आदि नागराजका मस्तकमा रहेका नागमणिका कान्तिले जस्को नीलो कण्ठ इन्द्रधनु जस्ता सप्त रङ्गले रँगियेको छ । पूण्यात्माहरुका पवित्र कपालको माला गलामा लगाउने ती हरलाई नमस्कार छ । जो जगत्को जन्ममृत्युमय दुःख हर्छन् । समस्त पाप ताप हर्छन् । पुनश्च वारंवार ती पशुपतिनाथ शिवलाई नमस्कार छ, जो पापी पाखण्डी दुष्ट दैत्य दानव अत्याचारी र अन्यायीहरूलाई मार्ने र धर्मात्मा भक्तहरुको रक्षा गर्ने चम्चम् ·चम्कँदो त्रिशूल दाहिना हातमा धारण गर्छन् । ज्ञानमय शक्ति धारण गर्ने तारकासुरादि देवताका वैरिहरुको संहार गर्ने प्रशान्त शिवसूनु पार्वतीपुत्र कार्त्तिकेय स्कन्द कुमारलाई पनि नमस्कार गरेर अगस्ति मुनि शिवधर्म शोद्धछन्ः- भगवन् ! तपाइंको दर्शनमात्र गर्नाले पनि अन्त्यजादि समस्त प्राणीको सद्गति शिवगति हुन्छ , स्वर्गवाट भ्रष्ट भयेर आये पनि सात जन्म सम्म विप्र हुन्छ । हेनाथ ! हेकुमार ! तेसैले सवै भूत प्राणीका अनुकम्पक सवै माथि कृपा गर्ने कृपालु हुनु हुन्छ । अत: सवैको समान हित गर्ने धर्म संक्षेप मा मलाई भन्नुहोस् ? देव (महादेव) र देवी (महादेवी पार्वती) ले समय समयमा सवै विधि विधानका धर्म सवैलाई भन्नु भयेको छ र ती सवै धर्म तपाईले सुन्न पाउनु भयेको छ र जानी सक्नु भयेको छ। तसर्थ म (अगस्ति) तपाईलाई सोद्धैछु कृपया भन्नुहोस्, शिवधर्ममा के प्रधान छ ? शिवको वाक्य कस्तो छ ? कुन विधिले शिवलिङ्गको पूजा गर्दा शिव प्रसन्न हुनु हुन्छ ? सवै दानभन्दा विद्यादान उत्तम हो भन्ने कुरामा शङ्कै छैन । तर त्यो श्रुतिविद्या (वेद) द्विज (ब्राह्मण, क्षत्रिय, वैश्य) मात्रले पाउँछन्. सवैले पढ्न सुन्न जान्न पायेका छैनन् त्यो पुण्य स्त्री शूद्रादि सवै मानिसले कसरी पाउन संक्छन् ? त्यो सर्वोत्तम विद्यादान कति प्रकारको छ ? कुन कुन पुण्य कर्म गरेर गृहस्थहरु सवैंले स्वर्ग पाउँछन् ? यस मनुष्यलोकमा जन्म लिने समस्त मानवले शिवको योग कसरी पाउँछन् ? कर्मयज्ञ १ तपोयज्ञ २ स्वाध्याययज्ञ ३ ध्यानयज्ञ ४ ज्ञानयज्ञ ५ ई पाँचोटा महायज्ञ भनियेका छन् । ई पाँच मध्ये सवै भन्दा उत्तम कुन यज्ञ छ ? ई पञ्च यज्ञमध्ये यौटा दुइटा वा सवै गर्ने सुपात्रमा दान दिँदा कस्तो पुण्यफल हुन्छ ? धर्म र अधर्मका भेद कति छन् ? तिनका साधन कति प्रकारका छन् ? तिनका गति कति प्रकारका छन् ? स्वर्गवाट झरेका र नरकवाट सरेका मनुष्यादि प्राणीका चिन्ह भुक्तशेष कर्मले कस्ता हुन्छन् ? अनि यस संसार सागरवाट प्राणीहरु मुक्त कसरी हुन्छन् ? किनकि यो घोर संसार सागर धर्म र अधर्मका तरङ्गहरुले आकुल व्याकुल छ , गर्भवास, जन्म, शैशव, बाल्य, कौमार, यौवन, जारठ्य, वार्धक्य, जरा, मृत्यु आदि दुःखका फिनले ढाकियेको छ र विषयादि विषधर नक्र ग्राह आदिले भरियेको अगाध अतलस्पर्श र दुस्तर छ ।

॥ स्कन्द उवाच ॥

श्रद्धापूर्व्वाः सर्व्वधर्म्माः श्रद्धामध्यान्तसंस्थिताः ॥
श्रद्धानिष्ठाप्रतिष्ठाश्च धर्म्माः श्रद्धैव कीर्त्तिताः ॥१७॥
श्रुतिमात्ररसाः सूक्ष्माः प्रधानपूरुषेश्वराः ॥
श्रद्धामात्रेण गृह्यन्ते न करेण न चक्षुषा ॥१८॥
कायक्लेशैर्न्न बहुभिर्न्न चैवार्थस्य राशिभिः ॥
धर्म्मः सम्प्राप्यते सूक्ष्मः श्रद्धाहीनैः सुरैरपि ॥१९॥
श्रद्धा धर्म्मः परः सूक्ष्मः श्रद्धा ज्ञानं हुतन्तपः ॥
श्रद्धा स्वर्ग्गश्च मोक्षश्च श्रद्धा सर्व्वमिदं जगद् ॥२०॥
सर्व्वस्वं जीवितं वापिं दद्यादश्रद्धया यदि ॥
नाप्नुयात् स फलं किञ्चिच्छ्रद्दधानस्ततो भवेत् ॥२१॥
एवं श्रद्धामयाः सर्व्वे शिवधर्म्माः प्रकीर्त्तिताः ॥
शिवश्च श्रद्धया गम्यः पूज्यो ध्येयश्च श्रद्धया ॥२२॥
अथाल्पाक्षरमर्थाढ्यम्महासारं विमुक्तिदं ॥
आज्ञायुक्तमसन्दिग्धं वाक्यमेतच्छिवात्मकं ॥२३॥
नानासिद्धियुतन्दिव्यं लोकचित्तानुरञ्जकं ॥
सुनिशिचतार्थगम्भीरं वाक्यं गाणेश्वरं स्मृतं ॥२४॥
मन्त्रम्मुखसुखोच्चार्यमशेषार्थप्रसाधकं ॥
प्राहोन्नमः शिवायेति सर्व्वज्ञः सर्व्वदेहिनाम् ॥२५॥
सद्बीजं सर्व्वविद्यानां मन्त्रमाद्यं षडक्षरं ॥
अतिसूक्ष्मं महार्थञ्च ज्ञेयन्तद्वटबीजवत् ॥२६॥
देवत्रयगुणातीतः सर्व्वज्ञः सर्व्वकृत् प्रभु ॥
ओमित्येकाक्षरे मन्त्रे स्थितः सर्व्वगतः शिवः ॥२७॥
ईशानाद्यानि सूक्ष्माणि ब्रह्म्यण्येकाक्षराणिं तु ॥
मन्त्रोन्नमः शिवायेति संस्थितानि यथाक्रमं ॥ २८॥
मन्त्रे षडक्षरे सूक्ष्मे पञ्चब्रह्मतनुः शिवः ॥
वाच्यवाचकभावेन स्थितः साक्षात् स्वभावतः ॥२९॥
वाच्यः शिवोऽ प्रमेयत्वान्मन्त्रस्तद्वाचकः स्मृतः ॥
वाच्यवाचकभावोऽयमनादिः संस्थितस्तयोः ॥३०॥
यथाऽ नादिप्रवृत्तोऽयं घोरसंसारसागरः ॥
शिवोऽपि हि तथानादिः संसारान्मोचकः स्थितः ॥३१॥

स्कन्द कुमार भन्नु हुन्छ :–

शिवधर्मादि सवै धर्महरु श्रद्धापूर्वक छन् । आदिमा श्रद्धा छ, मध्यमा श्रद्धा छ, अन्तमा पनि श्रद्धा नै छ । श्रद्धामा नै धर्मको निष्ठा र प्रतिष्ठा छ तसर्थ सवै धर्म श्रद्धामय छन् र श्रद्धा नै धर्म हुन् यस्मा शङ्कै छैन । प्रधान (प्रकृति) पुरुष (जीव) ईश्वर (शिव) अत्यन्त सूक्ष्म छन् र श्रुतिमात्र रस -वेदादि श्रुति शास्त्र मात्रले जान्न सकिने छन् श्रुति कानले मात्र सुन्न सकिन्छ न हातले समात्न सकिन्छन् न त आँखाले नै देख्न सकिन्छ केवल श्रद्धामात्र ले ग्रहण गरिन्छन् । एवं धर्म पनि श्रद्धा मात्रले ग्रहण गरिन्छन् । न धेरै कार्य ल्केशले, न धेरै अर्थराशिले, न अरु कुनै उपायले ग्रहण गर्न सकिन्छ, केवल श्रद्धाले सकिन्छ: श्रद्धा हीन देवताले पनि पाउन सक्तैनन्। श्रद्धानै त्यो परम सूक्ष्म धर्म हो,श्रद्धा नै ज्ञान हो, श्रद्धा नै यज्ञ हो र श्रद्धा नै तपस्या हो श्रद्धानै स्वर्ग र मोक्ष हो, श्रद्धा नै यो समस्त जगत् हो, श्रद्धा बाहेक अरु केहि छैन । यदि अश्रद्धाले सर्वस्व दानगरोस् वा जीवन दान देवोस् , तै पनि तेसको रत्ति फल पाउँदैन, तसर्थ श्रद्धा राख्नु पर्छ । एवं सवै शिवधर्म श्रद्धामय छन् । शिवलाई पनि श्रद्धाले नै पाउन सकिन्छ । श्रद्धाले नै पूजा गर्नु पर्छ र श्रद्धाले नै शिवको त्यो ध्यान गर्नु पर्छ । अव शिवको वाक्य (उपदेश पशुपतिमत) पनि यस्तो छ हेर्नुहोस् :- अल्पाक्षर (शिववाक्यमा अक्षर, पद, स्वल्प) छ , अर्थाढ्य (अर्थ धेरै) छ, महासार (महान सार तत्त्व)छ , विमुक्तिद संसार सागरवाट सवैलाई मुक्ति दिने छ, आज्ञायुक्त (आदेशयुक्त) छ , असन्दिग्ध (कुनै प्रकारको सन्देह नभएको छ ।) सर्वसंशयरहित र सर्वनिश्चयसहित शिवको यो वाक्य सवैको शिव (कल्याण) कारक छ । एवं गणेशको वाक्य पनि-अणिमादि नाना प्रकारका सिद्धिले युक्त छ, दिव्य छ , लोक चित्तानुरञ्जक (समस्त लोकका जनमनोरञ्जन गर्ने) छ सुँनिश्चितार्थ (कुनै प्रकारको शङ्का नरहेको अर्थभयेको) छ, गम्भीर (अतलस्पर्श अथाह गहिरो) छ, गणेशको वाक्य यस्तो छ । शिवको मन्त्र पनि मुखले सुख साथ उच्चारणगर्न सकिने र अशेष (यौटा शेष न राखी सवै) अर्थको प्रकाश गर्ने र धर्म, अर्थ, काम, मोक्ष, चारै प्रयोजन सिद्ध गर्ने - ॐ नमः शिवाय- (ॐकारका प्रतिपाद्य कल्याणकारी शिवलाई नमस्कार) भन्ने यो शिवको मन्त्र समस्त प्राणीमात्रलाई दयामय सर्वज्ञ भगवान शिव पशुपतिनाथले दिनु भयेको छ । यसको ज़प नरनारी मनुष्य मात्रले गर्नु हन्छ । यो मन्त्र वेदादि १४ विद्याको सद्बीज हो. सवै मन्त्रको आदि हो. षडक्षरी (ॐ नमः शिवाय भन्ने ६ वटा अक्षर भयेको) छ । वरको विञा जस्तो अतिसूक्ष्म. तर महार्थमञ्जरी जस्तो महान अर्थ भयेको छ । यो सवैले ज़ान्नु पर्छ । ब्रह्मा, विष्णु, रुद्र, तीन देव र सत्व, रजः तमः तीन गुणदेखि पर निर्गुण, निरञ्जन शिव कल्याणमय, सर्वज्ञ, सर्वकर्ता समर्थ, सर्वव्यापी सवैका हृदयवासी, शिव ॐ भन्नें यस एकाक्षरी मन्त्रमा विराजमान हुनु हुन्छ । ईशानादि सवै नाम रूपमन्त्रार्थ ॐ भन्ने एकाक्षरमा यथाक्रम वसेका छन् र ॐ नमः शिवाय भन्ने मन्त्रमा सूक्ष्म रूपेण पञ्चब्रह्मरूपी शिव विराजमान हुनु हुन्छ । स्वयं वाच्य र वाचक भावले शिव यस शिवमन्त्रमा सन्निहित हुनुहुन्छ । स्वभावतः साक्षात् शिव शिवमन्त्रमा व्यवस्थित हुनु हुन्छ र अप्रमेय शिववाच्यः मन्त्र वाचक छ । ई दुवैको यो वाच्य वाचक भाव सम्बन्ध अनादि र अनन्त छ । जस्तै यो घोर संसार सागर अनादि प्रवाहगत छ, उस्तै यस संसार वाट सवै प्राणीलाई मुक्ति दिन भनेर कम्मर कसेर शिव पनि अनादि कालदेखि नै तत्पर हुनु हुन्छ । शिवले सर्वदा सर्वथा सवैको कल्याणै गर्नु हुन्छ । शिव भक्ति सवैले गर्नु राम्रो छ ।

व्याधीनाम्भेषजं यद्वत् प्रतिपक्षं स्वभावतः ॥
तद्वत् संसारदोषाणां प्रतिपक्षः शिवः स्थितः ॥३२॥
असत्यस्मिञ्जगन्नाथे तमोभूतमिदम्भवेत् ॥
सूर्येणैव विहीनं हि निरालोकं जगद्यथा ॥३३॥
तस्मादनादिः सर्व्वज्ञः परिपूर्णः स्वभावतः ॥
मुक्तिहेतुः शिवः सिद्धः सर्व्वज्ञो ज्ञानभावकः ॥३४॥
अस्याभिधानमन्त्रोऽयमभिधेयश्च स स्मृतः ॥
अभिधानाभिधेयत्वान्मन्त्रः सिद्धः परः शिवः ॥३५॥
वेदे शिवागमे चायमुभयत्र षडक्षरः ॥
मन्त्रः स्थितः सतां मुक्त्यै लोके पञ्चाक्षरः स्मृतः ॥३६॥
किन्तस्य बहुभिर्म्मन्त्रैः शास्त्रैर्व्वा बहुविस्तरैः ॥
यस्यौन्नमः शिवायेति मन्त्रोऽयं हृदि संस्थितः ॥३७॥
तेनाधीतंश्रुतं ज्ञानं तेन सर्व्वमनुष्ठितम् ॥
येनौन्नमः शिवायेति मन्त्रोऽभ्यन्तः स्थिरीकृतः ॥३८॥
शिवज्ञानानि यावन्ति विद्यास्थानानि यानि च ॥
षडक्षरस्य मन्त्रस्य तानि भाषेत् समासतः ॥३९॥
एतावत्तच्छिवज्ञानमेतावत् परमं पदम् ॥
येनौन्नमः शिवायेति शिववाक्यं षडक्षरं ॥४०॥
विधिवाक्यमिदं शैवं नार्थवादः शिवात्मकः ॥
लोकानुग्रहकर्त्तायः समृषार्थङ्कथं वदेत् ॥४१॥
सर्व्वज्ञः परिपूर्णत्वाद् यथालोकेन हेतुना ॥
ब्रूयाद् वाक्यं शिवः शान्तः सर्व्वदोषविवर्ज्जितः ॥४२॥
यद्यथावस्थितं वस्तु गुणदोषैः स्वभावतः ॥
यावत्फलञ्च पुण्यञ्च सर्व्वज्ञस्तत्तथा वदेत् ॥४३॥
रागद्वेषावृतः क्रोधैग्रर्स्तत्वादनृतं वदेत् ॥
ते चेश्वरे न विद्यन्ते ब्रुयात् स कथमन्यथा ॥४४॥
अज्ञाता शेषदोषेण सर्व्वज्ञेन शिवेन यत् ॥
प्रणीतममलं वाक्यं तत् प्रमाणन्न संशयः ॥४५॥
तस्मादीश्वर वाक्यानि श्रद्धेयानि विपश्चिता ॥
यथार्थम्पुण्यपापेषु तदश्रद्धो व्रजेदधः ॥४६॥
शिववाक्यप्रवक्तारं शिववत् पूजयेद् गुरुं ॥
नृपःपरोपकाराय चात्मनश्च समृद्धये ॥४७॥

जस्तै रोगको प्रतिपक्ष वा प्रतिवादी विरोधी वा शत्रु औषधी स्वभावतः छ उस्तै संसारका जन्म मृत्यु आदि दोषका प्रतिपक्ष संसारबाट मुक्ति प्रदान गर्ने स्वभावतः अनादि सिद्ध आदिनाथ शिव हुनुहुन्छ। यदि इनी जगत्का नाथ (ईश्वर) जगन्नाथ शिव न हुँदा हुन्त यो संसार अन्धकारमयै हुने थियो । सूर्य न भयेको जगत जस्तैं प्रकाश रहित रहन्छ, उस्तै शिव न भयेको जगत् अशिव (अकल्याण) नै रहने थियो । तसर्थ अनादि (जस्को आदि अन्त छैन) सर्वज्ञ (सवै जान्ने) परिपूर्ण (सवैतिर सवैप्रकार भरियेका) स्वभावतः (आफै आफ आफ्नै सत्ताले सम्पन्न) मुक्तिहेतु (सवैका मुक्तिदाता) सिद्ध (स्वतः सिद्ध परिपक्व परिपूर्ण) सर्वज्ञ र ज्ञानभावक (ज्ञानका अभिभावकज्ञानजनकज्ञानकार) इत्यादि सवै लक्षणले युक्त शिव हुनुहुन्छ। शिवको अभिधान ॐ नमः शिवाय भन्ने मन्त्र हो र मन्त्रका अभिधेय शिव हुनु हुन्छ । एवं अभिधान र अभिधेय भावले मन्त्र परम शिव हो र शिव मन्त्रमय हुनुहुन्छ। यो कुरा सिद्ध छ। वेद (निगम) मा तथा शिवका आगम (शिवज्ञान पशुपतिमत शिवधर्मशास्त्र) मा दुवैमा यो मन्त्र षडक्षर छ। लोकमा सज्जन शिवभक्तको मुक्ति गर्नाको लागि पञ्चाक्षर छ। जस्का हृदयमा सदा ॐ नमः शिवाय भन्ने मन्त्र राम्ररी जपेर बसेको छ, तेस्ता व्यक्तिका लागि अरु धेरै मन्त्र वा धेरै शास्त्रको विस्तार गर्ने खाँचो पो के छ र ? जस्का हृदय कमलमा यो ॐ नमः शिवाय भन्ने पवित्र महामन्त्र स्थिर छ. तेसैले पढेको ठहर्छ. तेसैले शास्त्र सुनेको ठहर्छ तेसैले शिवज्ञान जानेको र तेसैले सवैथोक गरेको ठहर्छ । जति पनि शिवंज्ञान छन्, जति विद्यास्थान (१४ विद्या १८ विद्यादि) छन्, ती सवै यसै ॐ नमः शिवाय भन्ने षडक्षरी मन्त्रका संक्षिप्त भाष्य हुन् । यत्ति हो त्यो शिवज्ञान. यत्ति हो त्यो परम पदः जो यो ॐ नमः शिवाय भन्ने शिववाक्य, छ अक्षरको छ। यो शिवको विधिवाक्य (अनिवार्य तथा अवश्य कर्तव्य) हो । अर्थवाद (अर्थवादपरक, रोचक भयानक) होइन । जो सवै लोकमाथि समस्त जीवहरुमा अनुग्रह गर्ने विनाकारण दयामय आशुतोष शिव हुनु हुन्छ, वाहाँ ले माञ्छेका आँखामा छारो हाल्न मृषार्थ (मिथ्या, भ्रामक वाग्जाल) किन बोल्नु हुन्थ्यो र ? शिव सर्वज्ञ, शान्त परिपूर्ण हुनाले र सवै दोषदेखि रहित हुनाले, अनि सवै लोंकमाथि कल्याण वृद्धि गर्ने हेतुले जो वस्तु गुणदोषले स्वभावतः जस्तो छ, उसलाई उस्तै भन्नु हुन्छ। किनकि शिव सर्वज्ञ हुनुहुन्छ। जुन कर्मको जति जस्तो पुण्य फल हुन्छ, सर्वज्ञ र अवञ्चक सत्यवक्ता शिवले उस्तै भन्नु हुन्छ। अरु कुनै संसारी जीव राग द्वेष, क्रोध, स्वार्थले ग्रस्त हुनाले मिथ्या वाग्जालको बोली बोल्न सक्ला, तर ती दोष ईश्वर (महादेव शिवमा न हुनाले अन्यथा कसरी बोल्नु हुन्थ्यो ? कदापि बोल्नु हुन्न प्रकृतिका प्राणीमा हुने कुनै दोष शिवमा न भयेकाले र श्रिव सर्वज्ञ, सर्वकल्याणकारी निर्वैर तथा सर्वदा सर्वथा सवैको शिवै गर्ने हुनाले शिवले बोलेको शिववाक्य निर्मल, निर्दोष, निस्सन्देह स्वतः प्रमाण छ, यस्मा संशय छैन। तेसैले ईश्वरका वाक्यमा विद्वानले र आफ्नु हित र अहित बुझ्ने जीवमात्रले विश्वास राख्नु पर्छ, श्रद्धा राख्नु पर्छ र भक्तिभाव राख्नु पर्छ। पुण्य पाप आदिमा शिवले जस्तो भन्नु भयेको छ, उस्तै यथार्थ श्रद्धा राख्नुपर्छ, अश्रद्धालु अधोगतिमा पर्छ। तसर्थ सवैको कल्याणकारी शिववाक्य र शिवमा श्रद्धा भक्ति सवैले राख्नुपर्छ र शिववाक्यका प्रवक्ता (उपदेशदाता =मन्त्रदाता) गुरुमा पनि शिव झैं श्रद्धाभक्ति राख्नु पर्छ र आदर सत्कार पूजा प्रतिष्ठा गर्नुपर्छ। राजाले पनि यस्ता शिववाक्य प्रवक्ता शिवज्ञानी शिवयोगी गुरुको आदर सत्कार निजोपकार र परोपकारका लागि गर्नु पर्छ। सुख समृद्धि का लागि पनि शिवमा तथा शिवयोगी गुरुमा आस्था राख्नुपर्छ। शिव झैं मान्नु पर्छ।

जगद्धिताय नृपतिः शिवधर्म्मे नियोजयेत् ॥
तन्नियोगादयं लोकः शुचिः स्याद्धर्म्मतत्परः ॥४८॥
यंयं धर्म्मन्नरः श्रेष्ठसमाचरति भक्तितः ॥
तत्तदाचरते लोकस्तत्प्रामाण्याद् भयेन च ॥४९॥
धर्म्मनिष्ठः कृतो राजा धर्म्मपादैकह्रासतः ॥
युगत्रयं स विज्ञेयस्तस्माद्राजा चतुर्युगः ॥५०॥
धर्म्मज्ञः सततं राजा प्रजा न्यायेन पालयेत् ॥
न्यायतः पाल्यमानास्ता ध्यायन्ति स्वामिनः शिवम् ॥५१॥
धर्म्ममर्थञ्च कामञ्च यच्चान्यत् प्राप्तुमीहते ॥
तत्तदाप्नोत्ययत्नेन प्रजा धर्म्मेण पालयेत् ॥५२॥
प्रजासु धर्म्मयुक्तासु चतूर्थांशं भजेन्नृपः ॥
अधर्म्मिष्ठास्व धर्म्मस्य चतुर्थांशेन लिप्यते ॥५३॥
तस्मादधर्म्मे मज्जन्तं राजालोकन्निवारयेत् ॥
धर्म्मे नियोजयेन्नित्यमुभयार्थविचक्षणः ॥५४॥
धर्म्मशीलनृपे तस्मात् प्रजाः स्युद्धर्म्मतत्पराः ॥
नृपतिं बोधयेत् तस्मात् सर्व्वलोकानुकम्पया ॥५५॥
उपायेन भयाल्लोभान्मूर्खान् सदाऽनुबोधयेत् ॥
मन्त्रौषधिक्रियाद्यैर्व्वा लुब्धान् धर्म्मे निवेशयेत् ॥५६॥
मन्त्रौषधिनिधि क्षेत्र विलमूलरसक्रियाः ॥
धर्म्ममार्ग्गावताराय वादोऽष्टाङ्गः प्रकीर्त्तितः ॥५७॥
प्रत्यार्यार्याङ्गवादेन कामार्थाभिरतन्नृपः ॥
शनैर्द्धर्म्मे नियुञ्जीत ज्ञानयोगे पुनः क्रमात् ॥५८॥
एवं यः सर्व्वयत्नेन राजानम्बोधयेद् बुधः ॥
जगद्गुरुः स विज्ञेयः सर्व्वलोकानुकम्पकः ॥५९॥
संसारपङ्कनिर्म्मग्नं यः समुद्धरते जनं ॥
शिवज्ञानात्महस्तेन कस्तेन सदृशः पिता ॥६०॥
अज्ञानवन्हिसन्तप्तं निर्व्वापर्याति यः शनैः ॥
ज्ञानामृतेन नृपतिङ्कस्तन्न प्रतिपूजयेत् ॥६१॥
नैव राज्येन महता न चैवार्थस्य राशिभिः ॥
प्राप्यमज्ञानशमनं परलोकसुभाषितं ॥६२॥
स्वर्ग्गापवर्ग्गसिध्द्ययर्थं भाषितं यत् सुभाषितं ॥
वाक्यं मुनिवरैः शान्तैस्तद्विज्ञेयं सुभाषितं ॥६३॥

जगत्का हितका लागि. विश्वकल्याणका लागि समस्त जनकल्याणार्थ तथा प्राणिमात्रका इहलोक र परलोक सुखार्थ राजा जनतालाई शिवधर्ममा लगावोस् । शिव पशुपतिनाथका धर्ममा नियोजित गरोस् । स्वयं पनि तत्पर रहोस् । किनकि यथा राजा तथा प्रजाः । यसरी स्वयं अग्रसर भयेर राजाले नियोगगर्दा समस्त लोक यो सारा संसार पापरहित पवित्र भयेर शिवधर्ममा तत्पर हुन्छ र सवैको कल्याण हुन्छ ।

रागद्वेषानृतक्रोधकामतृष्णानुसारि यत् ॥
वाक्यन्निरयहेतुत्वात्तद् दुर्भाषितमुच्यते ॥६४॥
संस्कृतेनापि किन्तेन मृदुना ललितेन च ॥
अविद्यारागवाक्येन संसारक्लेशहेतुना ॥६५॥
यच्छ्रुत्वा जायते पुण्यं रागादीनाञ्च संक्षयः॥
विरूपमपि तद् वाक्यं विज्ञेयमतिशोभनं ॥६६॥
पुराणं भारतं वेदाः शास्त्राणि सुमहान्ति च ॥
आयुषः क्षेपणाः सर्व्वे धर्म्मोऽल्पो ग्रन्थविस्तरः॥६७॥
पुत्रदारादिसम्भारः पुंसां सम्मूढचेतसाम् ॥
विदुषां शास्त्रसम्भारः स योगाभ्यासविघ्नकृत् ॥६८॥
इदं ज्ञेयमिदं ज्ञेय यः सर्व्वं ज्ञातुमिच्छति ॥
अपि वर्षसहस्रायुः शास्त्रान्तन्नाधिगच्छति ॥६९॥
विज्ञायाक्षरतन्मात्रं जीवितञ्चातिचञ्चलम् ॥
विहाय शास्त्रजालानि पारलौकिकमाचरेत् ॥७०॥
पण्डितेनापि किन्तेन समर्थेन च देहिना ॥
यः पुण्यभारमुद्वोढुमशक्तः पारलौकिकं ॥७१॥
पण्डितोऽपि स मूर्खः स्याच्छक्तियुक्तोऽप्यशक्तिमान् ॥
यः संसारात् स्वमात्मानमुत्तारयितुमक्षमः ॥७२॥
तस्मात् स पण्डितः शक्तः स तपस्वी जितेन्द्रियः ॥
यः शिवज्ञानसद्भावमालोकयितुमुद्यतः ॥७३॥
यः प्रदद्यात्महीं कृत्स्नां महामेरुञ्च काञ्चनं ॥
स चेदन्यायतः पृच्छेन्न तस्योपदिशेद् गुरुः ॥७४॥
यः श्रृणेति शिवज्ञानं न्यायतस्तत् प्रवक्ति च ॥
तौ गच्छतः शिवस्थानं नरकन्तद्विपर्ययात् ॥७५॥
अथ गोदेहसम्भूतषडङ्गविधिना शिवः ॥
लिङ्गे सम्पूजितः शीघ्रं नराणां संप्रसीदति ॥७६॥
सुरासुरैर्म्मथ्यमानात् क्षीरोदात् सागरोत्तमात् ॥
पञ्च गावः समुत्पन्नाः सर्व्वलोकस्य मातरः ॥७७॥

नन्दा सुभद्रा सुरभिः सुशीला सुमनास्तथा ॥
गावः शिवपुरात् पञ्च क्षितिं प्राप्ताः शिवेच्छया ॥७८॥
सर्व्वलोकोपकारार्थन्देवानान्तर्प्पणाय च ॥
गोमातरः स्थिता भूमौ स्नानार्च्चार्थं शिवस्य च ॥७९॥
गोमयं रोचना मूत्रं क्षीरं दधि घृतं गवां ॥
षडङ्गानि पवित्राणि सर्व्वसिद्धिकराणि च ॥८०॥
गोमयादुत्थितः श्रीमान् बिल्ववृक्षः शिवप्रियः ॥
तत्रास्ते पद्महस्ता श्रीः श्रीवृक्षस्तेन स स्मृतः ॥८१॥
बीजान्युत्पलपद्मानां पुनर्ज्जातानि गोमयात् ॥
गोरोचना च माङ्गल्या पवित्रा सर्व्वसाधिका ॥८२॥
गोर्मूत्राद् गुग्गुलुर्ज्जातः सुगन्धिः प्रियदर्शनः ॥
आहारः सर्व्वदेवानां शिवस्य च विशेषतः ॥८३॥
यद् बीजं जगतः किञ्चित् तज्ज्ञेयं क्षीरसम्भवं ॥
दध्नः सर्व्वाणि जातानि माङ्गल्यान्यर्थसिद्धये ॥८४॥
घृतादमृतमुत्पन्नममराणामतिप्रियं ॥
तस्माद् घृतेन पयसा दध्ना च स्नापयेच्छिवं ॥८५॥
तदन्ते चोष्णतोयेन कषायैश्च विरुक्षयेत् ॥
स्नाप्य शीताम्बुना पश्चाल्लिङ्गं रोचनमालभेत् ॥८६॥
पूजयेद् बिल्वपत्रैश्च पद्मैर्न्नीलोत्पलैरपि ॥
अर्चयित्वा दहेद् भक्त्या घृतयुक्तन्तु गुग्गुलुं ॥८७॥
पायसन्दधि भक्तञ्च घृतमध्वा परिप्लुतं ॥
निवेदयीत शर्व्वाय भक्तांश्च घृतपाचितान् ॥८८॥
कृत्वा प्रदक्षिणां चान्ते प्रणिपत्य क्षमापयेत् ॥
अनेन विधिना देवः षडङ्गेन प्रसीदति ॥८९॥
इह लोके परे चैव सर्व्वान् कामान् प्रयच्छति ॥
षडङ्गविधिना तस्मान्नृपतिः पूजयेच्छिवं ॥९०॥
शिवभक्तः समुत्तार्य कुलानामेकविंशतिम् ॥
स्वर्गे स्थाप्य स्वयं गच्छेदैश्वरम्पदमव्ययं ॥९१॥
अशठाः सर्व्वभृत्याश्च दैवकार्य्ये नियोजिताः ॥
प्रयान्ति स्वामिना सार्द्धं श्रीमच्छिवपुरं महत् ॥९२॥
भुक्त्वा भोगान् सुविपुलान् भृत्यवर्गसमन्वितः ॥
कालात् पुनरिहायातः पृथिव्यामेकराड् भवेत् ॥९३॥

वृक्षाः पुष्पाङ्गपत्राद्यैरुपयुक्ताः शिवार्च्चने ॥
शिवगावश्च गच्छन्ति रुद्रलोकं न संशयः ॥९४॥
पूजितं पूज्यमानं वा यः पश्येद् भक्तितः शिवं ॥
श्रुत्वानुमोदयेद्यश्च सर्व्वयागफलं लभेत् ॥९५॥
अर्च्चितं शङ्करं दृष्ट्वा सर्व्वपापैः प्रमुच्यते ॥
हर्षात् प्रणम्य तं भूमौ शिवलोके महीयते ॥९६॥
सम्पूज्यमानं विधिना यः पश्येच्छ्रद्धया शिवं ॥
सोऽपि यागफलं कृत्स्नं प्राप्नुयान्नात्र संशयः ॥९७॥
श्रुत्वानुमोदयेत्पुण्यमैश्वरं यः समाधिना ॥
तत्समं फलमाप्नोति शिवस्य वचनं यथा ॥९८॥
यदशेषैः शिवभक्तैर्ध्यानार्च्चनकृतन्तपः ॥
भक्तयानुमोदयेदीशं तत्सर्व्वं त्वत्प्रसादतः ॥९९॥
शिवपुण्यमहिंसाद्यमशेषजनसम्भवं ॥
कालत्रये ऽपि निखिलं यः पुण्यमनुमोदयेत् ॥१००॥
इति त्रिसन्ध्यमखिलं तण्याहमनुमोदयेत्॥
असंशयमतिः श्राद्धस्तत्समं यः पुण्य माप्नुयात् ॥१०१॥
शिवधर्म्माः शिवप्रोक्ताः सुसूक्ष्माः सुमहाफलाः ॥
कीर्त्तितास्ते समासेन शिवार्च्चनविधिं प्रति ॥१०२॥
इति शिवधर्म्मोत्तरे षडङ्गविधिर्न्नाम प्रथमोऽध्यायः ॥१॥

अथ पशुपतिमते शिवधर्मे महाशास्त्रे शिवधर्मोत्तरे विद्यादानो
नाम द्वितीयोऽध्यायः ॥

ॐ नमः शिवाय

अथ विद्याविदा देयं विद्यादानं शिवात्मकं ॥
तस्य दानन्महादानं सर्व्वदानोत्तमोत्तमम् ॥ १०३ ॥
अध्यापयन्शनैः शिष्यान् शिवभक्तान् प्रबोधयेत् ॥
शिवविद्यानुसारेण विद्यादानं तदुच्यते ॥ १०४ ॥
संस्कृतैः प्राकृतैर्व्वाक्यैः यः शिष्यानमुरूपतः ॥
देशभाषाद्युपायैश्च बोधयेत् स गुरुः स्मृतः ॥१०५॥
यथा शिवस्य नैवान्तः सम्पूर्णस्य महात्मनः ॥
तथा विद्याप्रदानस्य नान्तः सर्व्वगुणात्मकः ॥१०६॥
शिवाष्टगुणमैश्वर्यविद्यादानफलं लभेत् ॥
इह कीर्तिं शिवां ब्राह्मीम्प्रज्ञां बृद्धिं धनं सुखं ॥१०७॥
योऽशुद्धमात्मनाधीत्य ज्ञानमध्यापयेच्छिवं ॥
स याति नरकं घोरं पापीयान् ज्ञाननाशकः ॥१०८॥
शिवज्ञानस्य कालेन विनष्टस्य प्रमादतः ॥
ऊनातिरिक्तवर्णस्य मूढैर्दुर्ल्लिखितस्य च ॥१०९॥
प्रमादाधीतपाठस्य नाशितस्याल्पवुद्धिभिः ॥
ज्ञानावलेपमानान्धैराचार्यैः शोधितस्य च ॥११०॥
व्यस्तैः पदैरुपेतस्य पुनरुक्तस्य चार्थतः॥
पूर्वोत्तरविरुद्धस्य स्वसिद्धान्तविरोधिनः ॥१११॥
छन्दसातीव नष्टस्य शब्दार्थरहितस्य च ॥
इत्येवमादिभिर्द्दोषैरुपेतस्य क्वचित् क्वचित् ॥११२॥
यः करोति पुनः सम्यक् संस्कारं पूर्व्ववद् गुरुः ॥
शिवतन्त्रार्थविद् धीमान् स विद्यापरमेश्वरः ॥११३॥
न चास्य पुण्यमाहात्म्यं शक्यं वक्तुं हि केन चित् ॥
यथा शिवस्तथैवायमस्मिन्नित्यं शिवः स्थितः ॥११४॥
विद्यादानं प्रवक्ष्यामि व्रतिनां पुस्तकाश्रितं ॥
नीयते दीयते येन विधिना तत्फलं च यत् ॥११५॥

शिवं सम्पूज्य विधिवत् तद्विद्यां पूजयेत्ततः ॥
गुरुञ्च पूजयेद् भक्त्या तुल्यमेतत् त्रयं यतः ॥११६॥
यथा शिवस्तथा विद्या यथा विद्या तथा गुरुः ॥
शिवविद्यागुरूणाञ्च पूजायाः सदृशं फलं ॥११७॥
भूमि(भा)गे समे रम्ये सर्व्वबाधाविवर्ज्जिते ॥
विद्यामण्डलकं कृत्वा गन्धगोमयवारिणा ॥११८॥
अष्टहस्तं तदर्द्धं वा वृत्तं वा चतुरस्त्रकं ॥
तन्मध्ये सितचूर्णेन लिखेत् पद्मं सुशोभनं ॥११९॥
तद्बहिर्व्वर्णकैश्चित्रैर्न्नाना शोभाः प्रकल्पयेत् ॥
लम्बनैः सूत्रदामैश्च मुक्ताहारैश्च कन्दुकैः ॥१२०॥
विचित्रपुष्पस्रग्दामैर्घण्टाचामरभूषितम् ॥
चित्रवस्त्रपरिच्छन्नैश्चतुर्भिर्द्दण्डकैर्वृतं (धृतं) ॥१२१॥
बुद्बुदैरर्द्धचन्द्रैश्च दर्प्पणाद्युपशोभितं ॥
सितपद्मसमाकीर्णैश्चतुर्भिः कलशैः शुभैः ॥१२२॥
शोभितं सितमृत्पात्रैर्यवशाल्यङ्कुरोद्(भवै)ः ॥
विद्यासिंहासनं श्रीमन्नागदन्तादिनिर्म्मितं ॥१२३॥
सुवर्णरत्नखचितं दुकूलास्तरणान्वितं ॥
दत्तासनं वा श्रीमत्तद्धेमरत्नोपशोभितं ॥१२४॥
नागेन्द्रदन्तनिचितं रक्तमन्दनदारुजं ॥
स्थाप्य पुष्पं गृहस्यान्ते गन्धपुष्पैः प्रपूज्य च ॥१२५॥
लेख्यञ्च लिखितञ्चैव विन्यसेत् पुस्तकद्वयं ॥
रोचनाचन्दनाद्यैश्च पुष्पैर्धूपैश्च पूजयेत् ॥१२६॥
घृतप्रदीपमाल्याद्यैर्भक्ष्यैर्व्वस्त्रैश्च शोभनैः ॥
कस्तूर्यगुरुकर्प्पूर सितचन्दन कौशिकैः ॥१२७॥
दद्यात् पञ्चविधं धूपं समुत्थाप्य पुनः पुनः ॥
ततः प्रदक्षिणं कृत्वा नमेत् सर्व्वाङ्गिकैर्बुधः ॥१२८॥
सम्पूज्यैवं शिवज्ञानं गुरुं सम्पूजयेत्ततः ॥
द्वितीये तु पुष्पगृहे श्रीमदासनसंस्थितं ॥१२९॥
शिववत् पूजयेद् भक्त्या शिवज्ञानप्रकाशकं ॥
त्रिधा प्रदक्षिणीकृत्य दण्डवत् प्रणमेत् क्षितौ ॥१३०॥
विज्ञापयेत् समुत्थाय जानुभ्यां धरणीङ्गतः ॥
कृताञ्जलिपुटो भूत्वा प्रणिपत्य पुनर्ग्गुरुं ॥१३१॥

भगवंस्त्वत्प्रसादेन शास्त्रं सञ्चारयाम्यहं ॥
तथेति समनुज्ञातः शास्त्रं पुण्याहमाचरेत् ॥१३२॥
मङ्गलैस्तूर्यघोषश्च कृतस्वस्त्ययनः शुचिः ॥
स्नातः शुक्लाम्बरधरः स्त्रग्वी गन्धाद्यलङ्कृतः ॥१३३॥
हेमाङ्गुलीयपाणिश्च कटकाद्यैरलङ्कृतः ॥
लिखेत् प्रणम्य देवेशं लेखकः श्लोकपञ्चकं ॥१३४॥
ततो विविधभक्तान्नपानव्यञ्जनकादिभिः ॥
भोजयेत गुरुं पूर्वं व्रतिनः सद्विजानपि ॥ १३५ ॥
दीनान्धकृपणानाथबालवृद्धकृशातुरान् ॥
माता पितृसुहृद्बन्धून् नक्तं सर्वांश्च दक्षयेत् ॥१३६॥
क्षमाप्य च गुरुं पश्चाद् भुञ्जीयाद् भृत्यसंयुतः ॥
दत्वा गणबलिं रात्रौ ब्रह्मचारी निशि स्वपेत् ॥१३७॥
अपरेऽहनि पूर्व्वाह्णे विद्यामण्डलकं बुधः ॥
कृत्वा द्विहस्तमात्रन्तु नानावर्णकशोभितं ॥१३८॥
यवाङ्कुरशरावाद्यैश्चित्रपुष्पैरलङ्कृतं ॥
स धूपदीपसंयुक्तं वितानं विततांम्बरं ॥१३९॥
शरयन्त्रासनासीनं तन्मध्ये पूज्य पुस्तकं ॥
एवं लिखेद् वाचयेद्वा कृत्वा पूजां दिने दिने ॥१४०॥
चतुरस्रैः सौम्यशीर्षैर्न्नाति स्थूलैर्न्न वा कृशैः ॥
सम्पूर्णावयवैः स्निग्धैर्न्नातिविच्छिन्नसंहतैः ॥१४१॥
मात्रानुस्वारसंयोगह्रस्वदीर्घादिलक्षितैः ॥
नन्दिनागरकैर्व्वर्णैर्ल्लेखयेच्छिवपुस्तकं ॥१४२॥
सम्पूर्णं पूर्व्वविधिना पुनः पूजां प्रकल्पयेत ॥
शिवाग्निगुरुविद्यानां सोपचारां प्रयत्नवान् ॥१४३॥
कल्पयेज्जागरं चात्र वादित्रैर्म्मधुरस्वनैः ॥
गीतनृत्यैर्व्वहुविधैराख्यातैश्च शिवात्मकैः ॥१४४॥
वेदघोषैश्च विविधैः प्रेक्षणकैश्च शोभनैः ॥
क्रीडायन्त्र प्रयोगाद्यैरित्येवं क्षपयेन्निशां ॥१४५॥
शिवविद्याविमानञ्च कुर्यात् प्रातः शुशोभनं ॥
पञ्चाण्डकं त्रिभूमञ्च दारुवंशादिनिर्म्मितं ॥१४६॥
विचित्रवस्त्रसञ्छन्नं सर्व्वशोभासमन्वितं ॥
विद्यासनस्थं तन्मध्ये शिवज्ञानस्य पुस्तकं ॥१४७॥

हेमरत्नचितं दिव्यमथवा दन्त शोभितं ॥
विचित्रचित्रयुक्तं वा बहिरुत्कीर्णकम्बिके ॥१४८॥
पार्श्वे चर्म्मसमायुक्तं दृढसूत्रनिबन्धनं ॥
सम्पूज्य गन्धपुष्पाद्यैः पूर्व्वोक्तविधिना बुधः ॥१४९॥
समुत्क्षिप्यानयेद् भक्त्या तद्विमानं शिवाश्रमं ॥
सुस्थितं रथ्यमुख्येन पुरुषैर्व्वावलम्बितं ॥१५०॥
छत्रध्वजपताकाद्यैर्व्विमानैस्तुर्यनिस्वनैः ॥
मङ्गलैर्व्वेदघोषाद्यैः सुधूपैः कलशैःसितैः ॥१५१॥
चारणैर्व्वन्दिभिर्व्वाद्यैः स्त्रीसङ्गीतैर्व्विभूषितं ॥
चारुचामरहस्ताभिश्चित्रदण्डैश्च दर्प्पणैः॥१५२॥
महता जनसंघेन पुरतश्च महीयतेः ॥
धर्म्मवृध्दै स्वयं गच्छेत्सर्व्वशोभासमन्वितः ॥१५३॥
अथवा हस्तियानस्थं कृत्वा पुस्तकमानयेत् ॥
राजमार्गेण महता नगरान्तं प्रदक्षिणं ॥१५४॥
सर्व्वायतनपूजाञ्च स्वधनैः कारयेन्नृपः ॥
दशदिक्षु बलिन्दत्वा नगरस्य समन्ततः ॥१५५॥
मार्गेऽपि पुरतो गच्छेद् बलिन्दद्यान्निरन्तरं ॥
गन्धपुष्पाक्षतोन्मिश्रमुदकञ्च तदानुगं ॥१५६॥
अग्रेपश्चाच्च गच्छेयुः सर्व्वायतनवासिनः ॥
पुरतः शिवविद्यायाः शिवमन्त्रस्मराः शुभाः ॥१५७॥
शुक्लाम्वरधराः सर्व्वे भवेयुः पुरवासिनः ॥
उच्छ्रेयेयुः पताकाश्च जनास्ते देशवासिनः ॥१५८
गृहदेवाश्च सम्पूज्याः कार्य्यश्चाप्युत्सवो गृहे ॥
ब्राह्मणान् भोजयेयुश्च गृहेषु गृहमेधिनः ॥१५९॥
अन्नपानैर्ज्जानपदायात्रां कुर्युः शिवाश्रमे ॥
अच्छेद्यास्तरवः कार्याः सर्व्वा हिंसान्निवारयेत् ॥१६०॥
बन्धनस्थाश्च मोक्तव्या बद्धाः क्रोशेन शत्रवः ॥
अकालकौमुदीं कुर्याद् दिवसद्वयमीश्वरे ॥१६१॥
शिवायतनमासाद्य विमानस्थन्तमर्घयेत् ॥
पुण्याहजयशब्दैश्च्र महता तुमुलेन वा ॥१६२॥
स्थाने सुसंस्कृते रम्ये शिवस्य पुरतः शनैः ॥
स्थापयित्वा गुरुं भक्त्या तं प्रणम्य निवेदयेत् ॥१६३॥

शान्त्यर्थमेकमध्यायं गोब्राह्मणमहीभृतां ॥
राष्ट्रियनगराणाञ्च वाचयेद् वाचकोत्तमः ॥१६४॥
छन्दोलक्षणतत्वज्ञः सत्कविर्म्मधुरस्वनः ॥
गान्धर्व्वविद्विदग्धश्च श्रेष्ठः पुस्तकवाचकः ॥१६५॥
शान्तितोयेन राजानं समुत्थाय गुरुस्ततः ॥
शिरस्यभ्युक्षयेदीषत्तत्रस्थश्च जलन्ततः ॥१६६॥
अवधार्य जगच्छान्तिं पुनरन्ते नृपस्य च ॥
आचार्यभोजनञ्चात्र नृपः कुर्यात् सदक्षिणं ॥१६७॥
स्वयमत्रैव भुञ्जीत सान्तःपुरपरिच्छदः ॥
कार्या च विविधा प्रोक्ता भुक्तवत्सु जनेषु च ॥१६८॥
एवं कृते महाशान्तिर्न्नृपस्य नगरस्य च ॥
देशस्य च समस्तस्य जायते नात्र संशयः ॥१६९॥
ईतयश्च प्रशाम्यन्ति न च मारी प्रवर्त्तते ॥
शाम्यन्ति सर्व्वघोराणि प्रशमन्ति भयानि च ॥१७०॥
उन्मूल्यन्ते ग्रहाः सर्व्वे प्रणश्यन्ति च शत्रवः ॥
उपसर्गाः प्रलीयन्ते न दुर्भिक्षभयं भवेत् ॥१७१॥
विनायकाश्च नश्यन्ति सौभाग्यं परमं भवेत् ॥
राज्यवृद्धिश्च विपुला नित्यञ्च विजयी नृपः ॥१७२॥
वर्द्धते पुत्रपौत्रैश्च मतिर्धर्म्मे प्रवर्तते ॥
विद्यादानप्रसादेन नृपस्य च जनस्य च ॥१७३॥
अनेन विधिना राजा यः शिवज्ञानपुस्तकं ॥
दद्यात्तदभियुक्ताय विद्यादानफलं लभेत् ॥१७४॥
यो वाऽन्यः पुरुषः कश्चिच्छ्रद्धावित्तानुसारतः ॥
कुर्याद् विधिमिमं स्त्री वा विद्यादानफलं लभेत् ॥१७५॥
दरिद्रश्चानुसारेण वित्तशाठ्यविवर्ज्जितः ॥
कृत्वा विधिमिमम्भक्त्या विद्यादानफलं लभेत् ॥१७६॥
यस्य यावद्भवेद् वित्तं सतस्येहानुसारतः
अशाठ्ये नाचरेत्पुण्यमाढ्यतुल्यफलं लभेत् ॥१७७॥
यावदक्षरसंख्यानं शिवज्ञानस्य पुस्तके ॥
तावद्वर्षसहस्राणि दाता शिवपुरे वसेत् ॥१७८॥
दश पूर्व्वान् समुद्धृत्य दश वंश्याश्च पश्चिमान् ॥
मातापितृधर्म्मपत्नीः स्वर्ग्गे स्थाप्य शिवं व्रजेत् ॥१७९॥

सान्तःपुरपरिवारः सर्व्वभृत्यसमन्वितः ॥
राजा शिवपुरङ्गच्छेद् विद्यादानप्रभावतः ॥१८०॥
विमानयानैः श्रीमद्भिः सर्व्वकामसमन्वितः ॥
मनोरम्यैरसंख्यानैः क्रीडते कालमक्षयं ॥१८१॥
परमाष्टगुणैश्वर्यैरुपेतः सर्व्वतः प्रभुः ॥
सर्व्वज्ञः परिपूर्णात्मा द्वितीय इव शङ्करः ॥१८२॥
यथाऽमराणां सर्व्वेषां परमः परमेश्वरः ॥
तथैव सर्व्वदानानां विद्यादानं परं स्मृतं ॥१८३।
अनेनैव विधानेन यः शिवं ज्ञानपुस्तकं ॥
कुसुमगृहके स्थाप्य पूजयीत शिवाश्रमे ॥१८६ ॥
आषाढ्यां पूर्णिमास्यां तु दीपमालाविबोधनैः ॥
वैशाख्याञ्चापि सम्पूज्य विद्यादानफलं लभेत् ॥१८५॥
यः श्रीमत्पुस्तकवरमालेख्य विनिवेदयेत् ॥
शिवज्ञानाभियुक्ताय तस्य पुण्यफलं श्रृणु ॥१८६॥
यावत् तत्पत्रसंख्यानं मञ्चकेऽतीवशोभनं ॥
तावद्युगसहस्राणि शिवलोके महीयते ॥१८७॥
यत्पत्रं यन्त्रसूत्राद्यं मषीभाजनलेखनी ॥
शरयन्त्रासनाभ्यङ्ग शय्यासम्दक्तवेतनं ॥१८८॥
इत्येवमादि यच्चान्यत्तदर्थमुपयुज्यते ॥
यद्वा तद्वा महत् सूक्ष्मं विधानेन तु यद् भवेत् ॥१८९॥
तदेकमपि विद्याङ्गं श्रद्धावित्तानुसारतः ॥
निवेद्य स महाभोगैः शिवलोके महीयते ॥१९०॥
पुस्तकास्तरणन्दत्वा सद्वस्त्रश्च प्रमाणतः ॥
तद्वासनवितानं वा शिवलोके महीयते ॥१९१॥
यावत्तद्वस्त्रतन्तूनां परिसंख्या समन्ततः ॥
तावद्युगसहस्त्राणि महाभोगानवाप्नुयात् ॥१९२॥
शिवज्ञानाभियुक्ताय भक्ताच्छादन्ददाति यः ॥
आसमाप्तेरविच्छिन्नं विद्यादानफलं लभेत् ॥१९३॥
उपानच्छत्रकौपीनं शय्याप्रावरणासनं ॥
पादस्नेहाञ्जनाभ्यङ्गं स्नानभोजनभेषजं ॥१९४॥
यतिमात्रोपकरणं मठसम्मार्ज्जनाञ्जनं ॥
दीपाग्नितोयपुष्पाद्यं शिवपुस्तकवाचनं ॥१९५॥

य: कुर्यादेतदखिलं शिवज्ञानरतात्मकं ॥
पञ्चानां पञ्च वर्षाणि विद्यादानफलं लभेत् ॥१९६॥
त्रि:सप्तकुलमुत्तार्य स्थापयेद्वैष्णवे पुरे ॥ दैश्वरे ॥
तेऽत्र तद्विपुलैर्भोगै: क्रीडन्त्याचन्द्रतारकं ॥१९७॥
कलत्रपुत्रसद्भृत्यैर्युक्त: शिवपुरे नर:॥
अक्षयं मोदते कालं विमानै: सार्व्वकामिकै: ॥१९८॥
विद्यामण्डलकं वृत्तं यदि वा चतुरस्त्रकं ॥
द्विहस्तमधिकं वापि कृत्वा सद्गोमयाम्भसा ॥१९९॥
सितरक्तादिभिश्चूर्णै: समन्तादुपशोभितं ॥
सितपद्मयुतं मध्ये सद्वितानविभूषितं ॥२००॥
विचित्रकुसुमाकीर्णं प्रदीपाक्षतसंयुतं ॥
सम्पूज्यैवं शिवज्ञानं श्रद्धया वाचयीत य: ॥२०१॥
आद्यन्तन्तत् क्रमात्सर्व्वमेकरूपं शनै: शनै: ॥
सर्व्वलोकोपकारार्थमात्मनश्च समृद्धये ॥२०२॥
तत्समाप्तौ शिवं विद्यामाचार्यञ्च प्रपूजयेत् ॥
वाचयेच्चिन्तयेद्वापि लेखयेल्लिपयीत वा ॥२०३॥
श्रृणुयादेकचित्तश्च तदर्थञ्च विचारयेत् ॥
जनेभ्य: श्रावयेद्यश्च तस्य पुण्यफलं श्रृणु ॥२०४॥
य: प्रदद्यान्मही पूर्णां सर्व्वरत्नैस्तु यत्फलं ॥
श्लोकार्द्धं शिवज्ञानस्य पाठात्तत्फलमाप्नुयात् ॥२०५॥
य: श्रीपर्णीसमुद्भूतानम्नखातं सुसंञ्चयं ॥
दद्यात् सम्पुटकं कृत्वा चर्मणा वापि निर्म्मितं ॥२०६॥
शिवज्ञानाभियुक्ताय तदध्ययनहेतुना ॥
सुश्लक्ष्णफलकं वापि विद्यादानफलं लभेत् ॥२०७॥
महाविमानै: श्रीमद्भि: सर्व्वकामसमन्वितै: ॥
क्रीडते परमं कालं रुद्रलोके व्यवस्थित:॥२०८॥
तत: कालात् क्षितिं प्राप्य राजा भवति धार्मिक:॥
सुरूप: सद्द्विजो वापि सर्व्वविद्यार्थपारग: ॥२०९॥
य: सौवर्णं सुसम्पूर्णं सर्व्वरत्नोपशोभितं ॥
सपिधानं समञ्जूषं विद्याकोषसमाश्रयं ॥२१०॥
कारयेद्वापि रौप्येण ताम्रेण चतुरस्रकं ॥
कांस्यारकूटलौहैर्व्वा दारुवंशादिनिर्म्मितं ॥२११॥

तत्कषायानुरक्तेन चर्म्मणाभिनवेन च ॥
अन्तर्बहिश्च मठयेद्विद्यावासगृहं नवं ॥२१२॥
सर्व्वाश्मकटकोपेतं दृढसूत्रनिबन्धनं ॥
कुर्यात्तालकसंयुक्तं विद्यारत्नकरण्डकं ॥२१३॥
एवं वित्तानुसारेण कारयित्वानुरूपतः ॥
प्रक्षाल्य गन्धतोयेन विद्यावासगृहस्य दः ॥२१४॥ यः
कृत्वा वस्त्रवरं दिव्यमन्तःपुष्पं गृहान्वितं ॥
विद्यासिंहासनन्तत्र सम्पूज्य विधिवद् बुधः ॥२१५॥
तस्मिन् पुण्याहशव्देन विद्याकोषगृहन्यसेत् ॥
ततश्चन्दनकर्पूरैः कुङ्कुमाद्यैः प्रलेपयेत् ॥२१६॥
अन्तर्व्वस्त्रयुतं धूपं सत्पुष्पैरभिपूजयेत् ॥
ततो वादित्रनिर्घोषैर्विद्याकोषं प्रपूजयेत् ॥२१७॥
ततः सम्पूजयेद् विद्यां महाविभवविस्तरैः ॥
कृत्वा प्रदक्षिणञ्चान्ते नमत् सर्व्वाङ्गिकम्बुधः ॥२१८॥
विद्याकोषगृहस्यापि विद्यायतनमुत्तमम् ॥
भवेत् सुशोभनन्तस्य चाष्टहस्तप्रमाणतः ॥२१९॥
शिलेष्टकामृण्मयं वा सद्दारुकृतमेब वा ॥
कपाटार्ग्गलसंयुक्तं प्राकारासनशोभितम् ॥२२०॥
पताकाध्वजसंयुक्तं सद्वितानसुशोभनं ॥
घण्टाचामरसंयुक्त किङ्किणीरवकान्वितम् ॥२२१॥
चन्दनागुरुगन्धाद्यैरनुलिप्तं समन्ततः ॥
नित्यं सुगन्धकैर्द्धूपैः पुष्पैश्चैवाधिवासयेत् ॥२२२॥
तत्र तं तूर्यघोषेण मङ्गलैर्व्विविधैरपि ॥
आनीय स्थापयेद् भक्त्या विद्यारत्नकरण्डकं ॥२२३॥
ततः सुगन्धपुष्पाद्यैः शिववत् प्रतिपूजयेत् ॥
शिवविद्यां सदाकालं त्रिसन्ध्यमुपचारतः ॥२२४॥
ततः समागतान् सर्व्वान् भोजयेच्छिवयोगिनः ॥
दीनान्धकृपणाद्यांश्च दक्षयित्वा क्षमापयेत् ॥२२५॥
एवं यः शिवविद्यायाः कुर्यादायतनं शुभं ॥
स मुक्तः पातकैः सर्व्वैर्व्विद्यादानफलं लभेत् ॥२२६॥
कुलैकविंशदुत्तार्य सभृत्यपरिबारितः ॥
प्राप्याष्टगुणमैश्वर्यं शिवलोकेमहीयते ॥२२७॥

यस्तत्र ज्ञानमासाद्य विषयान् विषवत् त्यजेत् ॥
स प्राप्नोति पराम्मुक्तिं रागी भोगानवाप्नुयात् ॥२२८॥
सृष्ट्यन्तरे पुनःप्राप्ते पृथिव्यामेकराड् भवेत् ॥
सर्व्वैश्वर्यगुणोपेतः सर्व्वज्ञानार्थपारगः ॥२२९॥
यः कारयेन्महारम्यं सुवेदीसंस्थित पुरं ॥
पञ्चभौमं त्रिभौमं वा शिवज्ञानरतात्मनां ॥२३०॥
गुहाप्रवरकैर्य्युक्तम्मैत्रस्थानसमन्वितं ॥
वास्तुविद्याविभक्तञ्च प्राकारपरिवारितं ॥२३१॥
तस्य वेदी द्विहस्तोच्चा पर्यन्तस्तम्भसंयुतं ॥
पक्वेष्टकापरिच्छन्ना तत्सुरम्भस्त्रमन्तरं ॥२३२॥
सवीध्याः पुरतः कार्यं दिश्याग्नेयांम्महानसं ॥
धूमनिर्गमनोपेतं पूर्व्वतः सत्रमण्डपं ॥२३३॥
गन्धपुष्पगृहं कार्यमैशान्यां पटसंयुत ॥
भाण्डागारञ्च कौवैर्यां कोष्ठागारञ्च वायवे ॥२३४॥
उदकाश्रयश्च वारूण्यां वातायनसमन्वितं ॥
समित्कुशेन्धनस्थानमायुधानाञ्च नैर्ऋते ॥२३५॥
अभ्यागतालयं रम्यं शय्यांसनसपादुकं ॥
तोयाग्निदीपसद्भृत्यैर्युक्तं दक्षिणतोभवेत् ॥२३६॥
गृहान्तराणि सर्व्वाणि जलजैः कदलीगृहैः ॥
पञ्चवर्णैन्च कुसुमैः शोभितानि प्रकल्पयेत् ॥२३७॥
प्राकारान्तर्ब्बहिर्द्द्यात्पञ्चहस्तप्रमाणतः ॥
प्राकाराच्च बहिः कुर्यात्सर्व्वदिक्षु समन्ततः ॥२३८॥
दिव्यं शिवाश्रमारामं नानापुष्पोपशोभितं ॥
सर्व्वर्त्तुकगुणोपेतं नानावृक्षसमन्वितं ॥२३९॥
प्रियङ्गुशिरीषाशोकपुन्जीवकर्रञ्जकैः ॥
पुन्नागनागबकुलैः पाटलाबिल्वचम्पकैः॥२४०॥
श्वेतमन्दारविजयैर्ज्जातीतगरकुञ्जकैः ॥
सुवर्णश्वेतयूथीभिर्ब्बाणाम्रातकुरुण्टकैः ॥२४१॥
करवीरकर्णिकारैर्न्नानावर्णैरनेकशः॥
स्थानविन्यासरचितैस्सन्मार्गाधारसंयुतैः ॥२४२॥
पुष्पैर्ब्बहुविधैर्युक्तं दिग्विदिक्षु जलान्वितं ॥
सितरक्तार्ककुसुमैर्न्नीलरक्तोत्पलैर्युतं ॥२४३॥

लतावितानगृहकैः क्वचिक्वचिदवस्थितैः॥
कदलीस्तम्भषण्डैश्च दाडिमाद्यैर्व्विराजितं ॥२४४॥
इति कृत्वा बहिस्तस्य प्राकारं कल्पयेन्महत् ॥
कपाटगोपुरोपेतं परिखावंशसंयुतं ॥२४५॥
तृतीयाञ्च पुरादूर्ध्वं विद्याव्याख्यानमण्डपं ॥
गवाक्षनिर्ग्गमोपेतं विचित्रं परिकल्पयेत् ॥२४६॥
परार्द्धं पञ्चमङ्कार्यं शिवस्य वड(बल) भीगृहं ॥
षड्ढस्तमष्ठपट्टं वा चारुपट्टविनिर्म्मितं ॥२४७॥
तत्र मृद्दारुशैलं वा स्थापयेद्विधिवच्छिवं ॥
सर्व्वविद्याविधातारं सर्व्वज्ञं लकुलीश्वरं ॥२४८॥
वृतं शिष्यैः प्रशिष्यैश्च व्याख्यानोद्यतपाणिकं ॥
पद्मासनस्थं सुश्वेतं प्रसन्नवदनं शुभं ॥२४९॥
एवं शिवाश्रमं कृत्वा भक्त्या वित्तानुसारतः ॥
तत्प्रतिष्ठान्ततः कुर्यात्पूजासंस्कारलक्षणं ॥२५०॥
विद्यादानोक्तविभवैः शोभां कृत्वा तथाग्रतः ॥
पञ्चभिः पञ्चगव्येन स्थाप्यैशान्यां शिवाङ्क्रमात् ॥२५१॥
स्नापयेद्गन्धतोयाद्यैः स्नानवस्त्रेण संयुतं ॥
तूर्यघोषैस्तमानीय स्थापयेत्पुष्पमण्डपे ॥२५२॥
ततश्चन्दनपुष्पाद्यैः पूजयित्वाऽधिवासयेत् ॥
जप्त्वा पञ्चविधं स्तोत्रं शिवं विज्ञापयेत्ततः ॥२५३॥
अद्याधिवासनं देव! श्वः प्रतिष्ठाविधिस्तव ॥
भक्तानामनुकम्पायै सान्निध्यमुपकल्पयेः ॥२५४॥
प्रातः स्नाप्य पुनर्द्देवं पूजयित्वा प्रकल्पयेत् ॥
पवित्रैः स्थापयेद्वेद्यां पादादारभ्य पञ्चभिः ॥२५५॥
ततः सुगन्धगन्धाद्यैर्न्नित्यं भाव्यं शिवालये ॥
शिवश्च पूजयेत् पुष्पैः स्नानं वर्ज्यं सुगन्धिभिः ॥२५६॥
सशिष्यस्तं प्रणम्येशं गुरुर्व्याख्यां प्रवर्त्तयेत् ॥
प्राङ्मुखोदङमुखो वापि पुण्याहार्थं शिवाग्रतः ॥२५७॥
ततः सम्पूजयेद् भक्त्या यजमानः स्वयं गुरुं ॥
दक्षिणाभिर्व्विचित्राभिर्भोजनाद्यैश्च पूर्व्ववत् ॥२५८॥
निवेदयेत्ततः स्थानं सर्व्वेषां शिवयोगिनां ॥
सर्व्वोपकरणोपेतं प्रणिपत्य पुनः पुनः ॥ २५९॥
एवं यः कारयेदाद्यः श्रीमच्छिवपुरम्महत् ॥

एवं यः कारयेदाद्यः श्रीमच्छिवपुरम्महत् ॥
सर्व्वपापविनिर्म्मुक्तः शिवलोके महीयते ॥२६०॥
स गोत्रं त्रिंशकोपेतः सभृत्यपरिवारितः ॥
पुत्रमित्रादिसंयुक्तः सान्तःपुरपरिच्छदः ॥२६१॥
सुविचित्रैर्म्महायानैरसंख्यैः सार्व्वकामिकैः ॥
शिववत् क्रीडते भोगैरणिमादिगुणान्वितः ॥२६२॥
ततः कालेन महता विद्यादानप्रभावतः ॥
ज्ञानयोगं समासाद्य तत्रैव परिमुच्यते ॥२६३॥
स्थपतिः स्थापका वृक्षा वलीवर्द्दाः सुकर्म्मिणः ॥
यान्ति रुद्रपुरं सर्व्वे तदध्यक्षाश्च ये नराः ॥२६४॥
ये चापि वृत्तिभृतकाः शिवायतनकर्म्मणा ॥
तेऽपियान्ति मृताः स्वर्गा शिवकर्म्मानुभावतः ॥२६५॥
शिवदासत्वमापन्ना नरनारीनपुंसकाः ॥
तेऽपि तन्नामसंयोगाद्यान्ति रुद्रपुरम्महत् ॥२६६॥
दत्ताः क्रीताः प्रविष्टाश्च दण्डोत्पन्ना बलाहृताः ॥
विज्ञेया रुद्रगणिकाः शिवायतनयोगतः ॥२६७॥

या रुद्रगणिकोत्पन्ना पुत्रपौत्रादिसर्व्वतः ॥
सापि याति मृता स्वर्ग्गं मातुरेवानुभावतः ॥२६८॥
शिवायतनपर्य्यन्ते म्रियन्ते येऽपि जन्तवः ॥
तेऽपि यान्ति शिवं लोकं किं पुनस्तत्समाश्रिताः ॥२६९॥
अत्यल्पमपि यः कुर्य्यादतिरम्यैः शिवाश्रमं ॥
द्विरेकवसतिमात्रं सोऽपि याति शिवं पुरं ॥२७०॥
कृत्वा सुकुट्टिमां भूमिमीश्वरायतनाग्रतः ॥
तत्र मण्डलकं कुर्य्यात् सुवृत्तं गोमयाम्भसा ॥२७१॥
सूत्रेण सुमितङ्कृत्वा नानावर्णकशोभितं ॥
विचित्रकुसुमाकीर्णं मध्ये पङ्कजशोभितं ॥२७२॥
प्रदीपाक्षतसंयुक्तमुदकं भ्राम्य पाणिना ॥
मूर्ध्ना प्रणम्य मेदिन्यां शिवाय विनिवेदयेत् ॥२७३॥
यः कुर्य्यात् सकृदप्येवं शिवमण्डलकन्नरः ॥
स सर्व्वकामसंयुक्तः शिवलोके महीयते ॥२७४॥
कालात्पुनरिहायातः श्रीमानर्थपतिर्भवेत् ॥
ज्ञानवान् रूपवान् भोगी सुप्रियः सुद्विजः सुखी ॥२७५॥
विंद्यामण्डलकं कृत्वा विद्याव्याख्यानमण्डपे ॥
तत्राभ्यर्च्य शिवज्ञानं तद्व्याख्यां श्रृणुयात्ततः ॥२७६॥
शिवमण्डलकाद्येन विधिनातीव शोभनं ॥
गुरुमण्डलकं कृत्वा शिवलोके महीयते ॥२७७॥
शिवविद्यागुरूणाञ्च कृत्वा मण्डलकंत्रयं ॥
यः श्रृणोति शिवज्ञानं तस्य विद्या प्रसीदति ॥२७८॥
अनेन विधिना ज्ञानं यः श्रृणोति प्रवक्ति च ॥
स सम्प्राप्य श्रियं सौख्यं देहान्ते मुक्तिमाप्नुयात् ॥२७९॥

आरोग्यशाला

आरोग्यशालां यः कुर्य्यान्महावैद्यपुरस्कृतां ॥
सर्व्वोपकरणोपेतां तस्य पुण्यफलं श्रृणु ॥२८०॥
धर्म्मार्थकाममोक्षाणामारोग्यं साधनं यतः ॥
तस्मादारोग्यदानेन दत्तं स्यात्तच्चतुष्टयं ॥२८१॥
अप्येकमार्त्तं विद्वांसं सुस्थीकृत्य प्रयत्नतः ॥
प्राप्नोति सुमहत्पुण्यमनन्तं क्षयवर्ज्जितं ॥२८२॥

ज्ञानयोगरतं शान्तं रोगार्त्तं शिवयोगिनं ॥
यः करोति नरः स्वस्थं सर्व्वदानफलंलभेत् ॥२८३॥
ब्रह्मविष्णुसुराः सर्व्वे व्याधयः स्वजना नृपाः ॥
योगस्यैते महाविघ्ना व्याधयस्तेन योगिनां ॥२८४॥
ब्रह्मक्षत्रविशः शूद्रान् रोगार्त्तान् यान् प्रयत्नतः ॥
यत्पुण्यम्महदाप्नोति न तत्सर्व्वैर्महामखैः ॥२८५॥
आकाशस्य यथा नान्तः सुरैरप्युपलभ्यते ॥
तद्वादारोग्यदानस्य नान्तः संविद्यते तथा ॥२८६॥
पुण्यमानेन महता गत्वा शिवपुरन्नरः ॥
मोदते विविधैर्भोगैर्व्विमानैः सार्व्वकामिकैः ॥२८७॥
एकविंशकुलोपेतः सभृत्यपरिवारितः ॥
आस्ते शिवपुरे तावद्यावदाभूतसम्प्लवम् ॥२८८॥
ततस्तत्कर्म्मशेषेण सम्प्राप्ते प्रलये तथा ॥
ज्ञानमुत्पद्यते तस्य रुद्रेभ्यः परिवारितः ॥२८९॥
ज्ञानाद् विरक्तः संसारे शिवध्यानमुपाश्रितः ॥
स्वदेहं तृणवत् त्यक्त्वा सर्व्वदुःखान्तमाप्नुयात् ॥२९०॥
समस्तदुःखनिर्म्मुक्तः शुद्धः स्वात्मव्यवस्थितः ॥
सर्व्वज्ञः परिपूर्णश्च मुक्त इत्यभिधीयते ॥२९१॥
तस्माद् भोगापवर्ग्गार्थं रोगार्त्तं समुपाचरेत् ॥
विशेषेण च योगीन्द्रमात्मना च धनेन च ॥२९२॥
रोगिणो नोद्विजेत् प्राज्ञस्तन्मलानाश्च सर्व्वतः ॥
सम्पश्येद् गुरुवन्नित्यमेवं धर्म्मः प्रवर्तते ॥२९३॥
योऽनुगृहीतमात्मानं मन्यमानो दिने दिने ॥
उपसर्प्पति रोगार्त्तं तीर्णस्तेन भवार्णवः ॥२९४॥
एवमेतद् बहुविधं विद्यादानं प्रकीर्त्तितं ॥
सर्व्वेषामेव वर्णानां विधिनानेन तद्भवेत् ॥२९५॥
इति श्री शिवधर्म्मोत्तरे विद्यादानो नाम
द्वितीयोऽध्यायः ॥२॥

अथ पशुपतिमते शिवधर्मे महाशास्त्रे शिवधर्मोत्तरे ज्ञानयोगो नाम तृतीयोऽध्यायः

ॐ नमः शिवाय

अथ ये सततं भक्ता भवन्ति शिवयोगिनां ॥
ते विन्दन्ति महाभोगानन्ते योगञ्च शाङ्करं ॥२९६॥
भोगयोगार्थिभिस्तस्मात् सम्पूज्याः शिवयोगिनः ॥
प्रतिश्रयान्नपानेन शय्यावस्त्रात्सनादिभिः ॥२९७॥
यः स्थानगात्रशुश्रूषां प्रकुर्य्याच्छिवयोगिनां ॥
दरिद्रः सततं भक्त्या तस्य पुण्यफलं श्रृणु ॥२९८॥
सूर्य्यतेजःप्रतीकाशैर्व्विमानैः सार्व्वकामिकैः ॥
मृतः शिवपुरं गच्छेत् त्रिसप्तकुलसंयुतः ॥२९९॥
तत्र दिव्यैर्म्महाभोगैः स्त्रीसहस्रैर्म्मनोरमैः ॥
कल्पकोटिशतं दिव्यं सेव्यमानः स तिष्ठति ॥३००॥
तदन्ते विष्णुभवने तावत्कालं वसेत् पुनः ॥
वैष्णवैर्व्विविधैर्भोगैः स्त्रीसहस्रैश्च पूजितः ॥३०१॥
विष्णुलोकाद् ब्रह्मलोकं सम्प्राप्य क्रीडते पुनः ॥
भोगैः सुविपुलैः सूक्ष्मैस्तावत्कालमनुत्तमैः ॥३०२॥
प्रजापतीन्द्रगन्धर्व्वयक्षलोकेष्वनुक्रमात् ॥
भोगान्नानाविधान् भुक्त्वा पृथिव्यां जायते क्रमात् ॥३०३॥
कुले महति विप्राणां प्रज्ञाशीलगुणान्वितः ॥
ततः स पूर्व्वभावेन योगीन्द्रान् पर्युपासते ॥३०४॥
तत्सम्पर्क्काच्छिवज्ञानं प्राप्य योगं निषेवते ॥
योगाद् विरक्तः संसारात् प्राप्नोति परमं पदं ॥३०५॥
इति यः कुरुते भक्तिं सततं शिवयोगिनां ॥
स द्वितीये तृतीये वा देहे योगमवाप्नुयात् ॥३०६॥
अथ पूजादिकार्य्याद्यैर्भेदैर्बहुविधैः स्थितः ॥
कर्म्मयोगः समाख्यातस्तपश्चान्द्रायणादिकः ॥३०७॥
स्वाध्यायश्च जपः प्रोक्तः शिवमन्त्रश्च स द्विधा ॥
ध्यानयज्ञः समाख्यातः शिवचिन्ता मुहुर्म्मुहुः ॥३०८॥
अध्यापनमध्ययनं व्याख्याश्रवणचिन्तनं ॥
इति पञ्चप्रकारोऽयं ज्ञानयज्ञः प्रकीर्त्तितः ॥३०९॥

उत्तरोत्तरवैशिष्ट्यं सर्व्वेषां परिकीर्त्तितं ॥
पञ्चानामपि यज्ञानां ध्यानयज्ञो विमुक्तिदः ॥३१०॥
नास्ति ज्ञानं विना ध्यानं नास्ति ज्ञानमयोगिनः ॥
ज्ञानध्यानञ्च यस्यास्ति तीर्णस्तेन भवार्णवः ॥३११॥
ज्ञानं प्रसन्नमेकाग्रमशेषोपाधिवर्ज्जितं ॥
योगाभ्यासेन सततं विरक्तस्योपजायते ॥३१२॥
श्रुतञ्चिन्तामयं ज्ञानं विकल्पबहुलं यतः ॥
तस्मात्तदप्रसन्नत्वाच्चञ्चलन्न विमुक्तिदं ॥३१३॥
श्रुताद् विवर्द्धते प्रज्ञा प्रज्ञातश्चिन्तयेत् पुनः ॥
विमलन्तत् प्रसन्नञ्च चिन्त्यमानं भवेच्छनैः ॥३१४॥
आरम्भकालः श्रवणं क्रियाकालश्च चिन्तनं ॥
चिन्तया भावना तस्य निष्ठा काले प्रसन्नता ॥३१५॥
ज्ञानं विकल्पबहुलं रागाद्यैः कलुषीकृतं ॥
नाज्ञानमलशुद्ध्यर्थं कलुषोदकवद् भवेत् ॥३१६॥
निःसारमतिकष्टञ्च भवं भावयतः शनैः ॥
अम्भसीव शरत्काले तत्प्रसन्नङ् क्रमाद् भवेत् ॥३१७॥
यदा प्रसन्नमेकाग्रं स्तिमितोदधिवत् स्थितं ॥
तदा ज्ञानमिति प्रोक्तमज्ञानमिति चेतरत् ॥३१८॥
इति प्रसन्नं यज्ज्ञानं भावनामयमुत्तमं ॥
रागाद्यैरपरामृष्टन्तद् विज्ञेयं विमुक्तिदं ॥३१९॥
अज्ञानपाशबद्धत्वादमुक्तः पुरुषाः स्मृतः ॥
तस्माज्ज्ञानेन मुक्तिः स्यादज्ञानास्य परिक्षयात् ॥३२०॥
संसारबीजमज्ञानं संसारज्ञः पुमान् यतः ॥
ज्ञानात्तस्य निवृत्तिः स्यात् प्रकाशात्तमसो यथा ॥३२१॥
अज्ञाने सति रोगाद्या धर्म्माधर्म्मौ च तद्वशौ ॥
धर्म्माधर्म्मवशात्पुंसः शरीरमुपजायते ॥३२२॥
शरीरे सति संक्लेशैः सर्व्वैः संयुज्यते यतः ॥
ततः क्लेशप्रहाणार्थं पुनर्देहन्न कामयेत् ॥३२३॥
जगतस्तत्त्वसम्बोधादज्ञानं विनिवर्त्तते ॥
अज्ञानविनिवृत्तौ च रागादीनामसम्भवः ॥३२४॥
रागाद्युपशमात्पुंसः पुण्यपापपरिक्षयः ॥
तत्क्षयाच्च शरीरेण न पुनः सम्प्रयुज्यते ॥३२५॥

अशरीरश्च संक्लेशैः सर्व्वैरेव न बाध्यते ॥
क्लेशमुक्तः प्रसन्नत्वान्मुक्त इत्यभिधीयते ॥३२६॥
तस्मादज्ञानमूलानि सर्व्वदुःखानि देहिनां ॥
ज्ञानेन च तदज्ञानन्निवर्त्तेत न कर्म्मभिः ॥३२७॥
नास्ति ज्ञानादृते पुंसां पुण्यपाघपरिक्षयः ॥
मोक्षार्थी पुरुषस्तस्माज्ज्ञानमेव सदाभ्यसेत् ॥३२८॥
मार्ज्यमानः सदा यद्वद् दर्प्पणो निर्म्मलो भवेत् ॥
ज्ञानाभ्यासात्तथा पुंसां बुद्धिर्भवति निर्म्मला ॥३२९॥
ज्ञानामृतरसो येन सकृदास्वादितो भवेत् ॥
स सर्व्वकार्याण्युत्सृज्य तत्रैव परिधावति ॥३३०॥
ज्ञानामृतरसः प्रायस्तेन नास्वादितो भवेत् ॥
येनान्यत्राभिरमते तद् विहायैव दुर्म्मतिः ॥३३१॥
ज्ञानामृतेन तृप्तस्य कृतकृत्यस्य योगिनः ॥
नैवास्ति किञ्चित् कर्त्तव्यमस्ति चेन्न स तत्त्ववित् ॥३३२॥
लोकद्वयेऽपि कर्त्तव्यं किञ्चित्तस्य न विद्यते ॥
इहैव स विमुक्तः स्यात् सम्पूर्णप्रियदर्शनः ॥३३३॥
नास्ति ज्ञानात्परं किञ्चित् पवित्रं पापनाशनं ॥
तत् सदाऽभ्यासयोगेन शनैरात्मनि विन्दति ॥३३४॥
यज्ञेन देवानाप्नोति तपोभिर्ब्रह्मणः पदं ॥
दानेन विविधान् भोगान् ज्ञानान्मोक्षमवाप्नुयात् ॥३३५॥
धर्म्मरज्ज्वा व्रजेदूर्ध्वम् पापरज्ज्वा व्रजत्यधः ॥
द्वयं ज्ञानासिना छित्त्वा विदेहः शान्तिमृच्छति ॥३३६॥
ज्ञानिनांयद्यधर्मेण भवेद् बन्धः शुभेन वा ॥
हुहुत मुक्तिः कथन्तेषां निबद्धानां शुभाशुभैः ॥३३७॥
नहि देहभृता शक्यं कर्म्म त्यक्तुं शुभाशुभं ॥
गच्छतस्तिष्ठतो वापि तदवश्यम्भवेद्यतः ॥३३८॥
अधर्म्मविनिवृत्तौ च भवेत्पुण्यमकुर्व्वतः ॥
धर्म्मत्यागादधर्म्मश्च स तिष्ठेन्निश्चलः कथम् ॥३३९॥
तस्माज्ज्ञानासिना तूर्णमशेषङ्कर्म्मबन्धनं ॥
कामाकामकृतं छित्त्वा शुद्धः स्वात्मनि तिष्ठति ॥३४०॥
यथा वन्हिर्म्महान् दीप्तः शुष्कमार्द्रञ्चनिर्द्दहेत् ॥
तथा शुभाशुभं कर्म्म ज्ञानाग्निर्दहति क्षणात् ॥३४१॥

पद्मपत्रं यथा तोयैः स्वकैरपि न लिप्यते ॥
शब्दादिविषयाम्भोभिस्तद्वज्ज्ञानी न लिप्यते ॥३४२॥
यद्वन्मन्त्रबलोपेतः क्रीडन् सर्प्पैर्न्न दश्यते ॥
क्रीडन्न दश्यते ज्ञानी तद्वदिन्द्रियपन्नगैः ॥३४३॥
मन्त्रौषधिबलैर्य्यद्वज्जीर्य्यते भक्षितं विषं ॥
तद्वत्पापानि कर्म्माणि जीर्य्यन्ते ज्ञानिनां क्षणात् ॥३४४॥
नास्ति ज्ञानसमं तीर्थं नास्ति ज्ञानसमन्तपः ॥
नास्ति ज्ञानसमो यज्ञस्तस्माज्ज्ञानं समभ्यसेत् ॥३४५॥
यथा ज्ञानं तथा ध्यानं ज्ञानध्यानं समं स्मृतं ॥
ज्ञानध्यानरतः सौख्यं पुनर्म्मोक्षञ्च विन्दति ॥ ३४६॥
ज्ञानादैश्वर्य्यमतुलमैश्वर्य्यात्सौख्यमुत्तमं ॥
ज्ञानेन तत्परित्यज्य वितनुर्म्मोक्षमाप्नुयात् ॥३४७॥
सर्व्वेषामेव यज्ञानां ज्ञानयज्ञः परः स्मृतः ॥
नित्यं शुद्धः प्रसन्नश्च सर्व्वदोषविवर्ज्जितः ॥३४८॥
शुक्लकृष्णपरः सूक्ष्मः सुविशुद्धः समाधिजः ॥
ज्ञानयज्ञः परो ज्ञेयः स्थूलोऽशुद्धश्च कर्म्मिणां ॥३४९॥
विशुद्धः साधनैः सूक्ष्मैर्ध्यानयज्ञः प्रसाध्यते ॥
यस्मात्तस्माद्विशुद्धोऽयमपवर्ग्गफलप्रदः ॥३५०॥
अन्त=बहिर्य्योगोपचारेण यः पूजयति शङ्करं ॥
ध्यानयज्ञेन सततं स याति परमाङ्गतिं ॥३५१॥
पुष्पैर्य्यमनियमार्थैरात्मैकादशभिः परैः ॥
दशदिक्षु तथा मध्ये यजेत परमेश्वरं ॥३५२॥
कर्म्मयज्ञात्तपोयज्ञो विशिष्टो दशभिर्ग्गुणैः ॥
जपयज्ञस्तपोयज्ञाज्जपः शतगुणाधिकः ॥३५३,॥
ज्ञानध्यानात्मकः सूक्ष्मः शिवयोगमहामखः ॥
विशिष्टः सर्व्वयज्ञानामसंख्यातैर्म्महागुणैः ॥३५४॥
पूजया विपुलं राज्यमग्निकार्य्येण सम्पदः ॥
जपेन पापशुद्धिः स्याज्ज्ञानध्याने न मुच्यते ॥३५५॥
प्रक्षीणाशेषपापस्य ज्ञानध्याने भवेन्मतिः ॥
पापापहतबुद्धीनान्तद्वार्त्तापि सुदुर्ल्लभा ॥ ३५६॥
धनुषां कोटिभिर्य्योगः समन्तात् परिरक्ष्यते=क्षति ॥
सहस्रैः षष्टिभिर्ग्गङ्गा धर्म्मतीर्थानि चार्द्धतः ॥३५७॥

तीर्थानि तोयपूर्णानि देवाः पाषाणमृण्मयाः ॥
योगिनो न प्रपद्यन्ते स्वात्मप्रत्ययकारिणः ॥३५८॥
अग्नौ क्रियावतां देवा दिवि देवा मनीषिणां ॥
प्रतिमास्वप्रबुद्धानां योगिनामात्मनि स्थिताः ॥३५९॥
शिवमात्मनि पश्यन्ति प्रतिमासु न योगिनः ॥
अज्ञानाम्भावनार्थाय प्रतिमा परिकल्पिता ॥३६०॥
आत्मत्थं यः शिवं त्यक्त्वा बहिःस्थं यजते शिवं ॥
हस्ते पिण्डं समुत्सृज्य लिहेत् कूर्प्परमात्मनः ॥३६१॥
सर्व्वत्रावस्थितं ये तु न प्रपश्यन्ति शङ्करं ॥
ज्ञानचक्षुर्व्विहीनत्वादन्धाः सूर्यं यथोदितं ॥३६२॥
यः पश्येत् सर्व्वगं शान्तन्तस्यात्मस्थः शिवः सदा ॥
आत्मस्थं ये न पश्यन्ति तीर्थे मार्गन्ति ते शिवं ॥३६३ ॥
आत्मस्थं तीर्थमुत्सृज्य बहिस्तीर्थानि यो जपेत् ॥
करस्थं स महारत्नं त्यक्तवा काचं हि मार्गति ॥३६४॥
ज्ञानध्यानरतैः शान्तैर्यद्यस्त्येवं (सस्तो) यं निषेवितं ॥
पापशुद्ध्यर्थमज्ञानात्तत्तीर्थन्न तु योगिनां ॥३६५॥
दिवसं दिवसार्द्धं वा यत्र तिष्ठत्ति योगिनः॥
उन्मङ्गल्यं पवित्रं तत्तत्तीर्थं तत्तपोधनं ॥३६६॥
जिज्ञासुरपि योगस्य यां गतिं लभते मुनिः ॥
न ताङ्गतिमवाप्नोति सर्व्वैरपि महामखैः॥३६७॥
सत्यामागमवार्त्तायामप्रत्यक्षे च तत्फले ॥
अध्येयमैश्वरं ज्ञानमल्पक्लेशं महाफलं ॥३६८॥
यदि क्लेशेन महता भवेत् पुण्यं महाफलं ॥
स्यान्महारत्नवाहिभ्यः फलं पाषाणवाहिनां ॥३६९॥
पाषाणशतसाहस्रं यः स्कन्धेनाभिवाञ्छति ॥
वोढुंश्रमविनाशं वा नैंव तत्फलमाप्नुयात् ॥३७०॥
अङ्गुष्ठोदरमात्रेऽपि सुखं संवाह्य यत्फलं ॥
न तत्फलमवाप्नोति हितं पाषाणवाहिनः ॥३७१॥
एवं हि कष्टानि तपांसि यज्ञान् क्लेशात्मकानल्पफलप्रदाश्च ॥
सन्त्यज्य सर्व्वान् शिवयोगमेकं ध्यायेत्परं मुक्तिकरं विशुद्धं ॥३७२॥
ज्ञानयोगः प्रधानत्वादन्तरङ्गो विमुक्तिदः ॥
बहिरङ्गमप्रधानं यज्ञाद्यं भोगसाधनं ॥३७३॥

यथेहान्तश्चरा राज्ञां प्रिया शंभोर्न्न कर्म्मिणः ॥
तथान्तर्ध्यान निरताः प्रियाः शम्भोर्न्न कर्म्मिणः ॥३७४॥
बहिः कर्म्मकरा यद्वन्नातीव फलभागिनः ॥
दृष्ट्वा नरेन्द्रभवने तद्वदत्रापि कर्म्मिणः ॥३७५॥
यथान्तःपुरचारेण नरः स्त्रीषु प्रसीदति ॥
तथान्तर्ध्यानविधिना प्रसीदति महेश्वरः ॥३७६॥
यथान्तर्द्दन्तिनां दन्ताः सुखिनो न बहिः स्थिताः ॥
तथान्तर्ध्याननिरताः सफला न बहिः स्थिताः ॥३७७॥
अत्यल्पोऽपि यथा दीपः सुमहन्नाशयेत्तमः ॥
योगाभ्यासस्तथाल्पोऽपि महापापं विनाशयेत् ॥३७८॥
अर्द्धयामं मुहूर्त्तं वा ध्यायतः परमं शिवं ॥
यद्भवेत्सुमहत्पुण्यमन्तस्तस्य न विद्यते ॥३७९॥
यद्यन्तरा विपद्येत ज्ञानयोगार्थमुद्यतः ॥
श्रद्धया गुरुभक्त्या रुद्रलोकं स गच्छति ॥३८०॥
अनुभूय सुखं तत्र कुलनाथेन योगिनां ॥
ज्ञानयोगन्ततः प्राप्य संसाराद्विनिवर्त्तते ॥३८१॥
मृदुमध्याधिमात्रत्वाच्छ्रद्धा पुंसां त्रिधा स्थिता ॥
जन्मत्रयाद् ध्रुवं ज्ञानं मन्दश्रद्धोऽपि विन्दति ॥३८२॥
तस्मात्स्वर्ग्गीयमुत्सृज्य कर्म्मयोगमशाश्वतं ॥
ध्यायन्नित्यं विशुद्धञ्च ज्ञानयोगमनुत्तमं ॥३८३॥
इत्येतज्ज्ञानयोगस्य महाभाग्यमुदाहृतं ॥
तदभ्यासरतानाञ्च मुनीनां शान्तचेतसां ॥३८४॥
इति शिवधर्म्मोत्तरे ज्ञानयोगो नाम तृतीयोऽध्यायः ॥३॥

अथ पशुपतिमते शिवधर्मे महाशास्त्रे शिवधर्मत्तरे सत्पात्रप्रदानन्नाम चतुर्थोऽध्यायः

ॐ नमः शिवाय

अथैकभविकन्दानं कर्म्मयोगरतात्मनां ॥
शतजन्म भवेद्दानं तपोनिष्ठप्रतिष्ठितं ॥३८५॥
जपयज्ञाभियुक्तेभ्यः सहस्रभविकं स्मृतं ॥
आहूभूतः सम्प्लवस्थायि प्रदानं शिवयोगिनां ॥३८६॥
अत्यल्पमपि यद्दत्तं शिवज्ञानार्थवेदिनां ॥
तन्महाप्रलयं यावद्दातुर्भोगाय कल्पते ॥३८७॥
न दानमल्पं बहु वा किञ्चिदस्ति विजानतः ॥
देशकालविधिश्रद्धापात्रयुक्तन्तदक्षयं ॥३८८॥
पात्रे देशे च काले च विधिना श्रद्धया च यत् ॥
दत्तं हुतं कृतं चेष्टं तदनन्तफलं भवेत् ॥३८९॥
तिलार्द्धमात्रकेणापि यत्प्रमाणेन दीयते ॥
सत्पात्रे श्रद्धया किञ्चित् तद्भवेत् सार्व्वकामिकं ॥३९०॥
यद्धौतं ज्ञानसलिलैः शीलभस्मप्रमार्ज्जितं ॥
तत्पात्रं सर्व्वपात्राणामुत्तमं सार्व्वकामिकं ॥३९१॥
ज्ञानोडुपेन यः पुंसां त्राता संसारसागरात् ॥
अज्ञानां पालनात् त्राणात् तत्पात्रं परमं स्मृतं ॥३९२॥
ज्ञानप्लवबलोपेतस्त्राति पापमहार्णवात् ॥
नाज्ञानस्तारयेदंव्यं किं शिला तारयेच्छिलां ॥३९३॥
द्विजानां वेदविदुषां कोटिं सम्भोज्ययत् फलं ॥
भिक्षामात्रप्रदानेन तत्फलं शिवयोगिनां ॥३९४॥
शिवयोगी गृहे यस्य भिक्षां गृह्णाति संस्कृतां ॥
कुलमुत्तारयेत्तस्य नरकार्णवसंस्थितं ॥३९५॥
यज्ञाग्निहोमतीर्थेषु यत्फलं परिकीर्त्तितं ॥
योगिनामन्नदानेन तत्समग्रफलं लभेत् ॥३९६॥
ज्ञानिने शान्तचित्ताय शिवध्यानरताय च ॥
श्रद्धयान्नं सकृद्दत्वा सर्व्वपापैः प्रमुच्यते ॥३९७॥
एकं मुनिवरं शान्तमीश्वरर्प्पितमानसं ॥
भोजयित्वा सकृद् भक्त्या सर्व्वकामानवाप्नुयात् ॥३९८॥

ध्यायमानः शिवं योगी भुङ्क्तेऽन्नं सततं यतः ॥
ततः साक्षाच्छिवेनैव तद्भुक्तमशनम्भवेत् ॥३९९॥
पितृनुद्दिश्य यः श्राद्धं भोजयेच्छिवयोगिनं ॥
स गच्छेदीश्वरस्थानमेकविंशकुलान्वितः ॥४००॥
शिवाय सर्व्वपाकाग्रं निवेद्याग्नौ च होमयेत् ॥
कल्पयेच्च गुरोर्भागमित्येष सततं विधिः ॥४०१॥
शिवाग्निगुरुविप्रेभ्यः सर्व्वपाकाग्रमन्वहं ॥
योऽनिवेद्यात्मना भुङ्क्ते स भुङ्क्ते किल्विषं नरः ॥४०२॥
कृषिवृध्यादिवाणिज्यक्रोधासत्यार्ज्जनादिभिः ॥
पुंसां पापानि वर्द्धन्ते सूनादोषैश्च पञ्चभिः ॥४०३॥
सम्मार्ज्जनाञ्जनन्तोयमग्निकण्डनपेषणी ॥
सूनाः पञ्चगृहस्थानान्नित्यं पापाभिवृद्धये ॥४०४॥
शिवाग्निगुरुपूजाभिः पापैरेतैर्न्न लिप्यते ॥
अन्यैश्च पातकैर्घोरैस्तस्मात् सम्पुजयेत्त्रयं ॥४०५॥
शिवाग्निगुरुनैवेद्ये यावत्सिक्थानि संख्यया ॥
तावद्वर्षसहस्राणि दाता शिवपुरे वसेत् ॥४०६॥
घृतसूपयुतैः सिक्थैः पुण्यं दशगुणोत्तरं ॥
अवदत्स युतैर्ज्ञेयं पुण्यं शतगुणोत्तरं ॥४०७॥
षष्टिकोदननैवेद्यैः सहस्त्रगुणितं फलं ॥
सुगन्धशालिनैवेद्यैर्व्विज्ञेयमयुताधिकं ॥४०८॥
रक्तशाल्यन्ननैवेद्यः फलं स्यान्नियुताधिकं ॥
कलमैःशालिनैवेद्यैर्द्दशलक्षाधिकं फलं ॥४०९॥
एवं शालिविशेषेण फलं स्यादुत्तरोत्तरं ॥
सद्व्यञ्जनयुजां भूयस्तत्पुण्यमभिवर्द्धते ॥४१०॥
व्यञ्जनानि विचित्राणि स्वादूनि सुरभीणि च ॥
कोटिफलाधिकान्याहुः स्निग्धानि मधुराणि च ॥४११॥
क्षीरभक्तेन नैवेद्यं दशकोटिगुणाधिकं ॥
पानकानां सुगन्धानां फलं तुल्यं रसालया ॥४१२॥
तथा फलविशेषैश्च स्वादुभिः सदृशं फलं ॥
गुडखण्डकृतैर्भक्ष्यैघृतेन परिपाचितैः ॥४१३॥
कोटिसहस्रगुणितं गेयं पुण्यं सुगन्धिभिः ॥
दधिशर्करया युक्तं तत्पुण्यं स्याद्दशाधिकं ॥४१४॥

रसालां सुघनां सीतां कर्प्पूरसुरभीकृतां ॥
निवेद्य पुण्यमाप्नोति कोटिकोटिगुणाधिकं ॥४१५॥
घृताशनेन विज्ञेयं रसालातुलितं फलं ॥
शर्क्कराखण्डयुक्तेन रसालाभ्यधिकं फलं ॥४१६॥
यथा यथा हि स्वादूनि स्निग्धानि सुरभीणिच ॥
भक्त्यन्नपानमात्राणि तत्फलानि तथा तथा ॥४१७॥
यद्वा यद्वा शिवायान्नं लिङ्गनिगुरुमूर्त्तये ॥
भक्त्या निवेद्य भुञ्जानः फलमक्षयमाप्नुयात् ॥४१८॥
एवं यः कुरुते श्राद्धं भक्तितः शिवयोगिनां ॥
स पितॄन् सर्व्वपापेभ्यः समुद्धृत्य दिवन्नयेत् ॥४१९॥
गङ्गास्नानसमं पुण्यं दर्शनं शिवयोगिनां ॥
सर्व्वतीर्थाभिषेकच तत्सम्भाषणमुत्तमं ॥४२०॥
मुच्यते सर्व्वपापेभ्यः प्रणम्य शिवयोगिनं ॥
शुश्रूषयित्वा भक्त्या तु शिवलोके महीयते ॥४२१॥
युगवत् पूजितास्तेन ब्रह्मविष्णुमहेश्वराः ॥
पितरः सर्व्वदेवाश्च योऽर्च्चयेच्छिवयोगिनं ॥४२२॥
तुष्यन्ति पितरस्तस्य सुवृष्च्चैव च कर्षकाः ॥
यः श्राद्धे पूजयेद् भक्त्या विशेषाच्छिवयोगिन ॥४२३॥
अपि नः स कुले कश्चिज्जनयेत्पुत्रमीदृशं ॥
यःसम्पूज्य शिवं श्राद्धे भोजयेच्छिवयोगिनं ॥४२४॥
नृत्यन्ति पितरस्तुष्टा गायन्ति च पितामहाः ॥
अद्य नः पुत्रः पौत्रो वा योगिन्द्रं भोजयिष्यति ॥४२५॥
शिवयोगिनमायान्तं दृष्टैव गृहसंस्थितं ॥
कीडन्त्योषधयःसर्व्वायास्यामःस्वर्ग्गमक्षयं॥४२६॥
अनुग्रहाय लोकानां श्रद्धायाश्च परीक्षणे ॥
चरन्त्यतिथिरूपेण देवा योगी च भूतले ॥४२७॥
तस्मादतिथिमायान्तमनुगच्छेत्कृताञ्जलिः ॥
स्वागतासनपाद्यार्घस्नानान्नशयनादिभिः ॥४२८॥
रूपान्वितं विरूपं वा मलिनं मलिनाम्बरं ॥
योगीन्द्राशङ्कया नित्यमतिथिन्न विचारयेत् ॥४२९॥
शिवयोगिशरीरे तु नित्यं सन्निहितः शिवः ॥
योगीन्द्रं पूजयेत् तस्मात्स साक्षात् पूजितः शिवः ॥४३०॥

अधोमुखोर्ध्वपादास्ते पतन्ति नरकाग्निषु ॥४३१॥
कृमिभिर्भिन्नवदनास्ताप्यमानाश्च वन्हिना ॥
प्रपीड्यन्ते वधैर्घोरैर्य्यावदाचन्द्रतारकं ॥४३२॥
ये शिवज्ञाननिरतान् प्रद्विषन्ति मनागपि ॥
पश्चाद्बाहुकबद्धास्ते नीयन्ते यमसादनं ॥४३३॥
तत्राग्नितप्तैः सन्दंशैः प्रपीडचोरश्च पादतः ॥
तेषामुत्पाट्यते जिह्वाशतशोऽथ सहस्रशः ॥४३४॥
विकत्थन्ते महात्मानं ये मूढाः शिवयोगिनं ॥
ते यान्ति श्रोतृभिः सार्द्धं नरकेषु न संशयः ॥४३५॥
ये चापवादं श्रृण्वन्ति विमूढाः शिवयोगिनां ॥
ते विशेषेण पच्यन्ते नरकेष्वामहीक्षयात् ॥४३६॥
सति श्रोतरि वक्ता स्यादपवादस्य योगिनां ॥
तस्माच्छ्रोता तु पापीयांस्तद्दण्डः सुमहानतः ॥४३७॥
वक्ता श्रोताऽनुमन्ता च प्रयोक्ता दूषणस्य च ॥
एतैः संयुज्यते पञ्च पञ्चैते नारकाः स्मृताः ॥४३८॥
इति योगीन्द्रपात्रस्य महाभाग्यमुदाहृतं ॥
पूजापवादं विषयमपात्रं श्रृणुताधुना ॥४३९॥
अज्ञानपङ्कनिर्म्मग्नमात्मत्राणविवर्ज्जितं ॥
अपुण्यगिरिणाक्रान्तमपात्रं गुणवर्ज्जितं ॥४४०॥
आमपात्रे रसो यद्वन्नश्यते तच्च भाजनं ॥
दानमज्ञे तथा न्यस्त सह पात्रेण नश्यति ॥४४१॥
सद्बीजमुषरे यद्वद्वापितन्निष्फलम्भवेत् ॥
दानन्तद्वदपात्रेषु विन्यस्तन्निष्फलं भवेत् ॥४४२॥
भस्मनीव हुतं हव्यं यथा होतुः सुनिष्फलं ॥
ज्ञानाग्निरहिते पात्रे तथा दानमनर्थकं ॥४४३॥
यथा षण्ढोऽफलः स्त्रीषु यथा गौर्ग्गवि चाफ्फला ॥
मानवस्य तथा जन्म ज्ञानहीनस्य निष्फलं ॥४४४॥
लोहोडुपेन प्रतरन्निमज्जत्युदके यथा ॥
तथा दाता ग्रहीता च पतत्यज्ञस्तथाल्पधीः ॥४४५॥
कारुण्यात्सर्व्वभूतेभ्यः श्रद्धया यत्प्रदीयते ॥
दानन्तदपि विज्ञेयं सार्व्वकामिकमुत्तमं ॥४४६॥

दीनान्धकृपणानाथबालवृद्धकृशातुरान् ॥
एताननुकम्पयामीत्यर्थी गृह्वाति निस्पृहः ॥४४७॥
अह(द)त्वा ज्ञानितः(न) पात्रं निस्पृहत्वान्न ते ऽर्थिनः ॥
अल्पिकापि हि तत्पूजा पर्य्याप्ता ह्यात्मनः फलं ॥४४८॥
नहि स्वार्थ समुद्दिश्य प्रतिगृह्वन्त्ति साधवः ॥
दातुरेवोपकाराय यस्माद गृह्णन्ति निस्पृहाः ॥४४९॥
दरिद्रः साधुभिर्य्यत्नात्प्रार्थनीयोऽनुकम्पया ॥
अदानादस्य दारिद्रान्दानादैश्वर्य्यमाप्नुयात् ॥४५०॥
दातुरेवोपकाराय वदत्यर्थी ददस्व मे ॥
यस्माद्दाता प्रयात्यूर्ध्वमधस्तिष्ठेत् प्रतिग्रहात ॥४५१॥
देहीत्येव वदन्नर्थी जनम्बोधयतीव सः ॥
यदिदं कष्ठमर्थित्वं प्रागदानफलंहितत् ॥४५२॥
बोधयन्ति न यावत्ते देहीति कृपणाञ्जनाः ॥
अवस्थेयमदानस्य माभूदेवं भवानपि ॥४५३॥
कल्याणमित्रमायान्तमर्थिनं को न पूजयेत् ॥
दानात्स्वर्ग्गमवाप्नोति कोऽन्यो बन्धुरिहार्थिनः ॥४५४॥
इहामुत्रफलेनापि दातारमनुयोजयन् ॥
आयात्यर्थी गृहन्दातुं कस्तन्न प्रतिपूजयेत् ॥४५५॥
नार्थिनः स्युः कथ पूज्यापचमाना दिने दिने ॥
येबलादप्यनिच्छन्तं योजयन्ति नरं श्रिया ॥४५६॥
अहन्यहनि मार्ग्गन्त्तं को न मन्यद्गुरुं यथा ॥
मार्ज्जनन्दर्प्पणस्येव यः करोति दिने दिने ॥४५७॥
करमुत्तानकं कृत्वा दानं गृह्णत्ति यो द्विजः ॥
दानादूर्ध्वगतिस्तेन- दातुदर्शयतीव सः ॥४५८॥
एकेन तिष्ठत्यधस्तदन्येनोपरि तिष्ठति ॥
दातृयाचकयोर्भेदः कराभ्यामेव सूचितः ॥४५९॥
यः प्राप्तमर्थिनन्दीनं त्यक्त्वा पात्रमुदीक्षते ॥
स वणिगधर्म्मयुक्तत्वान्न दाता परमार्थतः ॥४६०॥
यद्यर्थिनो नरा न स्युर्द्दानकर्म्म कथं भवेत् ॥
सत्स्वर्थिषु भवेद्दानं सहि दाने च तत्फलं ॥४६१॥
यदि स्तब्धाः शठा दीना न स्युरप्रियवादिनः ॥
क्व नु दानन्दया क्षान्तिर्भाव्यते साधुभिस्तदा ॥४६२॥

यदि नाम न देयं स्यात् सम्प्राप्तायार्थिने गृहे ॥
किं वाक्यान्यपि नष्टानि प्रियाण्यनुगतानि च ॥४६३॥
प्रत्युत्थानाभिगमनं स्वागतं स्वासनं प्रियं ॥
पादोदकमनुव्रज्या स्वर्ग्गसोपानपुस्तकं ॥४६४॥
वित्तं चित्तानुसारेण कदा कस्य भविष्यति ॥
ग्रासादर्द्धमपिग्रासं युक्तं दातुं सदार्थिनां ॥४६५॥
दानं प्रियविनिर्मुक्तं नष्टमाहुर्म्मनीषिणः ॥
तस्मात्सकृत्प्रदातव्यमनन्तफलमिच्छता ॥४६६॥
प्रत्याख्यानमपि श्रेयः प्रियानुनयपेशलं ॥
न तु दानमसत्कारपारुष्यमलिनीकृतं ॥४६७॥
वरन्न दत्तमर्थिभ्यः सक्रोधेनान्तरात्मना ॥
न तद्धनन्न च प्रीतिर्नधर्म्मः प्रियवर्ज्जितः ॥४६८॥
दानं व्रतानि नियमो यज्ञा ध्यानं हुतं तपः ॥
यत्नेनापि कृतं सर्व्वं क्रोधनस्य वृथा भवेत ॥४६९॥
यः श्रद्धयार्च्चितं दद्यात् प्रतिगृह्णाति चार्च्चितः ॥
तावुभौ गच्छतः स्वर्ग्गं नरकन्तद्विपर्ययात् ॥४७०॥
औदार्यं स्वागतं मैत्रीमनुकम्पाममत्सरं ॥
गुणानावहते पञ्च दातुर्दानं महाफलं ॥४७१॥
वाराणसी कुरुक्षेत्रं प्रयागः पुष्कराणि च ॥
गङ्गा समुद्रतीरञ्च नैमिषामरकण्टकाः ॥४७२॥
श्रीपर्वतोमानसञ्च गोकर्णो वेदपर्वतः ॥
इत्याद्याः कीर्त्तिता देशाः सुरसिद्धनिषेविताः ॥४७३॥
सर्व्वे शिवाश्रमाः पुण्याः सर्व्वा नद्यः सपर्वत्ताः ॥
गोसिद्धर्षिनिवासाश्च देशाः पुण्याः प्रकीर्त्तिताः ॥४७४॥
शिवायतनसंस्थानां यदल्पमपि दीयते ॥
तदनन्तफलं ज्ञेयं शिवक्षेत्रानुभावतः ॥४७५॥
ग्रहणञ्चन्द्रसूर्याभ्यां दक्षिणायनमुत्तरं ॥
विषुवत्सव्यतीपातं षडशीतिमुखन्तथा ॥४७६॥
दिनक्षयाणि संक्रान्तिर्ज्ञेयं विष्णुपदं पुनः ॥
इति कालः समाख्यातः पुंसां पुण्यविवर्द्धनः ॥४७७॥
भक्तिर्भावः परा प्रीतिः शिवधर्म्मैकतानता ॥
प्रतिपत्तिरिति ज्ञेयं श्रद्धापर्यायपञ्चकं ॥४७८॥

श्रद्धामात्रंच जननी ज्ञानस्य सुकृतस्य च ॥
तस्माच्छ्रद्धां समुत्पाद्य देयमक्षयमिच्छता ॥४७९॥
यद्दानं श्रद्धया पात्रे विधिवत् प्रतिपादितं ॥
तदनन्तफलं ज्ञेयमपि बालाग्रमात्रकं ॥४८०॥
आर्त्तेषु दीनेषु गुणान्वितेषु यच्छ्रद्धयास्वल्पमपि प्रदत्तम् ॥
तत्सर्व्वकामान् समुपैति लोके श्रद्धैव दानं प्रवदन्ति तज्ज्ञाः ॥४८१॥
श्रद्धाप्रधानं विज्ञेयं सत्पात्रादिचतुष्टयं ॥
श्रद्धातः कीर्त्तिता तस्मान्नाश्रद्धातः फलं भवेत् ॥४८२ ॥
इति शिवधर्मोत्तरे सत्पात्रप्रदानश्चतुर्थोऽध्यायः ॥४॥

अथ पशुपतिमते शिवधर्मे महाशास्त्रे शिवधर्मोत्तरे शिवपुरधर्मगतिर्नाम पञ्चमोऽध्यायः

ॐ नमः शिवाय

अथ धर्म्माः शिवेनोक्ताः शिवधर्म्मागमोत्तरे ॥
ज्ञेया बहुविधास्ते च कर्म्मयोगोपभेदतः ॥४८३॥
हिंसादोषविनिर्म्मुक्ताः क्लेशायासविवर्ज्जिताः ॥
धर्म्मा भूतहिताः शुद्धाः सुसूक्ष्माः सुमहाफलाः ॥४८४॥
अनन्तशावावलिताः शिवमूले च संस्थिताः ॥
सर्व्वे सर्व्वगुणोपेताः शिवधर्म्माः सनातनाः ॥४८५॥
तारयन्त्यशिवाद्यस्माद्धार्यन्ते शिवभावितैः ॥
शिवधर्म्माः स्मृतास्तस्मात्संसारार्णवतारणाः ॥४८६॥
अथाहिंसा क्षमा सत्यं ह्रीः श्रद्धेन्द्रिय संयमः ॥
दानमिज्या जपो ध्यानं दशकं धर्म्मसाधनं ॥४८७॥
असमस्तैः समस्तैर्व्वा शिवधर्म्मैरनुष्ठितैः ॥
शिवैकस्थानसम्प्राप्तैर्गतिश्चैकैव कीर्त्तिता ॥४८८॥
यथा भूः सर्व्वभूतानां स्थानं साधारणं स्मृता ॥
तथा तच्छिवभक्तानां तुल्यं शिवपुरं स्मृतं ॥४८९॥
यथेह सर्व्वभूतानां भोगाः साधारणाः स्मृताः ॥
नानापुण्यविशेषेण भोगाः शिवपुरे तथा ॥४९०॥
शुभाशुभफलञ्चात्र भुज्यते कर्म्म देहिभिः ॥
शिवधर्म्मस्य चैकस्य फलन्तत्रोपभुज्यते ॥४९१॥
यापादृग्भवेत्पुण्यं श्रद्धामात्रविशेषणं ॥
भोगास्तादृग्विधास्तस्य ज्ञेयाः सातिशयाः पुरे ॥४९२॥
स्थानप्राप्तिफले तुल्ये भोगाः सातिशयाः स्थिताः ॥
कुर्यात् पुण्यं महत् तस्मान्महाभोगजिगीषया ॥४९३॥
सर्व्वाधिपत्यमेवैकन्तत्र नास्ति पुरोत्तमे ॥
स्वात्मभोगाधिपत्यं स्याच्छिवः सर्व्वजगत्पतिः ॥४९४॥
केचित्तत्रैव मुच्यन्ते ज्ञानयोगरता नराः ॥
आवर्त्तन्ते पुनश्चान्ये संसारे भोगतत्पराः ॥४९५॥
तस्माद्विमोक्षमन्विच्छेद्भोगासक्तिं विवर्ज्जयेत् ॥
विरक्तः शान्तचित्तात्मा शिवज्ञानमवाप्नुयात् ॥४९६॥

ये चान्यासक्तहृदया यजन्तीशम्प्रसङ्गतः ॥
तेषामपि ददातीशः स्थानम्भावानुरूपतः ॥४९७॥
तत्रार्च्चयन्ति ये रुद्रं सकृदुच्छिष्टकर्म्मणा ॥
तेषां पिशाचलोकेषु भोगानीशः प्रयच्छति ॥४९८॥
द्विरर्च्चयन्ति ये रुद्रं क्रुराः संकुद्धलोचनाः ॥
रक्षोलोके शिवस्तेषां महाभोगान् प्रयच्छति ॥४९९॥
त्रिरर्च्चयन्ति ये रुद्रं मद्यमांसातुरा नराः ॥
यक्षलोके शिवस्तेषां दिव्यान् भोगान् प्रयच्छति ॥५००॥
ये गीतनृत्यं कुर्व्वन्ति त्रिश्चतुर्व्वा यदृच्छया ॥
शिवाग्रतस्तु ते यान्ति गन्धर्व्वभवनन्नराः ॥५०१॥
लोके ख्यातिं समुद्दिश्य पञ्चार्च्चयति यः शिवं ॥
तस्येन्द्रभवने रुद्रः कामान् दिव्यान् प्रयच्छति ॥५०२॥
कामासक्तेन चित्तेन यः षडर्च्चयते शिवं ॥
प्राजापत्ये शिवस्तस्य लोके भोगान् प्रयच्छति ॥५०३॥
दारिद्रचमुक्तिहेतुत्वात् सप्तार्च्चयत्युपोषितः ॥
सोमलोके शिवेनैव दिव्यैर्भोगै रमन्ति (ते) च ॥५०४॥
ज्ञेयं विष्णुपुरादूर्ध्वं दिव्यं शिवपूरं महत्॥५०५॥
तद्भोगास्थानमतुलंकर्म्मरतात्मनां ।
अप्रमेयगुणैर्दिव्यैर्व्विमानैः सार्व्वकामिकैः ॥
असंख्यैस्तत्पुरं व्याप्तं सर्व्वप्राण्युपकारकैः ॥५०६॥
सहस्रभौमविस्तीर्णः सूर्यकोटिसमप्रभः ॥
रुद्रलोक इति प्रोक्तश्चाशेषगुणसंयुत ॥५०७॥
सर्व्वेषां शिवभक्तानां तत्परं परिकीर्तितं ॥
रुद्रक्षेत्रमृतानाञ्च जङ्गमस्थावरात्मनां ॥५०८॥
अप्येकदिवसं भक्त्या यः पूजयति शङ्करं ॥
सोऽपि याति शिवस्थानं किं पुनर्ब्बहुशोऽर्च्चयेत ॥५०९॥
तस्मादीशे सदा भक्तिम्भावयेदात्मनात्मनि ॥
तन्माहात्म्यविचारेण भवरोगविरागतः ॥५१०॥
एवं शिवानुभावेन निकृष्टेनापि कर्म्मणा ॥
नरैः स्थानान्यवाप्यन्ते देशे भावानुरूपतः ॥५११॥
इत्येतदपरं प्रोक्तं क्षीमच्छिवपुरं महत ॥
देहिनां कर्म्म निष्ठानां पुनरावर्त्तकं स्मृतं ॥५१२॥

ऊर्ध्वं शिवपुराज्ज्ञेयं स्थानत्रयमनुत्तमं ॥
नित्यं परं विशुद्धञ्च स्कन्दोमाशङ्करात्मकं ॥५१३॥
स्कन्दं शक्तिधरं शान्तं षण्मुखं शिखिवाहनं ॥
तप्तचामीकरप्रख्यं त्रिशिखं बालरूपिणं ॥५१४॥
प्रभाभिर्भाषितन्देवं सर्व्वलोकानुकम्पकं ॥
ध्यायमानः प्रसन्नात्मा गुहस्थानमवाप्नुयात् ॥५१५॥
कन्यारूपामुमां शान्तां सूर्यकोटिसमप्रभां ॥
ध्यायमानः सदा भक्त्या देव्याः स्थानमवाप्नुयात् ॥५१६॥
शुद्धस्फटिकसंङ्काशं जटामुकुटधारिणं ॥
त्र्यक्षं चतुर्भुजं शान्तंमक्षमालाधरं हरं ॥५१७॥
वरदाभयहस्तञ्च त्रिशूलासक्तपाणिकं ॥
ध्यायमानः शिवन्नित्यं शिवस्थानमवाप्नुयात् ॥५१८॥
ये सम्प्राप्ताः शिवस्थानं ज्ञानयोगरता नराः ॥
न तेषां पुनरावृत्तिर्घोरे संसारसागरे ॥५१९॥
सर्व्वज्ञाः सर्व्वगाः शुद्धाः परिपूर्णा महेश्वराः ॥
शिवतुल्यबलाः सिद्धाः परं शिवपुरं गताः ॥५२०॥
योगं प्रवेदयिष्यामि पृथगध्यायसम्मितं ॥
उपरिष्टाच्च लोकानां स्वरूपं चाप्यनुक्रमात् ॥५२१॥
तत्राष्टगुणमैश्वर्यं पार्थिवं पिशिताशिनां ॥
तत्सायुज्यगतानाञ्च नराणां तत्समं स्मृतं ॥५२२॥
रक्षस्सु षोडशकलं पार्थिवाञ्च तद्द्विधा ॥
एतच्च निरवशेषं यक्षेष्वन्यच्च तैजसं ॥५२३॥
गान्धर्व्वाणाञ्च वायव्यं याक्षञ्च सकलं स्मृतं ॥
पाञ्चभौतिकमिन्द्रस्य चत्वारिंशद्गुणम्महत् ॥५२४॥
सोमस्य मानसं दिव्यं यच्चाधः पाञ्चभौतिकं ॥
सौम्यं प्रजापतिस्थानमहङ्कारगुणान्वितं ॥५२५॥
चतुष्षंष्टिगुणं ब्राह्मं बौद्धमैश्वर्यमुत्तमं ॥
विष्णोः प्रधानिकं सूक्ष्ममैश्वर्यम्ब्रह्मणः परं ॥५२६॥
श्रीमच्छिवपुरे नित्यमैश्वर्यं सार्व्वकामिकं ॥
शिवेन शिवभक्तानां कल्पितं वैष्णवात्परं ॥ ५२७॥
स्कन्दस्य भगवत्याश्च वैष्णवात् परमम्महत् ॥
सूक्ष्ममव्यक्तिकं दिव्यमैश्वर्यं सार्व्वकामिकं ॥५२८॥

अनन्तगुणमैश्वर्यं शिवस्यात्मगतं महत् ॥
आदिमध्यान्तरहितं विशुद्धं तत्वलक्षणं ॥५२९॥
सर्व्वाभिभासकं सूक्ष्ममनौपम्यं परात्परं ॥
सुसम्पूर्णं जगद्धेतुः पशुपाशविमोक्षणं ॥५३०॥
यो यां संस्थामनुप्राप्तस्तस्य भोगास्तदात्मकाः ॥
ऐश्वर्यन्तत्प्रमाणञ्च भवेदीशप्रसादतः ॥५३१॥
तारारूपविमानानाभिमा दृश्यन्ति कोटयः ॥
अष्टाविंशतिरेवोर्ध्वं सुदीप्ताः सुहृदात्मनां ॥५३२॥
ये कुर्व्वन्ति नमस्कारमीश्वराय क्वचित क्वचित् ॥
सम्पर्क्कात्कौतुकाल्लोभात्तद्विमानं लभन्ति ते ॥५३३॥
नामसङ्कीर्तनाद्वापि प्रसङ्गेन शिवस्य यः ॥
कुर्याद्वापि नमस्कारं तत्तस्यापिफलंलभेत् ॥५३४॥
इत्येता गतयः प्रोक्ता महत्यः शिवकर्म्मणां ॥
अत्यल्पाल्पतरेणापि पुंसामीशानभावतः ॥५३५॥
इति शिवधर्म्मोत्तरे शिवपुरधर्मगतिर्न्नाम पञ्चमोऽध्यायः ॥५॥

अथपशुपतिमते शिवधर्म्मे महाशास्त्रे शिवधर्मोत्तरे षष्ठोऽध्यायः

॥ॐ नमः शिवाय ॥

अथाधः पतनात् पुंसामधर्म्मः परिकीर्त्तितः ॥
नरकादौ महाघोरे पापानां यातनाः स्मृताः ॥५३६॥
अधर्म्मभेदा विज्ञेयाश्चित्तवृत्तिप्रभेदतः ॥
स्थूलाः सूक्ष्माः सुसूक्ष्माश्च कोटिभेदैरनेकधा ॥५३७॥
तत्र ये पाप निचयाः स्थूला नरकहेतवः ॥
ते समासेन कथ्यन्ते मनोवाक्कायसाधनाः ॥५३८॥
परस्त्रीपरसङ्कल्पश्चेतसोऽनिष्टचिन्तनं ॥
अकार्य्याभिनिवेशश्च चतुर्द्धा कर्म्म मानसं ॥५३९॥
अनिबद्धप्रलापित्वमसत्यञ्चाप्रियञ्च यत् ॥
परापवादः पैशुन्यं चतुर्द्धा कर्म्म वाचिकं ॥५४०॥
अभक्ष्यभक्षणं हिंसा मिथ्याकामनिवेदनं ॥
परस्वानामुपादानं चतुर्द्धा कर्म्म कायिकं ॥५४१॥
इत्येतद् द्वादशविधं कर्म्म प्रोक्तं त्रिसाधनं ॥
अस्य भेदान् पुनर्व्वक्ष्ये येषां फलमनुत्तरं ॥५४२॥
ये द्विषन्ति महादेवं संसारार्णवतारणं ॥
सुमहापातकोपेतास्ते यान्ति नरकाग्निषु ॥५४३॥
दूषयन्ति शिवज्ञानं ये सर्व्वार्थप्रसाधकं ॥
सुमहत् पातकन्तेषां निरयार्णवगामिनां ॥५४४॥
ये शिवज्ञानवक्तारं विद्विषन्ति गुरुन्नराः ॥
सुमहापातकोपेतास्ते यान्ति नरकार्णवं ॥५४५॥
शिवनिन्दा गुरुनिन्दा शिवज्ञानस्य दूषणं ॥
देवद्रव्यापहरणं गुरुद्रव्यविनाशनं ॥५४६॥
हरन्ति ये च सम्मूढाः शिवज्ञानस्य पुस्तकं ॥
सुमहापातकान्याहुरन्नन्तानि फलानि च ॥५४७॥
नाभिनन्दन्ति ये दृष्ट्वा शिवपूजां प्रकल्पितां ॥
न नमन्त्यर्च्चितं दृष्ट्वा पूजितन्न स्तुवन्ति च ॥५४८॥
यथेष्टचेष्टा निःशङ्काः सन्तिष्ठन्ति रमन्ति च ॥
उपचारविनिर्म्मुक्ताः शिवाग्निगुरुसन्निधौ ॥५४९॥

स्थानसंस्कारपूजाञ्च ये न कुर्व्वन्ति पर्व्वसु ॥
शिवविद्यागुरूणाञ्च कर्म्मयोगव्यवस्थिताः ॥५५०॥
ये त्यजन्ति शिवाचारं शिवभक्तान् द्विषन्ति च ॥
शिवनिन्दासमान्येव महान्ति पातकानि हि ॥५५१॥
असंम्पूज्य शिवज्ञानं येऽधीयन्ते लिखन्ति ॥
अन्यायतः प्रयच्छन्ति श्रृण्वन्त्युच्चारयन्ति च ॥५५२॥
विक्रीयन्ति च लोभेन कुज्ञाननियमेन च ॥
असंस्कृतप्रदेशेषु यथेष्टं स्थापयन्ति च् ॥५५३॥
शिवज्ञानकथाक्षेपं यः कृत्वाऽन्यत् प्रभाषते ॥
नाधीयीत समर्थश्च यः प्रमादं करोति च ॥५५४॥
अशुचिश्चाशुचौ स्थाने यः प्रवक्ति श्रृणोति च ॥
इति सर्व्वं समासेन ज्ञाननिन्दासमं स्मृतं ॥५५५॥
गुरुपूजामकृत्वैव यः शास्त्रं श्रोतुमिच्छति ॥
न करोति च शुश्रूषामाज्ञां भक्तिश्च भावतः ॥५५६॥
नाभिनन्दति तद्वाक्यमुत्तरञ्च प्रयच्छति ॥
गुरुकर्म्मणि शाठ्यञ्च तदुपेक्षां करोति च ॥५५७॥
गुरुं शान्तमशक्तं वा विदेशप्रस्थितन्तथा ॥
अरिभिः परिभूतं वा यः सन्त्यजति पापकृत् ॥५५८॥
तद्भार्यापुत्रमित्रेषु यश्चावज्ञाङ्करोति च ॥
इत्येतत् पातकं ज्ञेयं गुरुनिन्दासमं महत् ॥५५९॥
ब्रह्मघ्नश्च सुरापश्च स्तेयी च गुरुतल्पगः ॥
महापातकिनस्त्वेते तत्संसर्गी च पञ्चमः ॥५६०॥
क्रोधाद् द्वेषाद् भयाल्लोभाद्ब्राह्मणस्य वदेच्च यः ॥
मर्म्मान्तिकं महादोषं ब्रह्मघ्नः स प्रकीर्त्तितः ॥५६१॥
ब्राह्मणं यः समाहूय याच्यमानं सकिञ्चनं ॥
पश्चान्नास्तीति च ब्रूयात्स वै ब्रह्महणः स्मृतः ॥५६२॥
यश्च विद्याभिमानेन उद्वेजयति स द्विजं ॥
उदासीनं सभामध्ये ब्रह्महा स प्रकीर्त्तितः ॥५६३॥
मिथ्या गुणैः स्वमात्मानं नयत्युत्कर्षणम्बलात् ॥
गुरूणाञ्च विरुद्धो यः स वै ब्रह्महणः स्मृतः ॥५६४॥
क्षुत्तृट्सन्तप्तदेहानां द्विजानां भोक्तुमिच्छतां ॥
यः समाचरते विघ्नं तमाहुर्ब्रह्मघातकं ॥५६५॥

पिशुनः सर्व्वलोकानां रन्ध्रान्वेषणतत्परः ॥
उद्वेगजननः क्रूरः सवै ब्रह्महणः स्मृतः ॥५६६॥
गवां तृषाभिभूतानां जलार्थमुपसर्प्पतां ॥
यः समाचरते विध्नं तमाहुर्ब्रह्मघातकं ॥५६७॥
परदोषं परिज्ञाय नृपकर्णे जपेतु यः ॥
पापीयान् पिशुनः क्षुद्रः सर्वे ब्रह्महणः स्मृतः ॥५६८॥
देवद्विजगतां भूमिं पूर्व्वभुक्तां हरेत्तु यः ॥
प्रणष्टामपि कालेन तमाहुर्ब्रह्मघातकं ॥५६९॥
द्विजवृत्यापहरणे न्यायतः समुपार्ज्जतं ॥
ब्रह्महत्यासमं ज्ञेयं पातकं नात्र संशयः ॥५७०॥
अधीस यः शिवज्ञानं परित्यजति मूढधीः ॥
सुरापानसमं ज्ञेयं तस्य पातकमुल्वणं ॥५७१॥
अग्निहोत्रपरित्यागी पञ्चयज्ञीयकर्म्मणां ॥
मातापितृपरित्यागी कूटसाक्षी सुकृद्वधः ॥५७२॥
अप्रियः शिवभक्तानामभक्ष्यस्य च भक्षणः ॥
वने निरपराधानां प्राणिनाञ्च निपातनं ॥५७३॥
गवालये वने चाग्निं पुरे ग्रामे च दीपयेत् ॥
इति पापानि घोराणि सुरापानसमानि च ॥५७४॥
दीनसर्व्वस्वहरणं नरस्त्रीगजवाजिनां ॥
गोभूरत्नत्रतानामोषधीनां रसस्य च ॥५७५॥
चन्दनागुरुकर्पूरकस्तूरीपटवाससां ॥
हस्तन्यासापहरणं रुक्मस्तेयसमं स्मृतं ॥५७६॥
कन्यानां वरयोग्यानामदानं सदृशे वरे ॥
पुत्रमित्रकलत्रेषु गमनं भगिनीषु च ॥५७७॥
कुमारीसाहसं घोरमन्त्यजस्त्रीनिषेवणं ॥
स्ववर्णायाञ्च गमनं गुरुतल्पसमं स्मृतं ॥५७८॥
महापातकतुल्यानि पापान्युक्तानि तानि च ॥
तानि पातकसंज्ञानि तद्भूतान्युपपातकं ॥५७९॥
द्विजायार्थं प्रतिज्ञाय न प्रयच्छति यः पुनः ॥
न च स्मारयते विप्रस्तुल्यं तदुपपातकं ॥५८०॥
द्विजद्रव्यापहरणं मर्यादाया व्यतिक्रमः ॥
अतिमानोऽतिकोपश्च दाम्भिकत्वं कृतध्नता ॥५८१॥

अत्यन्तविषयासक्तिः कार्प्पण्यं शाठ्यमत्सरं ॥
परदाराभिगमनं साध्वीकन्याप्रदूषणं ॥५८२॥
परिवित्तिः परिवेत्ता ययाच परिविद्यते ॥
तयोर्द्दानञ्च कन्यायास्तयोरेव च याचनं ॥५८३॥
पुत्रमित्रकलत्राणामदोषे स्वामिनस्तथा ॥
सहायानं परित्यागः साधुबन्धुतपस्विनां ॥५८४॥
गवां क्षत्रियवैश्यानां स्त्रीशूद्राणां च घातने ॥
शिवाश्रमतरूपाञ्च पुष्पाशमविनाशनं ॥५८५॥
यः पीडमाश्रमस्थानामाचरेदल्पिकामपि ॥
तद्भृत्यपरिवर्ग्गस्य पशुधान्यधनस्य च ॥५८६॥
कुप्यधान्यपशुस्तेयमयाच्यानाञ्च याचनं ॥
यज्ञारामतडागानां दारापत्यस्य विक्रयः ॥५८७॥
तीर्थयात्रोपवासानां व्रतायतनकर्म्मणां ॥
स्त्रीधनान्युपजीवन्ति स्त्रीभिरत्यन्तनिर्ज्जिताः ॥५८८॥
अरक्षणञ्च नारीणाम्मद्यपस्त्रीनिषेवणं ॥
ऋणानामप्रदानञ्च धान्यवृद्ध्युपसेवनं ॥५८९॥
निन्दिताच्च धनादानमवश्यानाञ्च विक्रयः ॥
विषमारणमन्त्राणां प्रयोगो मूलकर्म्मणाम् ॥५९०॥
उच्चाटनाभिचारश्च गरविद्वेषणक्रिया ॥
जिह्वाकामोपभोगार्थं यस्यारम्भः स्वकर्म्मसु ॥५९१॥
मूल्येनाध्यापयेद्यस्तु मूल्येनाप्यधीते च यः ॥
व्रात्यता व्रतसन्त्यागः सर्व्वकार्यनिषेवणं ॥५९२॥
असच्छास्त्राधिगमनं शुष्कतर्क्कावलम्वनं ॥
देवाग्नि साधुसाध्वीनान्निन्दा गोब्राह्मणस्य च ॥५९३॥
प्रत्यक्षं वा परोक्षं वा राज्ञाम्मण्डलिनामपि ॥
कुत्सनं पितृदेवेज्यास्वकर्म्मत्यागिनश्च ये ॥५९४॥
जनस्याप्रियवक्तारः क्रूराः समयभेदिनः ॥
भेत्ता तडागवप्राणां संक्रमाणां रथस्य च ॥५९५॥
एकपङ्क्तिस्थितानाञ्च पाकभेदं करोति यः ॥
इत्येतैः स्त्रीनराः पापैरुपपातकिनः स्मृताः ॥५९६॥
युक्तास्तद्भूतकैः क्षदैः पापैः पापकराः स्मृताः ॥
ये गोब्राह्मणकन्यानां स्वामिमित्रतपस्विनां ॥५९७॥

अन्तरं यान्त्यकार्य्येषु स्मृता नारका नराः ॥
परस्त्रियाभिलप्यन्त ये परदुव्यसूचकाः ॥५९८॥
परव्यापारनिरताः परस्त्रीपरदूषकाः ॥
द्विजाय दुःखं कुर्य्यात् प्रहारमुग्दिरच्च यः ॥५९९॥
यः सेवते द्विजः शूद्रं सुरामाघ्राति कामतः ॥
ये पापाभिरताः क्रूरा ये च हिंसाप्रिया नराः ॥६००॥
प्रव्यर्थां येच कुर्व्वन्ति दानयज्ञादिकां क्रियां ॥
गोष्ठाग्निजलरथ्यासु तरुच्छायानगेषु च ॥६०१॥
त्यजन्ति ये पुरीषादीनारामायतनेषु च ॥
मद्यमांसरता नित्यं गीतवाद्यरता नराः ॥६०२॥
केलिकीलाभुजङ्गाश्च रन्ध्रान्वेषणतत्पराः॥
वंशेष्टकाशिलाकाष्ठैः स्व(ख)भ्रैः शङ्कुभिरेव वा ॥६०३॥
ये मार्ग्गमुपरुन्धन्ति परस्मिन्नो हरन्ति च ॥
कूटशासनकर्तारः कूटकर्मक्रियारताः ॥६०४॥
कूटयुद्धाः कुशस्त्राणि कूटसंव्यवहारिणः ॥
धनुषः शल्यशस्त्राणां यः कर्त्ता यश्च विक्रयी ॥ ६०५॥
निर्द्दयोऽतीव नृत्येषु पशूनान्दमकाश्च ये ॥
मिथ्या प्रवदतो वाचमाकर्णयति यः शनैः ॥६०६॥
स्वामिमित्रगुरुद्रोही मायावी चपलः शठः ॥
ये भार्य्यापुत्रमित्राणि बालवृद्धकृशातुरान् ॥६०७॥
भृत्यानतिथिबन्धूश्च त्यक्त्वाऽश्नन्ति बुभुक्षितान् ॥
यः स्वयं मृष्टमश्नाति विप्रायान्यत् प्रयच्छति ॥६०८॥
वृथापाकः स विज्ञेयो ब्रम्हवादिषु गर्हितः ॥
नियमान् स्वयमादाय ये त्यजन्ति जितेन्द्रियाः ॥६०९॥
प्रवक्ष्या(व्रज्या) वसिता ये च रहस्यानाञ्च भेदकाः ॥
ये ताडयन्ति गाश्चैव त्रासयन्ति मुहुर्म्मुहुः ॥६१०॥
दुर्व्वलान् न च पुष्णन्ति प्रणष्टान्नान्विषन्ति च ॥
पीडयन्त्यतिभारेण सक्षतान् वाहयन्ति च ॥६११॥
सार्द्धयामाच्च परत अभुक्ते ये च भुञ्जते ॥
ये भग्नक्षतरोगार्त्तान् गोरूपांश्च क्षुधातुरान् ॥६१२॥
न पालयन्ति ते गोघ्ना नारकाः पापिनः स्मृताः ॥
वृषणां बृषणौ ये च पापिष्ठा गालयन्ति च ॥६१३॥

वाहयन्ति च गां बन्ध्यां महानारकिणो नराः ॥
आशावासमनुप्राप्तान् क्षुत्तृष्णाश्रमपीडितान् ॥६१४॥
येऽतिर्थाश्चावमन्यन्ते ते वै निरयगामिनः ॥
अनाथं विकलं दीनं बालवृद्धाकृशातुरान् ॥६१५॥
नानुकम्पन्ति ये मूढास्ते यान्ति निरयार्णवं ॥
अजाविको माहिषिकः सामुद्री वृषलीपतिः ॥६१६॥
शूदविट्क्षत्रवृत्तिश्च नारकी स्याद् द्विजाधमः ॥
शिल्पिनः कारुकावश्या हेमकारा नृपाध्वजा ॥६१७॥
भृतकाः शाठ्यसंयुक्तास्तथान्त्या नारकाः स्मृताः ॥
यश्चोचितमतिक्रम्य स्वच्छाया वाह्येत्करं ॥६१८॥
नरकेषु स पच्येत यश्च दण्डरुचिर्न्नृपः ॥
उत्कोचिकैरधिकृतैस्तस्करैश्च प्रपीड्यते ॥६१९॥
यस्य राज्ञः प्रजा राष्ट्रे पच्यते नरकेषु सः ॥
ये द्विजाः प्रतिगृह्णन्ति नृपस्यान्यायवर्त्तिनः ॥६२०॥
प्रयान्ति तेऽपि घोरेषु नरकेषु न संशयः ॥
पारदारिकचौराणां यत्पापं पार्थिवस्य तत् ॥६२१॥
भवेदरक्षतः सर्व्वं घोरं तस्य प्रतिग्रहात् ॥
अचौरं चौरवत् पश्येच्चौरान्वाऽचौररूपिणः ॥६२२॥
अविचार्य्य नृपस्तस्माद् घातयन्नरकं व्रजेत् ॥
घृततैलान्नपानानि मधु मांससुरासवं ॥६२३॥
गुडेक्षुक्षीरशाकानि दधि मूलफलानि च ॥
तृणकाष्ठपत्रपुष्पंमौषधं कांस्यभाजनं ॥६२४॥
उपानच्छत्रशकटा येतयेत्मासनं गृहं ॥
ताम्रसीसत्रपुक्तांस्य शंखाद्यञ्च जलोद्भवं ॥६२५॥
वार्क्ष्यं वा वैणवाद्यं वा गृहेषु पुष्कराणि च ॥
ऊर्णाकर्पासकौशेयभङ्गपट्टोद्भवानिच ॥६२६॥
स्थूलसूक्ष्माणि वस्त्राणि यें लोभेन हरन्ति च ॥
एवमादीनि चान्यानि दव्याणि विविधानि च ॥६२७॥
नरकेषु ध्रुवं गच्छेदपहृत्याल्पकान्यपि ॥
यद्वा तद्वा परद्रव्यमपि सर्षपमात्रकं ॥६२८॥
अपहृत्य नरो याति नरकन्नात्र संशयः॥
एवमाद्यैर्न्नरः पापैर्व्याक्रान्तैः समनन्तरं ॥६२९॥

शरीरं यातनार्थीयं पूर्व्वाकारमवाप्नुयात् ॥
यमलोकं व्रजंस्तेन शरीरेण यमाज्ञया ॥६३०॥
यमदूतैर्म्महाघोरैर्न्नीयमानः सुदुःखितः ॥
देवमानुषतिर्य्याणामधर्म्मनिरतात्मनां ॥६३१॥
धर्म्मराजः स्मृतः शास्ता सुघोरैर्विविधैर्व्वधैः ॥
विनयाचारयुक्तानां प्रमोदस्खलितात्मनां ॥६३२॥
प्रायश्चित्तैर्ग्गुरुः शास्ता न वधैरिष्यते यमः ॥
पारदारिकचौराणामन्यायव्यवहारिणां ॥६३३॥
नृपतिः शासकः प्रोक्तः प्रच्छन्नानाञ्च धर्म्मराट् ॥
तस्मात् कृतस्य पापस्य प्रायश्चित्तं समाचरेत् ॥६३४॥
नाभुक्तस्यान्यथा नाशः कल्पकोटिशतैरपि ॥
यः करोति स्वयं कर्म्म कारयेद्वानुमोदयेत् ॥६३५॥
कायेन मनसा वाचा तस्योर्द्धा गोत्तते फलं ॥
इति संक्षेपतः प्रोक्ताः पापभेदास्त्रिसाधनाः ॥६३६॥
कथ्यन्ते गतयश्चित्रा नराणां पापकारिणां ॥६३७॥
इति शिवधर्म्मोत्तरे पापभेदाध्यायः षष्ठः ॥६॥

अथ पशुपतिमत शिवधर्म्मे महाशास्त्रे शिवधर्मोत्तरे पापगतिर्न्नाम

सप्तमोऽध्यायः

ॐ नमः शिवाय

अथ पापैरिमे यान्ति यमलोकं चतुर्व्विधैः ॥
सन्त्रासजननं घोरं विवशाः सर्व्वदेहिनः ॥६३८॥
गर्भस्थैर्ज्जायमानैश्च बालैस्तरुणमध्यमैः ॥
स्त्रीपुन्नपुंसकैवृद्धैर्य्यातव्यं सर्व्वजन्तुभिः ॥६३९॥
शुभाशुभफलं तत्र देहिनां प्रविचार्यते॥
चित्रगुप्तादिभिः षद्भिर्म्मध्यस्थैः सर्व्वदर्शिनः ॥६४०॥
न तेऽत्र प्राणिनः सन्ति ये न यान्ति यमालयं ॥
अवश्यं हि कृतं कर्म्म भोक्तव्यं तद्विचारितं ॥६४१॥
तत्र ये शुभकर्म्माणः सौम्यचित्ता दयान्विताः ॥
ते नरा यीन्ति सौम्येन पथा यमनिकेतनं ॥६४२॥
यः प्रदद्याद् द्विजेन्द्राणमुपानत्काष्ठपादुके ॥
सवराश्वेन महता सुखं यान्ति यमालयं ॥६४३॥
छत्रदानेन गच्छन्ति यथा साभ्रेण देहिनः ॥
दिव्यवस्त्रपरीधाना यान्ति वस्त्रप्रदायिनः ॥६४४॥
शिविकाश्वप्रदानेन तद्रथेन सुखं व्रजेत् ॥
शैयाशनप्रदानेन स्वपन् याति च विश्रमं ॥६४५॥
आरामकर्ता छायासु शीतलासु सुखं भवेत् ॥
यान्ति पुष्पकयानेन पुष्पारामप्रदायिनः ॥६४६॥
देवायतनकर्त्ता च यतीनामाश्रमस्य च ॥
अनाथमण्डपानाञ्च क्रीडन् याति गृहोत्तमैः ॥६४७॥
देवाग्निगुरुविप्राणां मातु पितुश्च पूजकाः ॥
पूज्यमाना नरा यान्ति कामिकेन यथासुखं ॥६४८॥
उद्योतयन्दिशः सर्व्वा याति दीपप्रदायकः ॥
प्रतिश्रयप्रदानेन सुखं यान्ति गृहे स्वयं ॥६४९॥
सर्व्वकामसमृद्धेन पथा गच्छन्ति गोप्रदाः ॥
येऽन्नपानानि कुर्व्वन्ति ते तृप्ता यान्ति तत्पथा ॥६५०॥

अन्नौषधप्रदातारः सुखं यान्ति निरामयाः ॥
विश्राम्यमाना गच्छन्ति गुरुशुश्रूषणे रताः ॥६५१॥
पादशौचप्रदानेन शीतलेन पथा व्रजेत् ॥
हेमरत्नप्रदानेन याति दुर्गाणि निस्तरन् ॥६५२॥
पादाभ्यङ्गञ्च यः कुर्यादश्वपृष्ठेन स व्रजेत् ॥
रुष्या (वृषा) नड्वाहदानेन नरो यानेन गच्छति ॥६५३॥
सर्व्वकामसमृद्धात्मा भूमिदानेन गच्छति ॥
अन्नपानप्रदानेन खादन् पिबंश्च गच्छति ॥६५४॥
इत्येवमादिभिर्द्दानैः सुखं यान्ति यमालयं ॥
स्वर्गेच विपुलान् भोगान् प्राप्नोति विविधान्नरः ॥६५५॥
सर्व्वेषामेव दानानामन्नदानं परं स्मृतं ॥
सद्यः प्रीतिकरन्दिव्यं बलबुद्धिविवर्द्धनं ॥६५६॥
नान्नदानसमं दानं त्रिषु लोकेषु विद्यते ॥
अन्नाद्भवन्ति भूतानि तदभावे म्रियन्ति च ॥६५७॥
रक्तं मांसं वसा शुक्रं क्रमादन्नात् प्रवर्द्धते ॥
शुक्राद्भवन्ति भूतानि तस्मादन्नमिदं जगत् ॥६५८॥
हेमरत्नास्वनागेन्द्रनारीस्त्रक्चन्दनादिभिः ॥
समस्तैरपि सम्प्राप्तैर्न्न रमन्ते बुभुक्षिताः ॥६५९॥
गर्भस्था जायमानाश्च बालवृद्धाश्चमध्यमाः ॥
आहारमभिकांक्षन्ति देवदानवतापसाः ॥६६०॥
क्षुधा हि सर्व्वरोगानां व्याधिः श्रेष्ठतमः स्मृतः ॥
तस्मान्नौषधिलेपेन प्रतीकारः प्रकीर्तितः ॥६६१॥
नास्ति क्षुधासमं दुःखं नास्ति रोगः क्षुधा समः ॥
नास्त्याहारसमं सौख्यं नास्ति क्रोधसमो रिपुः ॥६६२॥
अत एव महत् पुण्यमन्नदानप्रभावतः ॥
यतः क्षुधाग्निसन्तप्ता म्रियन्ते सर्व्वदेहिनः ॥६६३॥
अन्नदः प्राणदः प्रोक्तः प्राणदश्चापि सर्व्वदः ॥
तस्मादन्नप्रदानेन सर्व्वदानफलं लभेत् ॥६६४॥
त्रैलोक्ये यानि रत्नानि भोगाः स्त्रीवाहनानिच ॥
अन्नदानप्रदः सर्व्वानिहामुत्र च तांलभेत् ॥६६५॥
यस्यान्नपानपुष्टाङ्गः कुरुते धर्म्मसञ्चयं ॥
अन्नप्रदातुस्तस्यार्द्धङ्कर्तुश्चार्द्धन्न संशयः ॥६६६॥

धर्म्मार्थकाममोक्षाणां देहः परमसाधनं ॥
स्थितिस्तस्यान्नधानाभ्यामन्नस्तत्सर्व्वसाधनं ॥६६७॥
अन्नं प्रजापतिः साक्षादन्नं विष्णुः शिवः स्वयं ॥
तस्मादन्नसमं दानं न भूतन्न भविष्यति ॥६६८॥
त्रयाणामपि लोकानामुदकं जीवितं स्मृतं ॥
पवित्रममृतं दिव्यं शुद्धं सर्व्वरसाश्रयं ॥६६९॥
अन्नपानाश्वगोवस्त्रशैयाछत्रासनानि च ॥
प्रेतलोके प्रशस्तानि दानान्यष्टौ विशेषतः ॥६७०॥
एवन्दानविशेषेण धर्म्मराजपुरन्नराः ॥
यस्माद्यान्ति सुखेनैव तस्माद्धर्म्मं समाचरेत् ॥६७१॥
ये पुनः क्रूरकर्म्माणो नरा दानविवर्ज्जिताः ॥
ते घोरेण पथा यान्ति दक्षिणेन यमालयं ॥६७२॥
षडशीतिसहस्राणि योजनानां व्यतीत्य तत् ॥
वैवस्वतपुरं ज्ञेयं नानारूपमवस्थितं ॥६७३॥
तत्समीपमिवाभाति नाराणां शुभकर्म्मणां ॥
पापानामतिदूरस्थं पथा रौद्रेण गच्छताम् ॥६७४॥
तीव्रकण्टकयुक्तेण शर्क्करानिचितेन च ॥
क्षुरधारानिभैस्तीव्रैः पाषाणैर्न्निचितेन च ॥६७५॥
कचित्पङ्केन महता दुरुत्तारैश्च खातकैः ॥
लोहसूचीनिभैर्द्दर्भैः सञ्छन्नेन पथा क्वचित् ॥६७६॥
ततः प्रयान्ति विषमैः पर्व्वतैर्वृक्षसंयुतैः ॥
प्रतप्ताङ्गारयुक्तेन यान्ति मार्ग्गेण दुःखिताः ॥६७७॥
क्वचिद् विषमगर्ताभिः क्वचिल्लोष्ठैः सुपिच्छिलैः ॥
सुतप्तबालुकाभिश्च तथा तीक्ष्णैश्च शङ्कुभिः ॥६७८॥
अनेकशाखाविततैर्व्याप्तं वंश[illegible] क्वचित् ॥
कष्टेन तमसा मार्गमनालम्बेन कुत्रचित् ॥६७९॥
अयःसङ्कटकैस्तप्तैः क्वचिद्दावाग्निना पुनः ॥
क्वचित्तप्तशिलाभिश्च क्वचिद् व्याप्त हिमेन च ॥६८०॥
क्वचिद् बालुकया व्याप्तनाकण्ठान्त प्रवेशया ॥
क्वचिदुष्णाम्बुना व्याप्तं क्वचिच्च करिषाग्निना ॥६८१॥
क्वचित् सिंहैर्वृकैर्व्याघ्रैर्दंशैः कीटैश्च दारुणैः ॥
क्वचिन्महाजलौकाभिः क्वचिच्चाजगरैः पुनः ॥६८२॥

मक्षिकाभिश्च रौद्राभिः क्वचित्सर्प्पैर्विषोल्वणैः ॥
महागजेन्द्रयूथैश्च बलोन्मत्तैः प्रमाथिभिः ॥६८३॥
पन्थानमुल्लिखद्भिश्च तीक्ष्णश्रृङ्गैर्म्महावृषैः ॥
महाश्रृङ्गैश्च महिषैरुष्ट्रैर्म्मत्तैश्च खादनैः ॥६८४॥
डाकिनीभिर्व्विकरालै राक्षसैर्भीमरूपिभिः ॥
व्याधिभिश्च महाघोरैः पीड्यमाना ब्रजन्ति च ॥६८५॥
महाधूलीविमिश्रेण महाचण्डेन वायुना ॥
महापाषाणवर्षेण हन्यमाना निराश्रयाः ॥६८६॥
क्वचिद् विद्युत्प्रपातेन दार्यमाणा व्रजन्ति च ॥
महता बाणवर्षेण भिद्यमानाश्च सर्व्वतः ॥६८७॥
पताद्भीर्वज्रनिर्घातैरुल्कापातैश्च दारुणैः ॥
प्रदीप्ताङ्गारवर्षेण दह्यमाना नशन्ति च ॥६८८॥
महता पाशुवर्षेण घूर्यमाणा रुदन्ति च ॥
महामेघरवैर्घोरैः सन्त्रास्यन्ते मुहुर्मुहुः ॥६८९॥
निशितायुधवर्षेण चूर्णीकृताश्च सर्व्वतः ॥
महाक्षाराम्वुधाराभिः सिच्यमाना द्रवन्ति च ॥६९०॥
महाशीतेन मरुता रुक्षेण परुषेण च ॥
समन्ताद्वास्यमानाश्च शुष्यन्ते सद्धचन्ति च ॥६९१॥
इत्थं मार्गेण रौद्रेण पाथेयरहितेन च ॥
निरालम्बेन दुर्गेण निर्ज्जलेन समन्ततः ॥६९२॥
अविश्रामेण महता निर्गतापाश्रयेण च ॥
तमोरूपेण कष्टेन सर्वदुःखाश्रयेण च ॥६९३॥
नीयन्ते देहिनः सर्व्वे ये मूढाः पापकारिणः ॥
यमदूतैर्म्महाघोरैस्तदाज्ञाकारिभिर्ब्बलात् ॥६९४॥
एकाकिनः पराधीना मित्रबन्धुविवर्ज्जिताः ॥
शोचन्तः स्वानि कर्म्माणि रुदन्तश्च मुहुर्मुहुः ॥६९५॥
प्रतीभूता विवस्त्राश्च शुष्ककण्ठोष्ठतालुकाः ॥
कृशाङ्गा भीतभीताश्च दह्यमानाः क्षुधाग्निना ॥६९६॥
बृद्धाः श्रृंखलया केचिदुत्तानाः पादयोन्नराः ॥
आकृष्यन्ते घृष्यमाणा यमदूतैर्ब्बलोत्कटैः ॥६९७॥
उरसाऽधोमुखाश्चान्ये घृष्यमाणा सुदुःखिताः ॥
केशपाशनिबद्धेन समाकृष्यन्ति रज्जुना ॥६९८॥

ललाटे चाङ्कुशेनान्ये भिन्नाः कृष्यन्ति देहिनः ॥
उत्तानाः कण्टकपथाकेचिदङ्गारवर्त्मना ॥६९९॥
पश्चाद् बद्धाश्च जठरे पाशेन च प्रपीडिताः ॥
पूरिताः श्रृंखलाभिश्च हस्तायोश्च सुकीर्त्तिताः ॥७००॥
ग्रीवापाशेन कृष्यन्ते प्रयान्ति च सुदुःखिताः ॥
जिह्वाशङ्कुप्रबद्धेन कृष्टा नीयन्ति रज्जुना ॥७०१॥
कवर्या मर्द्धचन्द्रेण क्षिप्यमाणा इतस्ततः ॥
शिश्ने सवृषणे बद्धा नीयन्तेऽन्ये च रज्जुना ॥७०२॥
नासाविद्धाश्च रज्ज्वा च समाकृष्यन्ति चापरे ॥
भिन्नाः कपोलयो रज्ज्वा कृष्यन्तेऽन्ये तथोष्ठयोः ॥७०३॥
विभिन्नाश्चोदरे चान्ये तप्तश्रृंखलया नराः ॥
कृष्यन्ते कर्ण्णयो श्चान्येभिन्नाश्च चिवुके परे ॥७०४॥
छिन्नाग्रहस्तपादाश्च च्छिन्नकर्णोष्ठनासिकाः ॥
सञ्छिन्नशिश्नवृषणाश्छिन्नभिन्नाङ्गसन्धयः ॥७०५॥
प्रभिद्यमानाः कुन्तैश्च भिद्यमानाश्च सायकैः ॥
इतस्ततः प्रधावन्तें क्रन्दमाना निराश्रयाः ॥७०६॥
मुद्गरैर्ल्लोहदण्डैश्च हन्यमाना मुहुर्म्मुहुः ॥
क्लेशैश्च विविधैर्घोरैर्ज्वलिताग्निसमप्रभैः ॥७०७॥
भिन्दिपालैर्व्विभिद्यन्तः श्रवणाः पूयशोणितं ॥
सक्षताः कृमिदष्ठाश्च नीयन्ते विवशा नराः ॥७०८॥
याचमानाश्च सलिलमन्नैश्चापि बुभुक्षिताः ॥
छायां प्रार्थयमानाश्च शीतार्त्ताश्चानलं पुनः ॥७०९॥
दानहीनाः प्रयान्त्येवं प्रार्थयन्ति सुखान्नराः ॥
गृहीतदानपाथेयाः सुखं यान्ति यमालयं ॥७१०॥
एवं पथातिकष्टेन प्राप्ताः प्रेतपुरन्नराः ॥
आज्ञापितास्तदा दूतैः प्रवेश्यन्ते यमाग्रतः ॥७११॥
तत्र ये शुभकर्म्माणस्तान् सम्मानयते यमः ॥
स्वागतासनदानेन पाद्यार्घेण प्रियेण चः ॥७१२॥
धन्या यूयं महात्मानः स्वात्मनो हितकाम्यया ॥
येन दिव्यसुखार्थाय भवद्भिः सुकृतं कृतं ॥७१३॥
इदं विमानमारुह्य दिव्यस्त्रीभोगभूषितं ॥
स्वर्ग्गं गच्छध्वमतुलं सर्व्वकामसमन्वितं ॥७१४॥

तत्र भुक्त्वा महाभोगांस्तदन्ते पुण्यसंक्षयात् ॥
यत्किञ्चिदल्पमशुभं पुनस्तदिह भोक्ष्यथ ॥७१५॥
तेचापि धर्म्मराजानं नराः पुण्यानुभावतः ॥
पश्यन्ति सौम्यवदनं मित्रभूतमिवात्मनः ॥७१६॥
ये पुनः क्रूरकर्म्माणस्ते पश्यन्ति भयानकं ॥
पापा वस्तब्धनयना विपरीतात्मबुद्धयः ॥७१७॥
दंष्ट्राकरालवदनं भृकुटीकुटिलेक्षणं ॥
ऊर्ध्वकेशं महाश्मश्रुं प्रस्फुरत्स्वधरां हरं ॥७१८॥
अष्टादशभुजं क्रुद्धन्मीलाञ्जनचयोपमं ॥
सर्व्वायुद्धोद्यतकरं ब्रह्मदण्डेन तर्ज्जयन् ॥७१९॥
त्रासन्तमिव त्रैलोक्यमुद्गिरन्ता मिवाननम् ॥
महामहिषमारूढं दीप्ताग्निसमलोचनं ॥७२०॥
रक्तमाल्याम्बरधरं महामेरुमिवोच्छ्रितं ॥
प्रलयाम्बुदनिर्घोषं पिवन्तमिव सागरं ॥७२१॥
मृत्युञ्चतत्समीपस्थः कालानलसमप्रभम्ः ॥
कालश्चाञ्जनसङ्काशः कृतान्तश्च भयानकाः ॥७२२॥
मारीचोग्रमहामारी कालरात्री च दारुणाः ॥
विविधा व्याधयः कष्टा नाना रूपा भयावहाः ॥७२३॥
शक्तिकुशाङ्कुशकराः पाशचक्रासिधारिणः ॥
वज्रदण्डधरा रौद्राः क्षुरतूणधर्नुर्द्धराः ॥७२४॥
असंख्याता महावीर्याः क्रूराश्चाञ्जनसप्रभाः ॥
सर्व्वायुधोद्यतकरा यमदूता भयानकाः ॥७२५॥
अनेन परिवारेण महाघोरेण संवृतं ॥
यमं पश्यन्ति पापिष्ठाश्चित्रगुप्तञ्चभीषणं ॥७२६॥
निर्भर्त्सयति चात्यर्थं यमस्तान् पापकारिणः ॥
चित्रगुप्तश्च भगवान् धर्म्मवाक्यैः प्रबोधयन् ॥७२७॥
भोभो दुष्कृतकर्म्माणः परद्रव्यापहारिणः ॥
गर्विता रूपवर्येण परदारविमर्द्दकाः ॥७२८॥
यस्स्वयं क्रियते कर्म्म तत्स्वयं भुज्यते पुनः ॥
तत्किमात्मोपघातार्थं भवद्भिर्दुष्कृतं कृतं ॥७२९॥
इदानी किं प्रतप्यध्वं पीडचमानाः स्वकर्म्मभिः ॥
भुञ्जध्वं स्वानि कर्म्माणि मात्र दोषोऽस्ति कस्यचित् ॥७३०॥

एते मे पृथिवीपालाः सम्प्राप्ता मत्समीपतः ॥
स्वकीयैः कर्म्मभिर्घोरैर्दुष्प्रज्ञाबलगर्व्विताः ॥ ७३१॥
भो भो नृपा दुराचाराः प्रजाविध्वंसकारकाः ॥
अल्पकालस्य राज्यस्य कृते किं दुस्कृतं कृतं ॥ ७३२॥
राज्यलोभेन मोहेन बलादन्यायतः प्रजाः ॥
यद्दण्डिताः फलन्तस्य भुञ्जध्वमधुना नृपाः ॥७३३॥
क्व तद्राज्यं कलत्रञ्च यदत्र (यत्कृते) चाशुभं कृतं ॥
तत्सर्व्वं सम्परित्यज्य यूयमेकाकिनः स्थिताः ॥७३४॥
पश्यामस्तद्बलं वोऽद्य येन विध्वंसिताः प्रजाः ॥
दूतैः प्रयात्यमानानामधुना कीदृशम्भवेत् ॥७३५॥
एवं बहुविधै र्वाक्यै रुपलव्धायसेन ते ॥
शोचन्तः स्वानि कर्म्माणि तूष्णीन्तिष्ठन्ति पार्थिवाः ॥७३६॥
इति धर्म्मं समादिश्य नृपाणां धर्म्मराट् पुनः ॥
तत्पातकविशुद्ध्यर्थमिदं वचनमब्रवीत् ॥७३७॥
भो भो चण्ड महाचण्ड गृहीत्वा नृपतीनिमान् ॥
विशोधयध्वं पापेभ्यः क्रमेण नरकाग्निषु ॥७३८॥
ततः शीघ्रं समुत्थाय नृपांस्तान् गृह्य पादयोः ॥
भ्रामयित्वा तिवेगेन विक्षिप्योर्ध्वं प्रगृह्य च ॥७३९॥
सर्व्वप्राणेन महता सुतप्ते च शिलातले ॥
आस्फारयन्ति तरसा बज्रेणेव महाद्रुमाः ॥७४०॥
ततः स्वरक्तं स्रोतोभिः स्रवते तर्ज्जनीकृताः ॥
निस्संज्ञत्सततं देहो निश्चेतश्च प्रजायते ॥७४१॥
ततः स वायुना स्पृष्टः शनैरुज्जीवते पुनः ॥
ततः पापविशुध्द्ययर्थं क्षिप्यते नरकार्णवे ॥७४२॥
अष्टाविंशतिरेवाधः क्षितेर्न्नरककोटयः ॥
सप्तमस्य तलस्यान्ते घोरे तमसि संस्थिताः ॥७४३॥
घोराख्या प्रथमा कोटिः सुघोरा तदधः स्थिता ॥
अतिघोरा महाघोरा घोररूपा तु पञ्चमी ॥७४४॥
षष्ठि नरलघोराख्या सप्तमी च भयानका ॥
अष्टमी कालरात्रिश्च नवमी च भयोत्कटा ॥७४५॥
दशमीच ततश्चण्डा महाचण्डा ततोऽप्यधः ॥
चण्डकोलाहला चान्या प्रचण्डा नरनायिका ॥७४६॥
पद्मा पद्मावती भीमा भीम भीषणनायिका ॥

कराला विकराला च चतुर्विंशतिमा स्मृता ॥७४७॥
त्रिकोणा पञ्चकोणा च सुदीर्घा परिवर्तुला ॥
सप्तभौमाष्टभौमा च दीप्ता मायेती चाष्टमी ॥७४८॥
ता नामतः समुद्दिष्टा घोरा नरककोटयः ॥
अष्टाविंशतिरेवैताः पापिनां यातनात्मिकाः ॥७४९॥
आसां क्रमेण विज्ञेयाः पञ्च पञ्चैव नायकाः ॥
प्रत्येकं सर्व्वकोटीनान्नामतस्तान्निबोधत ॥७५०॥
रौरवः प्रथमस्तेषां रुदन्ति यत्र देहिनः ॥
महारौरवपीडाभिर्म्महान्तोऽपि रुदन्ति च ॥७५१॥
तमः शीतं तथा चोष्णः पञ्चाद्या नायकाः स्मृताः ॥
सुघोरः सुतमस्तीक्ष्णः पद्मः सञ्जीवनस्तथा ॥७५२॥
महामायी विलोमश्च सुलोमश्च कटङ्कटः ॥
तीव्रकेशः करालश्च विकरालः प्रकम्पनः ॥७५३॥
महापद्मः सुवक्त्रश्च कालसूत्रः प्रगर्ज्जनः ॥
सूचीमुखः सुनेमश्च खादकः सुप्रपीडनः ॥७५४॥
कुम्भीपाकः सुपाकश्च क्रकचश्चातिदारुणः ॥
अङ्गारराशिभवनश्चाम्रक् पूयमहाह्रदः ॥७५५॥
तीक्ष्णायःखण्डः शकुनिर्म्महासंवर्त्तकः क्रतुः ॥
तप्तजतुः पङ्कलेपः पूतिमांसो द्रवस्तपुः ॥७५६॥ त्रपुः
उच्छ्वासकश्च निश्वासः सुदीर्घः कूटशाल्मलिः ॥
दुरेष्टः सुमहानादः प्रवहः सुप्रवाहणः ॥७५७॥
ऋक्षमेषवृकाश्चान्ये सिंहव्याघ्रगजाननाः ॥
श्वशूकराश्च महिषा वृषमेषा अजास्तथा ॥७५८॥
ग्राहकुम्भीरनक्रास्याः सर्प्पकूर्म्माश्च वायसाः ॥
गृध्रोलूकजलोकाश्च शार्दूलकपिकर्प्पटाः ॥७५९॥
गण्डकाः पूतिवक्त्राश्च एकाक्षाः पूतिमृत्तिकाः ॥
कणधूमास्तुषाग्निश्च कृमीणान्निचयस्तथा ॥७६०॥
अभेद्यश्चाप्रतिष्ठश्च रुधिराणाञ्च भोजनः ॥
लालाभक्षात्मभक्षश्च सर्व्वभक्षः सुदारुणः ॥७६१॥
सङ्कटः सुविशालश्च विकटः कटपूतनाः ॥
अम्बरीषः कटाहश्च कष्टा वैतरणी नदी ॥७६२॥
सुतप्तलोहशयनमेकपादः प्रपूरणः ॥
असितालवनं घोरं मक्षिभृङ्गप्रपीडितं ॥७६३॥

तिलातसीक्षुयन्त्राणि कूटपाशप्रमर्द्दनः ॥
महाचुल्ली सुचुल्ली च तप्तलोहमयी शिला ॥७६४॥
पर्व्वतः क्षुरधाराख्यस्तथा यमलपर्व्वतं ॥
मूत्रविष्ठान्धकूपश्च शा(क्षा)लकूपश्च शातनः ॥७६५॥
मुशलोलूखलं यन्त्रं शिलाशकटलाङ्गलं ॥
तालपत्रासिगहनं महापातकमण्डपं ॥७६६॥
सम्मोहनास्थिभङ्गश्च तप्तशूलमयोऽशुभं ॥
बहुदुःखं महादुःखं कश्मलं शवलंमलं ॥७६७॥
हालाहलं विरूपञ्च सुरूपश्च यमानुगः ॥
एकपादस्त्रिपादश्च तीव्रश्चावीचिरन्तिमः ॥७६८॥
अष्टाविंशतिरित्येते क्रमशः पञ्चनायकाः ॥
कोटीनामानुपूर्व्वेण पञ्च पञ्चैव नायकाः ॥ ७६९॥
रौरवाद्यमवीच्यन्तं नरकाणां शतं स्मृतं ॥
चत्वारिंशच्छताधिकं महानरकमण्डलं ॥७७०॥
एषु पापाः प्रपच्यन्ते नरकर्म्मानुरूपतः ॥
यातनाभिर्विचित्राभिर्न्नराः कर्म्मक्षया भृशं ॥७७१॥
आमलप्रक्षयाद् यद्वदग्नौ धाम्यन्ति धातवः ॥
तथा पापक्षयात् पापाः शोध्यन्ते नरकाग्निषु ॥७७२॥
सुगाढं तप्तयोर्ब्बद्धा तप्तश्रृंखलया नरः ॥
महाबृक्षाग्रशाखासु उल्लम्ब्यन्तेऽस्य किङ्करैः ॥७७३॥
ततस्ते सर्वयत्नेनक्षिप्ता दोलन्ति किङ्करै : ॥
दोलान्तश्चाति वेगेन निःसंज्ञा यान्ति योजनं ॥७७४॥
अन्तरिक्षस्थितानान्तु लोहभारद्वयन्नरः ॥
पादयोर्व्वध्यते तेषां यमदूतैर्महावलैः ॥७७५॥
तेन भारेण महता भृशमातानिता नरा : ॥
ध्यायन्तः स्वानि कर्म्माणि तूष्णीन्तिष्ठन्ति निश्चलाः ॥७७६॥
ततः केशैरग्निकल्पैर्ल्लोहदण्डैः सकण्टकैः ॥
हन्यते किङ्करैर्घोरैः समन्तात्पापकारिणः॥७७७॥
ततः क्षारेण दीप्तेन चस्तेरपि विशेषतः ॥
समन्ततः प्रलिप्यन्ते क्षताङ्गाजर्ज्जरीकृताः ॥७७८॥
पुनर्व्विचार्य चाङ्गेषु शिरसः प्रभृतिक्रमात् ॥
वार्त्ताकु (क्त) वत्प्रपच्यन्ते तप्ततैल कटाहके ॥७७९॥
विष्ठापूर्णे तथा कूपे कृमीणां निचये ततः ॥

मेदोऽसृक्पूर्य्यमाणायां वाप्यां क्षिप्यन्ति ते पुनः ॥७८०॥
भक्ष्यन्ते कृमिभिस्तीक्ष्णैर्लोहतुण्डैश्च वायसैः ॥
श्वभिर्द्दंशैर्व्वृकैर्व्याघ्रै रौद्रैश्च विकृताननैः ॥७८१॥
पच्यन्ते मांसवच्चापि प्रदीप्ताङ्गारराशिषु ॥
प्रेताः शूलेषु तीक्ष्णेषु नराः पापेन कर्म्मणा ॥७८२॥
तिलपिण्डैरिवाक्रम्य घोरैः कर्म्मभिरात्मजैः ॥
तिलवत्सम्प्रपीड्यन्ते चक्राख्ये नरके नराः ॥७८३॥
भृज्यन्ते चातितप्तेषु लोहभ्राष्ट्रेष्वनेकधा ॥
तैलपूर्णकटाहेषु सुतप्तेषु ततः पुनः ॥७८४॥
बहुशोत्पाट्यते जिव्हा असत्यात् प्रियवादिनां ॥
सन्दंशेन सुतप्तेन प्रपीड्योरश्च पादतः ॥ ७८५॥
मिथ्यागमप्रवक्तुश्च द्विजिह्वस्य च निर्गताः ॥
जिव्हार्द्धक्रोशविस्तीर्णा हलैस्तीक्ष्णैः प्रपाद्यते ॥७८६ ॥
निर्भत्सयन्ति ये क्रूरा मातरं पितरं गुरुं ॥
तेषां वज्रजलौकाभिर्म्मुखमापूर्य्य सिच्यते ॥७८७॥
ततः क्षारेण दीप्तेन ताम्रेणत्रपुणा पुनः ॥
द्रुतेन पूर्य्यतेऽत्यर्थं तप्तस्तैलैश्च तन्मुखं ॥७८८॥
इतस्ततः पुनर्व्वक्त्रं भृशमापूर्य्य हन्यते ॥
विष्ठाभिः कृमिपूर्णाभिः सोपानच्चरणैर्न्नरैः॥ ७८९॥
परिष्वजन्ते चात्युग्रां प्रदीप्तां लोहशाल्मलीं ॥
हन्यन्ते पृष्ठदेशे च पुनर्भीमैर्म्महाघनैः ॥७९०॥
दन्तुरेणातिकुष्टेन (कष्टेन) क्रकचेनबलीयसा ॥
शिरःप्रभृति पादान्ते घोरै : कर्म्मभिरात्मजैः ॥७९१॥
रुदन्तिच्छिन्न सर्व्वाङ्गास्ततः शूलप्ररोपिताः ॥
सञ्चाल्यमाना विवशास्तिष्ठन्ति न म्रियन्ति च ॥७९२॥
देहादुत्पाट्यते मांसं भिद्यन्तेऽस्थीनि मुग्दरै : ॥
दृतिराकृष्यते तूर्णं यमदूतैर्ब्बलोत्कटैः ॥७९३॥
निरुच्छ्वासे निरुच्छ्वासास्तिष्ठन्ति नरके चिरं ॥
उच्छ्वसन्तः सदोच्छ्वासे बालुकावदनावृताः ॥७९४॥
रौरवे रोदमानाश्च पीडचन्ते विविधैर्व्वधैः ॥
महारौरवपीडाभिर्म्महान्तोऽपी रुदन्ति च ॥७९५॥
पद्भ्यामास्ये गुदे चाक्ष्णोः पाणौ चोरसि मस्तके ॥

निखन्यन्ते घनैस्तीक्ष्णैः सुतप्ता लोहशङ्कवः ॥७९६॥
सुतप्तबालुकायाञ्च प्रद्योल्ल्यस्तें मुहुर्म्मुहुः ॥
जतुपङ्के भृशंतप्ते क्षिप्ताः क्रन्दन्ति विस्वरं ॥ ७९७ ॥
तेन तेनैवरूपेण हसन्तीं पारदारिकां ॥
गाढमालिङ्गते नारीं ज्वलन्तीं लोहनिर्मितां ॥ ७९८ ॥
पूर्व्वाकाराश्च पुरुषाः प्रज्वलन्तः सुभाषणाः ॥
दुश्चारिणीं स्त्रियं गाढमालिङ्गन्ति वदन्ति च ॥७९९ ॥
किं प्रधावसि वेगेन न ते मोक्षसि साम्प्रतं ॥
लंङ्घितस्ते यथा भर्त्ता पापं भुङ्क्ष्व तथाधुना ॥ ८०० ॥
लोहकुम्भे विनिःक्षिप्ताः सपिधानैः शनैः शनैः ॥
मृद्वग्निना प्रपच्यन्ते स्वपापैरेव मानवाः ॥ ८०१ ॥
क्षोदन्त्युडुखले घोरे प्रपिष्यन्ते शिलासु च ॥
क्षिप्यन्ते चान्धकूपेषु दश्यन्ते भ्रमरैर्भृशं ॥ ८०२ ॥
कृमिभिर्भिन्नसर्व्वाङ्गाः शतशो जर्ज्जरीकृताः ॥
सुतीक्ष्णक्षारकूपेषु क्षिप्यन्ते तदनन्तरं ॥ ८०३ ॥
महाज्वाले च नरके पापाः फूत्कारया भृशं ॥
इतश्चेतश्च धावन्ति दह्यमानाःसदार्च्चिभिः ॥ ८०४
पृष्ठे निनीय जङ्घे द्वे विन्यस्ते स्कन्धयोर्द्वयोः ॥
तयोर्मध्येन वा कृष्य बाहुपृष्ठेन गाढते ॥ ८०५ ॥
बध्दाः परस्परं सर्व्वे सुदृढं पापरज्जुभिः ॥
पिण्डबन्धन्दशन्त्येन श्रुमरास्तीक्ष्णलोहजाः ॥ ८०६ ॥
मानिनां क्रोधिनाश्चैव तस्कराणाञ्च दारुणाः ॥
पिण्डबन्धःस्मृतो याम्यो महाज्वाले च यातना ॥ ८०७ ॥
रज्जुभिर्व्वेष्टिताङ्गाश्च प्रलिप्ताः कर्द्दमेन च ॥
करीषतुषवन्हौ च पच्यन्ते न म्रियन्ति च ॥ ८०८ ॥
सुतीक्ष्णक्षारतोयेन कर्क्कशासु शिलासु च ॥
आपापसंक्षयात्पापा घृष्यन्ते चन्दनं यथा ॥८०९॥
शरीराभ्यन्तरगतै प्रभूतैः कृमिभिर्न्नराः ॥
भक्ष्यन्ते तीक्ष्णवदनैरादेहप्रक्षयाद् भृशं ॥८१०॥
कृमिनाम्नि च प्रक्षिप्ताः पूतिमान् सस्यराशिषु ॥
तिष्ठन्त्युद्विग्नहृदयाः पर्व्वताभ्याञ्च पीडिताः ८११॥
सुतप्तवज्रलेपेन शरीरमनुलिप्यते ॥
अधोमुखोर्ध्वपादाश्च धृतास्ताप्यन्ति वन्हिना ॥८१२॥

वदनान्तः प्रविन्यस्तं सुतप्तं लोहजं गुडम् ॥
खादन्तीम्मपराधीना हन्यमानाश्च मुद्गरैः ॥८१३॥
ये शिवायतनारामवापीकूपमथाङ्गणः ॥
अभिद्रवान्त पापिष्ठा नृपास्तत्र पसन्ति च ॥ ८१४॥
व्यायामोद्वर्त्तनाभ्यङ्गं स्नानपानान्नभोजनं ॥
क्रीडनं मैथुनं द्यूतं साधरन्ति रमन्ति च ॥८१५॥
ते वधैर्विविधैर्घोरैरिक्षुयन्त्रादिपीडितैः ॥
निरयाग्निषु पच्यन्ते यावदाचन्द्रतारकं ॥८१६॥
ये श्रृण्वन्ति गुरोर्निन्दां तेषां कर्णौ प्रपूर्यतः॥
अग्निवर्णैरयः कीलैस्ततस्ताम्रादिभिर्द्रुतैः ॥ ८१७ ॥
त्रपुसीसारकूटाद्यैः क्षारेण जतुना पुनः ॥
सुतप्ततीक्ष्णतैलेन वज्रलेपेन चाभृशन् ॥८१८॥
क्रमादापूर्यतः कर्णौ नरकेषु च यातनाः ॥
अनुक्रमेण सर्व्वेषु भवन्त्यङ्गे समन्ततः ॥८१९॥
सर्व्वेन्द्रियाणामप्येवं क्रमात्पापेन यातनाः ॥
भवन्ति घोराः प्रत्येकं शरीरे तत्कृतेन च ॥८२० ॥
स्पर्शलोभेन ये मूढाः संस्पृशन्ति परस्त्रियं ॥
तेषामग्निसुवर्णाभिः सूचीभिः पूज्यते भृशं ॥८२१॥
ततः क्षारादिभिः सर्व्वैः शरीरमनुलिप्यते ॥
यातनाश्च महाकष्टाः सर्व्वेषु नरकेषु च ॥८२२॥
गुरोः कुर्व्वन्ति भृकुटिं क्रूरं चक्षुश्च ये नराः ॥
परदारांश्च पश्यन्ति लुब्ध्वा स्निग्धेन चक्षुषा ॥८२३॥
सूचीभिरग्निवर्णाभिस्तेषां नेत्रेषु पूर्य्यतः ॥
क्षाराद्यैश्च क्रमात्सर्व्वदेहे सर्व्वाश्च यातनाः ॥८२४॥
देवाग्निगुरुविप्राणामनिवेद्य प्रभुञ्जते ॥
लोहकीलशतैस्तप्तैर्जिव्हा चास्य प्रसूर्य्यते ॥८२५॥
ततः क्षारेण दीप्तेन तैलताम्रादिभिः क्रमात् ॥
शरीरेण महाघोराश्चित्रा नरकयातनाः ॥८२६॥
ये शिवारामपुष्पाणिं लोभात् सङ्गृह्य पाणिना ॥
जिघ्रन्ति मूढमनसः शिरसा धारयन्ति वा ॥८२७॥
आपूर्यते शिरस्तेषां सुतप्तैर्ल्लोहशङ्कुभिः ॥
नासिका चातिबहुशस्ततः क्षारादिभिः पुनः ॥८२८॥
ये निन्दन्ति महात्मानमाचार्यन्धर्म देशकं ॥

शिवभक्तांश्च सम्मूढाः शिवधर्मञ्च शाश्वतं ॥८२९॥
तेषामुरसि कण्ठे च जिव्हायां हनुसन्धिषु ॥
तालुन्योष्ठे च नासायां मुर्ध्निसर्व्वाङ्गसन्धिषु ॥८३०॥
अग्निवर्णाः सुतप्ताश्च त्रिशिखालोहशङ्कवः ॥
आकोट्यन्ते सुबहुशः स्थानस्थानेषु मुग्दरैः ॥८३१॥
ततः क्षारेण तप्तेन ताम्रेण त्रपुणा पुनः ॥
तप्ततैलादिभिः सर्व्वैरापूर्य्यन्ते समन्ततः ॥८३२॥
यातनाश्ंच महाचित्राः शरीरस्यापि सर्व्वत : ॥
निः शेषनरकेष्वेवं भवन्ति क्रमशः पुनः ॥८३३॥
ये गृह्णन्ति परद्रव्यं पादैर्विप्रंस्पृशन्ति च ॥
शिवोपकारिणीं गां च ज्ञानं च लिखितं कचित् ॥८३४॥
हस्तपादा घनैस्तेषामापूर्यन्ते समन्ततः ॥
क्षारताम्रादिभिर्द्दीप्तैदह्यन्ते बहुशः पुनः ॥८३५॥
नरकेषु च सर्व्वेषु विचित्रा देहयातना : ॥
भवन्ति बहुशः कष्टा पाणिपादसमुद्भवा : ॥८३६॥
शिवायतनपर्यन्ते शिवारामे च कुत्रचित् ॥
समुत्सृजन्ति ये पापाः पुरीषं मूत्रमेव वा ॥८३७॥
तेषां शिश्नं सवृषणं चूर्य्यते लोहमुग्दरै : ॥
सूचीभिरग्निवर्णाभिः स पश्चात्पूर्यते पुनः ॥८३८॥
लोहदण्डश्च सुमहानग्निवर्णः सकण्टकः ॥
आकोट्यन्ते गुदे तेषां यावन्मूर्ध्नि विनिर्गतः ॥८३९॥
ततः क्षारेण महता ताम्रेण त्रपुणा पुनः ॥
द्रुतेनापूर्यते गाढं गुदं शिश्नं च देहिनां ॥८४०॥
मनः सर्व्वेन्द्रियाणाञ्च यस्मादुक्तं प्रवर्तकं ॥
तस्मादिन्द्रियदुःखेन जायते तत्सुदुःखितं ॥८४१॥
धने सत्यपि ये दानं न प्रयच्छन्ति तृष्णया ॥
अतिथिञ्चावमन्यन्ते काले प्राप्ते गृहाश्रमे ॥८४२॥
ते लोहतोरणे रज्ज्वा हस्तपादावतारिताः ।
विस्तारिताङ्गाः शुष्यन्ते तिष्ठन्त्यब्दशतन्नराः ॥८४३॥
हस्तपादललाटेषु कीलिता लोहशङ्कुभिः ॥
नित्यं च विवृतं वक्त्रं कीलकद्वयताडितम् ॥८४४॥
कृमिभिः प्राणिभिश्चोग्रैर्लोहदण्डैश्च वायसै : ॥

उपद्रवैर्व्वहुविधैर्मुखमन्तः प्रपीडयते ॥८४५॥
जिव्हावेधः प्रवृद्धाश्च गाढं श्रृङ्खलया पुनः ॥
तिष्ठते लम्बमानश्च लोहभारः सुवर्तुलः ॥८४६॥
शिश्ने सवृषणेबद्धं लोहभारद्वयं पुनः ॥
तिष्ठते लम्बमानश्च बाहुभ्यासश्चतुर्गुणं ॥८४७॥
ततः स्वमांसमुत्कृत्य तिलमात्रप्रमाणकः ॥
खादितुं दीयते तेषां सूच्यग्रेण तु शोणितं ॥८४८॥
यदा निर्म्मांसतां प्राप्ताः कालेन बहुना नरा : ॥
ततः क्षारेण दीप्तेन तच्छरीरं विलिप्यते ॥८४९॥
क्लेद्यते बर्षधाराभिः शोष्यते वायुना पुनः ॥
शुष्कं सिच्येत तैलेन सुतप्तेन समन्ततः ॥८५० ॥
पच्यन्ते वन्हिना भूयो दुरस्थेन शनैः शनैः ॥
निः शेषयातनाभिश्च पीडयन्ते क्रमशः पुनः ॥८५१॥
भृशं बुभुक्षया पीडा कष्टञ्चाति पिपासया ॥
नात्युष्णे नातिशीतेन पापानां स्मरणेन च ॥८५२॥
एवमाद्या महाघोरा यातनाः पापकर्म्मणां ॥
एकैकेनरकज्ञेयाः शतशोऽथ सहस्रशः ॥८५३॥
प्रत्येकयातनाश्चित्राः सर्व्वेषु नरकेषु याः ॥
कस्ता वर्षशतेनापि सर्व्वा वक्तुं समुत्सहेत् ॥८५४॥
इति चित्रैर्व्वधैर्घोरैर्यात्यमानाः स्वकर्मभिः ॥
म्रियन्ते नैव पापिष्ठा यावत् पापस्य न क्षयः ॥८५५॥
तत्रत्या यातनाः कष्टा विविधा पापकारिणीः ॥
महाघोरातिघोराख्याः कल्पाग्निसदृशोपताः ॥८५६॥
श्रुत्वैव पापसम्पूर्णा म्रियन्ते मृदुचेतसः ॥
ततस्ता नात्र कथिताः पापाः पश्यन्तिताः स्वयं ॥८५७॥
पुत्रमित्रकलत्रार्थं यदपुण्यं कृतं त्वया ॥
एकाकी दह्यसे तेन नात्र पश्यसि तानि च ॥८५८॥
आत्मनैव कृतं पापं भोक्तव्यं ध्रुवमात्मना ॥
तत्किमात्मोपघातार्थं मूढ पापं कृतं त्वया ॥८५९॥
एवं दूनैरूपालब्धास्ते पृच्छन्ति ततः पुनः ॥
कियन्तं केन पापेन कालमत्रासतें नराः ॥८६०॥
देवद्रव्यविनाशेन गुरुद्रोहादिकर्म्मभिः ॥
क्रमात्पापेषु पच्यन्ते नरकेष्वामहीक्षयात् ॥८६१॥

महापातकिनश्चापि सर्व्वेषु नरकेष्विह ॥
आचन्द्रतारकं यावत्पीडचन्ते विविधैर्वधैः ॥८६२॥
तथा पातकिनः सर्व्वे निरयार्णवकोटिषु ॥
चतुर्द्दशसु पच्यन्ते कल्पान्तं विविधैर्व्वधैः॥८६३॥
उपपातकिनश्चापि तदर्द्धंयान्ति मानवाः ॥
शेषैः पापैस्तदर्द्धञ्च कालञ्चापि तथाविधं ॥ ८६४॥
तस्मात्पापं न कुर्व्वीत चञ्चलेजीविते सति ॥
पापेन हि ध्रुवं यान्ति नरकेषु नरः स्वयं ॥८६५॥
यः करोति नरः पापं तस्यात्मा ध्रुवमप्रियः ॥
पापस्य हि फलं दुःखं तद्भोक्तव्यमिहात्मना ॥८६६॥
कथन्ते पापनिरताः सुखं रात्रिषु शेरते ॥
मरणान्तरिता येषां नरके तीव्रयातनाः ॥८६७॥
एवं क्लिष्टा विशुद्धाश्च सावशेषेण कर्मणा ॥
ततः क्षितिं समासाद्य पुनर्ज्जायन्ति देहिनः ॥८६८॥
स्थावरा विविधाकारास्तृणगुल्मादिभेदतः ॥
तत्रानुभूय दुःखानि जायन्ते कीटयोनिषु ॥८६९॥
निष्क्रान्ताः कीटयोनिभ्यः पुनर्ज्जायन्ति पक्षिणः ॥
संक्लिष्टाः पक्षिभावेन भवन्ति मृगजातिषु ॥८७०॥
मार्ग्गन्दुःखमतिक्रम्य जायन्ते पशुयोनिषु ॥
क्रमाद्गोयोनिमासाद्य पुनर्ज्जायन्ति मानुषाः ॥८७१॥
एवं योनिषु सर्व्वासु परिभ्राम्य क्रमेण तु ॥
कालान्तरवशाद्यान्ति मानुष्यमतिदुर्ल्लभं ॥८७२॥
व्युत्क्रमेणापि मानुष्यं प्राप्यते पुण्यगौरवात् ॥
विचित्रा गतयः प्रोक्ता धर्म्माणां गुरुलाघवात् ॥८७३॥
मानुष्यं यः समासाद्य स्वर्ग्गमोक्षप्रसाधकं ॥
द्वयोर्न्न साधयेदेकं स मृतस्तप्यते चिरं ॥८७४॥
देवासुराणां सर्वेषां मानुष्यमतिदुर्ल्लभं ॥
तत्सम्प्राप्य तथा कुर्यान्न गच्छेन्नरकं यथा ॥८७५॥
स्वर्ग्गापवर्ग्गलाभाय यदि नास्ति समुद्यतः ॥
सर्व्वस्य मूलं मानुष्यन्तद्यस्मादनुपालयेत् ॥८७६॥
धर्म्ममूलेन मानुष्यं लब्ध्वा सर्व्वार्थसाधकं ॥
यदि लाभेन यत्नास्ते मूलं रक्षस्व यत्नतः ॥ ८७७॥
मानुष्यत्वे च विप्रत्वं यः प्राप्यातिसुदुर्ल्लभं ॥

न करोत्यात्मनः श्रेयः कोऽन्यस्तस्मादचेतनः ॥८७८॥
सर्वेषामेव देशानामयं देशः परः स्मृतः ॥
ततः स्वर्गश्च मोक्षश्च यतः सम्प्राप्यते नरैः ॥८७९॥
देशेऽस्मिन् भारते वर्षे प्राप्य मानुष्यमध्रुवं ॥
न करोत्यात्मनः श्रेयस्तेनात्मा वञ्चितश्चिरं ॥८८०॥
भोगभूमिः स्मृतः स्वर्गः कर्म्मभूमिरियं स्मृता ॥
इह यत् क्रियते कर्म्म स्वर्गे तदुपभुज्यतां ॥८८१॥
यावत् स्वस्थं शरीरं स्वं तावद् धर्म्मं समाचरेत् ॥
अस्वस्थश्चोदितोऽप्यन्यैर्न्न किञ्चित् कर्तुमुत्सहेत् । ८८२॥
अध्रुवेण शरीरेण न ध्रुवं यः प्रसाधयेत् ॥
ध्रुवन्तस्य परिभ्रष्टमध्रुवन्नष्टमेव तत् ।८८३॥
आयुषः खण्डखण्डानि निपतन्ति तवाग्रतः ॥
अहोरात्राऽपदेशेन किमर्थं नावबुध्यसे ॥८८४॥
यदा न ज्ञायते मृत्युः कदा कस्य भविष्यति ॥
आकस्मिके हि मरणे धृतिं विन्देत कस्तदा ॥८८५॥
परित्यज्य यदा सर्व्वमेकाकी यास्यसे ध्रुवं ॥
न ददासि तदा कस्मात् पाथेयार्थमिदन्धनं ॥८८६॥
गृहीतदानपाथेयाः सुखं यान्ति महाध्वनि ॥
अन्यथा क्लिश्यते जन्तुः पाथेयरहितः पथि ॥८८७॥
येषां सुपात्रवाहित्री पूर्णा भाण्डस्य गच्छति ॥
स्वर्ग्गदेशस्य पुरतस्तेषां लाभः पदे पदे ॥८८८॥
इति ज्ञात्वा नरः पुण्यं कुर्यात्पापं विवर्ज्जयेत् ॥
पुण्येन याति देवत्वमधर्म्मान्नरकं व्रजेत् ॥८८९॥
ये मनागपि देवेशं प्रपन्नाः शरणं शिवं ॥
तेऽपि घोरं न पश्यन्ति यमस्य वदनं नराः ॥८९०॥
किन्तु पापैर्म्महाघोरैः कञ्चित्कालं शिवेच्छया ॥
भवन्ति प्रीतमनसस्ततो यान्ति शिवम्पदं ॥८९१॥
ये पुनः सर्व्वभावेन प्रतिपन्ना महेश्वरं ॥
न ते लिप्यन्ति पापेन पद्मपत्रमिवाम्भसा ॥८९२॥
तस्माद्विवर्द्धयेद्भक्तिमीश्वरे सततं बुधः ॥
तत्माहात्म्यविचारेण भवदोषविरागतः ॥८९३॥

अथ पशुपतिमते शिवधर्मे महाशास्त्रे शिवधर्मोत्तरे संसार गतिर्न्नाम

अष्टमोऽध्यायः

ॐ नमः शिवाय

अथ नारकिणां पुंसामधर्म्मादेव केवलात् ॥
क्षणमात्रेण भूतेभ्यः शरीरमुपजायते ॥८९४॥
तद्वद्धर्म्मेण चैकेन देवानामौपपातिकं ॥
सद्यः प्रजायते दिव्यं शरीरं भूतसारतः ।८९५॥
कर्म्मणा व्यतिमिश्रेण यच्छरीरमिहात्मनः ॥
तद्भूतपरिणामेन विज्ञेयं हि चतुर्व्विधं ॥८९६॥
उद्भिज्जाः स्थावरा ज्ञेयास्तृणगुल्मादिरूपिणः ॥
कृमिकीटपतङ्गाद्याः स्वेदजा नाम देहिनः ॥८९७॥
अण्डजाः पक्षिणः सर्प्पा नक्रा मत्स्याः सकच्छपाः ॥
जरायुजाश्च विज्ञेया मानुषाः सचतुष्पदाः ॥८९८॥
तत्र सिक्ता जलैर्भूमिरन्तरष्मविपाचिता ॥
वायुना व्यूह्यमाना च खे बीजत्वं प्रपद्यते ॥८९९॥
यथर्त्तुकानि बीजानि संसिक्तान्यम्भसा पुनः ॥
उच्छूनतां मृदुत्वञ्च मूलभाव व्रजन्ति च ॥९००॥
तन्मूलादङ्कुरोत्पत्तिरङ्कुरात्पत्रसम्भवः ॥
पर्णान्नालन्ततः काण्डं काण्डाच्च प्रसवः पुनः ॥९०१॥
प्रसवाच्च तुषं क्षीरं क्षीरात्तण्डुलसम्भवः ॥
तण्डुलाश्च यदा पक्वा म्रियन्त्योषधयस्तदा ॥९०२॥
यवाद्याः षणपर्य्यन्ताः श्रेष्ठाः सप्तदश स्मृताः ॥
ओषध्याः फलपाकान्ताः शेषाः क्षुद्राः प्रकीर्त्तिताः ॥९०३॥
एता लूना मर्द्दिताश्चः शनै रुद्धृत्य संस्कृताः ॥
र्प्पोलूखलयन्त्राद्यैः स्थाल्यामुदकवन्हिभिः ॥९०४॥
ड्विधाहारभेदेन परिणाम्यन्ति तद्विधैः ॥
अन्योन्यरससंयोगादनेकस्वादुना पुनः ॥९०५॥
भक्ष्यं भोज्यञ्च पेयञ्च लेह्यञ्चोस्यस्च पिच्छिलं ॥
इति भेदाः षडङ्गस्य मधुराद्याश्च षड्गुणाः ॥९०६॥
तदन्नं पिण्डकवलैर्ग्रासैर्भुक्तञ्च देहिभिः ॥
अन्तः स्थूलाशये पूर्व्वं प्राणः स्थापयति क्रमात् ॥९०७॥

आतिष्ठेद्भुक्त आहारस्तं वायुः कुरुते द्विधा ॥
सम्प्रविश्यान्नमध्ये च पृथगन्नं पृथग्जलं ॥ ९०८ ॥
अग्नेरूर्ध्वजलं स्थाप्य तदन्नञ्चजलोपरि ॥
जलस्याधः स्वयं स्थित्वा सोऽग्निर्विधमते शनैः ॥ ९०९ ॥
वायुना ध्मायमानो ऽग्निरत्युष्णं कुरुते जलं ॥
तदन्नमुक्ततोयेन समन्तात्पच्यते पुनः ॥९१० ॥
द्विधा भवति तत् पक्वं पृथक्कीटं पृथग्रसः ॥
मलैर्द्वादशभिः कीटं भिन्नं देहाद् वहिर्व्रजेत् ॥९११॥
कर्णाक्षिनासिकाजिव्हादन्ताः शिश्नं गुदं नखाः ॥
मलाश्रयाः कफः (चाः) स्वेदो विण्मूत्रे द्वादश स्मृताः ॥९१२॥
हृत्पद्मे प्रतिबद्धाश्च सर्व्वा नाड्यः समन्ततः ॥
तासां मुखेषु तं सूक्ष्मं प्राणः स्थापयते रसं ॥९१३॥
रसेन तेन ता नाडीः प्राणः पूरयते पुनः ॥
प्रतर्प्पयन्ति सम्पूर्णास्ताश्च देहं समन्ततः ॥९१४॥
ततः स नाडीमध्यस्थः शारीरेणोष्मणा रसः ॥
पच्यते पच्यमानाच्च भवेत् पाकद्वयं पुनः ॥९१५॥
त्वङ्मेदसं समन्ताच्च रुधिरञ्च प्रजायते ॥
रक्ताल्लोमानि मांसञ्च केशाः स्नायुश्च मांसतः ॥९१६॥
स्नायोः शिरास्तथाऽस्थीनि नखा मज्जास्थिसम्भवाः ॥
मज्जातः करणं वैकल्यं शुक्रञ्च प्रसवात्मकं ॥९१७॥
इति द्वादशधान्नस्य परिणामः प्रकीर्त्तितः ॥
शुक्रान्तश्च ततः शुक्रादस्य देहस्य सम्भवः ॥९१८॥
ऋतुकाले सदा शुक्रं निर्दोषं योनिसंस्थितं ॥
तदा तद्वायुना स्पृष्टं स्त्रीरक्तेनैकतां व्रजेत् ॥९१९॥
विसर्गकाले शुक्रस्य जीवः कारणसंयुतः ॥
वृत्त्या प्रविशते योनिं कर्म्मभिः स्वैर्न्नियोजितः ॥९२०॥
तच्छुक्रं रक्तमेकस्थमेकान्हात्कल्कलम्भवेत् ।
पञ्चरात्रेण कललम् ....(?)................ ॥९२१॥
बुद्बुदं सप्तरात्रेण मांसपेशी भवेत्ततः ॥
द्विसप्ताहाद्भवेल् पेशा रक्तमांसाचिताद्दृढा ॥९२२॥
बीजस्येवाङ्कुराः पेश्यां पञ्चविंशतिरात्रितः ॥
भवन्ति मासमात्रेण पञ्चधा जायते पुनः ॥९२३॥
ग्रीवा शिरश्च स्कन्धश्च पृष्ठवंशस्तथोदरं ॥

मासद्वयेन सर्व्वाणि क्रमशः सम्भवन्ति च ॥९२४॥
त्रिभिर्म्मासैः प्रजायन्ते सद्द्रव्याङ्केरसन्धयः ॥
मासैश्चतुर्भिरङ्गुल्यः प्रजायन्ते यथाक्रमं ॥९२५॥
मुखं नासा च कर्णौ च मासैर्जायन्ति पञ्चभिः ॥
दन्तपङ्क्तिस्तथा गुह्यं जायन्ते च नखा पुनः ॥९२६॥
विभक्तावयवः स्पष्टः पुनर्म्मासाष्टकेन च ॥
पञ्चात्मकसमायुक्तः परिपक्व सतिष्ठति ॥९२७॥
मातुराहारवीर्येण षड्विधेन रसेनच ॥
नाभिसूत्रनिबन्धेन वर्द्धते स दिने दिने ॥९२८॥
ततः स्मृतिं लभेज्जीवः सम्पूर्णेऽस्मिन् शरीरके ॥
सुखदुःखं विजानाति निद्रास्वप्नं पुरा कृतं ॥९२९॥
मृतश्चाहं पुनर्ज्जातो जातश्चाहं पुनर्म्मृतः ॥
नानायोनिसहस्राणि मया दृष्टानि जायते ॥९३०॥
अधुना जातमात्रोऽहं प्राप्ते संस्कार एव वा ॥
तत्तच्छ्रेयः करिष्यामि येन गच्छे न सम्भवे ॥९३१॥
गर्भस्थश्चिन्तयत्येवमहं गर्भाद् विनिःसृतः ॥
अध्येष्यामि शिवज्ञानं संसारविनिवर्त्तकं ॥९३२॥
एवं स गर्भदुःखेन महता परिपीडितः ॥
जीवः कर्म्मवशादास्ते मोक्षोपायं विचिन्तयन् ॥९३३॥
यथा गिरिवराक्रान्तः कश्चिद् दुःखेन तिष्ठति ॥
तथा जरायुणा देही दुःखन्तिष्ठति वेष्टितः ॥९३४॥
पतितः सागरे यद्वद् दुःखमास्ते समाकुलः ॥
गर्ब्भोदकेन सिक्ताङ्गस्तथास्ते व्याकुलः पुमान् ॥९३५॥
लोहकुम्भे यथा न्यस्तः पच्यते कश्चिदग्निना ॥
गर्ब्भकुम्भे तथा क्षिप्तः पच्यते जठराग्निना ॥९३६॥
सूचिभिरग्निवर्णाभिर्व्विभिन्नस्य निरन्तरं ॥
यद्दुःखन्तु प्रजायेत तद्गर्भेऽष्टगुणम्भवेत् ॥९३७॥
गर्भवासात्परो वासः कष्टेनैवात्र कुत्रचित् ॥
देहिना दुःखबहुलं सुघोरमतिसङ्कटं ॥९३८॥
इत्येतद्गर्भदुःखं हि प्राणिनां परिकीर्तितं ॥
चलास्थिराणां सर्व्वेषामात्मगर्भानुरूपतः ॥९३९॥
गर्भात्कोटिगुणं दुःखं योनियन्त्रप्रपीडनात् ॥
सम्मूर्च्छितस्य जायेत जायमानस्य देहिनः ॥९४०॥

शरीरं पीड्यमानस्य यन्त्रेणैव समन्ततः ॥
शिरसा ताड्यमानस्य पापमुद्गरकेण च ॥९४१॥
गर्ब्भात्कोटिगुणं दुःखं परित्राणमविन्दतः ॥
यन्त्रेण पीडिता यद्वन्निःसाराः स्युस्तिलेक्षव : ९४२॥
तथा शरीरं निःसारं योनियन्त्रप्रपीडितं ॥
अस्थिपटतुलास्तम्भस्नायुबन्धेन यन्त्रितं ॥९४३॥
रक्तमांसमृदालिप्तं विण्मूत्रद्रव्यभाजनं ॥
केशरोमतृणाच्छन्नं रोगायतनमातुरं ॥९४४॥
बदनैकमहाद्वारं गवाक्षाष्टक भूषितं ॥
ओष्ठद्वयकपाटञ्च दन्तजिह्वार्ग्गलान्वितं ॥९४५॥
नाडिस्वेदप्रवाहञ्च कफपित्तपरिप्लुतं ॥
जराशोकसमाविष्टकालवक्त्रानलोम्भितं ॥९४६॥
कामक्रोधेन्धनाक्रान्तं व्यसनैश्चोपमर्द्दितम् ॥
भोगतृष्णातुरं मूढं रागद्वेषवशानुगं ॥९४७॥
संवर्त्तिताङ्गप्रत्यङ्गं जरायुपरिवेष्टितं ॥
सङ्कटेन विविक्तेन योनिमार्ग्गेण निर्ग्गतं ॥९४८॥
विण्मूत्ररक्तसिक्ताङ्गं षट्कोशांशसमुद्भवं ॥
अस्थिपञ्जरसंख्यान्तं ज्ञेयमस्मिन् कलेवरे ॥९४९॥
शतत्रयंषष्ट्यधिकं पञ्चपेशीशतानिच ॥
सार्द्धाभिस्तिसृभिश्छन्नं समन्ताद्रोमकोटिभिः ॥९५०॥
शरीरं स्थूलसूक्ष्माभिर्दृशाश्चयावताः स्थिताः ॥
तावतीभिश्च नाडीनां कोटिभिस्तंत्संमन्वितं ॥९५१॥
प्रस्वेदमशुचिर्याभिरन्तस्थं स्रवते वहिः ॥
द्वात्रिंशद्दशनाः प्रोक्ताः विंशतिश्च नखाः स्मृताः ॥९५२॥
पित्तस्य कुडवं ज्ञेयं कफस्यार्द्धाढकं स्मृतं ॥
वसाःपलानि विंशच्च तदर्द्धं कललस्य च ॥९५३॥
पञ्चाब्रदे (?) पलाज्ञेयाः पलानि दश मेदसः ॥
पलत्रयं महारक्तमज्जायास्तु चतुर्ग्गुणं ॥९५४॥
शुक्रार्द्धकुडवं ज्ञेयं तद्वीर्यन्देहिनां वरं ॥
मांसास्थ्नामेकं पिण्डेन पलसाहस्रत्रमुच्यते ॥९५५॥
रक्तं पलशतं ज्ञेयं विण्मूत्रञ्चाप्रमाणतः ॥
इति देहगृहं ह्येतन्नित्यस्यानित्यमात्मनः ॥९५६॥
अविशुद्धं विशुद्धस्य कर्म्मवन्धविनिर्म्मितं ॥

शुक्रशोणित संयोगाद्देहः सञ्जायते यतः ॥९५७॥
नित्यं विण्मूत्रपूर्णश्च तेनाशुद्धः प्रकीर्त्तित : ॥
यथान्तर्व्विष्ठया पूर्णः शुचिः स्यान्न बहिर्घटः ॥९५८॥
यत्नतः शोध्यमानोऽ पि देहोऽयमशुचिस्तथा ॥
यं प्राप्याति पवित्राणि पञ्चगव्यं हवींषि च ॥९५९॥
अशुचित्वं क्षणाद्यान्ति किमन्यदशुचिस्ततः ॥
हृद्यान्यप्यन्नपानानि यं प्राप्य सुरभीणि च ॥९६०॥
अशुचित्वं प्रयान्त्याशु किमन्यदशुचिस्ततः ॥
हेजनाः! किन्न पश्यध्वं यन्निर्य्याति दिने दिने ॥९६१॥
स्वदेहात्कश्मलं पूतिस्तदाधारः कथं शुचिः ॥
देहः संशोध्यमानोऽपि पञ्चगव्यकुशाम्बुभिः ॥९६२॥
घृष्यमाणमिवाङ्गारं निर्म्मलत्वं न गच्छति ॥
स्रोतांसि यस्य सततं प्रवहन्ति गिरेरिव ॥९६३॥
कफमूत्राद्यमशुचि स देहः शुद्ध्यते कथं ॥
सर्व्वाशुचिनिधानस्य शरीरस्य न विद्यते ॥९६४॥
शुचिरेकः प्रदेशोऽ पि विण्मूत्रस्य दृतेरिव ॥
स्मृत्वात्मदेहस्रोतांसि मृत्तोयैर्धावतः करौ ।९६५॥
तथाप्यशुचि भाण्डस्य न विरज्यन्ति किञ्जनाः ॥
कायः स्रग्गन्धपुष्पाद्यैर्यत्नेनापि सुसंस्कृतः ॥९६६॥
न जहाति स्वभावं हि श्वपुच्छमिव नामितं ॥
यथा जात्यैव कृष्णार्णी न शुक्लास्यादुपायतः ॥९६७॥
तथा संशोध्यमानापि भवेन्मूर्त्तिरनिर्म्मला ॥
जिघ्रन्नपि स्वदुर्ग्गन्धं पश्यन्नपि स्वकल्मलं ॥९६८॥
न विरज्यति लोकोऽयं पीडयन्नपि नासिकां ॥
अहो मोहस्य माहात्म्यं येन व्यामोहितं जगत् ॥९६९॥
जिघ्रन पश्यन् स्वदोषांश्च कायस्य न विरज्यते ॥
स्वदेहाशुचिगन्धेनं न विरज्येत यो नरः ॥९७०॥
विरागकारणन्तस्य किमन्यदुपदिश्यते ॥
सर्व्वमेतज्जगत्पूतं देह एवाशुचिः पर : ॥९७१॥
तत्पलावयवस्पर्शाच्छुचिरप्यशुचिर्भवेत् ॥
गन्धलेपापनोदार्थं शौचं देहस्य कीर्तितं ॥९७२॥
द्वयस्यापगमात्पश्चाद्भावशुद्ध्या विशुद्ध्यति ॥
गङ्गातोयेन सर्व्वेण मृद्भारैश्च नगोपमैः ॥९७३॥

आमृत्योराचरच्छौचं भावदुष्टो न शुद्ध्यति ॥
तीर्थस्नानैस्तपोभिर्व्वा भावदुष्टो न शुद्ध्यति ॥९७४॥
अदृतिः क्षालितस्तीर्थे किं शुद्धिमधिगच्छति ॥
अन्तर्भावप्रदुष्टस्य विशतोऽपि हुताशने ॥९७५॥
न स्वर्ग्गो नापवर्ग्गश्च देहनिर्द्दहनम्परं ॥
भावशुद्धिः परं शौचं प्रमाणं सर्व्वकर्म्मसु ॥९७६॥
अन्यथालिङ्ग्यतें कान्ता भावेन दुहितान्यथा ॥
मनसाभिद्यते बृत्तिरभिन्नेष्वपि बस्तुषु ॥९७७॥
अन्यथैव स्तनं पुत्रश्चिन्तयत्यन्यथा पतिः ॥
पश्य पश्य च भावस्य महाभाग्यमशेषत : ॥९७८॥
परिष्वक्तोऽपि यन्नार्या भावहीनो न कामयेत् ॥
भावना द्विविधानस्यम्भक्ष्याणि सुरभीणि च ॥९७९॥
अभावेन नरस्तस्माद्भावः सर्वत्र कारणं ॥
चित्तं शोधय यत्नेन किमन्यैर्बाह्यशोधनै : ॥९८०॥
भावतः सुविशुद्धात्मा स्वर्गमोक्षञ्च विन्दति ॥
ज्ञानामलाम्भसा पुंसः सद्वैराग्यमृदा पुनः ॥९८१॥
अविद्याराग विण्मूत्रलेपगन्धविशोधनं ॥
एवमेतच्छरीरं हि निसर्गादशुचि स्मृतं ॥९८२॥
त्वङ्मात्रसारं निस्सारं कदलीसारसन्निभं ॥
ज्ञात्वैवं दोषवद्देहं यः प्राज्ञः शिथिलीभवेत् ॥९८३॥
सोऽतिक्रामति संसारं दृढग्राही च तिष्ठति ॥
एवमेतन्महाकष्टं जन्मदुःखं प्रकीर्त्तितं ॥९८४॥
पुंसामज्ञानदोषेण नानाकर्म्मवशेन च ॥
गर्भस्थस्य स्मृतिर्यासीत्सा जातस्य प्रणश्यति ॥९८५॥
सम्मूर्च्छितस्य दुःखेन योनियन्त्रप्रपीडनात् ॥
बाह्येन वायुना तस्य मोहाज्ञानेन देहिनः ॥९८६॥
स्पृष्टमात्रस्य घोरेण ज्वरः समुपजायते ॥
तेन ज्वरेण महता महामोहः प्रजायते ॥९८७॥
सम्मूढस्य स्मृतिभ्रंशः शीघ्रं सञ्जायते पुनः ॥
स्मृतिभ्रंशात्ततस्तस्य पूर्व्वकर्म्मवशेन च ॥९८८॥
रसः सञ्जायते तूर्णं जन्तोस्तत्रैव जन्मनि ॥
रक्तो मूढश्चलोकोऽयमकार्य्ये सम्प्रवर्त्तते ॥९८९॥
नचात्मानं विजानाति न परं नच दैवतं ॥

न श्रृणोति परं भूयः सति चक्षुषि नेक्षते ॥९९०॥
समे पथि शनैर्गच्छन् स्खलतीव पदे पदे ॥
बुध्दौ सत्यां न जानाति बोध्यमानो बुधैरपि ॥९९१॥
संसारे क्षिप्यते तेन रागलोभवशानुगः ॥
गंगास्मृतेरभावेन शास्त्रमुक्तं शिवेन तु ॥९९२॥
तद्दुखःकथनार्थाय स्वर्गमोक्षप्रसाधकं ॥
ये सत्यस्मिन् शिवज्ञाने सर्व्वकामार्थसाधके ॥९९३॥
न कुर्व्वन्त्यात्मनः श्रेयस्तदत्र महदद्भुतं ॥
अव्यक्तेन्द्रियवृत्तित्वादास्ते दुःखं महत्पुनः ॥९९४॥
इच्छन्नपि न शक्नोति वक्तुं कर्त्तुञ्चसत्क्रियां ॥
दन्तोत्थाने महद्दुःखं मौलेन व्याधिना तथा ॥९९५॥
बालरोगैश्च विविधैः पीडाबालग्रहैरपि ॥
तृड्बुभुक्षापरीताङ्गः क्वचित्तिष्ठति चारटन् ॥९९६॥
विण्मूत्रभक्षणाद्यञ्च मोहाद् बालः करोति वै ॥
कौमारे कर्णवेधे च तन्मातापितृताडनं ॥९९७॥
अक्षराध्ययनाद्यैश्च दुःखं स्याद् गुरुशासनात् ॥
प्रमत्तेन्द्रिय बृत्तेश्च कामरागप्रपीडनात् ॥९९८॥
रागाबृतस्य सततं कुतः सौख्यं हि यौवने ॥
ईर्ष्यया च महद् दुःखं मोहाद्रक्तस्य जायते ॥९९९॥
नेत्रस्याकुपितस्येव रागो दुःखाय केवलं ॥
न रात्रौ विन्दते निद्रां कामाग्निपरिखेदितः ॥१०००॥
दिवा चास्य कुतः सौख्यमर्थोपार्ज्जनचिन्तया ॥
स्त्रियायासितदेहस्य ये पुंसः शुक्रविन्दवः ॥१००१॥
न ते सुखाय मन्तव्यः खेदजा इव बिन्दवः ॥
कृमिभिः खाद्यमानस्य कुष्ठिनः पामितस्य च ॥१००२॥
कण्डूयानाग्नितापेन यद्भवेत् स्त्रीषु तद्विधः ॥
यादृशं मन्यते सौख्यं गण्डपूय विनिर्गमात् ॥१००३ ॥
तादृशं स्त्रीषु मन्तव्यं नाधिकं तासु विद्यते ॥
गण्डस्य वेदना यद्वत् स्फुटितस्य निवर्तते ॥४॥
तद्वत् स्त्रीष्वपि तद्विद्धि न सौख्यं परमार्थतः ॥
बर्च्चोमूत्रसमुत्सर्ग्गात्सुखं भवति यादृशं ॥५॥
तादृशं स्त्रीषु विज्ञेयं मूढैः कल्पितमन्यथा ॥
नारीष्ववस्तुभूतासु सर्व्वदोषाश्रयासु च ॥६॥

नाणुमात्रकमप्येवं सुखमस्ति विचारतः ॥
सम्मानमपमानेन वियोगेन च सङ्गम : ॥७॥
यौवनं जरया ग्रस्तं क सौख्यमनुपद्रवं ॥
वलीपलितखालित्यैः शिथिलीकृत विग्रहः ॥८॥
सर्व्वक्रियास्ववशक्तश्च जरया जर्ज्जरीकृतः ॥
स्त्रीपुंसोर्यौवनं रुपं यदन्योन्यं प्रियं पुरा ॥९॥
तदेव जरया ग्रस्तमुभयोरपि न प्रियं ॥
अपूर्व्ववत्स्वमात्मानं जरया परिवर्त्तितं ॥१०॥
यः पश्यन्न विरज्येत कोऽन्यस्तस्मादचेतन : ॥
जराभिभूतः पुरुषः पत्नीपुत्रादिवान्धवै : ॥११॥
अशक्तत्वाद्दुराचारैर्भृत्यैश्च परिभूयते ॥
धर्म्ममर्थञ्चकामञ्च मोक्षञ्च न जरीयतः ॥१२॥
शक्तः साधयितुं तस्माद्युवा धर्म्मं समाचरेत् ॥
वातपित्तकफादीनां वैषम्यं व्याधिरिष्यते ॥१३॥
वातादीनां समूहश्च देहोऽयं परिकीर्तित : ॥
तस्माद्व्याधिमयं ज्ञेयं शरीरमिदममात्मने ॥१४॥
वाताद्यव्यतिरिक्तत्वाद् व्याधीनां पञ्जरस्य च ॥
रोगैर्नानाविधैर्यानिं देहे दुःखान्यनेकधा ॥१५॥
तानि नैवात्मवेद्यानि किमन्यत्कथयाम्यहं ॥
एकोत्तरं मृत्युशतमस्मिन्देहे प्रतिष्ठितं ॥१६॥
तत्रैकः कालसंज्ञश्च शेषास्त्वागन्तवः स्मृताः ॥
ये त्विहागन्तवः प्रोक्तास्ते प्रशाम्यन्ति भेषजै : ॥१७॥
जपहोमप्रदानैश्च कालमृत्युर्न्न शाम्यति ॥
यदि वाऽपमृत्युर्न्नस्याद् विषयः स्यादशङ्कितः ॥१८॥
न चास्ति पुरुषस्तस्मादपमृत्योर्ब्बिभेति यः ॥
विविधा व्याधयः शस्त्रं सर्प्पाद्याः प्राणिनस्तथा ॥१९॥
विषाणि चाभिचाराश्च मृत्योर्द्वाराणि दूहिनी ॥
पीडितं सर्व्वरोगाद्यैरपि धन्वन्तरिः स्वयं ॥२०॥
स्वस्थी कर्त्तुन्न शक्नोति कालंप्राप्तं हि देहिनं ॥
नौषधन्न तपोदानं न मन्त्रा न च वान्धवा : ॥२१॥
शक्नुवन्ति परित्रातुं नरङ्कालप्रपीडितं ॥
रसायनतपोजप्यैर्योगसिद्धैर्म्महात्मभि : ॥२२॥
कालमृत्युरपि प्राज्ञैर्ज्जीयते नालसैर्न्नरै : ॥

नास्ति मृत्युसमं दुःखं नास्ति मृत्युसमं भयं ॥२३॥
नास्ति मृत्युसमस्त्रासः सर्व्वेषामेव देहिनां ॥
सद्भार्यापुत्रमित्राणि राजैश्वचर्यसुखानि च ॥२४॥
अबध्यानि च बैराणि मृत्युः सर्व्वाणि कृन्तति ॥
हेनराः! किन्न पश्यध्वं सहस्रस्यापि मध्यतः ॥२५॥
जनाः शतायुषः पञ्च भवन्ति न भवन्ति वा ॥
अशीतिका विपच्यन्ते केचित्सप्ततिका नरा : ॥२६॥
परमायुः स्थितं षष्टिस्तदप्यनिश्चितं पुनः ॥
यस्य यावद् भवेदायुर्द्देहिनः पूर्व्वकर्म्मभि : ॥२७॥
तस्यार्द्धं चायुषो रात्रिर्हरतेऽर्द्धं स्मृतो यमः ॥
बालभावे च मोहेन वार्द्धक्ये जरया पुनः ॥२८॥
वर्षाणां विंशतिर्याति धर्म्मकामार्थवर्जिता : ॥
आगन्तुकैर्भयैः पुंसां व्याधिशोकैरनेकधा ॥२९॥
ह्रियतेऽर्द्धञ्च तत्रापि यच्छ्रेयस्तद्विवर्ज्जितं ॥
जीवितान्ते च मरणं महाघोरमवाप्नुयात् ॥३०॥
जायते योनिकोटीषु मृतः कर्म्मबशात्पुनः ॥
देहभेदेन यः पुंसां वियोगः कर्म संक्षयात् ॥३१॥
मरणंतद्विनिर्द्दिष्टं न नाशः परमार्थत : ॥
महातमः प्रविष्टस्यंच्छिद्यमानेषु मर्म्मसु ॥३२॥
यद् दुःखं मरणे जन्तोर्न्न तस्येहोपमा क्वचित् ॥
हातात ! मातर्हाकान्ते ! क्रन्दन्त्येवं सुदुःखिता : ॥३३॥
मण्डूका इव सर्प्पेण गीर्यन्ते मृत्युना जना ॥
बान्धवैः स परिष्वक्तः प्रियैश्च परिवारित : ॥३४॥
निश्वसन्दीर्घमुष्णञ्च मुखेन परिशुष्यता ॥
चतुरन्तेम खट्वायाः परिवर्त्तन्मुहुर्म्मुहु : ॥३५॥
स मूढः क्षिपतेऽत्यर्थं हस्तपादानितस्ततः ॥
खट्वातो वाञ्छते भूमिं भूमेः खट्वां पुनर्म्महीं ॥३६॥
विवस्त्रस्त्यक्तलज्जश्च मूत्रविष्ठानुलेपनः ॥
याचमानश्च सलिलं शुष्ककण्ठोष्ठतालुकः ॥३७॥
चिन्तमानश्च वित्तानि कस्यैतानि मृते मयि ॥
खे नयञ्च वलात्भूयः कालपाशेन कर्षितः ॥३८॥
म्रियते पश्यतामेव गले घुरघुरायते ॥
जीवस्तृणजलौकेव देहाद्देहंविशेत्क्रमात् ॥३९॥

सम्प्राप्योत्तरमङ्गेन देहं त्यजतिपूर्व्विकं ॥
नराणां प्रार्थनादुःखमधिकं हि विवेकिनः ॥४०॥
क्षणिकं मरणे दुःखमनन्तं प्रार्थनाकृतं ॥
जगताम्पतिरर्थित्वाद्विष्णुर्व्वामनताङ्गतः ॥४१॥
अधिकः कोऽपरस्तस्माद्यो न यास्यति लाघवं ॥
ज्ञातं मयेदमधुना मृतो भवति यद्गुरुः ॥४२॥
न परं प्रार्थयेद् भूयस्तृष्णालाघवकारणं ॥
आदौ दुःखं मध्यद्दुःखमंन्ते दुःखञ्च दारुणं ॥४३॥
निसर्गादेवभूतानामिति दुःखपरम्परा ॥
वर्त्तमानान्यतीतानि दुःखान्येतानि यानि तु ॥४४॥
नरा न भावयन्त्यज्ञा न विरज्यन्ति तेन ते ॥
अत्याहारान्महादुःखमनाहारात्ततोऽधिकं ॥४५॥
तुरितं जीवितं कष्टमन्नेऽप्येवं कुतः सुखं ॥
क्षुधा हि सर्व्वरोगाणां व्याधिः श्रेष्ठतमः स्मृतः ॥४६॥
सा चान्नौषधिमात्रेण क्षणमात्रं प्रशाम्यति ॥
क्षुद्व्याधिवेदना तीव्रा निः शेषबलकृन्तनी ॥४७॥
ते यान्ति भूतोम्रियते यथान्यै र्व्याधितोर्न्नरः ॥
तद्रसं मिहिका गन्धाज्जिव्हाग्रपरिवर्त्तिनी ॥४८॥
तत्क्षणार्द्धार्द्धकालेन्न कण्ठं प्राप्य निवर्तते ॥
इति क्षुद्व्याधितप्तानामन्नौषधबलं स्मृतं ॥४९॥
न तत्सुखाय मन्तव्यं परमार्थेन पण्डितैः॥
मृतोपमश्च यच्छेते सर्व्वकार्यविवर्ज्जितः ॥५०॥
तत्रापि तु कुतः सौख्यं तमसाच्छादितात्मनः ॥
प्रबोधेऽपि कुतः सौख्यं कार्यैरुपहतात्मनः ॥५१॥
कृषिसेवाध्वगोरक्षावाणिज्यादिपरिश्रमैः ॥
प्रातः पुरीषमूत्राभ्यां मध्यान्हे तृड्बुभुक्षया ॥५२॥
तृप्ताहं येन वाध्यन्ते निद्रया निशि जन्तवः ॥
अर्थस्योपार्ज्जने दुःखमर्ज्जितस्य च रक्षणे ॥५३॥
नाशे दुःखं व्यये दुःखमर्थेऽप्येवं कुतः सुखं ॥
चौरेभ्यः स्वजनादग्नेः सलिलात्पार्थिवादपि ॥५४॥
भयमर्थवतान्नित्यं मृत्योर्द्देहभृतामिव ॥
खे यथा पक्षिभिर्म्मांसं भक्ष्यन्ते श्वापदैर्ब्भुवि ॥५५॥
जले च भक्ष्यते मत्स्यैस्तथा सर्व्वत्र वित्तवान् ॥

विमोहयन्ति सम्पत्तौ ताडयन्ति विपत्तिषु ॥५६॥
खेदयन्त्यर्ज्जनाकाले कदा भोगाः सुखावहाः ॥
यश्चार्थपतिरुद्विग्नो यश्च सर्व्वार्थनिस्पृहः ॥५७॥
तयोरर्थपतिर्दुःखी सुखी सर्वार्थनिस्पृहः॥
शीतेन दुःखं हेमन्ते ग्रीष्मे तापेन दारुणम् ॥५८
बर्षासु वातवर्षाभ्यां कालेऽप्येवं कुतः सुखं ॥
विवाहे विस्तरैर्दुःखं तद्‌गर्भोद्वहने पुनः ॥५९॥
प्रसवेऽपत्यदोषैश्च दुःखं विष्ठादिकर्म्मभिः ॥
दन्ताक्षिरोगः पुत्रस्य हा कष्टङ्किङ्करोम्यहं ॥६०॥
गावो नष्टा बृत्ति भग्नान्क्वधिंवा प्रपलायिताः ॥
अमी प्राहुशकाः प्राप्ता भक्तच्छेदश्च मे गृहे ॥६१॥
वालापत्या च मे भार्या कः करिष्यति राधनं ॥
प्रदेयकालः कन्यायाः कीदृशश्च वरोभवेत् ॥६२॥

……………………………………………………

इति चिन्ताभिभूतानां कुतः सौख्यं कुटुम्बिनां ॥६३॥
कुटुम्बचिन्ताकुलितस्य पुंसः श्रुतञ्च शीलञ्च गुणाश्च सर्व्वे ॥
अपक्वकुम्भे निहिता इवापः प्रयान्ति देहेन समं विनाशं ॥६४॥
राज्येपि हि महद् दुःखं सन्धिविग्रहचिन्तया ॥
पुत्रादपि भयंयत्र तत्र सौख्यं हि कीदृशं ॥६५॥
स्वजातीयाद् भयं प्रायः सर्व्वेषामेव देहिनां ॥
एकद्रव्याभिलाषित्वाच्छुनामिव परस्परं ॥६६॥
चापधृप्यबलः कश्चिन्नृपः ख्यातोस्मि भूतले ॥
निखिलं यत्तिरस्कृत्य सुखं तिष्ठति निर्भय : ॥६७॥

युद्धेबाहुसहस्त्रं हि प्रपपात महीतले ॥
श्रीमतः कार्त्तवीर्यस्य ऋषिपुत्रः प्रतापवान् ॥६८॥
ऋषिपुत्रस्य रामस्य रामोदशरथात्मजः ॥
जघान वीर्यमतुलमूर्ध्वगं यन्महात्मनः ॥६९॥
जरासन्धेन रामस्य कृष्णत्वे नाशितं यशः ॥
जरासन्धस्य भीमेन भीमस्यापि हनूमता ॥७०॥
हनुमानपि सूर्येण विक्षिप्तः पतितः क्षितौ ॥
सूर्यः प्रतापयुक्तोऽपि मेघैः प्रच्छाद्यते क्वचित् ॥७१॥
क्षिप्यन्ते वायुना मेघा वायोर्व्वीर्यं नगैर्ज्जितं ॥

दह्यन्ते वन्हिभिः शैलाः स वन्हिः शाम्यते जलैः ॥७२॥
तज्जलं शोष्यते सूर्यैस्ते सूर्याः सह वारिणा ॥
त्रैलोक्येन समेताश्च नश्यन्ति ब्रह्मणो दिने ॥७३॥
ब्रह्मापि त्रिदशैः सार्द्धमुपसंह्रियते पुनः ॥
परार्द्धद्वयकालान्ते शिवेन परमात्मना ॥७४॥
एवं नास्ति स संसारे यस्य सर्व्वोतमं बलं ॥
विहायैकं जगन्नाथं परमात्मानमव्ययं ॥७५॥
ज्ञात्वा सातिशयं सर्व्वमभिमानं विवर्ज्जयेत् ॥
एवम्भूते जगत्यस्मिन् कः शूरः पण्डितोऽपि वा ॥७६॥
नेहास्ति सर्व्ववित् कश्चिन् न च मूर्खश्च सर्व्वथा ॥
यो यद्वस्तु विजानाति तेन तत्र स पण्डितः ॥७७॥
न सर्व्वदा न सर्व्वत्र प्रभावः सदृशः स्मृतः ॥
स्थितिः सातिशयत्वेन प्रभावः कस्यचित् क्वचित् ॥७८॥
दानवैर्न्निर्ज्जितादेवास्ते देवैर्न्निर्ज्जिता पुनः ॥
इत्यन्योन्यस्थितावेषां भोगौ जयपराजयौ ॥७९॥
निवातकवचाः सर्व्वे दानवा बलगर्व्विताः ॥
निर्ज्जितास्तेऽर्ज्जुनेनैव गोपालैः सोऽपि निर्ज्जितः ॥८०॥
एवं वस्त्रषुगं राज्ञः प्रस्थमात्रान्न भोजनं ॥
पानशय्यासनञ्चैकं शेषं दुःखाय केवलं ॥८१॥
सप्तभौमेऽपि भवने खट्वापादपरिग्रहः ॥
उदकुम्भञ्चवन्तीभ्यः क्लेशायान्यः प्रविस्तरः॥८२॥
प्रत्यूषे तूर्यनिर्घोषः समः सर्व्वनिवासिभिः ॥
राज्ञोऽभिमानमात्रं हि ममैतद् वाद्यते गृहे ॥८३॥
सर्व्वमाभरणम्भारः सर्व्वमालेपनं मलं ॥
सर्व्वं प्रलपितं गीतं नृत्यमुन्मत्तचेष्टितं ॥८४॥
इत्येव राज्यसम्भोगैः कुतः सौख्यं विचारतः ॥
नृपाणां व्यग्रचित्तानामन्योन्यातिशयाः स्थिताः ॥८५॥
नरैः पुण्यफलं स्वर्ग्गे मूलच्छेदेन भुज्यते ॥
न चान्यत् क्रियते कर्म्म सोऽत्रदोषः सुदारुणः ॥८६॥
छिन्नमूलस्तरुर्य्यद्वदवस्यं पतति क्षितौ ॥
तद्वत् पुण्यक्षयात्सर्वे प्रपतन्ति दिवौकसः ॥८७॥
सुखाभिलाषनिष्ठानां दुःखं भोगाभिसंक्षयात् ॥
अकस्मात् पतनाद् दुःखं कष्टं सर्व्वं दिवौकसां ॥८८॥

इति स्वर्गेऽपि देवानां नास्ति सौख्यं विचारतः ॥
क्षयोच्चातिशयाच्छुद्धौ स्वर्ग्गभोगीय कर्म्मणां ॥८९॥
तत्रकष्टं महादुःखं नरकाग्निषु देहिनां ॥
घोरैश्चतुर्व्विधैः पापैर्वाङ्मनः कायकर्म्मभिः ॥९०॥
कुठारैश्छेदनं तीव्रं वल्कलानाञ्च तक्षणं ॥
पर्णशाखाफलानाञ्च पातनञ्चोग्रवायुना ॥९१॥
उन्मूलनं विमर्द्दश्च गजैरन्यैश्च देहिभिः ॥
दावाग्निहिमशोषैश्च दुःखं स्थावरजातिषु ॥९२॥
तृड्वुभुक्षा च सर्प्पाणां क्रोधदुःखश्च दारुणं ॥
दृष्ट्वा तं घातनं लोके पाशेन च निबन्धनं ॥९३॥
अकस्माज्जन्ममरणं कीटानाञ्च मुहुर्म्मुहुः ॥
सरीसृपनिकायानामेवं दुःखान्यनेकधा ॥९४॥
वर्षाशीतातपैर्दुःखं सुकष्टं मृगपक्षिणां ॥
क्षुत्तृष्णाक्लेशादिभिश्च भयत्रस्ताः सदा मृगाः ॥९५॥
क्षुत्तृषादिदमन्तश्च वधवन्धनताडनं ॥
नासावेधेन सन्त्रासः प्रतोदकशघातनं ॥९६॥
बेणुकुन्तादिनिगडं मुहुरङ्कुशवाधनं ॥
भारोद्वहनसंक्लेशः शिक्षायुद्धादिपीडनं ॥९७॥
आत्मयूथवियोगश्च वीलीनयनबन्धनं ॥
पशुनागनिकायानामेवं दुःखान्यनेकधा ॥९८॥
गर्भवासे महद् दुःखं जन्मदुःखं तथा नृणां ॥
वाल्ये च दुःखमज्ञानात् कौमारे गुरुशासनात् ॥९९॥
यौवनेकामरागाभ्यां दुःखं चैवेर्ष्यया पुनः ॥
कृषिवाणिज्यसेवाध्वगोरक्षाद्यैश्च कर्म्मभिः ॥११००॥
बृद्धभावे च जरया व्याधिभिश्च प्रपीडितम् ॥
मरणे च महद्दुःखं प्रार्थनायान्तथाधिकं ॥१॥
राजाग्निजलदायादचौरशत्रुभयं महत् ॥
अर्थस्यार्ज्जनरक्षार्थं दुःखं नाशे व्यये पुनः ॥२॥
कार्प्पण्यमत्सरौ यद्वत् तृष्णाधिक्यं भयं मदः ॥
अकार्ये सम्प्रवृत्तिश्च दुःखानि धनिनां सदा ॥३॥
भृतिर्धृतिः कुसीदश्च दासत्वं परतन्त्रता ॥
इष्टानिष्टैर्व्वियोगाश्च संयोगश्च सहस्रशः ॥४॥
दुर्भिक्षं दुर्भगत्वञ्च मूर्खत्वञ्च दरिद्रता ॥

अधरोत्तर भागश्च मरकं राष्ट्रविभ्रमः ॥५॥
अन्योन्यातिशयाद् दुःखमन्योन्याभिभवात् पुनः ॥
अन्तर्बहिः प्रकोपाश्च राज्ये दुःखं महीभृतां ॥६॥
अनित्यता च भावानामधुपाणाञ्च पातनं ॥
अन्योन्यस्मान्महीयस्त्वमन्योन्यश्चापि लक्षणं ॥७॥
इत्येवमादिभिर्दुःखैर्यस्माद् व्याप्तं चराचरं ॥
निरयादिमनुष्यान्तन्तस्मात्सर्व्वं जयेद् बुधः ॥८॥
स्कन्धात् क्वचिन्नयन् भारं विश्रामं मन्यते यथा ॥
तद्वत्सर्व्वमिदं लोके दुःखं दुःखेन शाम्यते ॥९॥
अन्योन्यातिशयात्पापाभिभवाद् भोगसम्प्लवात् ॥
धर्म्मक्षयाच्च देवानां दिवि दुःखमवन्ति तं ॥१०॥
नानायोनिसहस्रेषु सम्भवः पुण्यसंक्षयात् ॥
रोगाश्च विविधाकारा देवलोकेऽपि संस्थिताः ॥११॥
यज्ञस्य हि शिरश्छिन्नमश्विभ्यां संहितं पुनः ॥
तेन दोषेण यज्ञस्य शिरोरोगः सदैव हि ।१२॥
मार्त्तण्डभानोः कुष्ठञ्च वरुणस्य जलोदरः ॥
पूष्णो दशनवैकल्यं भुजस्तम्भः शचीपतेः ॥१३॥
क्षयरोगश्च सुमहान् सोमस्य परिकीर्त्तितः ॥
ज्वरश्च सुमहानासीद् दक्षस्यापि प्रजापतेः ॥१४॥
कल्पे कल्पेऽपि देवानां महतामपि संक्षयः ॥
परार्द्धद्वयकाले च ब्रम्हणश्चाप्यनित्यता ॥१५॥
दक्षदुहितरं पौत्रीं ब्रह्मा कामितवान् पुनः ॥
क्रोधेन च जयादेवीं योगस्थां शप्तवान् प्रभुः ॥१६॥
कामक्रोधौ स्थितौ यत्र तत्र दोषास्तदात्मकाः ॥
दुःखानि च समस्तानि संस्थितानि न संशयः ॥१७॥
विष्णोश्च जन्ममरणं मायावित्वञ्च सर्व्वतः ॥
स्त्रीवधः कामशक्तिश्च सारथ्यम्पाण्डवे बले ॥१८॥
रुद्रेण त्रिपुरं दग्धं दक्षयज्ञश्च नाशितः ॥
स्कन्दस्य जन्म तच्छ्रुत्वा क्रीडाश्चान्याः सहस्रशः ॥१९॥
एवं त्रयोऽपि रागाद्यैर्दोषैर्देवाः समन्विताः ॥

शिवः

एभ्य: पर: शिव: शान्त: परिपूर्णस्तु मुक्तिद : ॥२०॥
एवमेतज्जगत्सर्व्वमन्योन्यातिशये स्थितं ॥
दु:खैराकुलितं ज्ञात्वा निर्वेदं परमं व्रजेत् ॥२१॥
निर्व्वेदाच्च विराग: स्याद् विरागाज्ज्ञानसम्भव: ॥
ज्ञानेन तत्परं ज्ञात्वा शिवमुक्तिन्तदाप्नुयात् ॥२२॥
समस्तदु:खनिर्म्मुक्त: स्वस्थात्मा स सुखी सदा ॥
सर्व्वज्ञ: परिपूर्णश्च मुक्त: इत्यभिधीयते ॥२३॥

इति शिवधर्म्मोत्तरे संसारगतिर्न्नामाष्टमोऽध्याय : ॥८ ॥

अथ पशुपतिमते शिवधर्मे महाशास्त्रे शिवधर्मोत्तरे स्वर्ग्यनारकचिन्हो

नवमोऽध्यायः

ॐ नमः शिवाय

अथ स्वर्गभोगमनुभूय नराः क्षीणपुण्यास्तद्वासनानुभवादिमं लोकमागत्य शुभ देश-जाति- कुल-रूपायुःश्रुतः-प्रज्ञा- शील- शौच-सत्य-दम-दान-दया-दाक्षिण्य- क्षमारोग्य-सत्व- बलोत्साह- प्रभावतः॥

प्रधान- धन- धान्य- रत्न- यान- वाहन- हर्म्य- प्रासाद- गीत- नृत्य- वाद्य कला-सुख - शय्यासन- मृष्टान्न- पान- सुगन्धवास - स्त्रीरत्न- पुत्र- पशु- वस्त्रालङ्कार-हिरण्य- मही- भोगायतनावसथः- सभा- सत्र प्रपाराम- तडाग- दीर्घिका- कूपोद्यान-देव- द्विज- गुरु - विद्या- विनीतः- साधु- तपस्वि- पूजा- सत्कारानुष्ठानाभिरतस्तप-स्वाध्याय- ध्यान ज्ञानापवर्ग स्वर्ग कथाभिरामश्च भवतीति ॥२४॥

तस्माद्युक्तञ्च स्वर्गीयं कर्म कर्त्तुञ्च वस्तुतः ॥
धर्म्माद्रक्ष्यं धनं सौख्यमधर्माद् दुःखसम्भवः ॥२५॥

तस्माद्धर्म्मं सुखार्थाय कुर्यात्पापञ्च वर्ज्जयेत् ॥
लोकद्वयेऽपि यत्सौख्यं धर्म्मात्तत्प्राप्यते यतः ॥२६॥

धर्म्ममेवमतः कुर्यात्सर्व्वकामार्थसिद्धये ॥
मुहूर्त्तमपि जीवेत नरः शुक्लेन कर्म्मणा ॥२७॥

न कल्पमपि कृष्णेन लोकद्वयविरोधिना ॥
अथ नरकेषु नराः केन पापेन कर्म्मणा यातनाविचित्राःकष्टा अनुभूय भूमिमभ्यागच्छन्ति ॥२८॥

ततः पापशेषेण वृक्ष-कीट-मृग-पशु जाति- लक्षणैः
प्रत्यक्ष नरकेषु पुनर्दुःखान्यनुभवन्ति ॥२९॥

ततः क्षीणावशिष्ट-पापास्तद्वासनामायानुभावादेतैर्ल्लक्षणैर्म्मनुष्यजातौ जायन्ते ॥३०॥

तद्यथा ॥ ब्रह्महा क्षयी ॥ सुरापः श्यामदन्तः ॥ सुवर्णचौरः कुनखी॥ दुश्चर्म्मागुरुतल्पगः ॥ तदपवादपरिश्रवणाद् बधिरः ॥ स्वयमनुकीर्त्तनात् खरः ॥ आनिन्दकः प्रतिहन्ता गुरोरपस्मारी ॥ तदाज्ञाभङ्गाद्भगन्दरी ॥ मत्सरी च भवेत् कृमि ॥ अवज्ञाकारी चान्धः ॥ गुरुकार्य्योपेक्षी कृमिः ॥ दुष्प्रज्ञस्तत्कर्म्मणि शठः कृकलासः ॥ कुपितमक्षमाप्य गुरुमपक्रामतः शिरोरोगः ॥ एते गुरुकर्मविपाकाः ॥३१॥ श्वचण्डालाः पतिताः पापिष्ठाः ॥ द्विजखराः ॥ सन्ध्यवहार्य्यान्त्यजातिः ॥ अग्निदः, कुष्ठ ॥ रजतापहारी दर्दुरः ॥ कूटसाक्षी मुखरोगी ॥ मातापितृ.गुरु.तपस्वि व्याधित.बाल.वृद्धार्त्त. शरणागत. त्यागी. अनिमित्तः पादाक्षिरोगी ॥ प्रतिज्ञाय

ब्राह्मणस्यादानादल्पायुः ॥ तद्वृत्यपहारादामगर्भान्त : ॥ पाकी. प्रपा नाशक. नैष्टिक. प्रतिनिर्वृत्तः सदारोगी ॥ पत्नीबहुत्वे सत्येकरामः सदाल्कीबः ॥ स्वामिना धर्म्मे नियुक्तस्तदनुष्ठान. सत्कार. पूजा. प्रदानादिषु शाठ्य. व्यवहारी जलोदरी ॥ दुर्ब्बल वधे बलवत : समुत्प्रेक्षादङ्गहीनत्वं ॥ अन्नहार्यजीर्णव्यवहारपक्षपाती जिव्हारोगी ॥ स्वयं प्रवर्त्तित. व्रत. धर्म्मानुष्ठान . विच्छेदनः प्रतिपत्नीष्ववियोगः स्वयमग्रहीतुर्ग्गलरोगः ॥ अकृत पञ्च महायज्ञ भोगी विट्वराहः ॥ पर्व्वमैथुनी प्रमेही ॥ स्वदारेभ्योऽन्यत्र दीव्यतः केशाल्पत्वं ॥ परिक्षीण. मित्र. बन्धु. स्वामि. साधु. जनायमन्ता परिभूतकष्टबृत्तिः क्षीणवृत्तिरथातिथि. मनः खेदकोऽन्तःकपोलपिटकः ॥ सूर्योढस्याप्रतिश्रयदानादिष्टपत्नी. वियोगः ॥ छद्मना गुरु. स्वामि. मित्रमुपचरतः प्राप्तार्थ. परि भ्रंशोविश्रम्भापहारी सर्व्वः दुःखाश्रयी ॥ मिथ्या. गुणैरात्मापकर्षी वामनः ॥ गोपृष्ठ घाति कटिल्लुती गोघ्नो जात्यन्धः ॥ गोदुःखकारी गोनासः ॥ गोनिर्द्दयाश्चिपिटनासः ॥ निस्तेजस्कः सभायां गलगण्डी ॥ क्रोधनश्चण्डालः ॥ पिशुनः पूतिनासिकः॥ सूचकः पूतिवक्त्रः ॥ त्रपु. चामर . सीस. सहस्र .जण्डकाशेष . विक्रयी. मृगव्याधः॥ कुण्डाशी भृतकः ॥ तैलिको नास्तिकः ॥ रङ्गोपजीवी . अभक्ष्यभक्षी . ॥ अप्रतिरूपव्यवहारदर्शी गण्डमाली ॥ ज्ञानमन्यायतः प्रतिगृह्णन् मूक : ॥ पुस्तकहार्यन्ध : ॥ पुण्यकथाक्षेपको वक्रनासः॥ शिष्टाचीर्ण . धर्म. दूषकः केकराक्षः ॥ साधु. तपस्वि. देव. द्विजाति. ज्ञान. योग. द्वेष्टा पुण्य. दान. प्रवृत्त. प्रतिषेधकः कृमिदन्ती ॥ देव. ब्रह्मस्वापहारको वान्ताशी ॥ तडागारामभेत्ताछेत्ताङ्गहीनः प्रभु, सुरादि, व्यवस्था समय भेदकस्तस्कराणामरक्षिता व्यवहारेष्वमध्यस्थां ॥ छल. ग्राह्यजितभृत्यः ॥ सदापुरुषोव्याध्यभिभूतः ॥ परदाराभिगाम्यगुप्तदारः ॥ स्वामि. मित्र. गुरु. द्रोही. वातरोगी ॥ गोष्ठोत्कर्षी दुश्चर्म्मा ॥ खराश्वाभिगामी मधुमेही ॥ धर्म्मपत्नीष्वन्यमैथुन. प्रवर्तकस्तूवरकः ॥ स्वगोत्र. समय. स्त्र्यभिगामी श्लीपदी ॥ मातापितृभगिनीस्त्र्यभिगाम्यजीवी ॥ परापवाद्यलसः ॥ कृतघ्नः स्फुटिताक्षः ॥ सर्व्वारम्भविफलास्तदशेष, कुब्ज, कुण्ड. पण्ड. व्यङ्ग दरिद्रता : स्फूटितपाणि . पादाङ्गावयवा : ॥ धूसराश्छद्मिनः ॥ परपिण्डोपजीविनश्चीरकर्प्पटधराः स्थूलमलिनवाससः॥ क्षुत्पिपासातुराःप्रेतरुपिणः सततमुद्विग्नहृदया बहुप्रलापिनः पुण्यकथापराङ्मुखाः॥ स्त्रीष्वासक्ता चित्ता दुर्भगाः ॥ स्त्रीपराधीनान्नपान मैथुनाम्बरा देवाग्नि. गुरु. बृद्ध. ब्राह्मणावमन्तारः ॥ पसभाभिर्सृष्टस्त्रीकाः सदापहृत. सर्वस्वा बधबन्धन. ताडन. निर्भर्त्सनाभिभूताः ॥ स्त्रीद्यूत . मद्यपान . निरता नित्य . क्रुद्धास्याः ॥ पापनिरताः स्मृतिपरिहीणाः पुण्यद्वेष्टारः परमर्म्म. कीर्त्तन. रताहीनाङ्गा हीनाचारा हीनान्नपानवस्त्र. शय्यासनाः कल्पायुषः स्वल्पबुद्धयः ॥ शठ. षण्ढ, चण्ड. भण्ड. शैलूष. तस्कर. परप्रेष्य. परकर्म. व्याधिता दुःखिताः क्रूरकर्म्माणश्चोपजायन्ते॥ तस्मादेनसि प्रायश्चित्तव्यं, तीर्ण यश्चित्ताः परिशुद्ध लक्षणा जायन्ते ॥ स्वर्गा नारकाश्च. पुण्य हेतुत्वादुभयरुपाः॥

सङ्कीर्णफलास्तत्कर्म्माधिकोनभोग्य. व्यवहाराधार. परिरक्षिताद्भवन्ति ॥
तत्रैतेश्लोका: ॥३२॥
यस्मात् पापेन दुःखानि तीव्राणि सुबहूनि च ॥
तस्मात्पापं न कर्त्तव्यमात्मपीडाकरं हि तत् ॥३३॥
यस्मिन् काले च देशे च वयसा यादृशेन च ॥
कृतं शुभाशुभं कर्म्म तत्तस्मात्तेन भुज्यते ॥३४॥
तस्मात्सदैव दातव्यमविच्छिन्नं सुखार्थिभिः ॥
विच्छिद्यन्ते यथा भोगा ग्रीष्मे कुसरितो यथा ॥३५॥
सत्यं वक्तुमशेषतोऽस्ति सुलभा वाणी मनोध्यायितुं ॥
दातुं दानवरं शरण्यमभयं वाह्यं पितृभ्यो जलं ॥
पूजार्थं हि सदाशिवस्य विमलः सन्धानयज्ञ : परः
क्षुद्व्याधेः फलमूलमस्ति रसितुं क्लेशात्मकैः किन्धनैः ॥३६॥

इति शिवधर्म्मोत्तरे स्वर्ग्गनारकचिन्हाध्यायो नवमः ॥९॥

अथ पशुपतिमते शिवधर्मे महाशास्त्रे शिवधर्मोत्तरे ज्ञानयोगोनाम

दशमोऽध्यायः

ॐ नमः शिवाय

अथ संसारमुक्त्यर्थं ज्ञानयोगं ब्रवीमि ते ॥
शिव प्रकाशकं ज्ञानं योगस्तत्रैकचित्तता ॥३७॥
स्वसिद्धावविरुद्धेन पुस्तकेन विचारयेत् ॥
धर्म्मज्ञानापवर्गार्थं सतस्त्वं वद नेतर : ॥३८॥
पूर्वोत्तराविरोधेन कोऽत्रार्थोऽभिमतो भवेत् ॥
इत्याद्यव्यूहनं तर्क्कः शुष्कतर्क्कं विवर्ज्जयेत् ॥३९॥
तस्मादागमयुक्तैव सूक्ष्मार्थप्रविचारतः ॥
कर्त्तव्यं नानुमानेन केवलेन विपश्चिता ॥४०॥
हीनमध्योत्तमफलं बहुद्वारं यतः शुभं ॥
तस्मात्परीक्ष्य कुर्व्वीत पुण्यं साधु महत्फलं ॥४१॥
आदिमध्यान्तनिर्म्मुक्तः स्वभावविमलः प्रभु : ॥
सर्व्वज्ञः परिपूर्णश्च शिवो ज्ञेयः शिवागमे ॥४२॥
सर्व्वार्थसाधकं ज्ञानं शिवयोगश्च शाश्वतं ॥
प्रकाशयति मुक्त्यर्थं मुमुक्षूणामयं शिव : ॥४३॥
वहुत्वेऽपिच शास्त्राणां सर्व्वज्ञेन शिवेन यत् ॥
प्रणीतममलं ज्ञानं तत् प्रमाणं न संशय : ॥४४॥
यः सर्व्वज्ञः सुसम्पूर्णः स्वभावविमलः शिव : ॥
सर्व्वदोषविनिर्म्मुक्तो ब्रूयात् स कथमन्यथा ॥४५॥
अभावादीश्वरस्येयं जगत्सृष्टिः कथम्भवेत् ॥
अचैतन्यात्प्रधानस्य अज्ञत्वात् पुरुषस्य च ॥४६॥
प्रधानपरमाण्वादि यावत् किञ्चिदचेतनं ॥
तदकर्तृ स्वयं दृष्टं बुद्धिमत्कारणं विना ॥४७॥
न यथा घटभावेन मृत्पिण्डं स्वयमृच्छति ॥
तथाज्ञा बुद्धिभावेन न तिष्ठेत् प्रकृतिः स्वयं ॥४८॥
धर्म्माधर्म्मोपदेशश्च बन्धमोक्षविचारणं ॥
न सर्व्वज्ञं विना पुंसामादिसर्गे प्रसिद्ध्यति ॥४९॥

बैद्यं विना निराक्रन्दाः क्लिश्यन्ति रोगिणो यथा ॥
शिवं विना जगत्तद्वन्निराक्रन्दं भवेत् सदा ॥५०॥
तस्मादनादिः सर्व्वज्ञः परिपूर्णः परः शिवः ॥
अस्ति नाथः परित्राता पुंसां संसारसागरात् ॥५१॥
येऽभ्यस्यन्ति शिवज्ञानं शिवोक्तं शिव भाविताः ॥
ते भवन्ति शिवाः शान्ता भवे मज्जन्त्यभाविताः ॥५२॥
असत्यस्मिञ्जगन्नाथे तमोभूतमिदञ्जगत् ॥
सूर्येणैव विहीनं हि निरालोकं जगद्यथा ॥५३॥
यथानादिप्रबृत्तोऽयं घोरः संसारसागर : ॥
शिवोऽपि हि तथानादिः संसारान्मोचकः स्थित : ॥५४॥
व्याधीनाम्भेषजं यद्वत् प्रतिपक्षं स्वभावतः ॥
तद्वत्संसारदोषाणां प्रतिपक्षः शिवः स्थितः ॥५५॥
तस्मादनादिः सर्वज्ञः परिपूर्णः स्वभावतः ॥
मुक्तिहेतुः शिवः शान्तः सर्वज्ञो ज्ञानभाषकः ॥ ५६॥
यदि चेदं प्रमाणं स्यान्न सर्वज्ञस्य भाषितं ॥
किं प्रमाणं तदा ग्राह्यं ब्रूत पश्याम हे बुधाः ॥५७॥
वाक्यलिङ्गा हि वक्तारः क्रियालिङ्गाश्च कारकाः ॥
तस्मात्स्वेनैव लिङ्गेन विज्ञेयास्तद्गुणा बुधैः ॥५८॥
आगमत्वेऽपि सामान्ये कः प्रद्वैष्णाः (द्वेष्टा) शिवागमे ॥
अनायासेन यत्रोक्ता मुक्तिरेकेन जन्मना ॥५९॥
स्वपक्षरागमुत्सृज्य गुणेष्वाधीयतां मनः ॥
यतो गुणात्मनः पुंसां कल्याणं सफलं स्थिरं ॥६०॥
युक्तञ्चैतद्गुणैः सर्व्वैर्यस्माज्ज्ञानं शिवात्मकं ॥
तस्मात्तेन तदभ्यस्यं यस्यास्ति गुणगौरवं ॥६१॥
अभ्यासश्चास्ति सुकरस्तदतीव महत्फलं ॥
कः प्राज्ञः कार्यमुत्सृज्य दीर्घसूत्रीं समाश्रयेत् ॥६२॥
मध्वर्थी पर्व्वतङ्कश्चिद् दूरं सम्प्रस्थितः शनैः ॥
यद्यधो मधुसम्पश्येत् किमर्थं पर्व्वतं ब्रजेत् ॥६३॥
एवमेबैकभविकां विमुक्तिं पुरतः स्थितां ॥
विहायानेक भविकां कः प्राज्ञः प्रतियास्यति ॥६४॥
इमान्यत्र गतः कालस्तत्रैकं जन्मगच्छतु ॥
जिज्ञास्यतामियं तावन्मुक्तिरेकेन जन्मना ॥६५॥
यदि नाम न मुक्तिः स्यादेकेनैव तु जन्मना ॥

अनेकभविका मुक्तिर्भवतः केन वार्यते ॥६६॥
तस्माद्यत्रैकभविका मुक्तिर्ज्ञानेन निश्चिता ॥
तद्बुध्वा तु भवेन्न्यायमप्रत्यक्षासु मुक्तिषु ॥६७॥
यथा समीपे दूरे च सदृशं भोजनद्वयं ॥
सा नु काले विकाले च भोक्ता चाति बुभुक्षितः ॥६८॥
तयोर्गृह्णातु कतमत् कथयध्वं विपश्चितः ॥
समीपे यदि मन्येथा मुक्तिमेवं शिवात्मिकां ॥६९॥
सन्मार्गौषधदृष्टान्तैः स्वयमुत्प्रेक्ष्य युक्तितः ॥
वक्तव्य प्रतिबोधाय कार्याकार्यविवेकिनः ॥७०॥
इत्येवं परमं शान्तं प्रतिपन्ना महेश्वरं ॥
ते लभन्ते सुखेनैव विमुक्तिम्भवसागरात् ॥७१॥
अकर्त्ताज्ञः पशुर्भोक्ता विभुर्न्नित्यश्च स प्रभुः ॥
किञ्चित्कर्ता स किञ्चिज्ज्ञः पुरुषः पञ्चविंशकः ॥७२॥
न करोति यतः सर्व्वं स्वभोगाद्यङ् करोति च ॥
अस्वातन्त्र्यादकर्त्ता यः किञ्चित्कर्त्ताणुरन्धवत् ॥७३॥
न बेत्ति तत्वतः सर्व्वं तेनाज्ञः पुरुषः पशुः ॥
बुद्ध्या व्यवसितं किञ्चिज्ज्ञानं किञ्चिज्ज्ञ उच्यते ॥७४॥
अचेतनं विभु सूक्ष्मं भोग्यं साधारणं ध्रुवं ॥
चतुर्व्विंशकमेकञ्च प्रधानं गुणलक्षणं ॥७५॥
पुंसां भोगापवर्गार्थमीस्वरेच्छा प्रचोदितं ॥
प्रधानं न भवेद्रुद्रस्तथा विष्णुपितामहौ ॥७६॥
सत्कार्यकरणोपेताः सुविशुद्धा महाबलाः ॥
जगतः कारणत्वेन त्रयो देवा व्यवस्थिताः॥७७॥
प्रधानाञ्च भवेद् बुद्धिर्ज्जगद्धेतु शिवेच्छया ॥
बुद्धेरपि च सङ्क्षोभादहङ्कारस्त्रिधा भवेत् ॥७८॥
अहङ्काराच्च सूक्ष्माणि तन्मात्राणिन्द्रियाणि च ॥
सूक्ष्मेभ्यः पञ्च भूतानि तेभ्यः स्थूलमिदं जगत् ॥७९॥
चतुर्विंशकमित्युक्तं पुरुषः पञ्चविंशक : ॥
रुद्रः षंड्विंशकः प्रोक्तः शिवश्च परमस्ततः ॥८०॥
सप्तविंशतिमः शान्तः सुसूक्ष्मः परमेश्वर : ॥
स्वर्ग्गापवर्ग्गयोर्द्दाता तं विज्ञाय विमुच्यते ॥८१॥
ज्ञानेन हि भवेन्मुक्तिर्न्न चास्या अस्ति संक्षयः ॥
मुक्तिसम्प्रत्ययार्थाय शिवयोगं समभ्यसेत् ॥८२॥

योगसिद्ध्येकदेशेऽपि दृष्टे मोक्षे भवेन्मति : ॥
दृष्टमेतन्मया यद्वन्मोक्षस्तद्वद् ध्रुवं भवेत् ॥८३॥
न केवलं हि योगेन मुक्तिसम्प्रत्ययो भवेत् ॥
अप्यष्टगुणमैश्वर्यं योगाभ्यासात् प्रवर्त्तते ॥८४॥
ध्याता ध्यानं तथा ध्येयं यच्च ध्यानप्रयोजनं ॥
एतच्चतुष्टयं ज्ञात्वा योगं युञ्जीत योगवित् ॥८५॥
ज्ञानवैराग्यसम्पन्नः श्रद्दधानः क्षमान्वित : ॥
शिवभक्तः सदोत्साही ध्यानेङ्कं पुरुषः स्मृतः ॥८६॥
ध्यै चिन्तायां स्मृतो धातुः शिवचिन्ता मुहुर्म्मुहुः ॥
ज्ञानेन परिशुद्धेन ज्ञानं ध्यानमतः परं ॥८७॥
सकलः स तु तत्वज्ञः सर्व्वज्ञः सर्व्वदः प्रभुः ॥
नानारूपविकल्पेन ध्येयः सिद्ध्यर्थमीश्वरः ॥८८॥
विमुक्तिप्रत्ययः पूर्व्वमैश्वर्यञ्चाणिमादिकं ॥
इत्येतद् विविधं ज्ञेयं शिवध्यान प्रयोजनं ॥८९॥
युञ्जन्त्यन्येन पुरुषं शिवः संयोजकः स्मृतः ॥
फलेन योजकं तस्माद् ध्यायेत् सततमीश्वरं ॥ ९०॥
नाजीर्णसुरसोद्गारे न च विण्मूत्र बाधते ॥
न छर्यान्तातिसारे च नातिभुक्तः श्रमान्वितः ॥९१॥
न चातिकर्म्मनिरतश्चिन्ताव्याकुलितेन्द्रियः ॥
नात्रिस्ते गुरुकार्ये वा न चापि क्षुत्पिपासितः ॥९२॥
न दंशमशकाकीर्णे न च प्राणिसमन्विते ॥
श्मशानचैत्यबल्मीकसर्पश्वापदसेविते ॥९३॥
नदीसमुद्रतीरे वा न जलाश्रयसन्निधौं ॥
जीर्णोद्यानगृहारामे न भीस्थाने विचिन्तयेत् ॥९४॥
सुस्निग्धान्नाल्पभोजी च वातलाहार वर्ज्जितः ॥
युक्ताहारविहारश्च युक्तचेष्टश्च कर्म्मसु ॥९५॥
युक्तनिद्रावबोधश्च सर्व्वायुक्तविवर्ज्जितः ॥
श्रद्धधानः क्षमानित्यो यावदर्थपरिच्छदः ॥९६॥
स्थितः शिवाश्रमे गुह्ये निःशब्दे जनवर्ज्जिते ॥
पुष्पाम्रादिफलोपेते पूर्व्वोक्तावसथान्विते ॥९७॥
सोपलिप्ते सुसंमृष्टे गन्धधूपाग्निवासिते ॥
मुक्तपुष्पसमाकीर्णे वितानोपरिसंयुते ॥९८॥

आसनं तूलसम्पूर्णं सितवस्त्रावगुण्ठितं ॥
कृष्णाजिनोत्तरीयञ्च विन्यसेन्मृदु चर्म्मणि ॥९९॥
पद्मक.स्वस्तिकादीनामभ्यस्तेनासनेन तु ॥
सन्निध्यास्य नमस्कृत्य शिवन्देवीङ्गणाधिपं ॥१२००॥
ऋजुग्रीवः शिरोवक्षोनातिशिलष्टोष्ठलोचनः ॥
किञ्चिदुन्नमितशिरा दन्तैर्दन्तान् न च स्पृशेत् ॥१॥
दन्ताग्रसन्निधौ जिह्वां अचलां सन्निवेश्य च ॥
पार्ष्णिभ्यां बृषणौ रक्ष्यौ तथा प्रजननं पुनः ॥२॥
ऊर्ब्बोरुपरि संस्थाप्य बाहू तिर्यक् प्रयत्नतः ॥
दक्षिणं करपृष्ठन्तु न्यसेद्वामतलोपरि ॥३॥
उन्नाम्य शनकैःपृष्ठमुरो विष्टभ्य चाग्रतः ॥
सम्प्रेक्ष्य नासिकाग्रन्तु दिशञ्चानवलोकयन् ॥४॥
संहृतप्राणसञ्चारः पाषाण इव निश्चल ॥
मैत्र्यादिवासनायुक्तं परबैराग्यमाश्रितः ॥५॥
अमार्ग्गेणापि यो योगं श्रद्दधानः समभ्यसेत् ॥
सोऽपि कालेन बहुना ध्रुवं योगमवाप्नुयात् ॥ ६॥
गच्छंस्तिष्ठन् स्वपन् जाग्रदुन्मिषन्निमिषन्नपि ॥
सदा शिवपरो भूत्वा शिवं सर्व्वत्र चिन्तयेत् ॥७॥
स्वदेहायतनस्यान्तर्मनसा स्थाप्य शङ्करं ॥
हृत्पद्मपीठिकामध्ये शिवं ध्यानेन चिन्तये ॥८॥
ध्यानयज्ञः परः शुद्धः सर्वदोषविवर्ज्जितः ॥
तेनेष्ट्वा मुक्तिमाप्नोति बाह्यशुद्धैश्चनाध्वरैः ॥९॥
हिंसादिदोष मुक्तत्वाद् विशुद्धश्चित्तसाधनः ॥
ध्यानयोगःपरस्तस्मादपवर्गफलप्रदः ॥१०॥
तस्मादशुद्धं स्वर्गीयमनित्यं बाह्यसाधनं ॥
यज्ञाद्यं कर्म्म सन्त्यज्य मुक्त्यर्थं योगमभ्यसेत् ॥११॥
विकार युक्तमब्यक्तं भोग्यभोक्तृसमन्वितं ॥
चिन्तयेद् हृदये पूर्व्वं क्रमाद्वापि गुणत्रयं ॥१२॥
तमः प्रच्छाद्य रजसा रजः सत्वेन छादितं ॥
ध्यायेत्त्रिमण्डलं पूर्व्वं कृष्णं रक्तं सितं क्रमात् ॥१३॥
सत्वोपरि गुणातीतं पुरुषं पञ्चविंशकं ॥
हेयमेतदशुद्धञ्च त्यक्त्वा शुद्धं विचिन्तयेत् ॥१४॥

ऐश्वंर पङ्कजं दिव्यं पुरुषोपरि संस्थितं ॥
द्वादशाङ्गुलविस्तीर्णं शुद्धं विकसितं सितं ॥१५॥
नालमष्टगुणन्तस्य नाभीकन्दसमुद्भवं ॥
पद्मं पत्राष्टकं ज्ञेयमणिमादिगुणाष्टकं ॥१६॥
तत्कर्णिका च वैराग्यन्नालं ज्ञानं शिवात्मकं ॥
शिवधर्म्मश्च तत्कन्द इति पद्मं विचिन्तयेत् ॥१७॥
तद्धर्म्मज्ञानवैराग्य शिवैश्वर्यमयं परम् ॥
ज्ञात्वा पद्मासनं शार्व्वं सर्वदुःखान्तमाप्नुयात् ॥१८॥
तत्पद्मकर्णिकामध्ये शुद्धदीपशिखाकृतिम् ॥
अङ्गुष्टमात्रममलं ध्यायेदोङ्कारमीश्वरम् ॥१९॥
कदम्बगोलकाकारं तारारूपमिव स्थितं ॥
ध्यायेद्वा रश्मिजालेन दीप्यमानं समन्ततः ॥२०॥
ध्यायेद्वा सततं शान्तं वक्षमाणकरुपकं ॥
प्रधानपुरुषातीतं सितपद्मस्थमीश्वरं ॥२१॥
जपेद्ध्यायेच्च सततमोङ्कारं शिवरूपिणं ॥
बाच्यवाचकभावेन मात्रात्रय विभागतः ॥२२॥
मात्रास्तिस्रः समाख्याताः स्कन्ददेवीमहेश्वरा : ॥
अकारोकारमकारास्ताश्च मात्राः प्रकीर्त्तिताः ॥२३॥
अकारादग्निगर्भत्वात् कुमारः परिगृह्यते ॥
उकारादप्युमादेवी मकाराच्च महेश्वरः॥२४॥
अथवान्यप्रकारेण ब्रह्माविष्णुमहेश्वराः ॥
क्रमान्मात्राः समुद्दिष्टास्तत्परश्चार्द्धमात्रया ॥२५॥
भावनामात्रगम्यत्वादचिन्त्यः परमः शिवः ॥
सकलं चिन्तयेत् तस्मात् सिद्धार्थं सततं शिवं ॥२६॥
अथवा व्यक्तमव्यक्तं पुरुषं वेदमुत्क्रमात् ॥
मात्रास्तिस्रः समाख्याताः शिवश्चाप्यर्द्धमात्रया ॥२७॥
श्रीकण्ठनाथं वरदं चतुर्व्वेदं परं हरं ॥
ध्यायमानस्य सततंमश्वर्य्यं सम्प्रवर्त्तते ॥२८॥
केचित् क्षित्यादि व्योमान्तं जयमिच्छन्त्यनुक्रमात् ॥
तत्र तं निश्चलीभूतं लभेत् सूक्ष्मेऽपि संस्थितं ॥२९५
स्थित्यर्थं मनसा भूतं स्थूलरूपं विचिन्तयेत् ॥
नानारूपाकृतिभेदोऽनन्ततत्वमचेतनं ॥३०॥

यच्छिवाधिष्ठितं रूपं तद्ध्यानं पापशुद्धिदम् ॥
मनःस्थितिकरश्चाशु न तु तत्वमचेतनं ॥३१॥
तस्माद् ध्येयानि सर्व्वाणि त्यक्त्वा ध्येयो महेश्वरः ॥
तत्सिद्धौसर्व्वतः सिद्धिर्न सर्ब्वैः सिद्ध्यते शिवः ॥३२॥
यदा शिवात्मकं रूपं ध्यायन् प्राणैर्व्विमुच्यते ॥
तदा स शिवतां याति नान्यं ध्यायेदतः शिवं ॥३३॥
यद्यत्तत्वन्न देवत्वाद् ध्यायेदभ्यासकारणात्॥
तत्तदीश्वररूपेण तद्वद्ध्यायेदधिष्ठितं ॥३४॥
मेरुसंस्थं क्षितौशर्ब्वं ध्यायेत्तञ्च उमापतिं ॥
अग्नेरधिपतिं रुद्रमुग्रं पवनरूपिणं ॥३५॥
आकाशाधिपतिं भीममीशानं सूर्य्यसत्पतिं ॥
चन्द्राधिपं महादेवं पुसां पशुपतिं परं ॥३६॥
अहङ्कारं स्मेरदीशं बुद्धौ सर्व्वज्ञमीश्वरं ॥
पुम्प्रकृत्यासनं शान्तं ध्यायति परमेश्वरं ॥३७॥
भूतसिद्धौ भवेत्सिद्धिर्म्मनस्तन्मात्रपञ्चके ॥
बुद्ध्याहङ्कारबुद्धस्य शिवत्वं प्रकृतौ भवेत् ॥३८॥
यत्रस्थं येन रूपेण शिवरूपमनुस्मरेत् ॥
लक्षयेदालसं स्थैर्य्यन्तत्तद् ध्येयं पुनः पुनः ॥३९॥
शुद्धस्फटिकसङ्काशं जटामुकुट भूषितं ॥
प्रसन्नवदनं शान्तं सर्व्वावयवशोभनं ॥४०॥
सितपङकजमध्यस्थं समाधिस्थं त्रिलोचनं ॥
पद्मासनस्थमचलमीषत्संवृतलोचनं ॥४१॥
सद्बीजपूरकवारं वरदाभयपाणिकं ॥
द्वीपिचर्म्मपरीधानमक्षमालाधरं हरं ॥४२॥
प्रभाकिरणपर्यन्तैर्भासयन्तदिगाननं ॥
संसारापरपर्यन्तं पुरुषानीककारणं ॥४३॥
इत्थंरूपं शिवध्यानं प्रतितत्वामनुक्रमात् ॥
अष्टाङ्गुलं वितस्तिं वा यथा स्वात्मनि संस्थितिः॥४४॥
रूपवर्णप्रमाणाद्यैः परिकल्प्यात्मबुद्धिना ॥
तथा ध्यायीत देवेशं यथा चित्तं स्थिरम्भवेत् ॥४५॥
शिवेनाधिष्ठितं यस्माज्जगत्सर्व्वं चराचरं ॥

सर्व्वरूपः शिवस्तस्मादिति ज्ञात्वा न मुह्यति ॥४६॥
प्राणायामैः सुसम्पूर्णैः कुर्य्याद्वा निश्चलम्मनः ॥
सर्व्वसङ्ग विनिर्मुक्तः सेवेद्वा विजनं बनं ॥४७॥
उत्साहान्निश्चयाद्धैर्यात्सन्तोषात्तत्वदर्शनात् ॥
मुनेर्ज्जनपदत्यागात् षड्भिर्योगः प्रसिद्ध्यति ॥४८॥
प्राणो वायुः शरीरस्थस्तस्यायामो निरोधनं ॥
रेचकः पूरकः कुम्भस्त्रिविधः संप्रकीर्त्तितः ॥५०॥
नासिकापुटमङ्गुल्या पीड्यैकमपरेण च ॥
औदर्य्यं रेचयेद् वायुं रेचनाद्रेचकः स्मृतः॥५१॥
बाह्येन वायुना देहं दृतिवत् पूरयेद् भृशं ॥
तथा पूर्णः स तिष्ठेत पूरणात्पूरकः स्मृतः ॥५२॥
न मुञ्चति न गृह्णाति वायुमन्तर्ब्बहिः स्थितं ॥
आपूर्णः कुम्भवत्तिष्ठेदचलः स तु कुम्भकः ॥ ५३॥
कन्यसः सकृदुद्घातः स च द्वादशमात्रकः ॥
मध्यमश्च द्विरुद्घातश्चतुर्व्विंशतिमात्रकः ॥५४॥
उत्तमश्च त्रिरुद्घातः षड्त्रिंशत्तत्वमात्रकः ॥
स्वेदकम्पादिपातानां जननं चोत्तमोत्तमः ॥५५॥
अजिताप्त (मा) रुहभ्दूमेर्वायोरुत्तमकांक्षया ॥
अजितारोहणाद्भूमेरुपजायन्त्युपद्रवाः ॥५६॥
हिक्का श्वासः प्रतिश्यायः कर्णदन्ताक्षिवेदनाः ॥
मूकता जडता कासः शिरोरोगः श्रमो ज्वरः ॥५७॥
इत्येवमादयो दोषा जायन्ते व्युत्क्रमेण तु ॥
सर्व्वरोग चिकित्साश्च संक्षेपाच्छृणु योगिनां ॥५८॥
यस्मिन् यस्मिन् भवेद्देशे योगिनां व्याधिसम्भवः ॥
तत्तदङ्गं धिया व्याप्य धारयेत्तत्र धारणां ॥५९॥
आग्नेयीं धारणां ध्यायेद्रोगे वायव्यवारुणे ॥
वायव्याग्नेयदोषेच विषदोषे च सर्व्वतः ॥६०॥
अमृतञ्चिन्तयेत्प्राज्ञः क्षुत्पिपासातुरस्तथाः ॥
अन्योन्याभिभवादेव ज्ञात्वा युञ्जीत धारणां ॥६१॥
ध्यानेनैव प्रणश्यन्ति ये रोगा योगसम्भवाः ॥
भेषजैर्जपहोमैश्च दानपुण्यैश्च कर्म्मजाः ॥६२॥
यथारण्ये गजः सिंहः पुरुषैरप्रयोगतः ॥

नाशयेद्धार्य्यमाणस्तु तथा वायुरबुद्धिभिः ॥६३॥
स वै वायुः यथा हस्ती प्रयोगाद् दम्यते शनै ः॥
निर्दोषश्च भवेत्कालाद्वश्यः सौम्यश्च जायते ॥६४॥
शनैः शनैस्तथा प्राणः प्रयोगाद्वश्यताङ्गतः ॥
स्वेच्छया धार्य्यते देहे न तद्दोषं करोति च ॥६५॥
यथा प्रचोदितो हस्ती परसैन्यं विनाशयेत् ॥
रक्षते च प्रयोक्तारमारूढञ्च बलेन सः ॥६६॥
तथा शरीर संरुद्धःप्राणः सम्यक् प्रचोदितः॥
निर्दहेत् सर्वपापानि तच्छरीरञ्च रक्षति ॥६७॥
प्राणैर्विनिर्जिते देहे चिन्हान्येतानि लक्षयेत् ॥
विण्मूत्रश्लेष्मदोषाणामल्पभावः प्रजायते ॥६८॥
बहुभोजनसामर्थ्यं चिरादुच्छ्व सनन्तथा ॥
आरोग्यं शीघ्रगामित्वमुत्साहः सुरसौष्ठवं ॥६९॥
बलवर्णप्रसादश्च सर्व्वदोषक्षयस्तथा ॥
एवमादीनि चिन्हानि सत्वस्थस्य प्रजाग्रति ॥७०॥
अगर्भश्च सगर्भश्च प्राणायामो द्विधास्थितः ॥
जपध्यानं विनाऽगर्भः सगर्भस्तत्समन्वितः ॥७१॥
अगर्भाद्गर्भवान्ज्ञेयः प्राणायामः शताधिकः ॥
सगर्भं धारयेत्तस्मादिन्द्रियाणां जयोत्सुकः॥७२॥
समस्तेन्द्रियविृत्तिश्च प्राणो वायुः प्रकीर्तितः ॥
तज्जयादिन्द्रि याण्येव निर्ज्जितानि भवन्ति तु ॥७३॥
वृत्तिवृत्तिमतोर्यस्मादभेदः परिगीयते ॥
तस्माद्वृत्तिजयादेव बृत्तिमान्निर्ज्जितो भवेत् ॥७४॥
ज्ञानवैराग्ययोक्त्राभ्यां प्राणायामकशेन च ॥
इन्द्रियाश्वान्विनिर्ज्जित्य सर्ब्वमेव जितम्भवेत् ॥७५॥
इन्द्रियाण्येव तत्सर्व्वं यत्स्वर्ग्ननगरकावुभौ ॥
निगृहीतविसृष्टानि स्वर्गाय नरकाय च ॥७६॥
शरीरं रथ इत्याहुरिन्द्रियाण्यस्य वाजिनः ॥
सारथिः पुरुषः प्रोक्तः प्राणायामः कशःस्मृतः ॥७७॥
ज्ञानवैराग्यरश्मिभ्यामायाम्य विधृतम्मनः ॥
शनैर्न्निश्चलतामेति प्राणायामकशाहते ॥७८॥
मनोवाजिनमत्युग्रं निगृह्णानः पुनः पुनः ॥

विनिर्व्वेद्यं पुनर्गच्छेत् कुर्यादेवात्मनो हितं ॥७९॥
जलबिन्दुकुशाग्रेणि मासे मासे च यः क्वचित् ॥
संवत्सरशतं साग्रं प्राणायामश्च तत्समः ॥८०॥
तपांसि यानि पठ्यन्ते यज्ञा दानं ब्रतानि च ॥
सर्व्वतीर्थाभिषेकश्च प्राणायामश्च तत्समः ॥८१॥
प्राणस्यैव जयो योगः प्राणस्यैवजयस्तपः ॥
प्राणस्यैव जयात्सर्वं प्राप्यते नात्र संशयः ॥८२॥
अथ प्रत्याहारचित्तं विसृतं भोगतृष्णया ॥
भवदोषविचारेणं कुर्य्यादुन्नीय सर्व्वत :॥८३॥
उद्धरेदात्मनात्मानमुह्यमानमनाथवत् ॥
भोगमद्यातिवेगेन ज्ञान बृक्षसमाश्रया ॥८४॥
इन्द्रियाणि प्रसक्तानि प्रतित्वं विषयोदधौ ॥
आहृत्य यो निगृह्णाति प्रत्याहारः स उच्यते ॥८५॥
एवं यः शान्तचित्तात्मा प्रत्याहारमनुक्रमात् ॥
स सर्व तीर्थ यज्ञानां फलं प्राप्य शिवं व्रजेत् ॥८६॥
यद्वा यावत् स्थितं लक्ष्यन्तत्तस्माच्चलते मनः ॥
तावत्कालं प्रदेशेषु धारणा मनसः स्थितिः ॥८७॥
कालावधिपरिच्छिन्नं देहे संस्थापितं मनः ॥
न प्रच्यवति पक्ष्याद्वा धारणा साऽभिधीयते ॥८८॥
धारणा द्वादशायामा ध्यानं द्वादशधारणं ॥
ध्यानद्वादशकं यावत्समाधिरभिधीयते ॥८९॥
धारणाभ्यासयुक्तात्मा यदि प्राणैर्व्वियुज्यते ॥
कुलैकविंशदुत्तार्य स्वयं याति शिवं पदं ॥९०॥
ध्यै चिन्तायां स्मृतो धातुः शिवचिन्ता मुहुर्म्मुहुः ॥
अनाक्षिप्तेन मनसा ध्यानमित्यभिधीयते ॥९१॥
आत्मनः समनस्कृत्य मुक्ताशेषोषधस्य च ॥
शिवचिन्ता समासक्तिर्ध्यानं नाम तदुच्यते ॥९२॥
ध्येयालम्बनसंस्थस्य सद्वशः प्रत्ययस्य च ॥
प्रत्ययान्तर निर्म्मुक्तः प्रवाहो ध्यानमुच्यते ॥९३॥
ध्येयावास्थितचित्तस्य प्रदेशे यत्र कुत्रचित् ॥
ध्यानन्तत्रेदमुद्दिष्टं प्रत्ययस्यैकतानता ॥९४॥
एवं ध्यानसमायुक्तः स्वदेहं यः परित्यजेत् ॥

कुलस्वजनमित्राणि समुद्धृत्य शिवोभवेत् ॥९५॥
एवं मुहूर्त्तमर्द्धं वा ध्यायेद्यः श्रद्धया शिवं ॥
सोऽपि याङ्गतिमाप्नोति न तां सर्व्वैर्महामखैः ॥९६॥
यावन्तः कर्म्मयज्ञास्युर्व्रतदानपांसि च ॥
सर्वे ते जपयज्ञस्य नार्घन्ति षोडशीं कलां ॥९७॥
माहात्म्यं वाचिकस्यैव जपयज्ञस्य कीर्तितं ॥
अस्माच्छतगुणोपांशुः साहस्रो मानसः स्मृतः॥ ९८॥
यदुच्चनीचस्वरितैः शव्दैः स्पष्टपदाक्षरैः ॥
मन्त्रमुच्चारयेद्बाचा जपयज्ञः स वाचिकः ॥ ९९॥
शनैरुत्थापयेन्मन्त्रमीषदोष्ठौ प्रचालयन् ॥
किञ्चिच्छब्दात्स्वयं विद्यादुपांशुरुज्जपःस्मृतः ॥ १३०० ॥
धिया यदक्षरश्श्रोण्यां वर्णात्वर्णं पदात्पदं ॥
शब्दार्थचिन्तनाभ्यस्तं तदुक्तं मानसंजपः॥ १॥
त्रयाणां जपयज्ञानां श्रेयः स्यादुत्तरोत्तरं ॥
भवेद्यज्ञविशेषश्च विशेषस्तत्फलस्य च ॥२॥
जपेन देवतानित्यं स्तूयमाना प्रसीदति ॥
प्रसन्ना विपुलान् भोगान् दद्यान्मुक्तिञ्च शाश्वतीं ॥ ३॥
यक्षरक्षः पिशाचाश्च ग्रहाः सर्प्पादिभीषणाः॥
जापिनन्नोपसर्प्पन्ति भयभीताः समन्ततः ॥ ४ ॥
जपेन पापं क्षपयेदशेषं यत्तत्कृतं जन्मपरम्परासु ॥
जपेन रोगाञ्जयते च मृत्युं जपेन सिद्धिंलभते च मोक्षं ॥५॥
जपाच्छ्रन्तः शिवं ध्यायेद् ध्यानाच्छ्रान्तः पुनर्ज्जपेत् ॥
जपध्यानाभियुक्तस्य शिवः क्षिप्रं प्रसीदति ॥६॥
पदार्थमात्रनिर्भासः स्तिमितोदधिवत्स्थितः ॥
स्वरूपशून्यवद् ध्यानं तत्समाधिरिहोच्यते ॥७॥
ध्येये मनः सन्निवेश्य यत्तिष्ठेन्निश्चलश्चिरं ॥
निर्वाणानलबद्योगी समाधिस्थः प्रकीर्तितः ॥८॥
न श्रृणोति न च प्रीति (जिध्रति) न रस्यति न पश्यति ॥
न च स्पर्शं विजानाति न सङ्कल्पयते मनः ॥९॥
न चातिमन्यते किञ्चिन्न च बुद्ध्यति काष्ठवत् ॥
एवमीश्वरसंल्लीनः समाधिस्थः प्रगीयते ॥१०॥
यथा दीपो निवातस्थो नेङ्गतेसोपमा स्मृता ॥

ध्यायतः शिवमात्मस्थं समाधिस्थस्ययोगिनः ॥११॥
प्राणायामाद्भवेत्क्षिप्रं सर्व्व पाप परिक्षयः॥
सर्वेन्द्रियवशीकारः प्रत्याहारेण जायते ॥१२॥
मनसःपरमं स्थैर्यं धारणातः प्रवर्त्तते ॥
ध्यानेन प्रलयं गच्छेदनैश्र्यगुणाष्टकं ॥१३॥
प्रसादाभिमुखी प्रीता भवेज्जप्येन देवता ॥
समाधिना च सर्व्वत्र प्रज्ञालोकः प्रवर्त्तते ॥ १४॥
एवमभ्यस्यतः पुंसः षडङ्गं योगसाधनं ॥
तदन्तराया नश्यन्ति मृगाःसिंहभयादिव॥१५॥
आलस्यं व्याधयस्तीव्राः प्रमादध्यानसंशयाः ॥
अनवस्थितचित्तत्वमश्रद्धाभ्रान्तिदर्शनं ॥१६ ॥
दुःखानि दौर्मनस्यञ्च विषयेषु च लोलता ॥
इत्येवमादिकाः प्रोक्ता योगविघ्नाः स्वभावतः॥ १७ ॥
अत्यन्तोत्साहयुक्तस्य जपध्यानरतस्य च ॥
तदन्तरायानश्यन्ति सर्व्वे विघ्नाःशनैः शनैः ॥१८॥
उपशान्तेषु विघ्नेषु समाधिस्थस्य योगिनः ॥
उपसर्गाः प्रवर्तन्ते दिव्यास्ते सिध्दिसूचकाः ॥१९ ॥
प्रातिभः श्रावणो वार्त्ता दर्शनास्वादवेदनाः॥
षडुपसर्गा योगस्य परित्यागे च सिद्धयः॥२० ॥
प्रार्थयन्ति च तान्देवा भोगैर्दिव्यैश्च योगिनः॥
नृपाश्च पृथिवीदानैर्द्रव्यैश्चान्ये धनाधिपाः॥२१॥
उपतिष्ठन्ति रत्नानि धनानि च महान्ति चः॥
वेदादिसर्व्वशास्त्राणि स्वयमेव भवन्ति च॥२२ ॥
अभीष्टच्छन्दोहृदयं काव्यं चास्य प्रवर्त्तते ॥
रसायनानिसर्व्वाणि दिव्याश्चौषधयः स्वयं ॥२३॥
समस्तानिच शिल्पानि कलाः सर्व्वाश्च विन्दति ॥
नागाः सुरेन्द्रकन्याश्च प्रणिपत्य नमन्ति च॥ २४ ॥
महामहोदधेर्यद्वद् भग्नाज्जायन्ति विप्रुषः ॥
योगैश्वर्योदधेस्तद्वद्विप्रुष प्रतिभादयः ॥ २५ ॥
प्रातिभादिषु क्षुद्रेषु गुणेष्वासक्त चेतसः ॥
सम्भवेत्परमैश्वर्यमक्षयं सार्व्वकामिकं ॥ २६॥
तस्माद्गुणांश्च भोगांश्च देवासुरमहीभृतां ॥

तृणवद्यस्त्यजेत् सर्वानीशस्तस्य प्रसीदति ॥२७ ॥
ततः प्रसन्ना देवेशि बुद्धिः सत्वात्प्रवर्त्तते ॥
अणिमादिगुणैश्वर्य्य सर्व्वज्ञत्वञ्च योगिन : ॥२८ ॥
सर्वज्ञश्च तनुं त्यक्त्वा शुद्धः शान्तःसदा सुखी॥
निर्द्वन्द्वः परिपूर्णश्च मुक्तः स्वात्मनि तिष्ठति ॥२९ ॥
अनुग्रहाय चान्येषां यदि देहं न सन्त्यजेत् ॥
अणिमादिगुणैश्वर्य्यःसन्तिष्ठेच्छिववत्प्रभुः॥३० ॥
दाता हर्त्ता च कर्त्ता च - भोक्ता च प्रकृतेर्व्वशी ॥
ज्ञानाञ्जनोपदेष्टा च कुज्ञानावृतचेतसां ॥ ३१ ॥
इत्येवमिच्छया भोगान् भुक्त्वा ज्ञानं प्रकाश्य च॥
प्रलयान्ते तनुं त्यक्त्वा स्वात्मन्येवावतिष्ठते ॥ ३२ ॥
यस्मात् सौख्यञ्च मोक्षञ्च योगादुभयमाप्नुयात् ॥
तस्मात् सर्व्वं परित्यज्य जपेद् ध्यायेत्सदा शिवं ॥३३ ॥
ये संश्रिता ज्ञानमय सुनावं ते यान्ति पारं भवसागरस्य ॥
तिष्ठन्तिमग्ना भवसागरे ऽ स्मिन् पुत्रेषु दारेषु गृहेषु सक्ता :॥३४ ॥
ध्यानेनमोक्षम्परमञ्च सौख्यं विन्दन्ति सर्व्वे पुरुषाःस्त्रियाश्च ॥
अनेन देहेन लभन्ति केचित् सिद्धाश्च भोगान् प्रलये च मुक्तिं ॥ ३५ ॥
इदं परं पापहरं पवित्रं ज्ञानामृतं मृत्युविनाशनञ्च ॥
विज्ञाय यः प्राणिहिताय दद्याज्जद्गुरुस्तेन समः कुतोऽन्यः ॥३६॥
स एव वन्द्य :प्रतिपूजनीयः स एव माता जगतः पिता च ॥
स एव बन्धुः स गुरुः शिवश्च ज्ञनामृतं यः परमं प्रदद्यात् ॥ ३७ ॥

इति शिव धर्मेत्तिरे ज्ञानयोगो नाम दशमोऽ ध्यायः ॥ १० ॥

अथ पशुपतिमते शिवधर्म्ममहाशास्त्रे शिवधर्म्मोत्तरे प्रायश्चित्तंनाम

॥एकादशोऽध्यायः॥

ॐ नमःशिवाय

अथ पापविशुद्ध्यर्थं प्रायश्चित्तं समाचरेत् ॥
कृत्वा शौचं तथा स्नानं शिवाग्निगुरुपूजकः ॥ ३८ ॥
उत्थाय पश्चिमे यामे सुगृहीतकमण्डलु : ॥
धौतपादुकमाक्रम्य मैत्रं कुर्य्याद्यथाक्रमं ॥३९ ॥
दीक्षविनीतचित्तज्ञस्तोयदानविधानवित् ॥
सहायः शौचकार्य्येषु तदभावात्कमण्डलुः ॥४० ॥
वाचं नियम्य यत्नेन ष्ठीवनोत्कासवर्ज्जितः ॥
शिरः प्रावृत्य तत्कुर्यादन्तर्धाय तृणैर्म्महीं ॥४१ ॥
दिवा सन्ध्यासु कर्णस्थब्रह्मसूत्री ह्युदङ्मुख :॥
कुर्य्यान्मूत्रपुरीषेतु रात्रौ चेद्दक्षिणामुख : ॥४२ ॥
मार्ज्जनं वामहस्ते वीरणाद्यैरयाज्ञिकैः॥
विण्मूत्रमुत्क्षिपेत्तत्र छायायामात्मनो न च ॥ ४३ ॥
नानिलानलदेवानां गोब्राह्मणजलम्प्रति ॥
जन्तुशाद्वलभस्मास्थिकृष्णच्छायां विवर्ज्जयेत् ॥४४॥
पादावसेवनं मूत्रं पुरीषष्ठीवनञ्च यत् ॥
दूरादावसथात्सर्व्वं यच्चान्यद् विकृतम्भवेत् ॥ ४५ ॥
गृहीतशिश्नश्चोत्थाय समायुक्तकमण्डलुः॥
शौचं कुर्यान्मृदाम्भोभिर्गन्धलेपापनुत्तये ॥ ४६ ॥
तिस्त्रो लिङ्गे मृदो योज्यास्त्वेकैकान्तरमृत्तिका ॥
आमलीफलमात्रञ्च पञ्च वामकरे यथा ॥ ४७॥
मृदस्तिस्त्रः कराभ्यां तु मूत्रोत्सर्गे भवेच्छुचि :॥
पञ्चापाने मृदो योज्यास्तन्निरन्तरमृत्तिकाः॥ ४८ ॥
दश वामकरे देयाःपाण्योः सप्त तथोभयो :॥
उपस्पर्शनकाले तु तिसृभिः क्षालयेत्करौ ॥४९ ॥
जङ्घाशौचमृदस्तिस्र एकैकान्तरमृत्तिका ॥
अक्षिणी नासिका कर्णौ तिस्रः संशोध्य हस्तयोः ॥५० ॥

कर्द्दमामेध्यमूत्राद्यैर्मदङ्गे सप्तपञ्चधा ॥
क्षालिते वारिण पूर्वं स तिस्रोऽन्तरमृत्तिका: ॥ ५१ ॥
आमणिबन्धनात् पाणिं मृत्तोयेन विशोधयेत् ॥
अन्त : कृत्वा भुजौ सम्यग् बहिज्ज़ानूर्व्विधाय च ॥ ५२॥
उद्धृत्तानुष्णफेनाभि: पूताभिर्व्वस्त्रचक्षुषा ॥
हृदयाभिरशब्दाभिस्त्रिचतुर्वारमाचरेत् ॥५३ ॥
परिमृज्य द्विराचम्य द्वादशाङ्गानि चालभेत् ॥
तूष्णीमेव ततो भूय: शिवमन्त्रेण पूर्व्ववत् ॥ ५४ ॥
आचमेद् ब्रह्मतीर्थेन ब्रह्मसूत्री ह्युदङ्ख :॥
तदन्तरान्तरे पाणिमाप्लाव्याप्लाव्य चाम्भसा ॥५५ ॥
वस्त्रशौचं प्रवक्ष्यामि तच्छुद्धौ शुद्ध्यते यत: ॥
वस्त्रशौच विहीनात्मा शुचिरप्यशुचिर्भवेत् ॥५६ ॥
देवकार्य्या प्रयोगानां प्रत्यहं शौचमिष्यते ॥
वाससामितरेंषाञ्च शौचं कुर्य्यान्मलागमे ॥५७ ॥
शुचिना तोरणङ्कार्यं स्वाङ्गदण्डत्रयेण तु ॥
तत्र वासांसि निर्णिज्य सम्यग्बद्धानि शोषयेत् ॥५८॥
खगैर्व्वा ऽ दुषिते बृक्षे निर्म्मले वा शिलातले ॥
दुर्व्वाजाले शुचौ वापि क्षालितेषु तृणेषु वा ॥५९॥
विण्मूत्रशुल्कदिग्धानां मृत्तोयेन विशोधनं ॥
कार्यमादौ तत: क्षारैर्गोमूत्राद्यैश्च शोधनं ॥६०॥
मृद्वारि तावदादेयं गन्धलेपौ हि तद्गतौ ॥
तस्मात्तान् दूरतो यावत्सर्व्वासु द्रव्य शुद्धिषु ॥६१॥
कौशेयाविकयोरुष्णै : क्षौमाणां गौरसर्षपै: ॥
श्रीफलैरंशुपट्टानां कुतपानामरिष्टकै :॥६२॥
चैलवद्रज्जुवेत्राणां पक्षचामरचर्म्मणि ॥
कल्कलानाञ्च सर्व्वेषां शुद्धि: कार्य्या विजानता ॥६३॥
विदलालांबुपात्राणां वस्रवच्छुद्धिरिष्यते ॥
गोपालैर्व्वर्षणं चैषां विशेष: परिकीर्त्तिता: ॥६४॥
कांस्यायस्ताम्ररौप्याणां त्रपुसीसकयोरपि ॥
शुद्धि: शौचार्थिना कार्य्या भस्मक्षाराम्लवारिभि: ॥६५॥
निर्ल्लेपं काञ्चनं रौप्यमद्भि:पात्रं विशुद्ध्यति ॥
मण्यश्मशंखशुक्तीनां शौचं तैजसवत्स्मृतं ॥६६॥

रजः खरासूतिका द्यैर्मूत्राद्यैश्चापि दूषितं ॥
अग्नेरपाश्च संयोगात्तैजसं शुद्धिमाप्नुयात् ॥६७॥
शूद्रोच्छिष्टस्य पात्रस्य त्रिः कृत्वा परिमार्ज्जनं ॥
शौचं बै पूतकामेन कर्त्तव्यं तैजसस्य तु ॥६८॥
द्रव्याणामिह सर्व्वेषां शुद्धिरुत्प्लवनं स्मृतं ॥
पलालतृणकाष्ठानां प्लवनाच्छुद्धिरिष्यते ॥६९॥
स्त्रुवादिचरुपात्राणां मुसलोलूखलस्य च ॥
शूर्पगोरसभाण्डानां शुद्धिरुष्णेन वारिणा ॥७०॥
श्रृङ्गास्थिदारुदन्तानां तक्षणैः परिशोधनं ॥
अत्यन्तोपहतानान्तु गोमूत्रस्सोदकेन तु ॥७१॥
संहतानाञ्च द्रव्याणां प्रोक्षणाच्छुद्धिरिष्यते ॥
असंहत द्रव्यशौचं कार्य्यं प्रत्यात्मिकं सदा ॥७२॥
वस्त्रधान्यादिराशीनामेकदेशस्य दूषणे ॥
तावन्मात्रं समुद्धृत्य शेषः प्रोक्षणमर्हति ॥७३॥
अम्भसाल्पीयसा कार्य्यं मृदाचैव विशोधनं ॥
शाकमूलफलाद्यानां धान्यवच्छुद्धिरिष्यते ॥७४॥
गोकीटमक्षिकाद्यैर्व्वा कृमिसंस्पर्शनेषु वा ॥
छागोपजिघ्रणाच्छुद्धिरन्यस्याद्भिश्च प्रोक्षणात् ॥७५॥
खरोष्ट्रश्वश्रृगालाद्यैर्ब्बिड्वराहावलेपने ॥
तावन्मात्रं समुद्धृत्यशेषं संस्कारमर्हति ॥७६॥
दीत्तोल्मुकेन संस्पृश्य त्रिसप्तधौतमेव च ॥
सुवर्णतोयसंस्पृष्टं शुद्धमेव न संशयः ॥७७॥
मक्षिका केशसम्मिश्रं पदान्तोपहतश्च यत् ॥
रजः पिपीलिकायुक्तं भुञ्जन्नोन्नमवक्ष्यति ॥७८॥
तावन्मात्रं समुद्धृत्य प्रोक्षयेदम्भसा ततः ॥
आज्ञाभिधारणाच्छुद्धिर्भस्मक्षेपेण वा भवेत् ॥७९॥
भूमिस्थमुदकं शुद्धं वितृष्णा यत्र गौर्भवेत् ॥
आव्याप्तपदमध्येन गन्धवर्ण रसान्वितं ॥८०॥
न मुखोद्विप्रुषोच्छिष्टं कुर्य्यारङ्गन्न वेङ्गताः ॥
न श्मश्रूणि गतान्नास्यं न दन्तान्तरसंस्थिताः ॥८१॥
पादौ स्पृशन्ति ये वापि पराचमनबिन्दवः ॥
ते पार्थिवसमा ज्ञेया न तैरप्रयतो भवान् (भवेत्) ॥८२॥

पीत्वा भुक्त्वा च सुप्त्वाच सम्प्रयाष्याधमैः सह ॥
ष्ठीवित्वाध्ययनादौ च शुद्धिरप्याचमे पुनः ॥८३॥
द्रव्यहस्ते समुच्छिष्टस्तान्निध्यायाङ्गिराचमेत् ॥
द्रव्यशुद्धिश्च पूर्व्वोक्ता कार्य्या द्रव्यानुरूपतः ॥८४॥
गोशकृन्मूत्र वल्मीकमृत्तिका भस्मवारिणा ॥
वेश्मायतनलिङ्गानाङ्कार्य्यमेतद्विशोधनं ॥८५॥
मार्ज्जनोल्लेखनैः सक्तैर्ग्गोनिसेक्तैर्ज्जलेन च ॥
इति पञ्चविधाशुद्धिर्भूमौ कार्य्या विजानता ॥८६॥
ग्रामाद्धस्तशतङ्गत्वा नगराच्च चतुर्गुणं ॥
गृहीसर्वत्रमेवास्यान्निर्लेपा यत्र दृश्यते ॥८७॥
शुचिराकरजन्द्रव्यङ्कारुहस्तः शुचिःसदा ॥
प्रस्नवे च शुचिर्व्वत्सः शकुनिः फलपातने ॥८८॥
विप्रगोमक्षिकाश्चाजच्छायाग्निसूर्य्यरश्मयः ॥
रजोभूर्व्वायुरापश्च मेध्यानि स्पर्शनं सदा ॥८९॥
नगरं ग्रामरथ्यां वा परिभ्रम्य गृहाद्बहि ः॥
पादौ प्रक्षाल्य मृत्तोयैर्गृहान्तः प्रविशेत्ततः ॥९०॥
शिरस्नानं प्रकुर्व्वीत स्रवन्तीषु विशेषतः ॥
मृद्गोमयैः समुद्घृष्य त्रिः शरीरं समन्ततः ॥९१॥
स्नानवस्त्रं समुत्सृज्य द्वितीयं परिधाय च ॥
तेन स्नात्वा कषायाद्यैर्व्वस्त्रमन्यत्समाददेत् ॥९२॥
सोपनीयःसमाचम्य पानीयमभिमन्त्रयेत् ॥
एक विंशतिवारांश्च शिवमन्त्रेण भावित ॥९३॥
ध्यायमानः शिवं शान्तं शनैः स्नानं संमाचरेत् ॥
आचम्य चात्मनः कुर्य्यादभिषेकं ततः पुनः ॥९४॥
कुम्भेन पर्णपुटकैःकरद्वयपुटेन वा ॥
जपन्नेकादशात्मानं स्थापयेद्येन वा पुनः ॥९५॥
विद्यालक्ष्मी विशुद्ध्यर्थमभिषिञ्चन् समन्ततः ॥
आरभ्य प्रोक्षयेद्भूयस्तावदेवा च ना शिरः ॥९६॥
गृहेच परिजप्तेन स्नानकुम्भेन कारयेत् ॥
एवं भावेन सुस्नातः सर्व्वपापविवर्ज्जितः ॥९७॥
सर्व्वतीर्थाभिषेकस्य श्रद्दधानःफलं लभेत् ॥
सन्ध्यात्रयपरिभ्रष्टः शिवैकादशिकात्रयं ॥९८॥

जप्त्वा शुद्धिमवाप्नोति स्नानहीनश्च तज्जपेत् ॥
पर्व्वण्यपूज्य देवेशं गुरुमग्निञ्च भक्तितः ॥९९॥
अदत्वा च बलिन्तत्र शिवस्याष्टशतञ्जपेत् ॥
पत्रं पुष्पं फलं मूलमन्नपानाद्यमौषधं ॥१४००॥
अनिवेद्य न भुञ्जीत यदाहाराय कल्पितं ॥
अनिवेद्य प्रभुञ्जानः प्रायश्चित्ती भवेन्नर :॥१॥
शिवाष्टशतजप्तेन पूजया च विशुद्ध्यति ॥
अनस्थिप्राणसङ्घातं हुत्वैकादशिकाञ्जपेत् ॥२॥
हुत्वा च पक्षिणः सर्व्वांस्त्रिरेकादशिकाम्पुनः ॥
सर्प्पमार्ज्जारनकुलं श्वानमुष्ट्रं खरं हयं ॥३॥
गजाद्यांश्च मृगान् सर्व्वान् हत्वावाष्टशतञ्जपेत् ॥
जपेदष्टसहस्रन्तु क्षत्रविड्गोवधे पुनः ॥४॥
शिवाग्निगुरुपूजा च योगिन्द्रद्विजभोजनं ॥
हत्वा शुद्रं स्त्रियंबालं शिवं पञ्चशतं जपेत् ॥५॥
जपेदष्टसहस्रञ्च स शूद्रस्य प्रमारणे ॥
सद्वृत्तः शिवभक्तश्च नाद्यात् मृतकसूतके ॥६॥
संस्कारेषु च सर्व्वेषु गृहेषु किमुतान्यतः ॥
सूतके न तु भोक्तव्यन्नैत्यकञ्च विवर्ज्जयेत् ॥७॥
भुक्त्वा प्रमादतः स्नेहाच्छिवस्याष्टशतञ्जपेत् ॥
श्वविड्वराहचण्डालैर्दुर्ज्जनैः कपिकुक्कुटैः ॥८॥
उलूक गृध्रकाकाद्यैः स्पृष्टमन्नन्न भक्षयेत् ॥
शिवैकादशजप्तेन गव्येन हविषाबुधः ॥९॥
प्रीतेन शुद्ध्य क्षिप्रमभोज्याहारदूषितः ॥
तीर्थयात्राविशुद्धात्मा सद्वृत्तः शिवभावितः ॥१०॥
पुत्रैरपि न भुञ्जीत सार्द्ध क्रुरैरधार्मिकैः॥
महापातकशुद्ध्यर्थं सहस्राणिजपेद्दश ॥११॥
प्राणायामैस्त्रिसंन्ध्यञ्च शिवमग्निञ्च पूजयेत् ॥
रेतोमूत्रपुरीषाणि प्राश्य पीत्वा च वारुणीं ॥१२॥
भुक्त्वा चान्नमभोज्यानां गत्वा चाप्यन्त्यजां स्त्रियं ॥
जप्त्वा शिवायुतं सम्यक् पूर्व्वोक्तविधिना बुधः ॥१३॥
पञ्चगव्यं सकृत् पीत्वा सर्व्वपापैः प्रमुच्यते ॥
गोमूत्रं गोमयं क्षीरं दधि सर्पिरनुक्रमात् ॥१४॥

जपेत् त्रिःपञ्चब्रह्मेण ॐ कारेणकुशोदकं ॥
पलाशपद्मिनीपत्रे ताम्रपात्रेऽथवा स्थितं ॥१५॥
कृत्वैकस्थं शिवेनैव जपेदष्टशतं पुनः ॥
अहोरात्रोषितः स्नातः शिवस्य पुरतः स्थितः ॥१६॥
ॐ काराद्येन मन्त्रेण प्राङ्मुखैस्तच्छनैः पिवेत् ॥
पीतमात्रो भवेत्पूतः सम्पूर्णः शशिनिर्म्मलः ॥१७॥
ब्रह्महत्यादिकैः पापैः सर्वैरेवाशु मुच्यते ॥
मातापितृसमुद्भूतं सहजागन्तुकञ्च यत् ॥१८॥
अस्थिमज्जागतं पापं ब्रह्मकूर्च्चः क्षणाद्दहेत् ॥
अष्टम्यं ब्रह्मकूर्चेन स्नापयित्वा सकृच्छिवं ॥१९॥
पीत्वा च पातकैर्म्मुक्तः शिवलोके महीयते ॥
तस्मात् प्रतिचतुर्मासं ब्रह्मकूर्च्चं पिबेद्वुधः ॥२०॥
सर्व्वपापविशुद्ध्यर्थं सर्व्वपातकनाशनम् ॥
प्रायश्चितं शिवप्रोक्तं न देयं यस्य कस्य चित् ॥२१॥
एतद्रहस्यम्परमं प्रायश्चित्तं स्वयं बुधः ॥
कुर्य्यात् प्रच्छन्नपापेषु प्रकाशे प्रार्थयेद् गुरुं ॥२२॥
शिवज्ञानविदं शान्तं महापातकनाशनं ॥
प्रणिपत्य गुरुं पश्चात् प्रार्थयेच्छुद्धिमात्मनः ॥२३॥

इति शिवधर्म्मोत्तरे प्रायश्चित्तन्नामैकादशो ऽध्यायः ॥ ११॥

अथ पशुपतिमते शिवधर्मे महाशास्त्रे शिवधर्मोत्तरे गोलोको नाम

द्वादशोऽध्यायः

ॐ नमः शिवाय

श्रुत्वैतत्परमं गुह्यं गवान्देहसमुद्भवम् ॥
ब्रह्मकूर्च्चस्य माहात्म्यमगस्तिः पुनरब्रवीत् ॥२४॥
भगवन् ! श्रोतुमिच्छामि गोलोकः कीदृशःपुनः ॥
प्राप्यते कर्म्मणा केन कियत्यंध्वनि संस्थितः ॥२५॥

॥स्कन्द उवाच॥

श्रूयतामभिधास्यामि नमस्कृत्य महेश्वरम् ॥
गोमातृलोकं परमं सर्व्वकामसमन्वितम् ॥२६॥
अधस्तात्सर्व्वलोकानां नरकाः क्रमशः स्थिताः ॥
पातालानि ततः सप्त पातालपतयस्तथा ॥२७॥
यावत्प्रमाणं स्वादूदं परिच्छिन्नं महीतले ॥
तावत्प्रमाणमेवाधः कूपाकाराणि तानि तु ॥२८॥
तेषां प्रत्येकमुत्सेधः प्रमाणं परिकीर्त्तितं ॥
योजनानां सहस्राणि दश तन्त्रार्थ वित्तमैः ॥२९॥
सहस्रयोजनन्तेषां दलाभ्यन्तर नेमयः॥
सुषिराणाम्प्रमाणञ्च सहस्राणि नवैकशः ॥३०॥
तेषां रुचिरमम्भोधिस्तामतस्तन्महातलं ॥
दिव्यद्रव्योपसम्पन्नं श्रीमच्चामीकरद्युतिः ॥३१॥
नागराजः सदैवास्ते तस्मिन् कृतनिकेतनः ॥
अनन्तो ऽनन्तधामा च मुचुकुन्दो नृपोवली ॥३२॥
बासुकेर्न्नागराजस्य तत्र चारु महापुरं ॥
ततो रसातलन्नाभ शिलासंघातभूमिकं ॥३३॥
पुरं सुलोम्नस्तत्रैव दानवाधिपतेर्म्महत् ॥
सुपर्णतश्च दैत्यानामन्येषाञ्च महात्मनाम् ॥३४॥
तत्र तलातलन्नाम शर्क्करार्चित भूमिकं ॥
नागानां खलिकादीनां निवासस्तत्र कीर्त्तितः ॥३५॥
दानवाधिपतीनाञ्च तत्रैव निलयाःकृताः ॥

वैराचन हिरण्याक्ष प्रभृतीनां महात्मनां ॥३६॥
ततः सुतलमित्युक्तं पातालं पीतभौमिकं ॥
तस्य चोर्ध्वञ्च सर्व्वेषां मृण्मय्येव तलक्षितिः ॥३७॥
असुराधिपतेस्तत्र कालनेमेर्महत्पुरं ॥
चारुचामीकरप्रख्यं वैनतेयस्य चापरं ॥३८॥
ततश्च वितलन्नाम पातालं रक्त भूतलं ॥
तस्मिन् महान्तको नागो दानवाश्च कृतालयाः ॥३९॥
तारकाग्निमुखस्तत्रः अनुक्रा(ह्रा)दश्च दानवः ॥
निवसन्ति कृतावासाः प्रह्लादस्तु तथैव च ॥४०॥
पातालन्त्रितलन्नाम शुक्लक्षितितलन्ततः ॥
कम्बलाश्वतरौ नागौ सहितौ यत्र तिष्ठतः ॥४१॥
महाजम्भहयग्रीवप्रभृतीनां महात्मनां ॥
वीराणामसुरेन्द्राणान्निवासस्तत्र कल्पितः ॥४२॥
कृष्णक्षितितलन्तस्मात्पातालन्तलसंज्ञितं ॥
शङ्कुकर्णमहानाद नमुचीनां निकेतनं ॥४३॥
पातालसप्तकादूर्ध्वं सप्तद्वीपा मही स्थिताः ॥
समुद्रैःसप्तभिर्य्युक्ता पर्व्वतैःसमलङ्कृता ॥४४॥
जम्बूद्वीपो महीमध्ये प्लक्षद्वीपस्ततः परः ॥
तृतीय : शाल्मलीद्वीपः कुशद्वीपश्च तद्बहिः ॥४५॥
क्रौञ्चद्वीपश्च परतः शाकद्वीपश्च तद्बहिः ॥
परतः पुष्करद्वीपः सप्तमः परिकीर्त्तितः ॥४६॥
क्षारोदश्चेक्षुरसोदः सुरोदश्च घृतोदधिः ॥
दध्युदः क्षीरपूर्णश्च स्वादूदः सप्तमः स्मृतः ॥४७॥
अत्र द्वीपसमुद्राणां द्विगुणाद् द्विगुणोत्तरः ॥
प्रमाणं विस्तरोज्ञेयो नियुतः प्रथमः स्मृतः ॥४८॥
हिमवान् हेमकूटश्च निषधश्चेति दक्षिणे ॥
नीलः श्वेतश्च श्रृङ्गीच मेरोरुत्तरतस्त्रयः ॥४९॥
मध्ये मेरुःस्थितः षण्णां जम्बूद्वीपस्य मध्यतः ॥
माल्यवान् पर्वतो ज्ञेयः पश्चिमे गन्धमादनः ॥५०॥
एते पर्व्वतराजानो जम्बूद्वीपे नव स्थिताः ॥
प्लक्षद्वीपादिषु ज्ञेयाः सप्त सप्तैव पर्व्वताः ॥५१॥
पुष्करद्वीपमध्ये च पर्व्वतो बलयाकृतिः ॥

एकः स्थितः समन्ताच्च नामतो मानसोत्तरः ॥५२॥
वहिरेक शिरा नाम स्वादूदस्य व्यवस्थितः ॥
उर्व्वाकरतलाकाराः काञ्चनै : परिमण्डलाः ॥५३॥
आरुद्रसन्निवेशान्ता निवेश्या विबुधाक्षितिः ॥
तस्याः प्रमाणं निर्द्दिष्टं दशयोजनकोटयः ॥५४॥
लोकालोक इति ख्यातस्तत्पर्य्यन्ते समन्ततः ॥
स्थितो हेममयः श्रीमानचलः परिमण्डलः ॥५५॥
योजनानां सहस्राणि अधश्चोर्ध्वं समुच्छ्रितः ॥
तावदेव च विस्तीर्णस्तदूर्ध्वं भानुमान्यतः ॥५६॥
गन्धर्व्वयक्षरक्षोभिः पिशाचैश्च निषेवितः ॥
मनुष्यैः पशुभिश्चैव भूमेः पक्षिसरीसृपैः ॥५७॥
स्थावरैर्व्विविधाकारै भूर्तैर्युक्तस्तु षड्विधैः ॥
भूर्ल्लोकतो भुवर्ल्लोको यावदादित्यमण्डलं ॥५८॥
अनिकेता बसन्त्यस्मिन् बसुरुद्राःसभाष्कराः ॥
आदित्यमण्डलादूर्ध्वं प्रोक्तः स्वर्ल्लोक आध्रुवं ॥५९॥

अब पशुपतिमत शिवधर्म महाशास्त्रका शिवधर्मोत्तरमा गोलोकवर्णनको वाह्रौं अध्याय प्रारम्भ हुन्छः-

कल्याणमय कल्याणकारी पशुपतिनाथ शिवलाइ नमस्कार । यो परम गुह्यतम गाइका अङ्ग प्रत्यङ्गकोमाहात्म्य सुनेर अनिब्रह्मकूर्च (पञ्चगब्यादि) को माहात्म्य सुनेर अगस्ति ऋषिले स्कन्दकुमार कार्त्तिकेयसित सोधे :- भगवन ! गोलोक कस्तो छ ? कुन पुण्यले त्यो पाइन्छ ? जस्को पञ्चगव्य (गउत, गोबर, दहि, दूध घिउ अमृत जस्तो छ । जस्को दर्शन, पर्सन, परमकल्याणकारी छ, यस्ती गाइ आमाको गोलोक कस्तो छ ? भूः भुवः स्वः जनः महः तपः सत्यका साततले स्वर्गको कुन तलामा गोलोक छ ? सबै भन्नु होस् ? म सुन्न चाहन्छु । भने पछि स्कन्द कुमारले भन्नु भयो :- हे अगस्ति ! सुनः महेश्वर (बावा) लाइ नमस्कार गरेर म भन्दैछु जसबाट गोभक्त र शिवभक्तका समस्त मनः कामना सिद्ध हुन्छन्, परम पवित्र गाइ आमाको लोक कस्तो छ ? सबै विस्तार भन्छु :- सबै लोक भन्दा तल नरकहरु क्रमैसंग रहेका छन् । नरक भन्दा पनि अज्ज तल अतल वितल आदि सातौं पाताल लोक तथा सातै पातालाका अधिपतिहरु छन् । जति प्रमाणको स्वादु (स्वादिष्ट खाने पानीको) समुद्र धर्तीमुनिधर्तीले छोपियेको छ । तेत्ति परिमाणका ती सातै पातललोक कुवा जस्ता छन । समस्त विश्व ब्रह्माण्डको भूगोल र खगोल

जान्नेहरुले ती प्रत्येक पातलहरुको उचाइ लम्बाइ चक्लाइ आदि भनेका छन् । दश हजार योजन (४० हजार कोश) तिनका दलका भित्री नेमि (परिधि) हरु एक-एक हजार योजनका छन् । तिनका सुषिर (बिल=प्वाल) को प्रमाण दश हजार योजना छ । तामस (अन्धकारमय) समुद्रले घेरिएको नागमणिहरुले झलमल्ल रमाइलो महातल छ । जो अनेक प्रकारका दिव्य द्रव्यहरुले सम्पन्न छ र सुनौलो चम्कीलो छ । यस्तै अनेक प्रकारका द्रव्यहरुले शोभिएका सातै पाताल तथा भूर्भुवः आदि गरियेका सातै स्वर्गलोक छन् ।

विमानकोटयस्तस्मिन्नष्टाविंशतिरासते ॥
मेधीभूतो विमानानां सर्व्वेषामुपरि ध्रुवः ॥ ६०॥
समुत्य यत्र बद्धानि क्रमेणानिलमण्डलं ॥
योजनानां महीपृष्ठे ऊर्ध्वं पञ्चदश ध्रुवः ॥ ६१ ॥
नियताश्चानिलस्कन्धाःसप्तास्मिन्नुत्तराःस्थिताः॥
पृथिव्यां प्रथमःस्कन्धःस्थित आमेघमण्डलात् ॥ ६२ ॥
आवहो नाम मेघानां व्याहारावाहनादिषट् ॥
द्वितीयः प्रवहोनाम विवद्धः सूर्य्यमण्डले ॥६३ ॥
तृतीय उद्वहो वायुस्कन्ध इन्दौ प्रतिष्ठितः ॥
चतुर्थः संवहस्कन्धः स्थितो नक्षत्रमण्डले ॥६४ ॥
ग्रहेऽपि पञ्चमः सोऽपि विंवहः परिकीर्तितः ॥
स्कन्धः परावहः षष्ठः स्थितः सप्तर्षिमण्डले ॥ ६५ ॥
वायुः परिवहोनाम विवद्ध : सप्तमो ध्रुवे ॥
करोत्युत्प्लवनादीनि वर्षणादीनि चावहः ॥ ६६ ॥
उपरिष्टात् स्थितः षण्णां विमानोद्वहनक्रियां ॥
योजनानां ध्रुवात्कोटिमहर्ल्लोकः समुच्छ्रित : ॥ ६७ ॥
विनिवृत्ताधिकाराणामधिवासोमहात्मनां ॥
विंशतिः कोटयोंऽष्टौ च सुराणामधिकारिणां ॥ ६८ ॥
जनाः स्वर्ल्लोकमागम्य नियोगात्पद्मजन्मनः ॥
स्थित्वा मन्वन्तरन्तत्र स्वव्यापारावसायिते ॥६९॥
आरोहन्ति महर्ल्लोकमागच्छन्त्यपरे जंनाः ॥
ब्रह्मणो दिवसेनेत्थन्देववर्गाश्चतुर्दश ॥७०॥
क्रमेण कृत्वा कर्म्माणि महार्ल्लोकेवसन्ति ते ॥
कोटिद्वयं महर्ल्लोकाज्जनलोकः समुच्छ्रितः ॥७१॥

साध्या नाम सुरास्तस्मिन् वसन्ति सुखिनः सदा ॥
योजनानान्तपोलोकश्चतस्रः कोटियोजनाः ॥७२॥
प्रजानाम्पतयस्तत्र मानसा ब्रह्मणः सुता ॥
सत्यलोकस्तपोलोकात्कोटयः षट् समुच्छ्रितः ॥७३ ॥
आस्ते परिवृतस्तत्र सुराणामीश्वरैर्व्विराट् ॥
तस्योपरि ब्रह्मलोको द्विगुणेन समुच्छ्रितम् ॥७४॥
विस्तरेणतदूर्ध्वञ्च दिव्यभोग समन्वितः ॥
विष्णुलोकाच्च परतः श्रीमच्छिवपुरं महत् ॥ ७५ ॥
द्वात्रिंशत्कोटि विस्तीर्णन्तदर्द्धेन समुच्छ्रितम् ॥
सूर्य्यायुतप्रतीकाशं सर्व्वकामसमन्वितं ॥ ७६ ॥
अनेकाकारविन्यास रचना ह्युपशोभितं ॥
सर्व्वरत्नंचितैर्द्रव्यैस्तप्तजांम्बूनदप्रभैः ॥ ७७ ॥
सहस्रगुणभोगैश्च तदूर्ध्वं गुणभौमिकं ॥
अप्सरोगणसंङ्कीर्णः सर्व्ववाद्यसमन्वितैः ॥७८ ॥
गीतनृत्यरसोपेतैरप्रमेयगुणान्वितै : ॥
मनोजबैरसंख्यैश्च परिवारसमन्वितैः ॥ ७९ ॥
विमानैःसर्व्वतो व्याप्तं ताराभिरिव चाम्बरं ॥
क्वचिद्दोलागृहै रम्यैः किङ्किणीरवकान्वितैः ॥ ८० ॥
बुद्बुदैरर्द्धचन्द्रैश्च घण्टाचामरभूषितैः ॥
मणिमुक्तावितानैश्च छत्रैश्च मणिदण्डकैः ॥ ८१ ॥
सर्व्वरत्नचितैः शुभ्रैर्मुक्ताहारैश्च शोभितैः ॥
क्वचित्पुष्पगृहैः प्राप्यमसंख्येयगुणान्वितैः॥ ८२ ॥
सदापुष्पफलैर्वृक्षैः क्वचिद्व्याप्तं मनोरमैः ॥
पुष्पोद्यानैर्म्महारम्यैर्द्दिव्यगन्धगुणान्वितैः ॥ ८३ ॥
अमृतस्यन्दिनीभिश्च नदीभिरुपशोभितं ॥
हेमरत्नचिता वाप्यः सोपानैः स्फटिकप्रभैः ॥८४ ॥
सितरक्तासितैः पीतैः शुक्लवर्णैः सुगन्धिभिः ॥
पञ्चवर्णैश्च मृदुभिः पद्मैः शोभितकाञ्चनै : ॥ ८५ ॥
सदा विकसितास्नानैः श्रीमद्भिः पञ्चहस्तकै :॥
दशद्वादशहस्तैश्च विंशहस्तैश्च शोभनैः ॥ ८६ ॥
नालैर्म्मरकतप्रख्यैः पुष्पैश्च सुमनोहरैः ॥
पूर्णा नीलोत्पलैश्चान्या दीर्घिकाश्च क्वचित् क्वचित् ॥ ८७ ॥

सिंहव्याघ्रमुखैर्द्दिव्यैर्गजवाजिमुखान्वितैः ॥
गोमुखैश्छागवदनैर्न्नानाविहगरूपिभिः ॥ ८८ ॥
एकवक्त्रैर्म्महावक्त्रैर्वहुवक्त्रै : सुवक्त्रकैः॥
एकपादैस्त्रिपादैर्व्वा बहुपादैरपादकैः ॥ ८९ ॥
वामनैर्ज्जटिलैर्म्मुण्डैर्दीर्घग्रीवै र्म्महोदरैः ॥
महाकायैर्म्महानासैर्म्महाकर्णैरकर्णिकै : ॥ ९० ॥
नानारूपाकृतिधरैर्न्नानाभरणभूषितैः॥
नानावेशधरैर्द्दिव्यैःकामरूपैर्म्महाबलैः ॥ ९१ ॥
नानाप्रभावसंयुक्तैर्नानाशास्त्रविशारदैः ॥
असंख्यातैर्गणैर्व्याप्तं स्त्रियश्चान्यास्तथाविधा :॥ ९२ ॥
कुब्जवामनिका दीर्घा वरदेहा वराननाः ॥
मुण्डाश्च विकटाः स्थूलाः सुरूपाश्चिपिटनासिकाः ॥ ९३
लम्बोदरा ह्रस्वभुजा विनता ह्रस्वजानुकाः॥
मृगेन्द्रवदनाश्चान्या गजवाजिमुखास्तथा ॥ ९४ ॥
ह्रस्वकुञ्चितकेशाश्च सुन्दर्यः प्रियदर्शनाः॥
अन्याश्च कामरूपिण्यः कोटिशः परिचारिकाः ॥ ९५ ॥
बहिरन्तः प्रचारास्ता रमन्ते सर्व्वभूमिषु ॥
विचित्रा भूमयस्तत्र वज्रवैदूर्य्यसन्निभाः ॥ ९६ ॥
क्वचित्सुवर्णसंकाशाः क्वचिन्मरकतप्रभाः ॥
स्फटिकेन्द्रनीलवर्णाः पद्मरागनिभाः क्वचित् ॥ ९७ ॥
चन्द्रमण्डलसङ्काशाः क्वचिदिन्दीवरप्रभाः ॥
अम्लानैः पञ्चवर्णैश्च महापद्मैरलङकृता : ९८ ॥

गोलोकः शिवलोकश्च

क्वचिच्च विविधै रम्यैः कुसुमैरुपशोभिताः ॥
एवं विभिन्न वर्णाभा भूमयोऽतीव शोभनाः ॥९९ ॥
रमन्ते यासु सततं स्त्रीभिः सार्द्धं शिवाश्रिता : ॥
नीलोत्पलदलश्यामाः पद्मपत्रायतेक्षणा : ॥ १५०० ॥
तप्तचामीकराकाराः शुद्धश्यामास्तथापरा : ॥
प्रियङ्गुश्यामवर्णाश्च दिव्यगन्धमनोरमाः ॥ १ ॥
कृशोदर्य्यः सुसङ्गा(धा)स्ताः सुरूपाःप्रियदर्शनाः ॥

मत्तमातङ्गगामिन्यः स्तनभारविनामिता: ॥ २ ॥
मदालसा : सुकेशाश्च सर्व्वावयवशोभना: ॥
चित्रवस्त्रपरीधाना दिव्याभरण भूषिता: ॥ ३ ॥
सोल्लापोल्लापकुशला गीतवाद्यरतिप्रिया: ॥ ४
दन्तत्विषा रञ्जितगण्डदेशाः स्वात्मप्रभाभासितगात्रयष्ट्य: ॥
स्वाभाविकैस्ता ललितप्रयौगै : प्रहृष्टचित्ता रमयन्ति नार्य्य :॥ ५ ॥
नृत्यप्रयोगैर्म्मधुरैश्च गेयैस्तन्त्रीनिबन्धैर्व्विविधैश्च वाद्यैः ॥
हास्यै : स्मितैर्ल्लोचनविभ्रमैश्च कीडा प्रयोगैर्व्विविधैस्तथान्यैः ॥ ६॥
इति दिव्यगुणोपेतैः स्त्रीसहस्रैर्म्मनोरमैः ॥
असंख्यातैःपुरं व्याप्तमीश्वरस्य समन्ततः॥ ७ ॥
तन्मध्ये सर्व्वतोभद्रं दिव्यमायतनम्महत् ॥
शुध्दस्फटिकसङ्काशमाद्यस्थानमुमापतेः ॥ ८ ॥
तत्रास्ते भगवान् सोम : पूज्यमानो गणेश्वरैः ॥
सिध्दैश्च स्थानसम्प्राप्तै ब्रह्मविष्णवाग्निवायुभिः ॥९ ॥
ईश्वरायतनस्याधः श्रीमान् धर्म्मबृषःस्थितः ॥
यत्र वीरवृषस्तत्र क्षित्यां गोमातरः स्थिता ॥१०॥
गोलोकः शिवलोकश्च एक एव ततः स्मृत :॥
ये गुणा रुद्रलोकस्य गोलोकस्यापि ते गुणाः ॥११॥
नन्दा सुभद्रा सुरभिः (भी) सुशीला सुमनाश्च ताः ॥
इति गोमातरः पञ्च शिवलोके व्यवस्थिताः ॥१२॥
एता दिव्या जगद्धात्र्यः सर्व्वलोकस्य मातरः ॥
तर्प्पयन्ति जगत् कृत्स्नं नित्यमात्मरसामृतैः ॥१३॥
अवतीर्य्य शिवस्थानादीश्वरेच्छावशानुगाः ॥
उपकाराय सर्व्वेषामिमं लोकं समाश्रिताः ॥१४॥
तृणानिखादन्ति बसन्त्यरण्ये पिबन्ति तोयान्यपरिग्रहामि (णि) ॥
दुह्यन्ति बाह्यन्ति पुनन्ति पापं गवां रसैर्ज्जीवति जीवलोकः ॥१५॥
कुतस्तेषां हि पापानि येषां गृहमलङ्कृतं ॥
सततं बालबत्साभिर्गोभिः श्रीभिरिव स्वयं ॥१६॥
ये कुर्व्वन्ति गवां भक्तिं तृणतोयप्रदानतः ॥
(ब्र) प्रणसंरोहनाद्यैश्च गवां लोकं ब्रजन्ति ते ॥१७॥
तृणतोयप्रदेशेषु नीत्वा यत्नेन मातरः ॥
ये रक्षन्ति सदा गोपाः शिवलोके व्रजन्ति ते ॥१८॥

ये शिवाय गुरोर्वापि गां प्रयच्छन्ति भक्तितः ॥
ते मोदन्ति शिवेलोके भोगैः कल्पायुतन्नराः ॥१९॥
निवेद्य गोरसं भकत्या शिवाय शिवयोगिने ॥
सर्व्वान् कामानवाप्नोति शिवलोकमितो गतः ॥२०॥
इहलोकसुखार्थाय परलोकहिताय च ॥
सर्व्वस्वेनापि गान्तस्मादाददीत विपश्चितैः ॥२१॥
अहो ! सुमहदाश्चर्य्यमहो ! सुष्ठु सुभाषितं ॥
यत् पवित्रश्च मृष्टश्च गोरसो बुद्धिवर्द्धन : ॥२२॥
गोमता निर्ज्जिताःलोका वृताशागोमतार्जिताः॥
गोमता निर्ज्जितः स्वर्गः समस्तं गोमता जितं ॥२३॥
गावो बन्धुर्म्मनुष्याणां गावश्च धनमुत्तमं ॥
गावो येषां गृहे नस्युरबन्धुरिव तद्गृहं ॥२४॥
स्पृष्ट्वातु गावः शमयन्ति पापं दत्वातु गावस्त्रिदिवं नयन्ति ॥
संरक्षिताश्चोपनयन्ति वित्तं गोभिर्न्न तुल्यं धनमस्ति किञ्चित् ॥२५॥
सम्पन्नमश्नाति ददाति नित्यं पापापहं मित्रविवर्द्धनञ्च ॥
स एव चार्थः परिभुज्यते च गोभिर्न्न तुल्यं धनमस्ति किञ्चित् ॥२६॥
तृणानि शुष्काणि वने चरित्वा पीत्वा च तोयान्यमृतं स्रवन्ति ॥
यद्गोमयाद्यैश्च पुनन्ति लोकान् गोभिर्न्न तुल्यन्धनमस्ति किञ्चित् ॥२७॥
स एवलोके परमः पवित्रो गवां रसः पुष्टि विवर्द्धनश्च ॥
अश्नाति नित्यं विविधान्नयुक्तामिष्टञ्चिरं येन शिव प्रसादात् ॥२८॥ (नवः प्रपान्नात्)
गोमातृशालां यः कुर्य्यात् सुदृढामिष्टकामयीं ॥
मृत्पिण्डकाष्ठकुड्यं वा सत्कपाटार्गलान्वितां ॥२९॥
सपिधानैर्गवाक्षैश्च चतुर्भिः समलङ्कृतां ॥
पश्चात् कुड्यञ्च कर्त्तव्यमुच्चैरेव गवाक्षकं ॥३०॥
सुपक्कैर्व्वंशविदलैः कटं कृत्वा समंदृढं ॥
गवामधः प्रदातव्यं येन मूत्रमधो व्रजेत् ॥३१॥
गोमयं तङ्गवाक्षैश्च क्षिपत्वा दूरं पुनर्न्नयेत् ॥
विकीर्य्य भस्मना सर्व्वं धूपयीत समन्ततः ॥३२॥
कृशवृद्धातुराणाञ्च पृथग्भावं प्रकल्पयेत् ॥
पृथक् च बालवत्सानामितरेषां पृथग्भवेत् ॥३३॥
दम्यानड्वाह य प्राणां (वृषाणां) वसतिं कल्पयेत् पृथक् ॥
गाः (गावः) स्वपन्ति सुखेनैव वसन्ति च रमन्ति च ॥३४॥

रुद्रो ब्रह्मा च विष्णुश्च गोशालायां सदा यजेत् ॥
विन्यस्य पूर्व्ववदनां पश्चात् कुडयगवाक्षके ॥३५॥
सिंहारूढां महादुर्गां पञ्च नन्दादिमातरः ॥
विघ्नेशं सोमनन्दिञ्च पूर्व्वादारभ्य विन्यसेत् ॥३६॥
नद्युभय तटाश्वत्थ विल्ववल्मीकमृत्तिकां ॥
पञ्चगव्येन संयोज्य देवान् पिण्डैः प्रकल्पयेत् ॥३७॥
द्वारशाखागवाक्षाभ्यां मृदाकार्यौ सुशोभनौ ॥
नन्दीश्वरमहाकालौ वृषञ्चोच्चैर्व्वहिः स्थितं ॥३८॥
यादृशोऽयं वृषेन्द्रः स्यात्सर्व्वावयवशोभनः ॥
तद्दर्शनानुभावेन गवां स्युस्तादृशाः प्रजाः ॥३९॥
अष्टम्यां स्नापनं कृत्वा भोजनञ्च प्रकामतः ॥
स्वस्ति वाच्यं ततश्चाग्रे प्रधानाङ्गाम्प्रवेशयेत् ॥४०॥
इति यः कारयेद् भक्त्या गोमातृगृहमीदृशं ॥
स विधूयाशु पापानि शिवलोके महीयते ॥४१॥
बालसूर्य्यप्रतीकाशैः सर्व्वकामसमन्वितैः ॥
काञ्चनै र्भवनैर्द्दिव्यैः सर्व्वरत्नोपशोभितैः ॥४२॥
सप्तभौमैः पुरवरैः शतसंख्यैर्य्यथेप्सितै :॥
प्रत्येकमतिदिव्येन स्त्रीसहस्रेण संयुतै : ॥४३॥
एतैरन्यैश्च विपुलैर्म्महाभोगैर्य्यथेच्छया ॥
क्रीडते तत्र पुण्यात्मा यावदाचन्द्रतारकं ॥४४॥
ततः कालात् परिभ्रष्टः क्रमाद् भोगमवाप्नुयात् ॥
हरिब्रह्मादि लोकेषु तदन्ते मेरुमूर्धनि ॥४५॥
तस्मादपि च्युतः कालात् प्राप्नुयादुत्तरान् कुरुन् ॥
ततो भारतवर्षेऽस्मिन् राजा भवति धार्मिक ॥४६॥
सुरूपः सुभगः शूरः सर्व्वकामसमन्वितः ॥
ततः प्राग्वासनायोगात् पुण्यमाचरते पुनः ॥४७॥
यश्च ग्रीष्मे गवां गोष्ठं जलाश्रयसमीपतः ॥
कूर्य्याद् बृक्षाकुले स्थाने तत्रैकत्राचिरन्नरः ॥४८॥
गवामेकत्र संवासे दोषः स्याद् गोमयोष्मणा ॥
तस्मान्नैकत्र वसतिं चिरं ग्रीष्मे प्रकल्पयेत् ॥४९॥
नान्यस्थानं यदा पश्येद् गवां ग्रीष्मे सुशोभनं ॥
पूर्व्वमेव तदा स्थानं यत्नाच्छोध्यं दिने दिने ॥५०॥

यैः शोध्यते (यः शोधयद्) गवां वाटमात्मीयं वा परस्य वा ॥
स प्रदायगवां सौख्यं शिवलोके प्रमोदते ॥५१॥
दुःखं कृत्वा लभेद् दुःखं सुखं कृत्वालभेत् सुखं ॥
तस्माद्धि सर्व्वसत्वानां सुखार्थी सुखमाचरेत् ॥५२॥
अप्येकं क्षणमुत्पाद्य सुखमार्त्तस्य देहिनः ॥
प्राप्नोति सुमहत् सौख्यमव्दकोटिं शिवे पुरे ॥५३॥
तस्माद्गाश्चारयेद् ग्रीष्मे तृणबृक्षजलान्विते ॥
वर्षास्वकर्द्दमस्थाने गिरिवृक्षसमीपतः ॥५४॥
हेमन्ते तु दिवाकाशे रात्रौ च प्रसरन्नयेत् ॥
निस्तृणेऽपि गवां स्थाने प्रसरेण धृतिर्भवेत् ॥५५॥
ग्रीष्मे त्रिष्याययेद् गाश्च स्वादुतोयं हि तद्धितं ॥
क्षारभूः सलिलं क्षारं ग्रीष्मादन्यत्र गोहितं ॥५६॥
एवं यः पाययेद् गाश्च स गोपश्चारयीत च ॥
सर्व्वपापविनिर्म्मुक्तः शिवलोके महीयते ॥५७॥
यः स्तम्भं (सास्त्रं) दन्तुरं स्तम्भं गोषु मध्ये क्वचित्क्वचित् ॥
कण्डूयनार्थं निखनेच्छिवलोकं स गच्छति ॥५८॥
अनाथां दुर्ब्बलां गाञ्च रोगादिपरिपीडितां ॥
मृतवत्सामदुग्धाभिर्म्मातृभिश्च विवर्ज्जितां ॥५९॥
स्वकीयान् परकीयान् वा वत्सान्यः परिपालयेत् ॥
विधूय सर्व्वपापानि शिवलोके महीयते ॥६०॥
दुग्धलोभहतप्रज्ञा ये वत्सान् क्षीरजीविनः ॥
निष्पीडयन्ति ते गोभिः पीड्यन्ते नरकेषु च ॥६१॥
निश्वसन्ति गृहे येषां दह्यमानाः क्षुधाग्निना ॥
निर्द्दुग्धा निर्दयैर्वत्साः पच्यन्ते नरकेषु ते ॥६२॥
विक्रोशन्तः क्षुधाविष्टाः शुष्ककण्ठोष्ठतालुकाः ॥
नरकाग्नौ प्रपच्यन्ते वर्षकोटिशतन्नराः ॥६३॥
नरकेभ्यः समुत्तीर्णाः सावशेषेण कर्म्मणा ॥
यत्र यत्राभिजायन्ते तत्र तत्र बुभुक्षिताः ॥६४॥
योनिकोटिसहस्रेषु परिभ्रम्य क्रमात्पुनः ॥
मनुष्यलोके जायन्ते दरिद्राः परतर्ज्जकाः ॥६५॥
तस्मान्न पीडयेद् वत्सानपुष्टान् क्षीरतृष्णया ॥
वत्से तृप्ते यदधिकं तत्क्षीरं निर्द्दुहेत् पुनः ॥६६॥

द्वौ मासौ न दुहेद्वत्सांस्तृतीयेऽर्धन्दुहेत वा ॥
दुहेच्चतुर्थं निःशङ्कस्तस्य लालांस्तु वर्ज्जयेत् ॥ ६७ ॥
बन्धनंबालवत्सानाङ्कर्णग्राहञ्च वर्ज्जयेत् ॥
शीतवर्षातपत्राणं कार्य्यं निष्कर्द्दमं समं ॥ ६८ ॥
यूकापनयनं धूमं कुर्य्यात्कण्डूयनं सदा ॥
कृमिरोगक्षुधादिभ्यः सर्व्वयत्नेन पालयेत् ॥ ६९ ॥
य एवं वालवत्सानामुपकाराय वर्त्तते ॥
इहाप्नोति परं सौख्यं परत्र च शिवं पुरं ॥ ७० ॥
ग्रामभोज्यगृहं प्राप्तान् नृपतिर्य्यः समुद्धरेत् ॥
कुलैकविंशमुद्धृत्य शिवलोके महीयते ॥ ७१ ॥
यःस द्विजः प्रयत्नेन ग्रामभोज्यात्समुध्दरेत् ॥
प्रतिग्रहाद्युपायेन शिवलोके महीयते ॥ ७२ ॥
यः प्रदद्यात्सुधवलं शिवसन्ध्यामहावृषं ॥
विस्तीर्णा रक्तमुच्चाग्रं समुन्नतवृहत्कटिं ॥ ७३ ॥
ऊर्ध्वं कुंञ्चितश्रृङ्गाग्रमहाश्रृङ्गान्तरन्तथा ॥
स्थूलाग्रश्रृङ्गयुक्तं वा सर्व्वावयवशोभनं ॥ ७४ ॥
रक्तपीतैश्च कुसुमैः कुङ्कुमाद्यैश्चवर्णकैः ॥
यथाशोभं समालभ्य विभवैः पूजयेद् वृषं ॥७५ ॥
किङ्किणीरवकोपेतं घण्टिका चामरान्वितं ॥
स्वस्तिकैरर्द्धचन्द्रैश्च नानारत्नैश्च शोभितं ॥ ७६ ॥
अष्टाङ्गुलप्रवीस्तीर्णां हेमपट्टविनिर्म्मितां ॥
राजतीं चार्म्मणीं वापि मालामुरसि विन्यसेत् ॥ ७७ ॥
तद्विधां पृष्ठमालाञ्च पुच्छान्तककुदाश्रितां ॥
नानाभरण संयुक्तामुदरार्द्धप्रलम्विनीं ॥७८॥
हेमराजतकौषं वा नानारत्नोपशोभितं ॥
कार्य्यश्रृङ्गद्वयन्तस्य सद्वस्त्रचमरान्वितं ॥७९॥
पट्टं शिरसि सौवर्णंचन्द्रचन्द्रिक भूषितं ॥
चामराश्वत्थपत्रैश्च बध्नीयाद् द्रव्यसंयुतं ॥८०॥
ग्रैवेयकेण दिव्येन नानारत्नोपशोभिना ॥
घण्टाङ्कांस्यमयी शुद्धां गले वध्नीत सुस्वनाम् ॥८१॥
खुरैः सुवर्णकै रौप्यैः केयूराङ्गदभूषितं ॥
पट्टवस्त्रैर्विचित्रैश्च यथाशोभामलङ्कृतं ॥८२॥

वितानध्वजमालाभिर्गेयवाद्यादि मङ्गलैः ॥
दोधूयमानश्चमरैः शिवाय विनिवेदयेत् ॥८३॥
यावत्तद्रोमसंख्यानं तत्प्रसूति कुलेषु च ॥
तावद्युगसहस्राणि शिवलोके महीयते ॥८४॥
न च मानुष्यकं लोकमागच्छेत्पुनरध्रुवं ॥
ज्ञानयोगं समसाद्य तत्रैव स विमुच्यते ॥८५॥
एवं विधं यो वृषभं गोपतिङ्ग्राहणक्षमं ॥
वत्सिकाजननप्रायं बहुक्षीरावहङ्गमं ॥८६॥
नानाभरणसंयुक्तं पूर्व्वंशोभासमन्वितम् ॥
गोमातरञ्च सम्पूज्य विसृजेच्छिवगोकुले ॥८७॥
एवं यः सम्प्रदद्यात्तु वृष्येन्द्रं शिवगोकुलं ॥
स पूर्व्वोक्तं लभेत् पुण्यं यत्सन्ध्यावृषदानतः ॥८८॥
निवेद्य सद्गुणोपेतमनड्वाहं शिवाश्रमे ॥
दश धेनुप्रदानस्य फलं शोभनमाप्नुयात् ॥८९॥
उत्पाद्य सस्यानि तृणश्चरन्ति तदेवभूयः सवलं वहन्ति ॥
न भारखिन्नाः प्रवदन्ति किञ्चिदहो वृषैर्द्धार्यति जीवलोकः ॥९०॥
वृषाणाम्पृष्ठमारूढा ये गच्छन्ति नराधमाः ॥
ते महाप्रलयं यावत् पच्यन्ते नरकाग्निषु ॥९१॥
वृषपृष्ठेन गच्छन्तं ज्ञानं ज्ञात्वा यदा नृपः ॥
न वारयेदुपेक्षेत पापं तस्यापि तत्समं ॥९२॥
ये वृषाः साधुभिर्म्मुक्तास्त्रिशूलाङ्काः शिवप्रियाः ॥
तान् वाहयन्ति ये मूढाः पापाचारानराधमाः ॥९३॥
ते महाप्रलयं यावदशेषनरकाग्निषु ॥
प्रपद्यन्ते वधै र्घोरैः पत्नी पुत्रादिसंयुताः ॥९४॥
राज्ञश्च विषये यस्य जानतश्च नराधमैः ॥
वृषा वाह्यन्ति पापिष्ठै : पापन्तस्यापि तत्समं ॥९५॥
तस्मान्निवारयेद्राजा वाह्यमानान् खलैर्वृषान् ॥
अन्यथा चाति घोरेषु नरकेषु पतेत् स्वयं ॥९६॥
वाह्यमानान् वृषान् वार्य्य नृपतिः स्वर्गमाप्नुयात् ॥
इहारोग्यं धनं सौख्यमायुः कीर्तिं श्रियं सुतान् ॥९७॥
यश्च पापविशुद्ध्यर्थं प्रायश्चित्तं समीहते ॥
सवृषैकादशीं दत्वा वर्षं रक्षेच्च मातरं ॥९८॥

एकैकरक्षणं कुर्य्याद्गोरूपाणां शतं शतं ॥
गावः सुखेनबर्द्धन्ते चरन्ति च रमन्ति च ॥९९॥
गोव्रणाः प्रविलायन्ते नन्दन्ते तरवस्तथा ॥
तस्मात् प्रविरला गास्तु चारयेत् पाययीत च ॥१६००॥
गोभिर्न्नैकत्र रक्षाः स्युर्द्दन्यानड्वाहपद्रहः ॥
अपि द्रवन्ति गावस्ता विनश्यन्ति च तेऽपि च ॥१॥
शरद्ग्रीष्मे च मध्यान्हे छायायां विनिवेशयेत् ॥
छायासु घनवृक्षाणां पुनरुत्थाय्य चारयेत् ॥२॥
य एवं विरला गाश्च सदाकृत्वाऽनुपालयेत् ॥
समुक्तः पातकैः सर्व्वैः शिवलोकमवाप्नुयात् ॥३॥

इत्यादि दिव्य गुणगणले युक्त सहस्रशः शिवभक्ता नारीहरु र मनोरमअरुहरूले व्याप् महेश्वरको शिवलोक सवै भन्दा माथि, सवै भन्दा उत्तम तथा सवै भन्दा रमाइलो शिवज्यूको शिवलोक छ। शिवलोककामाझमा शिवको दिव्य भव्य विशाल धाम छ। यो उमापति पशुपतिनाथको आदिम स्थान शुद्ध स्फटिक जस्तो चम्चम् चम्क रहेको छ। यसैमा भगवान् शिव शिवा अम्बा गौरी देवी पार्वतीका साथ विराजमान तथा प्रमथगण सहित समस्त देवतागणद्वारापूज्यमान हुनुहुन्छ। योगसाधनाद्वार शिवधाममा पुगेका सिद्ध महर्षिहरू र ब्रह्मा, विष्णु, अग्नि, वायु, आदि देवतागणद्वार आराध्यमान हुनुहुन्छ। महेश्वरका आयतन (शिवालय) भन्दा अलि तल शिवक वाहन चतुष्पाद सकल धर्मवृष (वसाहा) श्रीमान् (सर्वशोभा र सर्वसम्पदाले सम्पन्न छन्। शिवलोकका जुन थलीमा वीर वृष छन्, तेसैथला कामधेनु गाई आमा छन्। तेसै कारणले शिवलोक र गोलोक यौटै हो र यौटै सम्झिन्छ। जुन गुण शिवलोकक छन्, ती गुण गोलोकका छन्। दुवैमा अन्तर छैन। नन्दा १ सुभद्रा २ सुरभि सुशीला ४ सुमना ५ ई पाँचोटी कामधेनु गाईआमा शिवलोक = गोलोकम व्यवस्थित = (राम्रो व्यवस्था भयेका ठाउँमा वसेकी) छन्।

नन्दा सुभद्रा सुरभी सुशीला.गौ पञ्चमी ई सुमना नि धेनु।
गोलोकमा छिन् शिवलोकमा नै. सन्तान इन्का तिनि मर्त्यमा छन् ॥

यी गाई आमाहरु दिव्य कामधेनु छन् र जगद्धात्री (समस्तजगतको धारण पोषणा गर्ने) हुनाले नित्य आफ्ना रसाऽमृत (गोरसमय अमृत) ले सारा संसारलाई तृप्त पा रहेकी छन्। शिवलोक आदि सव्वै स्वर्ग लोक झैं मर्त्यलोकको पनि गोरसका अमृ तृप्ति र कल्याण गर.जाउ गाई आमा! भनेर शिवको आदर र आदेश पाएर ओर्लें केहि गाई आमाहरुले मर्त्यलोकमा पनि सबैको सव प्रकार उपकार तथा कल्या

गरी रहेकी छन् । यी गाई आमाहरु तिरनः (घास) चर्छिन्, प्रशान्त बनमा बस्छिन, स्वच्छ र स्वच्छन्द वग्ने पवित्र पानी खान्छिन् , अमृतमय दूद दिन्छिन्, वाछा वसाहा र गोरु भएर गोवंशवृद्धि र वाहाने (खेतजोतनें काम गर्छन, दर्शन, पर्सन, सेवन, दान आदिले पापबाट पवित्र पार्छिन्. गोरसले समस्त जीवलोक जीवित रहन्छ । जस्को घर सदा स्वयं साक्षात् महाकाली. महालक्ष्मी. महासरस्वती जस्ती बालवत्सा (लैनी) गाई आमाहरुले अलङ्कृत (रमाइलो) रहन्छ, तेस्ता मान्छेका पाप कता अर्थात कतै रहदैनन् । यस्तो गाई आमाको सेवा र भक्ति घास, दाना, पानी, चोटपटकबाट रक्षा; ओखतीमुलो आदि द्वारा जो मान्छे गर्छन् ती सोज्भै गोलोक (शिवलोक) मा जान्छन् र अक्षय कालसम्म रहन्छन् । जुन गोठालाहरु गाई आमालाई सदा प्रशस्त घास, पानी सुविधा भयेका गौचर वनमा लगेर जतन राखेर चराउँछन् । ती सदाका लागि शिवलोकमा जान्छन् र अक्षयकाल सम्म दिव्य सुख भोग्छन् । जो भक्ति भावले शिवलाई वा आफ्ना गुरुलाई गाईदान गर्छन । ती मानिस पनि दश हजार वर्षसम्म शिवलोकमा दिव्य सुख भोगेर रहन्छन् । शिवलाई र शिवयोगीलाई भक्तिले गोरस दिने भक्त शिवलोकमा पुगेर समस्त कामना पूरा गर्छन् । तसर्थ इहलोकका सुख तथा परलोकका सुख तथा परलोकका हितका लागि सर्वस्व लायेर पनि सुपात्रमा गाईदान गर्नु पर्छ । आहा ! कति अचम्म र कति रमाईलो सुभाषित छ कि- गोरस पवित्र मिठो र बुद्धिवर्धक छ भन्ने तथा आयुर्घृतम् (घिउ नै आयु हो, घिउले आयु बढाउँछ) इत्यादि । गाई आमा हुने गाइ पालने गाइको सेवा र रक्षा गर्ने तथा गाइको दान गर्नेले- सवैलोक जित्यो सवै दिग्विजय गर्‍यो. स्वर्ग पायो. सवै जित्यो र सवै पायो. यस्मा शङ्का छैन । गाई आमा मानव आदि समस्त प्राणीमात्रकी आमा हुन्. भाइ बन्धुवर्ग हुन्. सर्वोत्तम धन हुन्. र जस्का घरमा गाइ आमा छैनन् त्यो घर अबन्धु (भाइ बन्धु. इष्ट मित्र नभयेको शून्य) हो .यस्मा पनि शङ्का छैन । गाइ आमाले दर्शन पर्सन गर्दा पापको नाश गर्छिन्.गोदान गर्दा शिवलोक वा गोलोकमा पुर्‍याउँछिन्.पालन.पोषण.रक्षण गर्दा सवै सम्पदाले भरपूर पार्छिन्. तसर्थ गाई आमा समान उत्तम धन् संसारमा छैन । गाई पालने मानिस सदा अमृतले सम्पन्न भोजन गर्छ. अरुलाई पनि दिन्छ.गोरसले पाप हर्छ.मित्र बढाउँछ .गोरसले नै सवभन्दा ठूलो अर्थराशि हो र गोधन तुल्य कुनै धन छैन । सुकेको घास बनमा चरेर पानी खायेर अमृत वर्षाउँछिन् . गउँत गोवर आदिले समस्तं लोकलाई नै पवित्र पार्छिन. तसर्थ गाई आमा भन्दा पर संसारमा कुनै धन छैन । विश्व ब्रह्मण्डमा त्यै गोरसाऽमृत सव भन्दा पवित्र पदार्थ छ तुष्टि र पुष्टि बढाउने पनि त्यै गोरस छ गाई आमाको सेवा गर्ने मानिस नित्य विविध प्रकारका अन्नका साथमा पनि त्यै अमृत गोरस खान्छ, गाई आमाका आराधनाले मानव समस्त मनः कामना सिद्ध गर्छ .तेस कारणले

गाईलाई कामधेनु भनिन्छ र गाई आमाको सेवा पूजा गर्दा शिवजी प्रसन्न हुनु तथा शिवका र गाई आमाका प्रसादले गोसेवक इहलोकमा चिरकाल सम्म शान्ति साथ रहेर अन्तमा शाश्वत शिवलोक (गोलोक) मा जान्छ । यस्ती आमाका लागि जोसेवकले ढुङ्गाले, इटाले, काचा इटाले, माटाको डल्लाले वा सुदृढ (बलीयो) गोशाला (गोठ) बनाउनु र खापा सहित चारोटा झ्याल र ढोका-आग्ला आदिको प्रबन्ध गर्नु । रमाइलो र हिउद घमाइलो गाईआमाको बनाउनु । पश्चिमपट्टी भित्तो अग्लो गरेर गाइआँखे झयाल राख्नु । चार पांच सम्मका राम्ररी पाकेका वाँस निगाला आदि चिरेर नघोचने सम्म पारेर बलीयो मान्द्रा बुनेर पछाडी पट्टी अलि करालो गरी बनेका गोठमा ओछ्याउनु जस्ले गाई आमालाई हिलो हुँदैन । गउँत छिरेर तल जान्छ गोवर माथि बस्छ । बाहिर बग्ने नाली बनाउनु पर्छ । गोवर झयालबाट बाहिर फालनु र बाहिरबाट टाडा लगेर उपयोग गर्नु । पासमा राखे गाईलाई हानि हुन्छ । गोठमा कैले गउँत गोवर थुप्रिन दिनुहुन्न । गाई फुकाइ सके पछि गोठ स्वच्छ पारी गउँत फालेर चारै तिर भस्म छरेर सबैतिर गोकुलधूप धूपी आदिको धूप ध्वाँर वायुमण्डल शुद्ध रहन्छ । गोठमा कुनै रोग व्याधि पस्तैन । दुबला.बूढा एकातिर, रोगी विरामी एकातिर, लैना वाछा- वाछी एकातिर, ठूलो वाछा- एकातिर, गरेर छुट्टाछुट्टै राखनु पर्छ । दाउनावहर, जोत्ने गोरु, तथा वृष साँडे) हरुलाई पनि भिन्नाभिन्नै राखनु पर्छ । दिनमा चराउँदा पनि उस्तै राखेर कसैलाई पिर मर्का नपर्ने गर्नु पर्छ । जुन गोठमा उक्त प्रकारले विचार.भक्ति भाव.दयामाया.राखेर गाई आमाको सेवा पूजा.पालन पोषण. हुन्छ, तेस गोशालामा ब्रह्मा. विष्णु. शिव आदि सबै देवता नित्य निवास त्यो गोठ शिवालय जस्तो पवित्र तीर्थ हुन्छ । यस्ता गोठमा गाई आमा सुख साथ बस्छिन्, सुत्छिन् । समस्त देवताहरु पनि रमायेर गाइ आमाका प्रत्यङ्गमा निवास गर्छन् । पश्चिमपट्टीका उस अग्ला भित्तामा माथिल्ला पञ्चम आँखे झयालमा.पूर्वमोहोडा गरेर सिंहका पीठमा बसेकी महादुर्गाको दुर्गा देवीका वरिपरि ती नन्दा. सुभद्रा. सुरभि. सुशीला. सुमना.पाँचोटी आदिमाता पञ्च कामधेनुका मूर्ति बनाउनु । गोठका चारै दिशाका चारै पूर्व.दक्षिण.पश्चिम.उत्तर.प्रदक्षिणा क्रमै सँग गणेश. पार्वती. शिव. नन्दीका बनाउनु. ती सबै देवता र गाइ आमाका ५ मूर्तिहरु पवित्र नदीका वारी पारी तीरको माटो.वर पिपलका फेदको माटो. वेलकाजराको माटो र धमिराको माटो पञ्च गव्य (गउँत. गोवर.दूध.दहि.घिउ.) ले मुछेर बनाउनु पर्छ र पानी नगलने न विग्रने प्रबन्ध गर्नु पर्छ । यसै माटाले अरु देवताका मूर्ति पनि

पर्छ । गोशालाका द्वारका दुबै शाखा झ्यालमा त्यै माटाले नन्दीश्वर, महाकालको मूर्ति बनाउनु पर्छ । तेस्तै त्यै माटाले गोठका ढोका बाहिर घाम पानीवाट सुरक्षित. तर चारै दिशाबाट छर्लङ्ग देखिने गरी उच्च विशाल भव्य र दिव्य नन्दी बसाहा बनाउनु पर्छ .वसेको होइन उभिएको आकर्षक, रमाइलो, हेरीरहुँ जस्तो लाग्ने वलीयो हुनु पर्छ । शिवका वाहन जस्तो यो बृषेन्द्र जति दिव्य भव्य राम्रो प्रभावशाली हुन्छ. सर्वाङ्ग शोभन यस वृषभका दर्शनका प्रभावले गाइ आमाका वाछा वाछी उस्तै राम्रा ठूला र बलिया दुधालु हुन्छन् । यो पनि मनोविज्ञान हो । अष्टमीका दिन स्थापना गरेर गोरसप्रधान इच्छा भोजन सबैलाइ गराउनु पर्छ र गाई आमालाई पनि त्यो पक्वान्न समेत दाना. नून. घास. पानी आदि अरु दिन भन्दा प्रशस्त दिनु पर्छ । अनि प्रधान गाईलाई अगाडी लगायेर स्वस्तिगोभ्य:स्वस्तिन इन्द्र.इत्यादिं वैदिक स्वास्ति वाचन गर्दै गोष्ठमा प्रवेश गर्नु र सबैको सदा कल्याण हुन्छ। यति यस्तो यसरी जस्ले गाई आमालाई गोठ (गोशाला) वनाउँछ र शिवगोभक्तिभावले गाइआमाको सेवा गर्छ,त्यो भक्त समस्त पापबाट तुरुन्त छुटेर शिवलोक जान्छ र अक्षय काल सम्म सदा शिव झैं पूज्यमान भएर दिव्य सुख भोगी रहन्छ। जब सम्म चन्द्र सूर्य तारा आकाशमा रहन्छन् तब सम्म त्यो गाई आमाको सेवक गोठालो, गोलोक (शिवलोक) मा वालसूर्यका जस्तो तेज भयेका, मनले चितायेका समस्त कामना पूरा गर्ने सवै रत्नले सुशोभित भयेका सात तले शतश: यथेष्ट दिव्याङ्गनायुक्त दिव्य सुनौला विमान र भवनहरुमा शिवलोकका दिव्य सुख भोगेर आनन्द रहन्छ। यस्ता अरु अनेकानेक, सुख स्वैच्छाले भोग्छ र स्वच्छन्द विहार गर्छ । यसरी चन्द्रताराका अन्तमा क्रमैसँग ब्रह्मा विष्णु आदि सवै देवलोकका दिव्य सुख भोग्दै सुमेरुपर्वतका टाकुरामा आयेर अमरमवतीका देवता गन्धर्वकिन्नर अप्सरा आदिसित नन्दन वनको रमाइलो विहार गर्छ । तेताबाट चिरकाल पछि उत्तर कुरुदेशमा पुग्छ । तदनन्तर हिमवर्ष हिमवत्खण्ड भारतवर्षको राजा हुन्छ, गाई आमाको सेवा शुश्रूषा पालन पोषण, तथा रक्षा गर्ने गोभक्त गोठाला आदि समस्त मानव अन्तमा राजा हुन्छ । राजा भयेर पनि सुरूप सुभग शूर वीर समस्त कामनापूर्ण भयेको सर्व लक्षण संयुक्त सर्वश्री सम्पदा सम्पन्न हुन्छ । तेस्मा पनि अधिका शुभ-वासनाका योगले पुनश्च जो पुण्य कर्म गोसेवा र रक्षा गर्छ फेरि पनि गोलोकमा जान्छ र मुक्त नहुँदा सम्म यो रोटेपिङ्ग यसै गरी घुमी रहन्छ । तसर्थ गोभक्त गोठालाले वैशाख जेठ तिर खडेरीमा गौचर, वन, प्रशस्त जल भयेका र बर, पिपल, शमी, नीम, काफल, तींदु, सल्ला, देवदारु आदि वृक्षका प्रशस्त छहारी पासमा भएका ठाउँमा गोठ बनाउनु पर्छ । खडेरीमा धेरै दिनसम्म गाई आमालाई एउटै गोठमा राख्नु हुन्न । एकै ठाउँ ठियामा धेरै दिन चैत्र, बैशाख, जेठ, असारमा

गाई रहँदा गोवर गऊँतका खारले र तापले खोऱ्याँत आदि दोष र अनेक रोगहर हुन्छन् । गैंडाका गऊँत तथा छाला आदिले त्यो रोग निको हुन्छ । गोसावित्री पाठ पनि नित्य गर्नु पर्दछ । तसर्थ ग्रीष्म ऋतुमा चिरकालसम्म यौटै गोठमा गाई राख्न हुँदैन । यौटै ठियो र यौटै वस्ति गर्नु हुँदैन तर जव कतै सुविधायुक्त ठाउँ ठियो पाइन्न तव करै लागेर यौटै ठाँउमा पऱ्यो भने अधिवाटै नित्य दिनका दिन विहानै गाइ फुकायेर भकारो सोहोर्नु पर्छ । गऊँत गोवर एकत्रित नराखेर स्वच्छ पारी दिन भरिमा राम्ररी सुकी सक्नुपर्छ, नत्र अनेक रोग हुन्छन् । आफनो गोठको वा अर्काको गोठको वाटो वनाउने अथवा सपार्ने, सुधार्ने जीर्णोद्धार गर्ने धर्मात्माले गाई आमालाई सुख सुविधा दियेका पुण्य प्रतापले र गाई आमाका आशिर्वादले गोलोक, शिवलोकमा गयेर दिव्य सुख शाश्वंती समासम्म भोग्छ । गाई आमालाई तथा सवै प्राणीलाई सुखदिने मानिस स्वर्ग सुख पाउँछ । दुःख दिने दुःखै पाउँछ । तसर्थ सुखार्थीले गाई आमालाई र सवै जीवजन्तुलाई सुखै दिनु पर्दछ सुःख दिन नसके दुःख पनि दिन हुन्न । कसैले कसैलाई कदापि दुःख दिनु हुन्न । एक्कैछिन्का लागी पनि रोगी, दुःखी, आर्त्त जीवलाई सुख दिने पुण्यात्मा शिवलोकमा एककोटि वर्षसम्म महान दिव्य सुख पाउंछ । तसर्थ ग्रीष्म ऋत्तुमा तिरन-पानी प्रशस्त रुख-छहारी भयेका ठाँउमा गाई चराउनु पर्छ । वर्षामा उचा वन पर्वतमा हिलोमैलो नहुँने ठाउँमा गो राखेर गाई चराउनु पर्छ । हेमन्त शिशिर आदि हिउँदका दिनमा घाम लाग्ने वता नलाग्ने र राति कत्ति वतास नलाग्ने गोठ ओडार गोइला छहारी भयेका रुख आ प्रशस्त भयेका र बिहानै घाम लाग्ने बेलुका सम्म रहने ठाउँमा न्यानो पारेर गा आमालाई सुख साथ राख्नु पर्छ, किनकि हिउँदमा खानु भन्दा पनि न्यानो धे चाहिन्छ । त्यसैबाट गाई आमालाई सुख धैर्य हुन्छ । ग्रीष्म ऋतुमा वैशाख, जे असारमा र धेरै घाम लाग्ने ठाउँमा चैत वैशाख देखि नै दिनमा २/३ पटक पा खुवाउनु पर्छ । अथवा गाई आमाले जति चोटी पानी खाना खोज्छिन् उती चो खाना दिनु पर्छ । ग्रीष्मयाममा खारी नूने पानी र नून खान दिन हुँदैन । स्वादि चीसो पानी खुवाउनु पर्छ । पायेसम्म हरियो घाँस खुवाउनु पर्छ । गाईले खा घाँसका दुदिला रूख पनि रोपी घाँस बढाउनु पर्छ । मानिसलाई झैं ताता दिन चीसो खानु पिउनु र चीसो दिनमा तातो खानु पिउनु गाई आमालाई हितकर हुन्छ आफुलाई जस्तो चाहिन्छ उस्तै गाई आमालाई पनि चाहिन्छ । नुनिलो खार भयेको ठाउँ ठिया र खारो पानी, पानी नून आदि ग्रीष्म वाहेक अरु ऋतुमा गाईको हि गर्छन् । एवं प्रकारले विवेक, विचार, दया, धर्मपूर्वक जो गोप (गोठाला) गाई पाल सवै मानिसले चरन पानी वासको ध्यान राखेर गाई आमाको पालन पोषण संर गर्छन् । ती सवै पाप देखि मुक्त भयेर शाश्वत् शिवलोक (गोलोक) मा पुगेर दि

सुख भोग्दै गोलोककी कामधेनु गाई आमाको अमृत खायेर अक्षय कालसम्म शिव झैं पूज्यमान भयेर रहन्छन् । गाईलाई कन्याउनाका लागि गोठका र ठिमा थलाका माँझमा ठाँउ-ठाँउमा न कोर्ने न विजाउने तर चिल्याइ मार्ने, कन्याउन सजिलो हुने गरी विवेक विचार राखेर दन्तुर (चिल्लो पारि ताछेका घँगारुका लाठि जस्ता) तथा चिल्लो धार भयेका चारपाटे बलीया खामा गाड्ने गोठाला वा अरु जुनसुकै मानिस पनि शिवलोक (गोलोक) मा जान्छ र शाश्वत दिव्य सुख पाउँछ । अनाथ, दुबला, रोगी आदिले पीडित, गाई गोरू, वाच्छा-वाच्छी, साँडे, वाच्छा मरेकी गाई वा माउ मरेका वाच्छा, वाच्छी, दुध सुकेका, दुध नपायेका, आमा नभयेका टुहुरा र कुनै कारणवस दु:खी आफ्ना अथवा अरुका गाई गोरू वाच्छा वाच्छी गोवंशको जो भक्त परिपालन र रक्षण गर्छ त्यो गोठालो वा जो भये पनि जन्म जन्मान्तरका पाप धोयेर पखाली शिवलोक (गोलोक) मा गयेर सदाका लागि पूज्य हुन्छ । शिवका साथ पूज्यमान भयेर अक्षयकाल सम्म रहन्छ । तर दुधका लोभले बुद्धि मारियेको लोभी र पापी जो भखखर जन्मेका दाना पानी घास न खाने वाच्छा वाच्छीको भाग पनि निचरेर भोकै मार्छन । ती पातकी गाई वाच्छाका ताता निश्वासले दन्केको नरकका आगामा पोलिन्छन् । जस्का घरमा वा गोठमा भोकका अग्निले डढेर वाच्छा, वाच्छी, निस्सासिएर रहन्छन । निर्दयहरुले दुध निचरेका भोका गाइ वाच्छा वाच्छी चाम्री, दाम्री, व्वाँ ! व्वाँ ! गरेर जस्को घरमा पिल्सिएर रहन्छन्, ती पापी पनि नरकमा पोलिन्छन् । गाई, वाच्छा जस्का घर गोठमा भोक प्यासले आम्मा ! आमा ! गर्दै रोइ रहन्छन, ओठ मुख तालु सुकेर सरापी रहन्छन, ती पापी नरकमा शय करोड वर्षसम्म उग्र आगामा पाकी रहन्छन । तेसपछि ती नरकवाट उत्रेर पनि पापका शेषले जुन जुन जुनिमा जन्मन्छन् त्यहाँ त्यसै गरी भोका र प्यासा रहन्छन् र हज्जारकोटी जुनिमा जन्मेर र मरेर चौरासीको चक्कर काटेर क्रमैसँग फेरि मनुष्य जुनिमा जन्मे पनि दु:खी दरिद्र भोका प्यासा र सवैको हपकी दपकी खाने निन्दनीय भैरहन्छन् । तसर्थ वाच्छा वाच्छीको भाग दुध निचरनु हुन्न । जवसम्म दाना पानी घाँसले पेट भर्ने हुँदैनन् तवसम्म पेट भरी दुध खान दिनु पर्छ । वाच्छा वाच्छी अघाएर शेष रहेको दुध पछिबाट बरु दुहुनु । अघिबाट दुधे वाच्छा वाच्छीलाई अघाउञ्जेली दुध खान दिनु पर्छ । (दुइ मास सम्म पूरा दुध खान दिनु पर्छ) तेस्रोमासमा मर्का नपारी आधादुध (एक पासो) दुहुनु वा एक थुन दुहुनु पर्छ । गाइको पालन पोषण पनि पूरा गर्नु पर्छ । दुध हेरी अघिवाटै दुहे पनि हुन्छ । चौथौ मास देखि निश्शङ्क भएर एक पासो दुहे हुन्छ । तर दाना पानी घासले वाच्छा वाच्छीको पेट भरेर मात्रै दुहुने वेला वाछाका मुखको फिंज भने वर्जित गर्नु पर्छ दुधमा न परोस् । दुध खाने वाच्छा वा वाच्छीका कान समात्नु हुन, दाम्ला डोराले

बाध्नु हुन्न । घाम, पानी (वर्षा) शीत चीसो वतास आदिवाट गाई आमा (गोवंश) लाई जोगाउनु पर्छ । हिलो मैलो पनि हुन दिनु हुन्न । गोठमा खाल्टा खुल्टी पनि राख्नु हुन्न । गोरु तथा गाई वाध्ने गाई वस्ने ठाँउ ठियाहरु सम्म राखनु पर्छ । किर्ना बत्ता फाल्ने कन्याउने कुर्मुन्याउने, सेवा गर्ने, धूप ध्वारँ गर्ने, डाँशभुसुना लामखुट्टे आदि तथा रोग व्याधिबाट एवं हिंस्रक जन्तुबाट गाई आमाको रक्षा गर्ने, पालन पोषण सेवा गर्ने, सवै जतनले गोवंशको सेवा गर्ने र विशेष गरेर साना वाच्छा वाच्छीहरुको र वुडा खाडाहरु को लालन पालन पोषण गर्ने गोठाला एवं गोभक्त सवै मानिस गोवंशका उपकारमा सदा प्रवृत रहनाले इह लोकमा परम सुख पाउँछ र परलोकमा पनि शिवलोक (गोलोक) मा पुगेर अक्षयकालसम्म शाश्वत दिव्य सुख भोग्दै शिवका साथमा पूजा पाउँछ । तसर्थ गाई आमाको (गोवंशको) सेवा पालन पोषण र संरक्षण सवैले सर्वदा सर्वथा गर्नु पर्छ ।

ये ऽर्च्चयन्ति शिवं भक्त्यां सद्विधान विवर्ज्जितः ॥
ते विन्दन्ति महाभोगान्नराः शिवपुरे चिरं ॥४॥
ये शिवाश्रमतीर्थानि श्रद्धया यान्ति मानवाः ॥
ते क्रीडन्ति महाभोगैर्दिव्यैः शिवपुरे नराः ॥५॥
न शिवः परिपूर्णत्वात् कञ्चिदर्थं समीहते ॥
किन्तु तन्नाममात्रेण दत्तम्भेवती चाक्षयं ॥६॥
दानेनानेन भगवान् प्रीयतां मे सदा शिवः ॥
इत्युक्त्वा देयमर्थिभ्यस्तत्तस्मादक्षयं फलं ॥७॥
यस्तूलपूर्णविस्तीर्णमुच्चमञ्चम पूरकं ॥
मृदुचर्म्मकृतं वापि सितवस्त्रावगुण्ठितं ॥८॥
कृष्णाजिनोपरिच्छन्नं धूपपुष्पाधिवासितं ॥
शिवध्यानाभियुक्ताय श्रद्धयाविनिवेदयेत् ॥९॥
तत्तूलवस्त्रतन्तुनां रोम्णां संख्या च यावती ॥
तावद्वर्षसहस्राणि शिवलोके महीयते ॥१०॥
तदन्ते सर्व्वलोकेषु भुक्त्वा भोगाननुक्रमात् ॥
ततः क्षितिं समासाद्य सिंहासनपतिर्भवेत् ॥११॥
तृणवल्कलपर्णोत्थं शय्याप्रवरणादिकं ॥
दत्वा तदर्थिने भोगैः शिवलोके महीयते ॥१२॥
शिमुद्दिश्य निर्व्वापं यः प्रदद्यात्तदर्थिने ॥
शाकमूलफलाद्यं वा तस्य पुण्यफलं श्रृणु ॥१३॥

यावत्स्यात्तण्डुलादीनां संख्या पत्र फलेषु च ॥
तावद्वर्षसहस्राणि शिवलोके महीयते ॥१४॥
भिक्षां सव्यञ्जनां दत्वा शिव भक्ताय भक्तित: ॥
वर्षलक्षं महाभोगै: शिवलोके महीयते ॥१५॥
दध्यन्नभक्ष्यपूर्णं वा भिक्षापात्रं सुशोभनं ॥
दद्याद्य: शिवभक्ताय तस्य पुण्यफलं श्रृणु ॥१६॥
वर्ष कोटिशतं दिव्यं महाभोगसमन्वित: ॥
स्थित्वा शिवपुरे देही तस्यान्ते स महीपति: ॥१७॥
सुशीतलेन तोयेन शिवभक्तं पिपासितं ॥
तर्प्पयित्वा शिवेलोके वर्षलक्षं प्रमोदते ॥१८॥
कलशं कर्क्करीयुक्तं बस्त्रपुतानुपूरितं ॥
दद्याद्य: शिवभक्ताय तस्य पुण्यफलं श्रृणु ॥१९॥
शुद्धस्फटिक सङ्काशं विमानं सार्वकामिकं ॥
सम्प्राप्य स शिवे लोके वर्षं कोटिं प्रमोदते ॥२०॥
पलाशपद्मपत्रैर्व्वा य: कृत्वा पुटकानि तु ॥
प्रदद्याच्छिवयोगिभ्यस्ताम्रपात्रफलं लभेत् ॥२१॥
यस्ताम्रपात्रं सुकृतं प्रदद्याच्छिवयोगिने ॥
सुवर्णपात्रदानस्य फलं प्राप्नोति मानव: ॥२२॥
रौप्यं सुवर्णपात्रं वा निवेद्य शिवयोगिने ॥
कोटिकोटिं स कल्पानां शिवलोके प्रमोदते ॥२३॥
अप्येकं शिवमुद्दिश्य योगिनं शिवधार्मिकं ॥
भोजयन्ति यथा शक्ति ते रमन्ति शिवे पुरे ॥२४॥
शिवाप्रव्रजितां शान्तां शक्त्या भक्त्या च भोजयेत् ॥
य:स दिव्यैर्म्महाभोगै: शिवलोके महीयते ॥२५॥
त्रिशूलपाणिर्य्य: शक्त्या वहते शिवगुग्गुलुं ॥
तम्भोजयित्वा यत्नेन शिवलोके महीयते ॥२६॥
भोजयेच्छ्रद्धया भक्त्या य: शिवब्रह्मचारिणीं ॥
स गो गै: क्रीडते दिव्यै :शिवलोके व्यवस्थित: ॥२७॥
य: शिवाश्रमधर्म्मस्थं गृहस्थं भोजयेद् बुध: ॥
विपुलै: स महाभोगै: कीडन् शिवपुरे बसेत् ॥२८॥
शिवाश्रमवनस्थं य: कन्दमूलादिभिर्य्यजेत् ॥
स दिव्यान् प्राप्नुयाद् भोगानीश्वरस्य पुरे स्थित: ॥२९॥

एकं पाशुपतं भक्त्या भोजयित्वा प्रणम्य च ॥
नानाविधैर्म्महाभोगैःशिवलोके प्रमोदते ॥३०॥
महाव्रतधरायैकां भिक्षां यः प्रतिपादयेत् ॥
स दिव्यैः सुमहाभोगैः शिवलोके महीयते ॥३१॥
अप्यन्तजनमाचार शिव भक्तिरतन्नरं ॥
भोजयित्वा यथाशक्ति शिवलोके महीयते ॥३२॥
ज्ञानयोगं वहिर्द्धा ये लोकसामान्यकर्म्मभिः ॥
पूजयन्ति शिवं भक्त्या शिवलोकं व्रजन्ति ते ॥३३॥
एभ्यः परादिव्यतमात्र पूजा लोके भवेद् गोग्रहघातिनोऽस्य ॥
सर्व्वेऽपि तिष्ठन्ति महान्तकालम्भवेयुरन्ते पृथिवीश्वराश्च ॥३४॥
नानाशकेनापि करीषवन्हौ न च प्रदानै र्न्न तपोभिरुग्रैः ॥
गतिं प्रयान्तिस्म न यज्ञसङ्घैर्न्नैवापि याङ्गच्छति गोगहेषु ॥३५॥
द्वावेव लोके पुरुष्टौमहान्तौ यौ गच्छतः सूर्य्यसभां विभिद्य ॥
एको मुनिर्य्योगरतस्तथान्यः प्राणान् प्रियान्यस्यंजते गवार्थे ॥३६॥
ज्ञानयोगेन ये शान्ता यजन्ति परमं शिवं ॥
ते सर्व्वे दुःख निर्म्मुक्ता भवन्ति सुखिनः सदा ॥३७॥
इत्येतच्छिवलोकस्य महाभाग्यमुदाहृतं ॥
गोलोकस्य प्रसङ्गेन तद्भक्तानां समासतः ॥३८॥
शिवलोकाद्वहिर्ज्ञेयमण्डस्यावरणाष्टकं ॥
पञ्च भूतान्यहङ्कारः ख्यातिः प्रकृतिरष्टमी ॥३९॥
ईदृशानां भुवाण्डानां कोट्यो ज्ञेयाः सहस्रशः ॥
सर्व्वे सत्वाः प्रधानस्य तिर्य्यग्गूर्ध्वमधः स्थिताः ॥४०॥
अण्डादूर्ध्वं पुनर्ज्ञेयं प्रकृतेर्धर्म्मतः स्थितं ॥
ब्रह्मणः परमस्थानं पद्मरागसमप्रभं ॥४१॥
ब्रह्मलोकात्परं ज्ञेयं विष्णोः स्थानं सनातनं ॥
इन्द्र नीलप्रतीकाशं महाभोगैरलङ्कृतं ॥४२॥
विष्णुलोकात्परं स्थानं कुमारस्य महात्मनः ॥
स्वच्छमौक्तिकसङ्काशं वरभोगसमन्वितं ॥४३॥
स्कन्दस्थानात् परं स्थानमुमादेव्याः प्रकीर्त्तितं ॥
तप्तचामीकरप्रख्यमशेषगुणसंयुतं ॥४४॥
उमास्थानाच्च परतः स्थानमाद्यमुमापतेः ॥
दिनकृत्कोटिसङ्काशं सर्व्वकामसमन्वितं ॥४५॥

अप्रमेयगुणं शुद्धमनौपम्यं सनातनं ॥
सर्व्वोपकारकैर्भोगैर्व्विविधैः समलङ्कृतं ॥४६॥
महाप्रभावसंयुक्तैः सूर्य्यायुतसमप्रभैः ॥
गणैरध्युषितं स्थानमसंख्यैर्य्योगतत्परैः ॥४७॥
हरिहिरण्यगर्भाद्यैर्व्वसुरुद्रदिवाकरैः ॥
स्तूयते भगवान्नित्यं तत्स्थानप्राप्तिकांक्षिभिः ॥४८॥
ज्ञानध्यानरतैः शान्तैर्भिक्षाहारैर्ज्जितेन्द्रियैः ॥
प्राप्यते तत्पदं दिव्यं योगिभिर्द्दग्धकिल्विषैः ॥४९॥
सम्प्राप्य तत्पदं सिद्धाः समस्तक्लेशवर्ज्जिताः ॥
सर्व्वज्ञाः सर्व्वगाः शुद्धाः परिपूर्णा भवन्ति च ॥५०॥
विशुद्धकायकरणाः परमैश्वर्य्यसंयुताः ॥
सदेहाश्च विदेहाश्च भवन्त्यात्मेच्छया पुनः ॥५१॥
इति नित्यविशुद्धञ्च स्थानमाद्यमुमापतेः ॥
दिव्यं श्रीकण्ठनाथस्य जगद्भर्त्तुःसमुच्छ्रितं ॥५२॥
स्थानपञ्चकमित्येतद् विशुद्धं परिकीर्तितं ॥
परमाष्टगुणैश्वर्य्यसंयुक्तं नित्यमक्षयं ॥५३॥
स्वदेवताप्रणीतेन ज्ञानयोगेन ये नराः ॥
ध्यायन्ति देवतां नित्यं ते सिद्धा यान्ति तत्पुरं ॥५४॥
तत्प्राप्तास्तद्गुणैर्य्युक्ता देवतारूपधारिणः ॥
भवन्ति च शिवाः सिद्धाः स्वभोगा नाम ईश्वराः ॥५५॥
अभ्यस्य यः शिवं ज्ञानं किञ्चित्कालं त्यजेत्पुनः ॥
कामतृष्णाभिभूतत्वात् तस्यापीदं महत्फलं ॥५६॥
अप्येकदिवसे पन्नः शिवध्यानपरायणः ॥
शिवधर्म्म परः सूक्ष्मस्तस्यान्तो नैव विद्यते ॥५७॥
योगधर्म्मः सुसारत्वादभेद्यः पापमुद्गरैः ॥
वज्रतण्डुलबज्ज्ञेयस्तस्मात्तस्य महत्फलं ॥५८॥
देहान्ते तेन धर्म्मेण स्थानमौममवाप्नुयात् ॥
तत्रास्ते विपुलैर्भोगैःक्रीडन् कल्पायुतन्नरः ॥५९॥
ततः कल्पायुतस्यान्ते स्थानं कौमारमाप्नुयात् ॥
तत्रार्द्धसम्मितङ्कालं क्रीडमानःसुखं वसेत् ॥६०॥
तदन्ते विष्णुलोकञ्च सम्प्राप्य रमते पुनः ॥
ब्रह्मलोकन्ततश्चान्ते प्राप्यभोगै रमेद् बुधः ॥६१॥

ब्रह्मलोकात्परिभ्रष्टस्तिष्ठेच्छिव पुरे सुखं ॥
ततस्तान् विष्णुब्रह्माद्याल्लोकानाप्नोत्यनुक्रमात् ॥६२॥
इत्येतत्सर्व्वलोकेषु भुक्त्वा भोगानशेषतः ॥
मनुष्यलोकमासाद्य शिवयोगी भवेत्पुनः ॥६३॥
ततःस योगविघ्नेना पुनर्ध्यायति शङ्करं ॥
प्राप्तयोगतमुन्त्यक्त्वा शिवस्थानं परं ब्रजेत् ॥६४॥
नैतत्तपोभिरत्युग्रैर्न्न च सर्व्वैर्म्मर्हामखैः ॥
सम्प्राप्य परमं स्थानं शिवयोगाद्वसेन्नरः ॥६५॥
तस्मादन्तर्बहिश्चिन्तां परिभाज्य विचक्षणः ॥
सर्व्वदुःख प्रहाणार्थं शिवयोगं समभ्यसेत् ॥६६॥
अथ योगं विनाप्येतत् स्थानमेकेन लभ्यते ॥
शिवप्रियेण विधिना नान्यैर्व्विधिशतैरपि ॥६७॥
शिवं सम्पूज्य विधिवद् घृतस्नानादिविस्तरैः ॥
सहस्रं शिव भक्तानां भोजयीत दशोत्तरं ॥६८॥
ततः सहस्र दोग्धीणाङ्गवां श्वेतं शितं तथा ॥
गर्भिण्यर्द्धेन सम्मिश्रं वृषभैर्द्दशभिर्य्युतं ॥६९॥
पूजितंगन्धपुष्पाद्यैश्चैलकण्ठमलङ्कृतं ॥
प्रदक्षिणामुपावृत्य मन्त्रेणानेन भक्तितः ॥७०॥
गावो ममाग्रतो नित्यं गावो नित्यं प्रतिष्ठिताः ॥
हृदये तु सदा गावो गवां मध्ये बसाम्यहं ॥७१॥
गवां मन्त्रं समुच्चार्य्य जपेत्तासां पुरः स्थितः ॥
गन्धपुष्पाक्षतोन्मिश्रां गृहीत्वा ताम्रकर्क्करीं ॥७२॥
श्रृङ्गे पुच्छं प्रधानाया गोश्च स्नाप्यतदम्भसा ॥
रौप्यपात्रे तु तत्तोयं प्रतिगृह्ण नयेत्ततः ॥७३॥
तैरेवसार्द्धं विप्रेन्द्रैर्म्महता तुमुलेन च ॥
भृत्यपुत्रकलत्राद्यैर्य्युक्तःस्वजनबन्धुभिः ॥७४॥

निवेदयीतशर्व्वाय मन्त्रेणानेन भक्तितः ॥
गोमातरः स्थिता नित्यं शिवलोके शिवप्रियाः ॥७५॥
शिवायैता मया गावः शिवार्थं विनिवेदिताः ॥
एवं निवेद्य शर्व्वाय गोसहस्रमलङ्कृतं ॥७६॥
प्राप्नोति परमं स्थानं यद्‌गत्वा न निवर्तते ॥
कुलानि त्रिशंदुत्तार्य्य भृत्यमित्राण्यशेषतः॥७७॥
संस्थाप्य रुद्रलोके च शिवं स्थानमवाप्नुयात् ॥
सर्व्वज्ञः परिपूर्णश्च शुद्धः सर्व्वगतः प्रभुः ॥७८॥
संसारसागरान्मुक्तः शिवतुल्यः प्रजायते ॥
एवमेतत्परं स्थानं गृहस्थैरप्यवाप्यते ॥७९॥
विनापि ज्ञानयोगेन गोसहस्रप्रदानतः ॥
गावः पवित्रमतुलं गावः सर्व्वार्थसाधिकाः ॥८०॥
तस्माद्धि गोप्रदानेन शिवभक्तः प्रमुच्यते ॥
यस्मिन् देशे वसेन्नित्यं शिवभक्तः क्षमान्वितः ॥८१॥
सोऽपि देशो भवेत्पूतः किं पुनस्तस्य बान्धवाः ॥
उक्तं द्वादशसाहस्रं शिवधर्म्मोत्तरं महत् ॥८२॥
अगस्तेयमुनीन्द्राय कुमारेण महात्मना ॥
इतीह कर्मयोगस्य ज्ञानयोगस्य तत्वतः ॥८३॥
धर्म्माधर्म्मगतीनाञ्च स्वरूपमुपवर्णितं ॥
इत्येतदखिलं बुध्द्वा संक्षिप्यागस्तिरब्रवीत् ॥८४॥
द्वादशाध्याय संयुक्तमिति सारं विमुक्तिदं ॥
शिवधर्म्मोत्तरं शास्त्रं वाचयेद्यः श्रृणोति च ॥८५॥
स संसाराद्विनिर्म्मुक्तः प्राप्नोति परमं पदं ॥
विद्यासिंहासने रम्ये वस्त्रपुष्पादिशोभिते ॥८६॥
पूजयित्वा शिवज्ञानं श्रृणुयाद्वाचयीत वा ॥
श्रीमद्दण्डासनं वापि कृत्वाऽसनसुशोभनं ॥८७॥

हेमपट्टोपरिच्छन्न नानरत्नविभूषित ॥
राजतं ताम्रकास्यं वा ब्रह्मरीत्याविनिर्मितं ॥८८॥
तरुसारसमुद्भूतं श्रृङ्गवंशादिनिर्म्मितम् ॥
यथासम्भवसम्भूतैरधश्चोर्ध्वं विभूषितं ॥८९॥
नानाभक्तिसमुत्कीर्णं चित्रसूत्रनिवन्धनं ॥
द्व्यङ्गुलोच्चप्रमाणेषु पूर्णचन्द्रनिभेषु च ॥९०॥
विचित्रोत्कीर्णवर्णेषु प्रतिपादेषु संस्थितः ॥
दुकूलपट्टदेवाङ्गचित्रपट्टादिसम्भैर्वं ॥९१॥
बध्दं कुसुम्भरक्तं वा प्राकारशिखरान्वितं ॥
चतुर्भिः कन्दुकैर्य्युक्तः पञ्चवर्णैः सुशोभनैः ॥९२॥
किङ्किणीरवकोपेतैश्चतुःकोणसमाश्रितैः ॥
गिरिप्राकारशिखरैः सुसूक्ष्मैः पञ्चरङ्गिकैः ॥९३॥
सद्वस्त्रांशसमुद्भूतैः कन्दुकाधः प्रलम्वितैः ॥
इत्थमास्तरणं कृत्वा विन्यसेद्दण्डकासने॥९४॥
तस्योपरि शिवज्ञानं संस्थाप्य प्रतिपूजयेत् ॥
विद्यादानोपचारेण शोभां कृत्वा प्रयत्नतः ॥९५॥
गन्धाधिवासितकरः श्रीमदासनसंस्थितः ॥
शम्भ्वायतनतीर्थेषु नरेन्द्र भवनेषु वा ॥९६॥
वाचयेत्परमं धर्म्मं गृहे ग्रामे पुरेषु वा ॥
श्रोतारश्च शिवज्ञानं धूपपुष्पैर्दिने दिने ॥९७॥
पूजयित्वा नमित्वा च कृताञ्जलिपुटाः स्थिताः ॥
सर्व्वेनीचासनाः शान्ता यथावृद्ध क्रमागताः ॥९८॥
धर्मतः श्रोतुमर्हन्ति कथान्तर विवर्ज्जिताः ॥
ज्ञानारम्भे समाप्तौ च श्रोतृभिर्व्वाचकेन च ॥९९ ॥

मानव जीवनका उकाला र ओराला



जननी जन्मभूमिश्च स्वर्गादपि गरीयसी ।

उकाला ओराला सम विजम यात्रा शिखरिणी ;
निरोगी वा रोगी सतत पदयात्रा जगतमा ।
कहीं बालो वृद्धे जलधि र हिमालै भरि सदा ;
सुखी दुःखी साथै कमर कसि नाथै नरहरिः ॥



हे हिन्दुराष्ट्र ! गोरखा !!
तेरो मुख हेरेर 'ॐ गौः संस्कृतम्' भन्ने
विश्वका कोटि-कोटि हिन्दुहरु आफ्नो शिर ठाडो पार्छन्।
'आत्मा खलु विश्वमूलम्' भनेर विश्वलाई आत्मा ठान्नेर 'वेदोऽखिलो
धर्ममूलम्' भनेर वेदलाई विश्वमानवधर्मको मूल मानेको हुनाले तँलाई विश्वले हिन्दुधर्मको एकताको केन्द्रबिन्दु मानेको हो।
परको ध्यान नराखेर, विवेकहीन भएर आज तैंले हिन्दुत्व त्यागिस् भने भोलि तँलाई कसैले पनि मान्ने छैनन्। तेरो अस्तित्व
पनि रहने छैन। साथै विश्वका हिन्दुहरुको पनि अस्तित्व मेटिने छ। सो जानी पूर्वजहरुको ऐतिहासिक आदर्श 'हिन्दुहमवीर' 'जम्बूद्वीप
का हिन्दुनामा एक' 'असल हिन्दुस्थान हो' भन्ने इतिहासका सुनौला पानामा कालो मोसो घसिने छ। सगरमाथा झुक्नेछ। हिन्दुजाति
सदाकालागि समाप्त हुनेछन्। मनुका पाला देखि अटल रहेको कैलासकूटको मुकुट पनि मेटिने छ।

॥ सावधान ॥



श्री पञ्चेश्वर महादेव, ललितपुर



गोपाल गोरखबहादुर रोकाया
गाईका साथमा

क्रमश- श्रीभारस्थापा, रामप्रसाद घिमीरे, योगी नरहरिनाथ: र विष्णुप्रसाद अर्याल विचारविमर्श गर्दै



श्री गोरखनाथ मन्दिर सिद्धाञ्चल
मृगस्थली, काठमण्डप नेपाल

श्री १०८ महन्त वडा गुरुमहाराज क्षिप्रानाथ योगिराजका दाजा तिर कृपानाथ योगी सिद्धाचल मृगस्थली गोरक्षपीठनिष्ठ हिमाली हिन्दुराष्ट्र २०४४ ।

गोरक्षराष्ट्र - नेपाल - सिद्धाचल - मृगस्थली।
यत्रगोरक्षनाथेन मेघमालाऽऽसनीकृता ॥
तत्र पीठस्थितो योगी क्षिप्रानाथः कृपायुतः। २०४४



पुरातत्त्वान्वेषी इतिहासप्रकाशक प्रकाण्ड विद्वान् हिन्दुराष्ट्रगुरु योगी नरहरिनाथज्यू द्वारा वार्षिक दीक्षान्त समारोह संस्कृत भाषामा नागपुर विद्यापीठका शिक्षकवर्ग र श्रोतागण संवत् २०३८ फागुन



गोर्खा हिन्दुराष्ट्रगुरु योगी नरहरिनाथज्यूद्वारा वार्षिक दीक्षान्त भाषण संस्कृतमा नागपुर विद्यापीठमा कुलगुरुकालमेघका पाला - संवत् २०३८ फागुन.



सम्पादकः श्रीशः थापा.

हिन्दुराष्ट्र–परिचयो देवदेशो हिमालयः

देवभूमि भारत एवं आध्यात्मिक नेपाल

वैदिक–राष्ट्रिय–प्रार्थना

ॐ आब्रह्मन्ब्राह्मणोब्रह्मवर्च्चसी जायतामाराष्ट्रे राजन्यः शूरऽइषव्व्योऽतिव्याधी
महारथो जायतान्दोग्ध्री धेनुर्व्वोढानड्वानाशुः सप्तिः पुरन्धिर्य्योषा जिष्णू रथेष्ठाः
सभेयो युवास्य यजमानस्यव्वीरो जायतान्निकामे निकामे नः पर्ज्जन्न्योव्वर्षतु फलवत्यो
नऽओषधयः पच्च्यन्तांय्योगक्षेमो नः कल्पताम् ॥ ॐ ॥

भावार्थ

तेजी ब्राह्मण वेदमा सब बनुन् आ राष्ट्रमा तेजिला
शूरा स्वस्थ महारथी धनुधरा रक्षा-क्षम क्षत्रिय ।
गाई धेनु समान दूध दुहुने गोरू र साँडे बली
घोडा वायु सरी सुशील विदुषी नारी पुरन्धी भनी ॥
योद्धा वीर रथस्थ शत्रु विजयी विद्वान् युवा सभ्य हुन्
देवार्चा यजमानका सुत हवुन् वीराग्रणी सद्गुणी ।
हाम्रा खेति किसानिका समयमा पर्जन्य वर्षुन् जल
बाली नालि फुलुन् फलुन् पर्जुरियुन् पाकुन् सबै ओषधी ॥
योग क्षेम समान रूप सबको होस् कल्प कल्पान्तमा।
मेधावी धन धान्य धर्म धृतिले सम्बद्ध सारा रहुन् ।
शान्ति स्वस्ति र सङ्घशक्ति जनमा जागुन् जगाउन् जगत्
विश्व स्वस्थ रहोस् सदा जय हवोस्, कल्याण होस् लोकको ॥

प्रचारक - रामप्रसाद घिमीरे

पशुपतिमतम् सम्पादक
विष्णुप्रसाद अर्याल

प्रवचन गर्दै - योगी नरहरिनाथ:



मृगस्थलि काष्ठमण्डपमा सुरक्षित बृहत नेपालको



प्रचार प्रसार सचिव
कलाकार- शालिग्राम कार्की
ललितपुर सैंबु भैंसीपाटी

क्रमश- रामप्रसाद घिमीरे, योगी नरहरिनाथः र ईश्वरराज वस्ताकोटी



सम्पादकमण्डल- रामप्रसाद घिमीरे विष्णुप्रसाद अर्याल र
श्रीशस्थापा सम्पादनमा तल्लिन हुँदै।

आनयेद् धूपपुष्पाद्यमेकैकं श्रावकः क्रमात् ॥१७००॥
सर्व्वसाधुजनार्थाय ज्ञानमत्र प्रदोऽपि वा ॥
आचार्य्येभ्यः करे दद्याद् वाचकः कुसुमत्रयं ॥१॥
तेऽपि तैरादिमध्यान्ते कुर्य्यु : पूजान्तु पुस्तके ॥
इति शक्तया च भक्तया च कृत्वा पूजां प्रदक्षिणं ॥२॥
प्रवर्त्तयति यः कश्चिच्छिवपुस्तकवाचनं ॥
सर्व्वलोकोपकारार्थमात्मनश्च विमुक्तये ॥३॥
तस्य पुण्यफलं वक्ष्ये श्रोतृणां वाचकस्य च ॥
धनमायुः प्रजाः कीर्त्तिं प्रज्ञां बुद्धिं श्रियं सुखं ॥४॥
इह सम्प्राप्य विपुलं देहान्ते शान्तिमाप्नुयात् ॥
असम्पूज्य शिवज्ञानं प्रदेशे चाप्यसंस्कृते ॥५॥
वाचयन्नरकं याति तस्मात्सत्कृत्य वाचयेत् ॥
वाचनान्ते जगच्छान्तिमवधार्य दिने दिने ॥६॥
गच्छेयुः कुशपुष्पार्थं शिवार्च्चाध्यानतत्पराः ॥
ततः शास्त्रसमाप्त्यन्ते पूजां कृत्वा विशेषत : ॥७॥
शिवविद्यागुरूणाञ्च भत्या च शिवयोगिनाम् ॥
भोजनं कल्पयेच्चैषान्दीनान्धानाञ्च सर्व्वत : ॥८॥
मित्रस्वजनबन्धूनामन्ते भृत्यजनस्य च ॥
गुरवे दक्षिणान्दद्याच्छ्वेतङ्गोमिथुनं शुभम् ॥९॥
बस्त्रयुग्माङ्गुलीयञ्च घृतपूर्णञ्च भाजनं ॥
वाचकाय प्रदातव्या दक्षिणा पूर्वभाषिता ॥१०॥
अभाषितेऽस्य दातव्या गुरोरर्द्धेन दक्षिणा ॥
शेषाणाञ्च यथाशक्ति दक्षिणा शिवयोगिनां ॥११॥
दद्याद् विबोधयेत्पश्चात्प्रदीपाष्टशतं बुधः ॥
निवेदयेच्छिवायैतदशेषं पुष्पवारिणा ॥१२॥
ज्ञानपुण्यं महाशान्तं तत्तस्मादक्षयं फलं ॥
एवमुद्यापःकृत्वा शिवज्ञानस्य भक्तित : ॥१३॥
अशेषपापनिर्म्मुक्तः श्रृणुयत्फलमाप्नुयात् ॥
कुलत्रिंशकमुद्धृत्य भार्यापुत्रादिसंयुतः ॥१४॥
बन्धुभिः स्वजनैः स्निग्धैर्भृत्यैःदासैः समाश्रितै : ॥
इत्येतैः सहितः सर्व्वैः श्रीमच्छिवपुरे वसेत् ॥१५॥

महाविमानैरारूढः सर्व्वकामसमन्वितः ॥
तत्र भुङ्क्ते महाभोगानिच्छया शिववद्वशी ॥१६॥
दाता हर्त्ता च कर्त्ता च यावत्सम्प्लाव महत् ॥
प्रलयान्ते ततः प्राप्य ज्ञानयोगमनुत्तमं ॥१७॥
परमेशप्रसादेन मुच्यते नात्रसंशय : ॥
यस्मादेवमतः कुर्याच्छिवपुस्तकवाचनं ॥१८॥
भोगापवर्गफलदं शिवभक्तो दिने दिने ॥
न मारी न चदुर्भिक्षं न रक्षांसि न चेतयः ॥१९॥
नाकालेम्रियते राजा पीड्यते न च शत्रुभि : ॥
श्रृणोति यत्र सततं शिवधर्म्मन्नराधिप : ॥२०॥
तत्र देशे भवेन्नित्यं सर्व्वेषं देहिनां शिवं ॥१७२१॥

इति श्रीशिवधर्म्मोत्तरे द्वादशोऽध्यायः ॥१२॥
॥ शिवाय नमः ॥

अथ पशुपतिमते शिवधर्मे महाशास्त्रे शिवधर्मसङ्ग्रहे गर्भोत्पत्तिर्न्नाम

प्रथमोऽध्यायः

ॐ नमः शिवाय

नमः परमदेवाय त्रैगुण्यविजितात्मने ॥
सर्व्वतो योगरूपाय संसाराभावहेतवे ॥१॥
स्थितिसंहारसर्ग्गाणां कर्त्रे हर्त्रे प्रसारिणे ॥
षडविंशाय प्रधानाय महादेवाय धीमते ॥२॥
शम्भोः सनत्कुमारस्य वायोर्द्वैपायनस्य च ॥
ग्रन्थसारं समुद्धृत्य क्रियते धर्म्मसङ्ग्रह : ॥३॥
गन्तुं वागुदधेः पारं पार्य्यतेऽब्दशतैरपि ॥
महात्मनां कुतस्तेषामतः संक्षेपमाश्रित : ॥४॥
अश्रुतार्थो जनः शोच्यः श्रुतशास्त्रश्च योगकृत् ॥
शोच्याच्छोच्यतरो जन्तुर्य्यो न वेत्ति सदाशिवं ॥५॥
विचित्रोज्ज्वलसुश्लिष्ट मङ्गलंसुधिया खलः ॥
विद्ययोद्विजति व्यक्तं सारमेय इव स्रजा ॥६॥
विमूढस्योपदेष्टा हि करोत्यहितमात्मनः ॥
सुप्तस्योग्रभुजङ्गस्य प्रबोधक इव ध्रुवं ॥७॥
अथ कैलासशिखरे शर्व्वं सर्व्वजगत्पतिं ॥
प्रणम्य शिरसा देवं पप्रच्छ शिखिवाहनः ॥८॥
देवदेव महादेव! विश्वस्य जगतः पते : ॥
अधुना मानुषीं सम्यक् सृष्टिमिच्छामि वेदितुं ॥९॥

॥देवदेव उवाच॥

श्रृणु वत्स ! परं गुह्यं यत्त्वया चोदितो ह्यहं ॥
तत् सर्व्वंकथयिष्यामि संसारस्य यथा स्थितिः ॥१०॥
जगत्सृष्टिरियं कष्टा तमोग्रस्ता प्रजायते : ॥
हिरयण्यगर्भस्य गुह ! नैषा श्रेय : प्रवर्त्तनी ॥११॥
मोक्षमार्ग्गपरिभ्रष्टा तामसार्णवतारिणी ॥
कालचक्रसमारूढा प्रभ्राम्यत्कर्म्मबन्धना ॥१२॥
नाकपृष्ठे जले भूमौ पाताले गगने तथा ॥
जन्तवः परिवर्त्तन्ते जायमाना इतस्ततः ॥१३॥

विष्णुरप्येष भूतानां जानन्नपि च तत्वतः ॥
छद्मना धर्म्ममाचष्टे यज्ञदानव्रतादिभि :॥१४॥
पूर्व्वञ्चाहं शिवेनोक्तः प्रजा वत्स ! सृजेति हि ॥
मया चैवात्मतुल्यानां कोटीः सृष्टास्तपस्विनां ॥१५॥
रुद्राणां शूलहस्तानां त्र्यक्षाणां कामरूपिणां ॥
जन्ममृत्युवियुक्तानामसुरासुरवन्दितान् ॥१६॥
दृष्टवा वै तादृशीं सृष्टिं ब्रह्मा लोकपितामहः ॥
सृष्टिं निवारयामास चरणावभिवाद्य मे ॥१७॥
सृजस्वेति मया प्रोक्ता नाहं स्रष्टा चर्तुर्म्मुखः ॥
तयान्यसृष्ट्वा ईदृश्चा नाहं स्रष्टा कदाचन ॥१८॥
शक्तोहं सर्व्वभूतानां क्षणान्मोक्तु पितामह ! ॥
किन्तु नैषापभेत्तव्या ग्रन्थिः संसार वर्त्तनी ॥१९॥
सिसृक्षुं तं प्रजाः पूर्व्वं विषण्णोद्विग्नमानसं ॥
वीक्ष्य प्रजापतिन्देवः पुरुषं सृष्टवानजः ॥२०॥
प्रविश्य हृदयं मन्त्रं व्यापकं व्याजहार सः ॥
व्यापकादीरणात्तस्य तिस्रो व्याहृतयोऽभवन् ॥२१॥
ताभ्योऽजायत गायत्री तस्मात्वेदाः प्रजज्ञिरे ॥
ऋग्वेदः प्रथमः स्कन्धो यजुर्वेदोद्वितीयकः ॥२२॥
तृतीयः सामवेदस्तु जाताश्चान्ये स्वयम्भुव : ॥
पृथिव्यापस्तु ऋग्वेदो यजुर्वेदोऽनलानिला : ॥२३॥
सामवेदोऽवरात्तूर्णमिन्द्रियाणाञ्च संहतिः ॥
मनोबुद्धिरहङ्कारश्चेतो जीवश्च पञ्चमः ॥२४॥
तुर्य्यं स्थानं समाश्रित्य व्यापकस्य व्यवस्थिताः ॥
ब्रह्मा विष्णुमहादेवा बिन्दुनादसमाश्रिताः ॥२५॥
जाग्रत्स्वप्नः सुषुप्तिश्च तस्य कालत्रयं परं ॥
एवं व्यापकसम्भूतं त्रैलोक्यं सचराचरं ॥२६॥
बर्त्तते सर्व्वभावेषु शुभाशुभनिबन्धना ॥
तिर्य्यक्त्वं यान्त्यधर्म्मेण स्वर्गन्धर्म्मेण जन्तव : ॥२७॥
मिश्रेण मानुषीं योनिं यान्ति देहक्षयेण तु ॥
यजमाना महात्मानस्ते ब्रजन्ति त्रिविष्टपं ॥२८॥
देवैः प्रदीयते तेभ्यो भागश्चन्द्रामृतस्य तु ॥
तं भुक्त्वा क्षीणकर्म्माणि पावकाः स्युर्म्महीतले ॥२९॥

पावकाच्च भवेद्धूमो धूमादभ्रस्ततो जलं ॥
जलाद्वृष्टिरथौषध्य ओषधिभ्योऽन्नमेव च ॥३०॥
अन्नाद्रजस्ततो मांसं मांसान्मेदस्ततोऽस्थि च ॥
अस्थिभ्यो जायते शुक्रं योन्यां शुक्रञ्चयोगतः ॥३१॥
तच्छुक्रं क्रमशः प्राप्तं कललं प्रति पद्यते ॥
कललाद्बुद्बुदं गच्छेन्मांसपेशित्वमेत्यतः ॥३२॥
मासंपेश्यास्ततोऽङ्गानि नखरोमत्वगस्थि च ॥
इन्द्रियाणि च जायन्ते लोभोबुद्धिर्म्मनस्ततः ॥३३॥
जीवेनाधिष्ठितं तच्च शरीरं पाञ्चभौतिकं ॥
मातुरन्नरसेनेदं वर्द्धते नालवेष्टितं ॥३४॥
घोरान्धकारमध्यस्थो दह्यमानो महाग्निना ॥
विण्मूत्ररुधिरक्लेदमेदोदुर्गन्धपूरिते ॥३५॥
स क्लेशक्लिशितो बालः शनैः श्वासं प्रमुञ्चति ॥
पूर्व्वजातिं स्मरंस्तत्र पुनार्दह्यति बालकः ॥३६॥
ततः स चिन्तयत्येवं यदि गर्भात्सुदारुणात् ॥
निर्ग्गमिष्याम्यहं तस्मात्सर्व्वगं सर्व्वथासदा ॥३७॥
सम्पूज्य परमेशानं बृषकेतुं त्रिलोचनं ॥
विषयन्न यथा भूय इमां कुर्य्यात्तथा तथा ॥३८॥
यथा स विकटामध्या यन्त्रेणैव निपीडितः ॥
रुधिरक्लेदसिक्तोपि योनिंद्वाराद्विनिर्गतः ॥३९॥
तदाऽनिलेन वाह्येन मोहितोऽसौ ज्वरेण वै ॥
स्मृतिलोपोऽन्यचित्तस्य पूर्व्वकर्म्म निबन्धनात् ॥४०॥
जायते तु रतिस्तस्य संसारार्णववर्त्तनी ॥
आयुस्तस्य विनिर्दिष्टं धात्रा बर्षशतं परं ॥४१॥
यदि जीवति रात्रौ स्याद्धतमर्द्धम्मृतोपमं ॥
बाल्यवार्द्धक्यतः पुंसां बर्षत्रिंशद्विनिर्गता ॥४२॥
अस्थिभिस्त्रिशतैः षष्ट्या दारुमन्दिरबद्धृतं ॥
त्रिभिः सन्धिशतैरूर्ध्वं दरिद्राम्बरवद्वपुः ॥४३॥
सप्तोत्तरशतेनापि कर्म्मणा परिवेष्टितं ॥
असाधुवच्छिद्रततं सप्तधातुमलान्वितं ॥४४॥
कोटीभिस्तिसृभी रोम्णाच्छन्नं विपिनवत्तृणैः ॥
दीर्घान्त्रमालया रुद्धं विण्मूत्रक्लेदपूर्णया ॥४५॥
शिराजालाकुलं रौद्रं बुद्ध्यहङ्कारसंयुतं ॥

मातापितृविभागेन षट्कौशिकमिदं स्मृतं ॥४६॥
भस्त्राजिनमिवोच्छ्वासं मुञ्चन्निरुपयोगिकं ॥
दुर्गन्धि नश्वरं पुंसां शरीरं शुचिवर्ज्जितं ॥४७॥
दुःखरोगजराधारं वेदनामनसिस्थितं ॥४८॥
कफमूत्रपुरीषरेतसान्निलये रक्तविगन्धिदुःसहं ॥
यदि सन्ति न मृज्जलादयो बपुरेतद्वद किम्भवेन्नृणाम् ॥४९॥
आजन्मषोडशं वर्षङ्ग्रहैः स्कन्द ! पुरोगमैः ॥
अभिभूतस्य बालस्य जायन्ते व्यसनोदयाः ॥५०॥
उर्ध्वंपश्यतिकम्पते न रमते क्रोशत्यकस्माद् भृशं ॥
स्तन्यंद्वेष्टि शिरो धुनाति दशनैर्ज्जिब्हान्दशत्युद्गमैः ॥
रात्रौ न स्वपिति प्ररोदिति परं तापान्वितोज्वर्य्यते ॥
जृम्भी बक्षसि पीड्यते कफरुजासम्मीलयत्यक्षिणी ॥५१॥
गात्रं शुष्यति काचनेत्रयुगलः पूतास्रगन्धाविल : ॥
निस्यागाप्रवगाननः कृमिकुलैः कुक्षिं विलुप्येत वा ॥
नेत्रान्नेत्रजलं स्रवत्यविरलं ग्रस्ताङ्गसन्धिस्तनुर्ज्जातस्याप्यलमेवमादि विधुरं
बालग्रहेभ्योभवेत् ॥५२॥

इति शिवधर्म्मसङ्ग्रहे गर्भोत्पत्तिर्न्नाम प्रथमोऽध्यायः ॥१॥

अथ पशुपतिमते शिवधर्मे महाशास्त्रे शिवधर्मासङ्ग्रहे

द्वितीयोऽध्यायः

ॐ नमः शिवाय

पीड्यमानो ग्रहैर्ब्बालः प्रयाति यमसादनं ॥
कदाचिद् बहुःदुखानि भुङ्क्तेऽत्र यदि जीवति ॥५३॥
अप्रतीघातघोरेण विक्रोशन्नपि मानवः ॥
ग्रस्यते भवदुःखेन भेकशाव इवाहिना ॥५४॥
बृक्षकूपगिरिश्रृङ्गप्रासादपतनादपि ॥
नदीतस्करभूपालसर्प्पबृश्चिकमूषिकैः ॥५५॥
ऋक्षशादूलमातङ्गैः श्रृङ्गिभिः श्वापदैरपि ॥
विद्विषो दहनाच्चैव भूतयक्षग्रहादिभिः ॥५६॥
अन्येभ्यश्चापमृत्युभ्यः कल्याणन्नैव विन्दति ॥
कालैः कालपरिक्लेशैः पीड्यते प्रावृडादिभिः ॥५७॥
घनकर्द्दमपिच्छिलायनं घनमार्गोत्कटबृष्टिसन्ततं ॥
तिमिलाकुलघोरदुःखदं विमशीका विपरीतमन्दिरं ॥५८॥
कथमप्यवहाय यत्नतो जलदानां समयं विरामकं ॥
यदि तिष्ठति मानुषः क्षणं तुहिनारम्भदिनैर्व्विरम्यते ॥५९॥
श्यायाम्भः क्लिन्नगात्रस्फुरदधरपुटस्फीतरोमाञ्चपुञ्जै ॥
ब्र्बिभ्रत्सङ्कोचमङ्गैस्तुहिनकणचयैर्म्मांसलायां क्षपायाम् ॥
मुञ्चन् सीत्कारशब्दं कथमपि विहरन्नुद्विजत्पादपार्श्वः
कष्टं हेमन्तकाले क्षपयति मनुजो मान्द्यवत् क्लेशबृत्या ॥६०॥
सूर्यांशुस्फालतालस्फुरदनलशिखादुःसहैः सन्निरुद्धे
क्षामं क्षेमं समाजेक्वथितसफरिकाप्रोल्लसद्दीर्घिकेऽस्मिन् ॥
शुष्यत्स्रोतस्युदात्तश्रमजलकणिकाक्लिन्नसर्व्वाङ्गसन्धिः
क्वाम्बुच्छायेति जल्पञ्ज्वलदवनितले भ्राम्यति ग्रीष्मकाले ॥६१॥
क्षुधापिपासया भूयः सातत्यमभिभूयते ॥
क्षुधासमो मनुष्याणां नास्ति देहस्य वेदना ॥६२॥
क्षुधा लज्जां जहात्याशु क्षुधा स्तेयं समाचरेत् ॥
बह्वकार्यं क्षुधा कुर्य्यादवद्यंवदति क्षुधा ॥६३॥
क्षुधागुरुतरं भारं वहन्ति खरवज्जनाः ॥
क्षुधाविधुरभारोऽपि प्रवासीक्रियते क्षणात् ॥६४॥

चतुर्व्वेदार्थतत्वज्ञा वैयाकरणतार्किकाः ॥
द्रव्यगन्धविशून्यस्य क्षुधाः सेवन्ति पण्डिताः ॥६५॥
क्षुधाबक्त्राणि बक्त्राणि विगन्धिविरसानि च ॥
चुम्वन्ति रूपवत्योऽपि किं क्षुधः परतो भवेत् ॥६६॥
मातृपुत्रकलत्राणां प्रयाणे शोकविह्वलः ॥
नेत्राम्वुकणिकासिक्तं ग्रासमश्नाति च क्षुधा ॥६७॥
न तथाबाध्यतेक्षुधारन्यै सर्व्वमिदं जगत् ॥
यदि कष्टादधो गच्छेत्सुभोज्यमपि किम्भवेत् ॥६८॥
ज्ञात्वैबन्नादरं कुर्यात्तस्मिन् बस्तुनि मानवः ॥
यथा संस्थाप्यते देहस्तथा तिष्ठति नान्यथा ॥६९॥
लालनात्कातरत्वं स्यात् खेदात्खेदसहो भवेत् ॥
विनाप्यत्यवहारेण धार्यन्ते नासवानृभिः ॥७०॥
अतो धर्म्ममयैवोक्तः सर्व्वथा युक्तमाचरेत् ॥७१॥
क्षुत्क्षामीकृतकुक्षिकोटरदरी जन्तुदृढोऽपिक्षणा ॥
सर्व्वाक्षाणि खिलीभवन्त्यसुभृतां बीजैर्व्विना क्षेत्रवत् ॥७२॥
दन्तर्ल्लीनहुताशनस्तरुरिव म्लानत्वमालिङ्गते ॥
नेत्रे सत्यपि नेक्षते न श्रृणुते कर्णोदरे सत्यपि
सितासितोत्थितग्रासैः कुक्षिरापूर्यते यदा ॥
तदा कामेन वाध्येत पश्य क्लेशपरम्परां ॥७३॥
कस्मिन् स्थिता कुरङ्गाक्षी प्रोत्फुल्लकमलानना ॥
सुपीनचारुजघना कलहंसरवा प्रिया ॥७४॥
इत्येवं प्रलपन् कामी भ्रमन् नगरवर्त्मनि ॥
करोति यदि शक्नोति परदारादिगर्हितं ॥७५॥
अत्युष्णं निश्वसत्युच्चैब्बाष्पदुर्द्दिनलोचनः ॥
उद्यानान्यटति तस्य विरहङ्कामचेतसः ॥७६॥
उत्थाय शयनदेशात्तडुपुक शब्दादपीक्षतेरभसः ॥
मदनपिशाचग्रस्तो दयितापदेशंकयाककुभं ॥७७॥
यद्यत्पश्यति दूरात्तत्तत्प्राणेश्वरी भवति तस्य ॥
विपरीतदर्शिनः स्यादुचितं हितं दवीयसि श्रेयः ॥७८॥
मनसिजबाणनिपाताद् विह्वलहृदयो दिशामुखं सकलं ॥
त्रट क त्रटकितकान्तया ततमवेक्षते वाप्सतराताक्षः ॥७९॥
व्रीडा विगलति दूरे गुरुजनमध्येऽपि रागिणः पुंसः ॥
अलमलमनङ्ग कथया श्रेयः प्रतिकूलया श्रुतया ॥ ८०॥

स्फीतज्योत्स्नाशशिमणिशिला कुट्टिमे हर्म्यपृष्ठे ॥
स्मृत्वा तस्या वदनशशिनो निर्वृतिस्तस्य दूरे ॥८१॥
श्रृण्वन् वीणां विकचनलिनीपत्रशय्या:निषण्णः ॥
मन्दं मन्दं मलयपवनैर्वीज्यमानोऽपि रागी
धर्म्मशास्त्रकथावाक्यमसमाप्तं समाप्यते ॥
स्त्रीसम्बन्धकथावाक्यं समाप्तमपि तन्यते ॥८२॥
अतित्यं जीवितं मुग्धे ! हठमानमिदं त्यज ॥
कान्तां प्रसादयत्येवमनित्यं व्याहरन्नपि ॥८३॥
अनित्यं जीवितमिति ज्ञात्वा सर्व्वात्मना सदा ॥
किन्नैति शरणं मूढः सकलार्त्तिहरं हरं ॥८४॥
गणयति दिनानि दयिता मम सङ्गमकांक्षिणीति पश्यति मे दिशं ॥
मृत्युरपि गणयति स्मरशरसञ्जातविब्हालोन बेत्ति नरः ॥८५॥
कौशल्यं कुसुमधनुर्निसर्गतायाः पश्यत्वं सुरतविधौ विनोपदेशात् ॥
पण्डित्यं जनयति रागिणां मनःसु धर्म्मस्तु प्रभवति नागमादपीह ॥८६॥
उपचर्युपरि विद्वांसः शर्ब्बादिकाक्षराद्यथा ॥
ब्रजन्त्यधस्तथा मूढाः स्त्रीरित्येकाक्षरादपि ॥८७॥
स रागी योषिता वाह्यः कृत्याकृत्यन्न वीक्षते ॥
मातुरङ्गगतं बस्त्रमाच्छिनत्यविशङ्कया ॥८८॥
हितं गुरुजनैरुक्तं विषबद्यस्तु मन्यते ॥
तस्यैव मुर्ध्नि पादेन हन्यते प्रमदाजनैः ॥८९॥
जनवादा वसुभ्रंशं जीवितस्यापि संशयं ॥
प्रत्यक्षनरकद्वारं परदारान्निषेबते ॥९०॥
वियोजयति च प्राणैः सहृद्वन्धून पीर्ष्यया ॥
स्वर्गप्राप्तिरियं नूनमिति सञ्चिन्तयत्यथ ॥९१॥
अन्येन सह सङ्केतैर्दृष्ट्वान्यैर्भाषते पुनः ॥
दीयते च मनोऽन्यस्मै स्वपन्त्यन्येन योषितः ॥९२॥
एषा क्षेत्रमनर्थानां मूलं दोषमहीरुहां ॥
अशनिः कुलबंशस्य दावाग्निर्व्वै वनस्य च ॥९३॥
भवनं कैतवस्यापि पन्थानो नरकस्य च ॥
प्रत्यूहाः सर्व्वसिद्धीनामकृत्यानाञ्च पत्तनं ॥९४॥
अश्रेयतामधिष्ठानं धर्म्माणां धुम केतवः ॥
निधानमपमानस्य स्थानं परिभवस्य च ॥९५॥
संसारवेश्मनः स्तम्भ आपदः सम्पदामपि ॥

विनाशभूमयः कीर्त्तेर्यौवनस्य धनस्य च ॥९६॥
आक्रान्त नौरिवाशेषैर्व्वातालीवाति दुःसहा ॥
प्रकटीकुरुते गुह्यमपूर्व्वपुरुषेष्वपि ॥९७॥
छागीव यवसमुष्ट्या नीयन्ते येन केनचित्प्रमदाः ॥
नवनवशय्यास्वादनलम्पटहृदया महिस्य इव ॥९८॥
तासांवदनसरोजस्मरणमिवाशेषलोकसामान्यं ॥
क्षणविध्वंसिनि रागे जीवितमिव जीवलोकस्य ॥९९॥
नगरभ्रमवत्सततं सर्व्वस्रोतांसि वहन्ति जघनानि ॥
नाडीव्रण इव योनेरशुचिरजस्रं स्रवति तासां ॥१००॥
अन्तर्गतविषभविषाद्विरसन वदनानि कुटिलगामिन्यः ॥
छिद्रान्वेषणचतुरा भुजङ्गाइव यान्त्यविश्वस्याः ॥१॥
रागं झगिति च व्योम्नि दर्शयन्त्यस्त चेतसः ॥
पश्चात्सम्मीलन श्यामं बेश्य तडिदिवापरा ॥२॥
अर्थमेकं परित्यज्य स्त्रीणां किमपरः प्रियः ॥
अहं तासां प्रियोऽस्मीति यो जानाति सगर्दभः ॥३॥
ओजसा सिंहतुल्येन क्रीडन्ती तद्विपर्यये ॥
तस्यैव द्रविणेनान्यै रमतेश्वसमैर्व्विटैः ॥४॥
पूतिचर्म्मलबां स्त्राणां क्षाराम्बुयदि न स्रवेत् ॥
कृमयः किन्न जायन्ते जनस्तत्रैव रज्यते ॥५॥
तासां भरणाम जना गम्भीरावर्त्तदुस्तराञ्चण्डनदीं ॥
श्वापदगहनञ्च वनं नगशिखराण्यपि विलंङ्घ्य यान्त्यसुमना ॥६॥
जम्बालगलितदुःखं निरन्तरासारवारिवाहपथे ॥
चण्डातपेऽपि धावति तासां भरणाय विलधनिभिः ॥७॥
बहुकपटघटितचरितं व्यवहरति परत्रं निर्भयो जन्तुः ॥
किञ्च न करोति पापं तासां भरणाय मोहजितः ॥ ८॥
प्रतिहतचरितं चरितं यस्या भरणाय यच्च विहितधिया ॥
तेनाह साग्निगर्भिण्यजाम्बुनिमग्नविग्रहो यमसदने ॥९॥
कुण्ठकुठारच्छिन्नः खगखरमुखखण्ड्यमानतीव्ररुजार्त्तः ॥
शकलीक्रियते भूमोघस्मलोपाच्च विष्ठाकर्द्दमसमूहे ॥१०॥
भैरवनादं मुञ्चन्ननुभावति स एक एवं वधूचर्यः ॥
सा तु विटैः सह रमते तास्वपि रज्यतः एव हताः ॥११॥
स्त्रियामिवाव्याजमनः समाधयो यदिस्युरीशे जगदर्त्तिहारिणी ॥
कथन्त्वगत्वारमनाथमन्दिरं भवन्ति पुंसां व्यसनानि बाधिताः ॥१२॥

सरोरुहदलाशितोदककणोपमं जीवितं
प्रबुध्य भववारिधेर्विषमशीलतोऽ सन्ततिं ॥
किमिन्दुरुचिराननां किमुत धर्म्म इत्यात्मना
विलोक्यहितमात्मने तदभिनन्द्यताम्पण्डितै : ॥१३॥
सान्द्रान्धकारभरितातिगभीरगर्त्ते
चण्डानलस्फुटितमस्तकनिस्वनाग्रे ।
तन्व्याः कुरङ्गकवधूतरलेक्षणेन
दुःखन्न शाम्यति महानरके नरस्य ॥१४॥
रुषा प्रबाध्यते कामाद्रुजो वा पथ्यभोजनात् ॥
संयुते ह्यशुभेनाशु सहि शत्रुरिवोत्थितः ॥१५॥
यान्ति मित्राणि सङ्कोच कोधार्च्चिःपरितात्मनः ॥
आदित्यात्कुमुदानीव स्फुटं विकसितान्यपि ॥१६॥
असद्वाविदुषां ग्रन्थाः कोधाविष्कृतचेतसः ॥
काष्ठघर्षणसंयोगाज्जायते दहना इव ॥१७॥
प्रतिघज्वलनो वेगाद्धगिति प्रमलीमसं ॥
प्रादुर्भवत्युदारेण प्रदीपादिव कज्जलं ॥१८॥
सतान्दुर्ज्जनसम्पत्तिर्न्न व्रजत्युपभोग्यतां ॥
श्मशानवृक्षच्छायेव मृगाणां मृदुचेतसां ॥१९॥
वन्हिज्वालावलीरुद्धं नरकं घोरनादितं ॥
प्रविशन्निर्व्विकारेण स्वरोहमिवं रोषणः ॥२०॥
गत्वा वाराणसी क्षेत्रं मुच्यते ब्रह्महत्यया ॥
रोषेणैवाभिभूतस्तु क्वाभिगम्यसुखी भवेत् ॥२१॥
वरं शक्यन्तु मोहन्तुं प्रदीपैर्म्मणिरश्मिभिः ॥
अशक्यं क्रौधजं हन्त तमो भानुशतैरपि ॥२२॥
क्रोधालीढस्य चेतांसि शास्त्रसंरक्षितान्यपि ॥
चैलबद्धजलानीव व्रजन्ति भ्रंशतांद्रुतं ॥२३॥
यो जपेत्क्रोधसंयुक्तो जुहुयात्पूजयेच्छिवं ॥
तत्फलं नश्यते क्षिप्प्रं भिन्नकुम्भादिवोदकम् ॥२४॥
न देवब्राह्मणास्तस्य कोधान्धस्य शरीरिणः ॥
दत्ते प्रहारयेत्कृत्यं प्रायश्चित्तं ब्रवीमितेः ॥२५॥
कृच्छ्रं विदध्यादगुरूर्ध्यरोषान्निपातने पुंस्यतिकृच्छ्रमेव ॥
कृच्छ्रातिकृच्छ्र रुधिरं जनित्वा सम्यक्करेच्छंकरशासनास्थः ॥२६॥
अन्तर्गतः क्रोधविषाग्निवेगाद्दहत्यपेक्षांपरिमुच्य दूरे ॥

निसर्गधीराण्यपि मानसानि वनानि दावाग्निरिव प्रबुद्धः ॥२७॥
अथ क्रोधमतीत्येवं जनोलोभेन बाध्यते ॥
अन्तरङ्गविधानेन बहिरङ्गविधिर्यथा ॥२८॥
द्रव्ये सति न देवेभ्यो ब्राह्मणेभ्यो ददात्यसौ ॥
न चापि स्वयमश्नाति मृतवद् भ्रमति क्षितौ ॥२९॥
मित्रस्वमपिलोभेन त्यक्तापेक्षां गरीयसीं ॥
प्रलोभपटलच्छन्न : कस्तस्य स्वपरोजनः ॥३०॥
दोषैः सङ्कल्प्य रोगार्त्तमुदासीनमदोषिणं ॥
आहरेदस्य सर्व्वस्वं क्षणिकस्य कृते खलः ॥३१॥
अजरामरवद्वित्तमुष्ट्या गृणया धियो ॥
भोक्तुमप्राप्यतेऽत्यन्तन्तदन्यैरुपभोज्यते ॥३२॥
पितरस्तनयैर्ल्लोभात्पुत्राश्च पितृभिः सह ॥
भ्रातरश्च विलुप्यन्ते लोभात् किन्न भवेदिह ॥३३॥
जन्मरोगमरणव्यथभीत्या पुण्यवभ्दिरमलेन्दुमनोभिः ॥
दत्तमर्थमपि चन्द्रजटाललालितो भवनेरितचित्तः ॥३४॥
अप्रलापिजनो मूर्खो वाचालश्चेत्स वातलः ॥
पार्श्ववर्त्ती प्रगल्भः स्याद्दूरवर्ती प्रहीनता ॥३५॥
दास्यति स्वपरो मह्यमिति तुष्टस्त्वचेतनः ॥
शुष्कास्ये मुर्द्धनि श्वासो लोभी धावति वाजिभिः ॥३६॥
नीचैश्च सम्पदो दर्प्पादत्यर्थं परिभूयते ॥
सेवा धर्मं महाकष्टं तृष्णया क्रियते किल ॥३७॥
निद्राहानिविशङ्कजीवितमनानर्थस्य सन्देहलाच्छन्नं लोभमना : ॥
अङ्गींकरोति चौर्यमकुशलादपि पानपात्रमघगणभवनं ॥
विरचितकरकमलाङ्गुलिमश्रुजलग्रथिततरलनयनमपि नरं ॥३९॥
योजयति मृत्युवर्त्मनि लोभविषदूषितान्तःकरणोऽकरुणं ॥
कृत्वा कृत्यं कुर्व्वन् प्रेरयति बृथा दिनं सकलं ॥४०॥
मृत इव निशामपि पुनः क्षपयति कष्टादवाप्तजन्ममनुजपशुः ॥
स्फुटितकुमुदहासिकेशदामश्लथवलितालकसंकुलं च वक्त्रे ॥४१॥
घनपटलचिपिटनेत्रकान्तिर्व्वपुषि नृणां रुजस्तु लोभ एकः ॥
विक्षिप्तबाण इव गच्छतिकाल आशु सम्पत्तयः सलिलराशितरङ्गलोलाः ॥
पाणिस्थतोयमिव यौवनमप्यवैसि किं तृष्णयानमत सङ्करमस्ति मृत्यु ॥४३॥
सर्व्वलोभमदद्वेषकामक्रोधावृतक्षुधां ॥
सेनानीर्ध्वंसकः पुंसां मोह इत्यभिधीयते ॥४४॥

मोहाद्दोषगणाः सर्व्वे देहिनां नरके सदा ॥
प्रभवन्ति महाघोरा आकरादिव धातवः ॥४५॥
राजसम्मानसं मोहात्पर्व्वतानपि नेक्षते ॥
कर्प्पूरभक्षणागतस्यो लोकवत्प्रबलो जनः ॥४६॥
नरेन्द्रलक्ष्मीः प्रभवन्तु सम्पदा यथा यथा वृद्धिमुपैति मानव : ॥
तथा तथासौ मलिनायते ध्रुवं कुमुद्वती चान्द्रमिवाप्य मण्डलं ॥४७॥
परसम्पदमालोक्य पैशुन्यं भजते खल ॥
अनन्तमद्भुतं पूर्व्वमात्मनेति न विन्दति ॥४८॥
तृष्णया बाध्यते पीतं पीते बुद्धिविनाशनं ॥
मद्यपानं मनुष्याणां परमं व्याधिलक्षणं ॥ ४९॥
षीतमद्योगलद्वस्त्रो दुर्व्वचः प्रलपन् बहून् ॥
इतस्ततः पतन्मार्गे तपांशुपरिधूषरः ॥५०॥
पर्यन्तताम्रनयनः प्रेङ्खन् स सङ्गतारकः ॥
गच्छ गच्छ प्रयाहीति व्याहरन् स्खलिताक्षरं ॥५१॥
अकस्मादुद्गमत्येवं विदग्धजनसंसदि ॥
पिता पुत्रसमाजेऽपि वक्ति सूक्तिमशङ्कया ॥५२॥
आत्मनो वसुना पीत्वा लोकेभ्यो लाच्छनं परं ॥
सततं कुशलं त्यक्त्वा वृथा य : क्षपयत्वसौ ॥५३॥
वसुधातलमपि शेते स्वशिरोगुदयोर्व्विशेषमप्यविदित्वा ॥
धर्म्माधर्म्मविवेकं कथंतयावेहि मदिरयाक्षतहृदयः ॥५४॥
दीव्यन्दुरोदरैर्म्मोहात्परस्वं लाति छद्मना ॥
तथैव तस्य सर्व्वस्वं ह्रियते धूर्त्तमण्डलै ॥५५॥
अभुक्त्वा पूतिगन्धेन वक्त्रेण क्षपयन्दिवा ॥
पटचीरावृतकटिर्व्वदन्नुच्चैस्तरां रुषा ॥५६॥
दीयते यदि कारुण्यात्सुहृद्भिरशनं यदा ॥
तत्पात्रमपि संगृह्य द्यूते हारयति क्षणात् ॥५७॥
क्षुधा प्रविष्टजठरं धूसराकुलमूर्द्धजं ॥
पाणिप्रावरणोरस्कं कण्डूपाण्डरितत्वचं ॥५८॥
प्रेतवद्विचरन्तन्तं वीक्ष्य निन्दन्ति विद्विषः ॥
अप्रत्ययश्च लोकेभ्यो भूयः परिभवाधिकः ॥५९॥
शर्म्म दूरे विनिक्षिप्य व्यसनं स्वीकरोति च ॥
द्यूतकृत्यगृहीतस्य श्रेय एव न विद्यते ॥६०॥
द्यूताद्धनेच्छा पितृपिण्डवाञ्छा दासीसुतात्सौख्यमितो भवाब्धे ॥

तारुण्यदर्प्पश्च शिरोजरङ्गाद्यस्यास्ति दूरे स हि वन्दनीय : ॥६१॥
दूषयत्युभयं लोकं नरस्य मृगयामति ॥
अरण्यतृणपर्णाम्बुभक्षिण्येणकदम्बके ॥६३॥
निर्वृत्तपरसन्तोषे भूयोऽसन्तमनोहरे ॥
अस्यते विषतीव्रेषुर्म्महामोहस्य रौद्रता ॥६४॥
प्राणातिपातः सुस्वप्ने दुःस्वप्ने तैर्व्विहन्यते ॥
सा हि सृष्टवती मृत्युं महतामपि भूभुजां ॥६५॥
अयं वराह एणोऽयमिमौ शशकतित्तिरौ ॥
ग्रीष्ममध्यन्दिनेऽप्येवं जल्पद्याति महाबलं ॥६६॥
समग्रावयवन्दृष्ट्वा नरम्प्राणिवधोद्यतं ॥
पङ्गुभ्यश्छिन्नहस्तेभ्यः कुष्ठिभ्यः स्पृहयाम्यहं ॥६७॥
अचिरांशुलतालोलविलासानित्यजीवितं ॥
न मोहजननैः शास्त्रैः कालं क्षपयितुं क्षमाः ॥६८॥
संज्ञासंज्ञिसमासानां सुप्तिङामपि चिन्तकै ॥
वैयाकरणवैतालैरायुष्यन्नीयते वृथा ॥६९॥
शशिभृङ्गलताम्भोजकामिनीमुखनिर्भ्भरं ॥
वर्णयन्तो जरां यान्ति काव्यविध्वस्तबुद्धयः ॥७०॥
निसर्गेणैव लोकस्य हृदि दीप्तः स्मरानलः ॥
कुकाव्यसर्प्पिराहुत्या मूढैरुत्तेज्यते पुनः ॥७१॥
षट्प्रमाणाष्टचेतस्को वस्तूनि प्रविवेकयन् ॥
मीमांसकपिशाचस्तु पश्येत् क्षीरेऽपि कण्टकान् ॥७२॥
वादिनो जीवमादाय प्रतिपक्षभयं यमः ॥७३॥
स्वपृष्ठरोम्णां गणनास्वपि प्रभुर्न यस्य चेतो विषयस्य गोचरं ॥
परीक्ष्यते तेन हरीश्वराद्यजमुदीरितं वस्तु किलाति मोहितं ॥७४॥
अप्राणिदेहजन्मत्वात् पवित्रं य सरानासवं ॥
गुणन्धर्म्मार्थिनां प्राश्य हेमसोमौषधादिवत् ॥७५॥
प्राणिधातुविकारत्वात् पञ्चगव्यमपावनं ॥
पुण्यार्थिनामपेयं स्याद्रक्तशुक्ररसादिवत् ॥७६॥
यस्मादशुचिनिस्यन्दस्तस्यैव क्षालनं हितं ॥
न पायुक्षालनं वातेनाङ्गारेण कुधावनं ॥७७॥
गुरुदारानिपादन्यः सहस्थेन्यस्य कर्त्तनं ॥
प्रायश्चित्तान्यपूर्व्वाणि श्रूयन्ते तव संसदि ॥७८॥
इत्थं निरूपयेत्युक्त्वा शुष्कतर्क्कावलम्बक : ॥

यद्धेयं तत्समादत्ते यदादेयं जहाति च ॥७९॥
कुशलैस्तार्क्किकैर्य्यत्नाद् वस्तून्यनुमितान्यपि ॥
अन्यथैवोपपद्यन्ते पुनः कुशलवस्तरैः ॥८०॥
दोषानपि गुणीकर्त्तुं दोषाकर्त्तुं गुणानपीः ॥
वाग्मी शक्तो न तत्सत्यं दोषा दोषा गुणा गुणाः ॥८१॥
प्राक्कर्म्मवासनोपात्तमोहादिग्रस्तचेतनः ॥
दिङ्मूढ इव दुर्बुद्धिरयथार्थमवेक्षते ॥८२॥
असम्भृतानेकगुणप्रकाशिना मनोहरेणात्तविरोधहेतुना ॥
जनो महामायजशास्त्रहेतुना विमोह्यते हेममृगेण रामवत् ॥८३॥
अतथ्यान्यपि तथ्यानि दर्शयन्त्यपि पेशलाः ॥
समे निम्नोन्नतानीव चित्रकर्म्मविदो जनाः ॥८४॥
भवाग्रं यावदागत्य शिवज्ञानेन मानवः ॥
च्यवन्ती पुनरावीर्य्या पितिवक्तविमोहितः ॥८५॥
प्रोक्तनानार्थबीजोत्थं किण्वसन्धानसम्भृतं ॥
पिबन् मोहमयं मद्यमवद्यं बहु भाषते ॥८६॥
शैववैष्णवपौराणवाक्यैर्व्विश्वविरोधितां ॥
महामायजशास्त्रेभ्यो विमोहयति मोहितः ॥८७॥
अनर्थमर्थवत्पश्दयर्थञ्चैवाप्यनर्थवत् ॥
तृषितो जलमुत्सृज्य लवणाम्बु पिपासते ॥८८॥
प्रायेण हि मनुष्याणाममार्ग्गप्रतिसारिणां ॥
अनयो नयरूपेण बुद्धिमाक्रम्य तिष्ठति ॥८९॥
प्राक्कर्म्मदुष्कृतवशात्कुपथानुरक्ताः सेवासुखं चरणयोर्न्न विदन्तिशम्भोः ॥
काष्ठाद्यनेकरसिका घुणकीटवर्ग्गा हृष्यत्सरोजमधुपानमिवातिरम्यं ॥९०॥
अन्यथाशास्त्रगर्भिण्या धिया धीरोऽर्थमीहते ॥
स्वाभिवत्प्राक्तनं कर्म्म विदधाति तदन्यथा ॥९१॥
को देशयति पन्थानमितश्चेतश्च धावतां ॥
स्वच्छन्दानाञ्च पयसां प्राक्तनानाञ्च कर्म्मणां ॥९२॥
तथास्योत्पद्यते ज्ञानन्तथास्योत्पद्यते नयः ॥
सहायास्तादृशास्तस्य यादृशी भवितव्यता ॥ ९३॥
अपि वर्षशतन्तुम्बी तरन्ती तरलार्णवे ॥
असंस्कारवती यातुमब्धिन्तदपि न क्षमा ॥९४॥
विधातुममृतज्ञानं विपरीततरस्थिते ॥

न मूढहृदये शक्यमधोमुखघटो यथा ॥९५॥
सर्व्वेषामेव भूतानां विनाशे समुपस्थिते ॥
बुद्धयः कुब्जगामिन्यो भवन्ति महतामपि ॥९६॥
सर्व्वव्यापिनमीशानं विश्वरूपमतीन्द्रियं ॥
पापासत्यादृतेकान्येस्तं परीक्षितुमर्हति ॥९७॥
ओषध्योऽपि न शक्यन्ते हेतुभिः सम्परीक्षितुं ॥
किं पुनर्द्देवदेवेशं परमात्मानमव्ययं ॥९८॥
आम्रास्थि धातकी बिल्वः कपित्थं पद्मकेशरं ॥
साङ्ग्राहिकाण्यमून्याहुः कषायत्वान्न संशयः ॥९९॥
पथ्याक्ष्यामलकी दन्ती चेतकी तषता तथा ॥
कषायत्वगुणादेव विरेचं जनयन्ति ताः ॥२००॥
किमु हेमुपिशाचोऽत्र विदधात्यनिलाधिकः ॥
हन्ति केवलमात्मानं देवद्विजपरीक्षया ॥१॥
ग्राह्यं स्वयम्भुवो वाक्यं श्रद्धया निर्व्विकल्पया ॥
तद्वाक्याद् विषसंहारं दृष्ट्वाप्यश्रद्दधानता ॥२॥
ज्वरग्रहपिशाचादिशान्तिस्तद्वचनादपि ॥
मूढत्त्वादादिदेवस्य वाक्यान्यपि परीक्षते ॥३॥
तथा च सौश्रुते शास्त्रे सर्व्वव्याधयनादिभिः ॥
स्वयन्तु विदितान् श्लोकांस्तन्वन्तदिव भाषते ॥४॥
अमीमांस्यान्यचिन्त्यानि प्रसिद्धानि स्वभावतः ॥
आगमे नोपयोज्यानि भैषज्यानि विचक्षणैः ॥५॥
प्रत्यक्षलक्षणफलाः प्रसिद्धाश्च स्वभावतः ॥
औषधीर्हेतुभिर्व्विद्वान्नपरीक्षेत कर्हिचित् ॥६॥
सहस्रैरपि हेतूनां नाभक्ष्यादि विरेचयेत् ॥
तस्मात्तिष्ठेद्धि मतिमान्नागमेन तु हेतुषु ॥७॥
मानुष्यग्रथितासु हेतुतिमिरप्रध्वस्तदृष्टिः परं
देवं शान्तमनन्तमादिपुरुषं ब्रह्मादिलोकप्रभुं ॥
प्रेतावासरतिर्भुजङ्गवलयः सोऽयं कपालाङ्कितो ॥
देवः स्याद्वदकः प्रविश्य च इति प्रद्वेप्तधोयानभाक् ॥८॥
स्वभावमस्या विज्ञाय वैश्वरूपमहेतुकं ॥
चरितं ह्यङ्गुलधियः परिच्छिन्दन्ति मोहिताः ॥९॥
यन्मूर्त्यष्टकमन्तरेण जगतः प्रत्यञ्जनं यः स्थितः
किं मायाविभुविश्वरूपरिचितं कस्माच्च हेतोरिति ॥१०॥

सृष्टिस्थित्यपकर्षकृत्सुरगणैः श्रेयोऽर्थिभिर्य्योच्यते ॥
कोऽभिप्रायमवैति तस्य महतो मानुष्यमात्रोऽल्पधीः
दैत्येभ्यो विपदं विलोक्य जगतः किं कुर्म्म तादृक् प्रभो !
तेषां किं विनयाय मूढमनसां मायावितानं खलु ॥
आहूतेन सुरेश्वरस्य महतो मानुष्यमात्रा अमी
दुर्भेदेन दिवौकसामपि कथं सञ्जानते शूलिनः ॥११॥
यद्धर्म्माज्जगतो योनिर्न वेत्ति किल सर्व्ववित् ॥
विश्वमूर्त्तिरचिन्त्यात्मा मानुष्याः किल जानते ॥१२॥
अशुभस्य शुभस्यापि विपाकः कर्म्मणः स्वयं ॥
वक्ता द्रष्टा च कर्त्ताच मूढैर्म्मूढ इति स्मृतः ॥१३॥
जननी योनिकर्म्माणि करोति मदविह्वला ॥
सूतैस्तानि विभाव्यन्ते शीलविप्रतिपत्तिषु ॥१४॥
नरकहेतुमनाः शशिशेखरं जननीतिविभुर्न्न भवेत्स किं ॥
शशधरः सुभगो मलिनायते वद किमस्य गुणः प्रपलायते ॥१५॥
त्यजत शूलिनि रूक्षनिसर्गतां व्रजत तच्चरणाम्बुजनम्रतां ॥
तमसि दीपिकया रहितो व्रजन् स्खलति वर्त्मनि किङ्किमु दीपिकः ॥१६॥
महादेवं त्यक्त्वा व्रजत यदि यूयं कुपदवीं
ममास्मिन् का पीडा नरकविपुलं किन्तु भवतां ॥
भवेदित्युक्ते मे हृदयमति दुःखान्यनुभवन्
न च द्वेषादित्थं व्यवहितमतः कारणतया ॥१७॥
मनोहार्य्यतिसंम्मोहात् स्वव्यापारापराधतः ॥
गृहपुष्टान्यपुष्टेव बद्धा पाखण्डवागुरा ॥१८॥
श्रुतिस्मृतिविरुद्धानि धर्म्माभासान्यधर्म्मिणः ॥
विपन्नचक्षुषस्तस्य भ्रान्त्यवस्तूनिवस्तुवत् ॥१९॥
जन्मान्तररतपः क्रीडायस्त्यजेदग्रजन्मतां ॥
स चेत् परमहंशः स्यात् काकेपिकतरो भवेत् ॥२०॥
धर्म्माधर्म्ममपि ज्ञानमनपेक्ष्य प्रवर्त्तते ॥
शिखासन्ध्योपवीतेभ्यः कथमस्यास्ति बन्धनं ॥२१॥
यद्यस्याप्यस्वतन्त्रः स्यादलं ज्ञानेन ते ततः ॥
आहोस्विदस्य नो बन्धस्तेषां त्यागो हि फल्गुवत् ॥२२॥
मुच्यते तैः समेतोऽपि यदि स्याज्ज्ञानवान् पुमान् ॥
अज्ञानी तु त्यजन्मोहाच्छूद्रापत्यपरो भवेत् ॥२३॥

जितेष्वसुरसद्घेषु पुरा देवासुरे युधि ॥
पाखण्डविकृताः स्पृष्टा नैषा सृष्टिः स्वयम्भुवः ॥२४॥
वृद्धश्रावक निग्रस्याः (स्थाः) शाङ्ख्यजीवककापिलाः ॥
न्यायिकावरकाश्चोक्षाः सिद्धपुत्राः ससात्वताः ॥२५॥
निवार्य्या वादिनो ह्येते विभक्ता नास्तिवादिनः ॥
ये धर्म्मन्नानुवर्त्तन्ते ते वै पाखण्डिनो जनाः ॥२६॥
तपश्चरन् स सर्व्वेषु दानवेषु महाबलान् ॥
विष्णुर्माहिश्वरीं मायामास्थाय सुरचोदितः ॥२७॥
मोहयामास मायात्मा दानवान् मायया प्रभुः ॥
तान्मूढान् बहु (द्ध) रूपेण धर्म्माभासमुवाच सः ॥२८॥
शक्या जेतुं सुराः सर्व्वे युष्माभिरिति दंशितैः ॥
बौद्धधर्म्मं समास्थाय तेन शक्या इति स्मृताः ॥२९॥
पाखण्डीयन्ति यस्माद्धि पाखण्डास्तेन हेतुना ॥
तेन ते कर्म्मणा बद्धा इह सम्यव्यवस्थिताः ॥३०॥
गच्छन्ति दानवीं योनिं जायन्ते दानवैः सह ॥
दानवेभ्यः पुनर्ज्जाता भावितास्तेन कर्म्मणा ॥३१॥
तेनात्मप्रतिपद्यन्ते वासिताः पूर्व्वकर्म्मभिः ॥
नरकः प्रेतजैर्दुःखैः सय्वानां क्लिश्यतां भृशं ॥३२॥
शिवधर्म्मादृते कश्चित्रता न भवति द्विजाः ॥
त्यागेन शिवधर्म्मस्य नरकल्केशनाशनं ॥३३॥
आहारमन्तरेणैव बुभुक्षोच्छित्तिमार्गणं ॥
विष्णुमायाग्रहोन्मादसुदूरच्युतचेतसः ॥३४॥
किमु कर्म्म न कुर्व्यन्ति किन्न जल्पन्ति साहसं ॥
किन्न दृष्टः परलोकः श्रुतो वा केन तत्वतः ॥३५॥
तदर्थे नानुभूयेह दुःखमोहपरिग्रहं ॥
खादन् पिबन् हसन् क्रीडन्न सेवेऽहं विषयान् बहून् ॥३६॥
व्रतोपवासनियमैः किं दुःखानि भजाम्यहं ॥
यावज्जीवेत् सुखं जीवेन्नास्ति मृत्योरगोचरः ॥३७॥
भस्मीभूतस्य देहस्य पुनरागमनं कुतः ॥
इत्थमाह जनस्तावदपश्यन् यमकिङ्करान् ॥३८॥
यदा पश्यति तान् काले मुखं व्यादाय रोदिति ॥
यस्तु मोहाद् विषं पीत्वा नावगच्छति मूढधी : ॥३९॥

स तस्य परिणामेन जानीते कर्म्मणः फलं ॥४०॥
कश्चिद्यदश्रेयसि चित्तवृत्तिमल्पामपि प्रेरयति प्रयत्नात् ॥
मद्यं पुरोडााशकृतोपदेशं पिबन्ति वै नाशकरं विशङ्काः ॥४१॥
बाल्ये बाल इतीह तेन कुशलाद्वृत्तमाचष्टते ।
तारुण्येतियुवेति दग्धहृदयः श्रोणीतटं सेवते ॥
आरूढेऽपि च यस्य जङ्गम इति स्याद् घस्मरं केवलं
कष्टं श्रेयसि बुद्धिरेव न भवेदेवं सदा देहिनां ॥४२॥
क्षिप्यते यूनि वृद्धेन यूनापि जरयाहतः ॥
धर्म्मः कन्दुकवद्याति क्षिप्यमाण इतस्ततः ॥४३॥
कश्चिद्युवा निधनमेत्यपरश्च बाल्ये कश्चिज्जराशिथिलचर्म्मकरङ्क शेषः ॥
गर्भाच्चकश्चिदपि पाटलमांसखण्ड इत्थंगतेषु किमुपेक्षत ईशसेव ॥४४॥
ताप्यन्तम्भवजैस्तिनार पिवति क्लेशैरमाहेश्वरं ॥
यः सोऽवश्यमुपैत्यिनर्थपदवीं धीरः कृयाम्रेडिताः ॥
हस्तेनोग्रतरङ्गतीव्ररया नद्योह्यमानं बलात्
क्रोशं विश्वरमच्छभल्लमवशं व्याक्रष्टुमिच्छन्निव ॥४५॥
भवाम्भोमूढचेतस्का भजन्ते कोटिमापद्रां ॥
वडिशोत्कर्षिता मत्स्या महागाधे ह्रदे यथा ॥४६॥
प्रदोषजं दुःखमवाप्य देहिनः कृतान्तमेकं तमसा विचेष्टिताः ॥
शनैः प्रतीक्षन्त उदाररागिणो रथाङ्गनामान इवांशुमालिनं ॥४७॥

इति शिवधर्म्मसङ्ग्रहे द्वितीयोऽध्यायः ॥२॥

अथ पशुपतिमते शिवधर्मे महाशास्त्रे शिवधर्मसङ्ग्रहे

तृतीयोऽध्यायः

ॐ नमः शिवाय

मातापितृसुहृज्जायापत्याभरणदुर्भिदे ॥
जनः शुक इवाक्षिप्तः संसारगृहपञ्जरे ॥४८॥
बहुभिस्तनुजैर्ग्गारैरावेष्टः स्नेहतन्तुभिः ॥
कोषकीट इवात्मानं नयत्यापदमात्मना ॥४९॥
मातापितृमयो बाल्ये यौवने दयितामयः ॥
पुत्रपौत्रमयः शेषे मूढो नात्ममयः क्वचित् ॥५०॥
युवत्वेऽपेक्षते बालो वृद्धत्वेऽपेक्षते युवा ॥
मृत्योरुत्सङ्गमारूढः स्थविरः किमपेक्षते ॥५१॥
तामसचेतसि पुंस्युपदेशो गच्छति काण्ड इवाश्मनि मुक्तः ॥
केवलमेव मुखश्रमभागी धर्म्मकथावचसामुपदेष्टा ॥५२॥
अघगणवनदावं पावनं श (ध) र्म्ममार्ग्गं
गिरिशगदितशास्त्रं यात्यनर्थस्यकोटिं ॥
श्रवणपथमुपेत्य भ्रष्टचित्तस्य जन्तो ॥
हरिरिदि(दि)वासमुपेतं शोधनं वक्त्ररन्ध्रं ॥५३॥
भवोदभवभयभङ्क्तुरीशस्य परमात्मनः ॥
प्रपन्नशरणं शान्तं मूर्खोमूर्खनवदीक्षते ॥५४॥
धर्म्मशीलगुणोपेतं पापमित्यवगच्छति ॥
आत्मशीलप्रमाणेन पापः सर्व्वत्रशङ्कितः ॥५५॥
महानप्यल्पतां याति निर्गुणे गुणविस्तरः ॥
आधाराधेयभावेन गजेन्द्र इव दर्प्पणे ॥५६॥
कस्यचित्कुलटापत्यमिति चालिङ्ग्यते मुखे ॥
तथापि ज्ञायते सदिम्राक्रोशात्परमात्मनां ॥५७॥
किमु मूढं मनः कृत्वा मन्यते सुखम्मासितुं ॥
व्यधयाति भवन्त्येव परेतमिव वायसाः ॥५८॥
अशेषकुशलोद्योगा रोगालीढस्य देहिनः ॥
निर्व्विकारा निवर्त्तन्ते सग्रहेन्दोः करा इव ॥५९॥
द्विपञ्चाशन्महाघोरैर्म्मृताः संसर्गसम्भवैः ॥

चतुर्भिर्म्मांससम्भूतैरष्टभिर्व्वाभिघातजै : ॥६०॥
पञ्चाशदनिलचजलजै रक्तविकारैश्च दशभिरुद्धततरैः ॥
कफजैश्च पञ्चनवकैरष्टत्रिशदि्भरद्यते पित्तसम्भवैः ॥६१॥
शस्त्रक्षारानलासह्या निरयव्यसनोपमाः ॥
गमयन्त्यातुरान् कृच्छं चिकित्सोपक्रमक्रियाः ॥६२॥
लावण्येन मनोहरेण वपुषा योऽधश्चकार स्मरं ।
कस्तस्यापदि नीयमानमवशं तीव्रव्यथैर्व्याधिभिः ॥
किञ्चिच्छ्वासपवित्रमस्थिनिवहं दृद्व तमेव क्षणात् ॥
चेतः प्रीतिपरिग्रहं वितनुते कस्यात्र सच्चेतसः ॥६३॥
इत्थं बहुविधै रोगै पीड्यमानस्य देहिनः ॥
गलत्यायुरधीरेण द्रुतं व्यसनमाव्रजेत् ॥६४॥
क्षुधार्त्तितृष्णाप्रसलोय आसीत् त्यागेन कार्प्पण्यकलङ्कबुद्धेः ॥
सोऽपि स्वधैर्य्यपरिहार्य्य कान्तङ्ग्रासं परान् मार्गयतीवभूतः ॥६५॥
गृहेऽपि यस्यापिं नरैर्न्निरुद्धे न दृक्पथं गच्छति कुट्टिमेऽपि ॥
क्षणेन तत्रैव विलोक्यमाने गृहोदरे कुट्टिममेव शेषं ॥६६॥
नक्षत्रवृन्दैरिव शीतरश्मिः समावृतो भृत्यगणैः पुरा यः ॥
छायाद्वितीयो भ्रमते क्षतश्रीः प्राप्तान्यजन्मान्तरवत्स एव ॥६७॥
मत्तद्विरेफावलिनीलगण्डमातङ्गपृष्ठेन पुरागमद्यः ॥
संसारवैषम्यवशात्स एव पादेन गोरक्ष इव प्रयाति ॥६८॥
शय्याभुजङ्गाधिपभोगशल्यां पुरा प्रियाभिः सहयोऽध्यशेते ॥
महीतले रूक्षपरागगौरैः सोऽपि स्वपित्यात्मकरोपधानः ॥६९॥
कश्चिद्भृत्यैरूपेतोव्रजति मणिशिलालोकिना स्यन्दनेन
व्याधिग्रस्तोऽपि कश्चित्पुनरपि मुदितः कश्चिदुद्दामशोकः ॥
काश्चित्कान्तावियोगाद्विधुरितहृदयो निश्वन्दीर्धमुष्णं ॥
कश्चित्क्षुत्क्षामकुक्षिर्न्निविंडयति भुजो मृत्यवेनीयतेभ्यः ॥७०॥
सम्पत्तडिदिवानित्या विपत्तिरविनश्वरी ॥
यद्यदिष्टहितन्नष्टमनिष्टं सुरभायते ॥७१॥
उद्यन्त्युपद्रवा घोरा दुर्भिक्षमारिकादयः ॥
बहून्युत्पातलिङ्गानि देहनाशकराणि तु ॥७२॥
प्रयान्ति दिवसा रम्या उपसर्प्पन्ति दारुणाः ॥
अन्यायकारिणो लोकाः पृथ्वी च गतयौवना ॥७३॥
शश्वद् व्यवस्था हीयन्ते स्वप्नवद् दृष्यते जगत् ॥

सुहृन्मित्राणि नश्यन्ति सम्प्रयोगो दुरात्मभिः ॥७४॥
येन संवर्द्धितः पित्रा बाल्यप्रभृति मानवः ॥
वीक्ष्यते बाष्परुद्धाक्षस्तिरोभावेन जीवितं ॥७५॥
यया चाब्दं धृतः कुक्षौ पीतौ यस्याः पयोधरौ ॥
कालव्याघ्रमुखं यान्तीन्ताम्मृगीमिव पश्यति ॥७६॥
ययास्यास्ताद्रिवत्पूर्व्वं मध्ये नीचांशुकं स्थितं ॥
अन्तरीक्रियते कालाल्लोके यापितयौवनः ॥७७॥
विना येन सुतेनासीन्निमेषो यस्य कल्पवत् ॥
स्वप्नद्रष्टव्यतां याति सोऽपि कालवशङ्गतः ॥७८॥
न श्वो दृश्येताद्य दृष्टोजनोऽपि यः श्वो दृश्येन्नापरे दृश्यते सः ॥
इत्थं याते यो जगत्यत्र भावं कुर्य्यात्तस्माच्चित्रमन्यत्र जाते ॥७९॥
हा मातस्तात ! हा पुत्र ! हा प्रिये ! हा सुहृज्जनाः ! ॥
मामेकाकिनमुत्सृज्य तद्वहिः क्व नु गम्यते ? ॥८०॥
भवद्वित्र्योगदावाग्निज्वालालीढशरीरकः ॥
अहमप्यनुगच्छामि प्रतिपालयत क्षणं ॥८१॥
विना भवद्भिरद्यैव वियोगतमसावृतं ॥
आत्मानमवगच्छामि अन्धकूपनिमग्नवत् ॥८२॥
ईदृग्व्यसनवज्रेण हतस्य निरपेक्षया ॥
हेशूलहृदय ! ब्रुहि कथं कस्यापि नास्ति ते ॥८३॥
संस्मृत्य यानि गदितानि पुरा भवद्भिः सौधाक्षराणि लिखितानि च वीक्ष्य भित्तौ ॥
निर्द्दह्यमानहृदयं मम यातितूर्णं छात्कृत्य शुष्कसिकतासु यथाल्पतोयं ॥८४॥
बाष्पाम्भः शिथिलायतेक्षणमुखीमत्रैव मा गा इति
प्रस्थानाभिमुखेमयि स्खलितया वाचा वदन्तीह मे ॥
संस्मृत्यैव सहस्रधा स्फूटति नो विश्रब्धमालम्बते
कष्टं वज्रकदम्बकेन घटितं धात्रा ममेदं मनः ॥८५॥
हाहेति करुणं क्रन्दन् पक्षां (त्नीं) विधुरवन्हिना ॥
स्फीतस्नेहरसैः सिक्तमन्तकेनाद्य ते जगत् ॥८६॥
शोकपङ्कनिमग्नोऽयमिति नापेक्षते जनः ॥
पद्मस्तुहिनवृष्ट्येव जरया नीयते दशां ॥८७॥
भ्रमद्भृङ्गावलीबृन्दकानि यच्चिकुराः पुरा ॥
शिरस्तदेव कालेन धत्तेऽलाबुफलश्रियं ॥८८॥
यदुत्पलचलच्चारूलोचनं श्रवणायतं ॥
पश्चादाश्यामतिमिरै रुध्यते पटलैरपि ॥८९॥

मयूखजालनिकरैर्य्यैर्ज्जिताः शशिरश्मयः ॥
त एव दशना कालाच्च्यूतशेषा रुजन्ति च ॥९०॥
कामिनीबाहुलतया यः कण्ठः परिलोलितः ॥
स एव वलिजालेन तन्यते जलदुःक्षवत् ॥९१॥
महीभृत्पीवरं रम्यं मृगाक्ष्यास्तनलालितं ॥
कालेनासुगणोऽस्थित्वं शिथिल (त्व) त्कमेव च ॥९२ ॥
करङ्कपञ्जरावस्थं तिलकोपहतच्छवि ॥
वक्षोभूकिरिटस्तुल्यं जायते जरया हते ॥९३॥
परिणाहिवृत्तसुश्लिष्टौ हेमस्तम्भानुकारिणौ ॥
मृदितोत्पलनालाभावूरू स्यातां जरार्द्दिते ॥९४॥
रक्तारविन्दसदृशौ चरणौ कान्तिमत्तमौ ॥
भवतः स्फूटितौ काला स्नायुजालतानोलणौ ॥९५॥
कथञ्चिद्यष्टिमालम्ब्य यद्युद्यातुं समीहते ॥
वीक्ष्यते किन्तु पत्तानं पटलाक्रान्तलोचनः ॥९६॥
नक्तं संकुचिताम्बुजानि सवितुर्ल्लक्ष्मीं भजन्ते पुन ॥
र्म्मार्त्तण्डः शुचिलीनरश्मिरुदयोदभूयोऽपि यश्चन्द्रमाः ॥९७॥
प्रत्यानीयत एव मज्जयति तं हालाहलं विद्यया
कष्टं यौवनमेकमेति न पुनः पुंसां प्रयत्नादपि ॥९८॥
क्षतिधरसदृशान् विजत्य मल्लानरशिरस्सु निहत्य शत्रुपक्षान् ॥
अहिमकर इवोजसा य आसीत् जरसि खिलीक्रियते स एव कालै ॥९९॥
ततः पुत्रकलत्रैश्च शश्वत्स परिभूयते ॥
कासश्वासार्द्दितो दुःखी तारुण्यं ललितं स्मरेत् ॥३००॥
एवञ्जीवन्तथापीतं मित्रैः कान्ताभिरेव च ॥
इत्येवं तप्यते तस्य मनो वार्द्धक्यपीडितं ॥१॥
सेवमानोऽपि भैषज्यं प्रवया निलयोरुजां ॥
द्वेष्टा शशिकलामौलेस्तपस्वीव भवापदां ॥२॥
बहुरोगघनान् घोरानविसह्य शरीरकान् ॥
जिघांसून् किङ्किरान् वीक्ष्य सस्वेदं वेपते भृशं ॥३॥
हस्तपादौ भयाद्दिक्षु क्षिपत्येणति मानवः ॥
विष्णुज्वरेण चाक्रान्तः प्राणम्मुञ्चति दुःखितः ॥४॥
तस्मिन् कुतः पिता माता कुतः पुत्रः कुतः प्रिया ॥
धर्म्म एको भवेद्बन्धुरधर्म्मश्च रिपुः स्वयं ॥५॥
एवं मतिमता ज्ञात्वा यत् क्षेमन्तदुपास्यतां ॥

मरणं प्रकृतिः पुंसां विकृतिर्ज्जीवितं स्मृतं ॥६॥
ज्ञात्वैवं तरसा कर्त्तुं युज्यते हितमात्मने ॥
तिर्य्यग्भावादतिक्रम्य यावन्मृत्युश्च नाप्यते ॥७॥
अत्रान्तराले यद्युक्तं सद्भिस्तत् क्रियतां द्रुतं ॥८॥
लोकाः कालं क्षमते न च खलहृदयः प्रजामिमां कालः ॥
एवं मत्वा नार्हत धर्म्मणि शिथिलादरं कर्त्तुम् ॥९॥
रम्या स्थली तृणवती कुसुमावतंसा रम्या नवा प्रणयिनी स्मरकोपबाष्पा ॥
रम्यं समागमसुखं विदुषामतीव रम्याणि तानि यदि न क्षणभङ्गुराणि ॥१०॥
मृत्युञ्जयजाप्यपरः सम्यग्यो वा मृत्योः परमं मित्रं ॥
श्वो मे भवितेति वचस्तेषां युक्तं गदितुं कथमन्येषां ॥११॥
छमछमायमानोग्रन्विताधूमाग्रधूसरे ॥
अस्थिमांसवसारुद्धे कपालशकलाकुले ॥१२॥
गृध्रध्वांक्षादिभिः कीर्णे भीषणे विस्रगन्धिभिः ॥
जम्बुचीत्कारगम्भीरै प्रेतवेतालसङ्कुले ॥१३॥
श्मशाने तं विसृज्याशु स्वगृहं यान्ति बान्धवाः ॥
अथात्र केचित् खगखवण्डितेक्षणाः करङ्कशेषा अपि शेरते शवाः ॥
विकीर्णकेशाः क्षितिरेणुधूसराः प्रभग्नजङ्घाः क्षतकुक्षयोऽपरे ॥१५॥
ये वासिता विक पुष्पकदम्बकेन भ्राम्यद्द्विरेफचयमेचककान्तिशोभाः ॥
तेऽपि प्रयान्ति वलिवातविधूयमानाः केशाः परेतवनपादपचामरत्वं ॥१६॥
यस्याः पुरा कनकतोरणमन्दिरेषु वेत्राग्रपाणिभिरलम्परिवारितेषु ॥
नो पक्षिणोऽपि निपतन्ति कुतोऽन्यपुंसस्तस्या मुखे विशति कालवशात्खगाङ्ग्रिः ॥१७॥
अग्निर्योनिविष्णुरेतो ब्रह्म पिता रुद्रमूर्तिरापः ॥३६॥
एताःसंत्स्मृत्य यो स्नाया स याति परमां गतिं ॥
नदीनदेषु यो देहं कामतो वाप्यकामतः ॥३७॥
समुत्सृज्य विशुद्धात्मा सोमलोकं स गच्छति ॥
चन्द्रकान्ति विमानेन सोमकन्याभिरावृतः ॥३८॥
सुरूपः सोमबत्सौम्यो विचरेत्स यथासुखं ॥
सोमलोकपरिभ्रष्टो जायते विपुले कुले ॥३९॥
तत्तीर्थं संस्मरेन्नित्यं मरणंचात्र कांक्षते ॥
अमरेशं प्रभासञ्चं नैमिषं पुष्करं तथा ॥४०॥
आषाढिं दिण्डमुण्डञ्च भारभूतिञ्च लाकुलिं ॥
हरिश्चन्द्रं परं गुह्यं गुह्यमध्यमकेश्वरं ॥४१॥
श्रीपर्वतं समाख्यातं जल्पेश्वरमतः परं ॥
आम्रातकेश्वरश्चैव महाकालमथापि वा ॥४२॥
केदारं पशुपं गुह्यं महाभैरबमेव च ॥
गयां भीमं कुरुक्षेत्रं नखलं कनखलन्तथा ॥४३॥
विमलञ्चाट्टहासञ्च माहेन्द्रं भीममष्टकम् ॥
छगलाण्डद्धिरण्डञ्च माकोटं मण्डलेश्वरं ॥४४॥

भद्रपदं रुद्रकोटिमविमुक्तं महालयं ॥
गोकर्णं भद्रकर्णञ्च स्वणाख्यं वैद्यनाथकं ॥४५॥
यक्षेशं देवघट्टञ्च पातालभुवनेश्वरं ॥
भागेश्वरं सोमनाथं रत्नचूडेश्वरं तथा ॥४६॥
महेशं च दिलीपेशं सहस्रेशं जलेश्वरं ॥
स्पर्शनाथं च सिद्धेशं गुप्तेशं च महाभयं ॥४७॥
सुरक्षेत्रं रुरुक्षेत्रं क्षेत्रं हारिहरं व्रजन् ॥
स्नानदर्शनपूजाभिर्मुच्यते सर्व्वकिल्विषैः ॥४८॥
गच्छन्ति भित्वा ब्रह्माण्डमेषु स्थानेषु ये मृताः ॥
पञ्चाष्टक (शैलबान्) पदं दिव्यं यदगत्वा न निवर्तते ॥४९॥
प्रलये स्थापिता दिव्याः क्षित्यनुग्रहकारिणा ॥
दर्शनादेव गच्छन्ति पदं दिव्यं महालये ॥५०॥
के परोदक्षपालाच्च गतिः पञ्चाष्टकी ध्रुवं ॥
विद्यया संयुता ये तु पिबन्ति च शुभं जलं ॥५१॥
शिवसायुज्यतां यान्ति सर्वावस्थाश्च मानवाः ॥
गुहायतनमीशस्य मुच्यते वीक्ष्य किल्विषैः ॥५२॥
प्राप्नुवन्ति गणत्वं हि ये तत्र निधनं गताः ॥
स्थानेष्वेतेषु मनुजः कुर्य्यादनशनं व्रतः ॥५३॥
अलाभेऽन्यत्र वा कुर्य्यात्स्वयंम्भूर्यत्र शङ्करः ॥

॥ देव्युबाच ॥

प्रब्रूह्यनशनस्यापि विधिं सम्यङ्महेश्वर ! ॥५४॥
किञ्चास्य फलमुद्दिष्टं तच्च कीदृक् त्वया स्मृतं ॥

॥ महेश्वर उवाच ॥

स्वपद्भ्यामेव गन्तव्यं यथोक्तविधिमिच्छता ॥५५॥
अनिवर्त्तकयोगेन सम्पूज्य स्वेष्टदेवतां ॥
द्वात्रिंशत्पिण्डमश्नीयाद्धविष्यं प्रथमेऽहनि ॥५६॥
एकैकं ह्रासयेत् पिण्डं यावन्निरशनान्तिकं ॥
पूजयेत्परमेशानं त्रिःस्नायी जपतत्परः ॥५७॥
तमेवं संस्मरेद्विद्वाँस्त्यजेत् प्राणान्यतात्मवान् ॥
न केदारसमन्तोयं नाश्वमेधसमः क्रतुः ॥५८॥
न च शैवसमं शास्त्रं न तपोऽनशनात्परं ॥
नश्यन्त्यनशनेनाशु पापानि सुतराण्यपि ॥५९॥

रविरश्मिनिपातेन हिमानीवं वरानने ! ॥
सत्यस्थोऽस्मीति यो ब्रूयात्प्राणैः कण्ठगतैरपि ॥६०॥
न तत्र यान्ति यज्वानो यत्रैत्यनशनी जनः ॥
यदन्हात् सुसमारभ्य करोत्यनशनन्नरः ॥६१॥
स्वर्गे मणिपुरन्तस्य तदन्हादेव जायते ॥
हंसविमानं सङ्गृत्य गन्धर्वाप्सरसां गणाः ॥६२॥
एकचित्ताः प्रतीक्षन्ते स्वामिनं सेवका इव ॥
दिवि सप्तसहस्राणि वर्षाण्यप्सु मृतोभवेत् ॥६३॥
दश वन्हिप्रवेशे तु पतनेषु च षोडश ॥
महाप्रस्थानयानेन सहस्राण्येकविंशतिः ॥६४॥
चतुः षष्टिसहस्राणि युधि सन्त्यक्तविग्रहः ॥
अवध्यत्वं पतत्येव जायते विपुले कुले ॥६५॥
मृतो नासकयोगेन नासो च्यवति मानवः ॥
उक्तं रहस्यमाहात्म्यं हरश्चापि निवोध मे ॥६६॥
शालग्रामे मल्लकूपे नित्यं सौकरवे हरिः ॥
मथुरायां स्थितः साक्षाच्छ्वेतद्वीपतथैव च ॥६७॥
तं दृष्ट्वा पुरुषवटे विष्णुं मुच्येतकिल्विषैः ॥
स्थानेष्वेतेषु मृतो यायात्तद्विष्णोः परमं पदं ॥६८॥
ब्रह्मस्कन्दगणेशानां लोकपालगृहेषु च ॥
उमाया मातृयक्षाणां पिशाचोरगराक्षसां ॥६९॥
ये भक्तास्तां गतिं यान्ति जपहोमर्चनादिभिः ॥
एवन्ते सर्वमाख्यातमुपवासविधिं श्रृणु ॥७०॥
मासि मासि च यः कुर्यादिकरात्रमुपोषितः ॥
पञ्चगव्यं शुचिर्भूत्वा पीत्वा मुच्येत पातकैः ॥७१॥
त्र्यहं त्र्यहं च भुञ्जीत प्रातः समय याचितं ॥
उपवासं त्र्यहं कुर्य्यात्प्राजापत्यविधिञ्चरेत् ॥७२॥
एकैकञ्च तथैवाद्यात् पिण्डं पिण्डसमं यमी ॥
अतिकृच्छ्रं भवेदेतदशेषं पापनोदनं ॥७३॥
त्र्यहं तप्तोदकं पीत्वा तप्तक्षीरं त्र्यहं पिबेत् ॥
त्र्यहं चाज्यं प्रतप्तन्तु वातादो वासरत्रयं ॥७४॥
तप्तकृच्छ्रं तदुच्येत रेतोमूत्रादिभक्षणे ॥
कथितं देवदेवेन गाढपापविशोधनं ॥७५॥

त्रि:स्नायी हरयाजी च जपन्मौनी सुयन्त्रितः ॥
ब्रह्मचारी हविर्भोजी नियमानि समाचरेत् ॥७६॥
अनेनैव विधानेन जितक्रोधो जितेन्द्रियः ॥
पराकन्तु चरेद् विद्वान् द्वादशाहमभोजनं ॥७७॥
गोमूत्रगोमयपयोदधिसर्पिषाच ॥
दर्भाम्बुना निरशनेन दिनानि सप्त ॥
पीत्वा पितृभ्य उपपादितदक्षिणान्त
मेतद् भवेत् पवनसान्तपनं शिवोक्तं ॥७८॥
एकैकं भक्षयेत् (वर्धयेत्) पिण्डं शुल्के कृष्णे च ह्रासयेत् ॥
त्रि:स्नायी मासमेकन्तु चन्द्रवृदध्याब्रतञ्चरेत् ॥६९॥
चान्द्रायणमिदं श्रेष्ठं सर्व्वपापापनोदनं ॥
पापी मुच्येत पापेन अपापी स्वर्गगो भवेत् ॥८०॥
अष्टावष्टौ समश्नीयात् पिण्डान् मध्यन्दिनेस्थिते ॥
हविष्येण समायुक्तं मुच्यते सर्वपातकैः ॥८१॥
अपापी स्वर्गमाप्नोति याति चान्द्रायणन्नरः ॥
चतुरो भक्षयेत् पिण्डान् पूर्वाह्णेच विचक्षणः ॥८२॥
सूर्यस्यास्तमने वापि चतुरो भक्षयेत् पुनः ॥
शिशुचान्द्रायणं ह्येतदुपपातकनाशनं ॥८३॥
मासेनैकेन शुद्धात्मा अपापीस्वर्गतिंव्रजेत् ॥
त्रिरात्राणि तु यः कुर्यात्सर्वकालं शुचिब्रतः ॥८४॥
शतेनैकेन पूर्णेन मुच्यते सर्वकिल्विषैः ॥
सहस्रेण महापापैर्मुच्यते नात्र संशयः ॥८५॥
अपापी स्वर्गमाप्नोति च्युतश्च धनवान् भवेत् ॥
एकान्तरोपवासन्तु द्वादशाब्दं करोति यः ॥८६॥
महतो मुच्यते पापाच्छुद्धात्मा योगमाप्नुयात् ॥
पक्षोपवासं यः कुर्याद् द्वादशाब्दं विकल्मषः ॥८७॥
प्रतिवर्षन्तु यः कुर्यान्मासैकं संयतेन्द्रियः ॥
उपवासं नरोलोके स गतिञ्चोत्तमां व्रजेत् ॥८८॥
महत्पापं विशुदध्येत धनवानपि पूजयेत् ॥
एकान्हे चैव भुञ्जाने धनवाञ्जायते नरः ॥८९॥
यावज्जीवञ्च यो भुङ्क्ते नक्तमन्नन्नरोत्तमः ॥
धनधान्यसमध्दःस्यादुत्तमोजायते नरः ॥९०॥

अयाचितन्तु भुञ्जानो यावज्जीवंब्रजेन्नरः ॥
मृते देवत्वमाप्नोति पापान्मुच्येत पातकैः ॥९१॥
मधुमांसं न भक्षेत व्रतमेतन्महत्तमं ॥
एवं यो वर्तते नित्यं सयाति परमां गतिं ॥९२॥
न विरुधो न बृक्षाग्रान्नाकाशात् पर्वतादपि ॥
मांसं भवति सुश्रोणि ! शरीरादेव जायते ॥९३॥
परमांसैः स्वमांसानि यो वर्द्धयितुमिच्छति ॥
व्यक्तोऽसौ राक्षसो ज्ञेयो मांसं तस्मान्न भक्षयेत् ॥९४॥
ब्रह्मचर्यव्रतं कष्टं यश्चरेत् स्त्रीसमन्वितः ॥
इहैव मन्त्राः सिध्द्यन्ति गतिं व्रजति चोत्तमां ॥९५॥
द्रव्यस्य विद्यमानस्य निवृत्तिं कुरुते तु यः ॥
स महत्फलमाप्नोति तच्चनान्त्यं भविष्यति ॥९६॥
मांसमत्स्यसुरासिन्धु राक्षसान्नमिदं स्मृतं ॥
तच्छाम्भवे न भोक्तव्यं गतिमिच्छेन्न्महात्मनां ॥९७॥
किन्तस्य दुर्लभंलोके रातु (अनु) तिष्ठति सुव्रतं ॥
कुरुध्वं सुव्रतं सम्यग् यदि वाञ्छेत सदगतिं ॥९८॥
पौर्णमास्याममावास्यां चतुर्दश्यष्टमीदिने ॥
संक्रान्तौ च युगादौ च विषुवेष्वयने तथा ॥९९॥
यथेप्सया च कर्तव्यं ज्येष्ठमध्यमकन्यसं ॥
रुद्रत्वञ्च गणत्वञ्च चक्रवर्त्तित्वमेव च ॥१००॥
आद्यन्तवासरे ज्येष्ठे ब्रह्मचारी निरामिषः ॥
एकाहारो जितक्रोधो मध्यनक्तं प्रकल्पयेत् ॥१॥
तथैव नक्तहीनन्तु मध्यमं समुदाहृतं ॥
आद्यन्तं व्रतहीनन् नक्तं तदपि मध्यमं ॥२॥
नक्तं विना तथैवान्नं कन्यसन्तं विदुर्बुधाः ॥
सातत्यमेवं कर्तव्यं चक्रवर्त्तित्वकांक्षिणा ॥३॥
आचार्यस्याग्रतो बन्धैः कृत्वा मण्डलकं शुभं ॥
पुष्पधूपैः समभ्यर्च्य पञ्चाङ्गेन महींस्पृशेत् ॥४॥
यद्यदाचार्यवक्त्रेण निष्क्रमत्यक्षरं स्फुटं ॥
तत्तदुच्चारयेत् स्पष्टं गृह्णीयाद् व्रतमुत्तमं ॥५॥

॥ देव्युवाच ॥

नक्षत्रदानं प्रब्रूहि हिताय जगतो विभो ! ॥

कस्मिन् कस्मिंश्च नक्षत्रे किं किन्दानं प्रशस्यते ॥६॥

॥ भगवानुवाच ॥

पायसं सर्पिषा प्लुत्य कृत्तिकासु सदक्षिणां ॥
शिवभक्ताय विप्राय दत्वा यान्त्यमरावतीं ॥७॥
माषाक्षतेन रोहिण्यां शालिभक्तं घृतान्वितं ॥
क्षीरपानन्ततः पश्चाद्देयं स्वर्गमभीप्सता ॥८॥
सवत्सां देवि ! गां दद्यान्नक्षत्रे मृगशीर्षके ॥
विहाय मानुषं लोकं याति पौरन्दरं पुरं ॥९॥
सतैलं कृशरन्दद्यान्नक्षत्रेशर्वदैवते ॥
उपोष्य नरकान्नैति क्षुरधारां सुदुस्तरां ॥१०॥
दद्यात्पुनर्वसौ धुपंब्राह्मणाय तपस्विने ॥
स्वर्गं भुक्त्वा परिभ्रष्टो जायते विपुलेकुले ॥११॥
दद्याच्चामीकरं पुष्ये मद्भक्तायाग्रजन्मने ॥
अत्यन्धकारे लोकेऽ पि भ्राजते सोंऽशुमानिव ॥१२॥
वृषमश्लेषया दद्यात्तारघटितमेव वा ॥
अरातीन्दुर्जयान् जित्वा देहपाते सुखी भवेत् ॥१३॥
वर्द्धनीस्तिलपात्राणि यो मद्यासु प्रयच्छति ॥
स्वर्गलोकपरिभ्रष्टो गोमान् भवति मानवः ॥१४॥
उपोष्य शैवविप्राय शर्करां यः प्रयच्छति ॥
फाल्गुनीषु गुडैः सार्द्धं धनसौभाग्यकांक्षया ॥१५॥
नानाव्यञ्जनसंयुक्त मुत्तरासु घृतान्वितं ॥
दद्यात् षष्टिकभक्तन्तु शुक्रलोकमवाप्नुयात् ॥१६॥
दधात् प्रदीपते प्रमिरुचरास सुलोचने ॥
अत्यदभु फलावप्तिर्मवतीति किमदभुम ॥१७॥
उपोष्य करिणं दद्याद्रथं हस्तेन भामिनि ! ॥
पिष्टकेन कृतं वापि दत्वा यात्यमरालयं ॥१८॥
रूपिणीं वृषलीन्दद्याच्चित्रायान्त्रिदशेश्वरी ! ॥
रमते नन्दनवने गन्धर्वाप्सरसावृतः ॥१९॥
यद्यदिष्टतमं द्रव्यं स्वातौ दद्यान्नरोत्तमः ॥
अक्षयान् प्राप्नुयाल्लोकान् दानस्यास्य प्रभावतः ॥२०॥
पयस्वीनीञ्च गान्दद्यादनड्वाह मथापि वा ॥
शकटं ये प्रयच्छन्ति सधान्यं वाससावृतं ॥२१॥

विशाखायां पितृदेवान् प्रीणयत्यविकल्पतः ॥
नरकेषु महादुःखं न प्राप्नोति सुलोचने ! ॥२२॥
दद्यात् प्रावरणंवस्त्रं समुपोष्यानुराधया ॥
तिष्ठेद्युगशतन्देवि ! शक्रलोके यथेप्सया ॥२३॥
ज्येष्ठायां मूलकन्दद्याद् ब्राह्मणेभ्यः सपानकं ॥
प्रीयन्ते तेन पितरो गच्छेत् स्वर्गमपि ध्रुवं ॥२४॥
दद्यान्मूलफलं मूले ब्राह्मणेभ्यः सदक्षिणां ॥
तेनापि पितरस्तृप्ताः स्वर्गन्तु प्रविशन्ति ते ॥२५॥
पूर्वाषाढासु च दधि प्रदद्यादन्नमेव च ॥
स्वर्गलोकपरिभ्रष्टो गवाढ्यकुलमाप्नुयात् ॥२६॥
घृतंचैवोदमत्थञ्च भूरिसोमधुफाणितं ॥
उत्तराषाढविसये सेवकामविवृद्धये ॥२७॥
पायसं चाभिजित्यान्तु दद्याद् घृतगुणान्वितं ॥
स धर्म्मं पुष्कलं प्राप्य नाकपृष्ठे विराजिते ॥२८॥
आविकं श्रवणे दद्यात् प्राकरं वस्त्रसंयुतं ॥
उपोष्य सद्गतिङ्गच्छेच्छ्वेतयानेन मानवः ॥२९॥
गोभिर्युक्तं धनिष्ठासु यानं विप्राय कल्पयेत् ॥
बस्त्र प्रग्रहसंयुक्तं जायते स नरेश्वरः ॥३०॥
छत्रञ्च पादुके गन्धं दद्यात्सागुरुचन्दनं ॥
दत्वा शंतभिषायोगे स्थानमप्सरसो व्रजेत् ॥३१॥
समाषमोदनं दत्वा पूर्वे प्रोष्ठपदे प्रिये ॥
सर्वभक्ष्यफलोपेतं समृतः सुखभाग्भवेत् ॥३२॥
दद्यादुत्तरयोगेन मासं दध्ना सहौदनं ॥
प्रीणन्ति पितरस्तस्य अनेनैतत्फलं भवेत् ॥३३॥
घेनुं प्रदद्याद्रेवत्यां कामदोहां सवाससीं ॥
सा प्रीणयति दातारं कामैर्बहुभिरुत्तमै : ॥३४॥
अश्विन्यामश्वसंयुक्तं रथन्दद्याद् द्विजन्मने ॥

गवां वाजिसमायुक्त तेजस्वी कुलमाप्नुयात् ॥३५॥
शिवभक्ताय विप्राय भरण्यां तिलधेनुकां ॥
कामधेनु मवाप्नोति यमलोके यशश्विनि ॥३६॥

॥ देव्युवाच ॥

कियन्त किं फलारुढं कस्मिन् पर्वणि पर्वणि ॥
दानधर्मस्य देवेश ज्ञातुमिच्छामि कृत्सनशः ॥३७॥

॥भगवानुवाच॥

शतमिन्दुक्षये दानसहस्न्तु दिनक्षये ॥
अक्षये विषुवे प्राहुर्व्यतीपाते तथैव च ॥ ३८ ॥
युगादौ कोटिदान स्याद्दशकोत्ययनर्द्वये ॥
चन्द्रग्रहेवेदविध्दि सूर्यग्प्रसे तक्षयं ॥ ३९ ॥
दशकोटिम्भवेद्दानं षडशीतिसुखेषुच ॥
निषर्णविष्णुपदयोः स्याद्द्विगायनयोरपि ॥ ४० ॥

॥ देव्युवाच ॥

येन धर्मविपाकेन नरो जातिस्मरो भवेत् ॥
एतदिच्छामि विज्ञातुं भगवन्वक्तुमर्हसि ॥ ४१ ॥

॥ भगवानुवाच ॥

क्षीरस्य पूर्णममलाम्बुजरुध्दवक्त्र ॥
मौदुम्बरं सकनकं कलशं यतात्मा ॥
प्रीतोऽस्तु सोमतनुरीश इतिब्रुवाण
उद्यत्यनुष्णरुचिकार्तिक पौर्णिमास्यां ॥४२॥
सन्तर्पिताय विप्राय दत्वा जातिस्मरो भवेत् ॥
अथ स्नानविधिं पुण्यं प्रवक्ष्याम्यनुपूर्वः ॥४३॥
यत्कृत्वा देवि! पापेभ्यो मुच्यते तत्क्षाणादपि ॥
नदीं प्राक्ल्पवनीङ्गत्वा यः करोत्यभिषेचनं ॥४४॥
दक्षिणावर्त्तशंखेन ,तिलाक्षतयुतेन च ॥
प्रविश्य नाभिमात्राम्बु प्राङ्मुखः शुचिमानसः ॥४५॥

शिवं संस्मृत्य मतिमान् स पापैः परिमुच्यते ॥
अलाभे दक्षिणावर्त्तशंखस्य श्रृणु भामिनि ॥४६॥
पूर्वोक्तविधिमास्थाय शुक्लवास शिवं स्मरेत् ॥
निश्छिद्राम्भोजपत्रेण कर्तव्यमभिषेचनं ॥४७॥
पुष्परत्नाम्बु पूर्णेषु सोऽपि निर्म्मलतां ब्रजेत् ॥
स्नात्वा तीर्थमपापः स्याद् गोपुच्छो धृतवारिण ॥४८॥
प्रस्रवेण च रोहिण्या : श्रध्दया परयान्वित : ॥
योधत्ते स्तनतो धारां क्षीरस्य शिरसा नरः ॥४९॥
शिवञ्च सुरभिञ्चैव स्मरन् पापै : प्रमुच्यते ॥
एवं यः कुरुते स्नानमिहैव धनवान् भवेत् ॥५०॥
नश्यन्त्युपद्रवाः सर्वे परतः स्वर्गमाप्नुयात् ॥५१॥
इति शिव धर्म संग्रहे सप्तमोध्याय :

अथ पशुपतिमते शिवधर्मे महाशास्त्रे शिवधर्मसङ्ग्रहे

अष्टमोऽध्यायः

ॐ नमः शिवाय

॥देव्युवाच ॥

कतरन्देवमाश्रित्य उपवासफलं महत् ॥
कथं वा पूजनीयास्ते ब्रवीहि परमेश्वर! ॥५२॥

॥ भवावानुवाच ॥

प्रतिपत्सोपवासीतु ब्राह्मणम्भोजयेन्नर :॥
ब्रह्मणेनम इत्येषमुभयोरपि पक्षयो : ॥५३॥
गन्धधूपैश्च पुष्पैश्च भक्ष्यभोज्यसमन्वितः ॥
अब्दमेकं समभ्यर्च्य क्रतूनां फलमाप्नुयात् ॥५४॥
अश्वमेधं राजसूयं सौवर्णञ्च गवामयं ॥
सप्तभिः सोमसंस्थैश्च नरमेधसमन्वितैः ॥५५॥
व्रह्मा स्वयम्भूर्विरीञ्चः पद्मयोनिः प्रजापतिः ॥
गीर्वाणः पद्मभूतश्च ओमित्येकाक्षरः प्रभुः ॥५६॥
चतुर्वेदधरः स्रष्टा परमेष्ठी चंतुर्मुखः ॥
संज्ञाभिः पूजयेदेभिब्रह्मणममितं द्युति ॥५७॥
संवत्सरेण युक्तात्मा स्वर्गलोके महीयते ॥
यावज्जीवन्तु कुर्वाणो ब्रह्यलोके महीयते ॥५८॥
द्वितीये पूजयेदग्निमाज्येनैव तु तर्पयेत् ॥
वैश्वानरो जातवेदा हुत भुग्घव्यवाहनः ॥५९॥
देववक्त्रः सर्वभक्षो घृणी च जगद्दाहक : ॥
विभावसुः सप्तजिह्व वरनामेतिकीर्तनं ॥६०॥
प्रतिमासं समभ्यर्च्य पक्षयोरुभयोरपि ॥
वर्षेणैकेन शुद्धात्मा स गच्छेदग्निलोकतां ॥६१॥
तृतीयं पूजयेद्यक्षाङ्गन्धधूपैर्निवेदनैः ॥
उभाभ्यामपि पक्षाभ्यां यावदब्दं भवेदिह ॥६२॥
धनं दास्यन्ति पक्षाभिर्धनदाद्याः सुपूजिताः ॥
यावज्जीवन्तु कुर्वाणो धनदस्य पदं व्रजेत् ॥६३॥
धनदो यक्षराजश्च वित्तेशो निधिपालकः ॥

राक्षसाधिपतिश्चैव पिङ्गलाक्षो विमानगः ॥६४॥
रूद्रसखः कुवेरश्च पौलस्त्यः कुलनन्दनः ॥
लोकपालेश्वरश्चैव यक्षेन्द्रः परिकीर्तितः ॥६५॥
अब्दन्तु पूजयेद्यस्तु यावज्जीबं स यक्षराट् ॥
गणेशं पूजयेद्यस्तु गन्धपुष्पसमन्वितः ॥६६॥
भक्ष्यभोज्यसमाकीर्णं चतुर्थ्योभयपक्षयोः ॥
अब्दैनैकेन शुद्धात्मा स याति गणमन्दिरं ॥६७॥
विघ्नैश्च नाभिभूयेत योऽर्चयेगद्णनायकं ॥
विघ्नेश्वरं गणपतिमेकदन्तङ्गजाननं ॥६८॥
गजकर्णन्तथा <यक्षं नागयज्ञोपवीतिनं ॥
चतुभुजश्च धुम्राक्षं बकतुण्डं विनायकं ॥६९॥
महोदरश्च संज्ञाभिः साधकः संयतेन्द्रिय ः॥
मोदकैन्र्लड्कैश्चैव मूलकैश्चापि शोभनैः ॥७०॥
न तस्य दुर्ल्लभं किञ्चित्पूजयेद्योगणाधिपं ॥
पञ्चम्यां पूजयेन्नागान् पुष्पैः सुरभिशोभनैः ॥७१॥
धूपैः सुरभिगन्धैश्च गुडक्षीरैःसपायसै ः॥
शर्करामधुपूपैश्च पक्षयोरुभयोरपि ॥७२॥
संवत्सरेण कामानिलभते कांक्षितानि तु ॥
यावज्जीवं समभ्यर्च्य नागलोकमवाप्नुयात् ॥७३॥
स्कन्दं षष्ठ्यान्तु सम्पूज्य उपवास समन्वितः ॥
गन्धधूपेषु धूपेन भक्ष्यभोज्येन संयुतं ॥७४॥
उभाभ्यामपि पक्षाभ्यां पूजयित्वा समाहितः ॥
स्कन्दो विशाखः कौञ्चारिरुमानन्दाग्निगर्भजः ॥७५॥
नैगमेशो महासेनस्त्रिवर्णः कृत्तिकासुतः ॥
पञ्चशिखाकुमारश्च देवसेनापति गुहः ॥७६॥
षण्मुखः शक्तिहस्तश्च मयूरवरवाहनः ॥
नामभिः पूजयेदेभिः संयतो मार्गशीर्षतः ॥७७॥
सर्वकाममवाप्नति वर्षेणैकेन मानवः ॥
जुदृयाघस्तु पक्षयोरुमयोरपि यावज्जीवं समभ्यर्च्य ॥
स्कन्दाग्निं समभ्यर्चय स्कन्दसायुज्यतां व्रजेत् ॥७८॥
सप्तयां मार्गशीर्षादौ भास्करं पूजयेच्छुचिः ॥
उपवासेन युक्तात्मा पुष्पधूपविलेपनैः ॥७९॥

भक्ष्यभोज्यैश्चविविधैस्तथा होमजपादिभिः ॥
संवत्सरेण युक्तात्म निर्मलाः काममाप्नुयात् ॥८०॥
सूर्यलोकं व्रजत्याशु यावज्जीवं प्रपूजनात् ॥
च्युता धनादया जायन्ते निरुजादीर्घजीविनः ॥८१॥
आदित्यः सविता सूर्यः खगः पूषा गभस्तिमान् ॥
हिरण्यगर्भस्त्रिशिखस्तपनो भास्करो रविः ॥८२॥
लोकसाक्षी जगन्नेत्रं नामभिस्त्वेभिरर्चयेत् ॥
सर्वकाममवाप्नोति पूजयेद्यो दिवाकरं ॥८३॥
अष्टम्यां मार्गशीर्षस्य शिवनामानमर्चयेत् ॥
उपवासेन युक्तात्मा गोमूत्रप्राशनेन च ॥८४॥
अतिरात्रफलन्तस्य पक्षरोरुभयोरपि ॥
भक्ष्यभोज्यान्न पानाद्यैरेतत्पलम्मवाप्नुयात् ॥८५॥
देवदेवं समभ्यर्च्च्य मासे पौषे हयुपोषितः ॥
वाजपेयमवाप्नति गोशकृत्प्राशनेन तु ॥८६॥
त्र्यम्बकं पूजयित्वा तु माघेकृष्णे ह्युपोषितः ॥
स्थाणुं फाल्गुन मासेतु पूजयेदुपवासतः ॥८७॥
दधिप्राश्य विशुद्धात्मानृमेघपुल माप्नुयात् ॥८८॥
हरञ्चैत्रेतु सम्पूज्य कृष्णाष्टम्यामुपोषितः ॥
आज्यं प्राइय शुचिर्भूत्वा राजसूय मछाप्नुयात् ॥
बैशाखे शङ्करं पूज्य उपवासी कुशोदकं ॥८९॥
प्राशयित्वा जितक्रोधः सौत्रामणिमवाप्नुयात् ॥
शिवं ज्येष्ठे तु सम्पूज्य सोपवासी शुचिव्रतः ॥९०॥
प्राश्य श्रृङ्गोदकं यस्तु सर्वयज्ञफलं लभेत् ॥
आषादे नीलकण्ठन्तु कृष्णाष्टम्यामुपोषितः ॥९१॥
शंखस्यापस्ततः पीत्वागोसहस्रफलं लभेत् ॥
पिङ्गाक्षं श्रावणे पूज्य कृष्णाष्टम्यामुपोषितः ॥९२॥
सिद्धार्थमुदकं पीत्वा कन्यादानफलं लभेत् ॥
मासे भाद्रपदे रुद्रं पूजयित्वा ह्युपोषितः ॥९३॥
यवोदकं प्राशयित्वा रुद्रलोके महीयते ॥
ईशानं चाश्विने मासे कृष्णाष्टम्यां समर्च्चयेत् ॥९४॥
तिलोदकं प्राशयित्वा बहुसौवर्णिकं फलं ॥
उग्रन्तु कार्तिके मासे कृष्णाष्टम्यमामुपोषितः ॥९५॥

सौवर्णमुदकं पीत्वा गाणपत्यमवाप्नुयात् ॥
संवत्सरन्तः कृत्वा इष्टान् कामांल्लभेत सः ॥९६॥
भवेत् क्रतुफलं कामाग्दाणपत्यमकामतः ॥
उभाभ्यामपि पक्षाभ्यां विधिरेषः प्रकीर्तितः ॥९७॥
नवम्यां सम्प्रवक्ष्यामिः महादेव्याः प्रपूजनं ॥
उपवासेन संयुक्तः पूजयेन्नामभिः शुभै ॥९८॥
उमा कात्यायनी देवी दुर्गारुद्रा सुभद्रिका ॥
कालरात्री महागौरी दैवती भूतनायिका ॥९९॥
आर्या प्रकतिरूपाच गणानाञ्चैव नायिका ॥
नामभिः पूजयेदेभिः पक्षयोरुभयोरपि ॥१०००॥
पुष्पैर्घूपैश्च गन्धैश्च वस्त्रालङ्कारभूषणै : ॥
नैवेद्यैश्चोपहारैश्च कन्दमूलफलैस्तथा ॥ १ ॥
प्राशनैश्च विचिंत्रैश्च वरदाम्पूजयेत्सदा ॥
उदकं कुशुमं प्राश्य सकुलाजं सधानकं ॥ २ ॥
कृशराश्च पयोमूलं फलं पर्णन्तथैव च ॥
शाकानि च फलश्चैव तिलानाञ्च खलिन्ततः॥ ३ ॥
मुद्गानपि समश्नीयात्तथा चैव निरश्नता ॥
प्राशयित्वा तथैतानि सर्वान् कामानवाप्नुयात् ॥ ४ ॥
आर्द्रकं प्राशयित्वातु शुक्लभोजी तथा पुनः ॥
लभते सर्वकामास्तु नवमी समुपोषितः ॥ ५ ॥
मचिरं प्राशनं कृत्वा नवमीं न तु योऽर्चयेत् ॥
सर्वकामानवाप्नोति देवी च वरदा भवेत् ॥ ६ ॥
कुशप्रस्तरशायी च पञ्चगव्यकृताशनः॥
नवमी नवसम्पूज्य देवी दद्याद्वरोत्तमं ॥ ७ ॥
यमन्दशम्यां सम्पूज्य मासे वै मार्गशीर्षके ॥
पुष्पैर्गन्धैश्च सम्पूज्य भक्ष्य भोज्यसमन्वितः ॥ ८ ॥
यमाय धर्मराजाय मृत्यवे चान्तकाय च ॥
वैवस्वताय कालाय सर्वलोक क्षयाय च ॥ ९ ॥
उग्रदण्डोग्रहस्ताय महिषासनगामिने ॥
शासित्रे च नमस्तुभ्यं नरकाधिपतये नमः ॥ १० ॥
नामभिः पूजयेदेभिस्तर्पयेच्च तिलोदकै : ॥
उभाभ्यामपि पक्षाभ्यामब्दमेकं सुयन्त्रित : ॥ ११ ॥

ुच्यते सर्वपापैश्च न दुःखं नरके भवेत् ॥
यावज्जीवार्चनं कृत्वा स गच्छेत् पर माङ्गतिं ॥ १२ ॥
एकादश्यान्तु यो धर्म्मं पूजयेच्च शुचिव्रत : ॥
गन्धैर्धूपैश्च पुष्पैश्च भक्ष्यैर्न्नानाविधैस्तथा ॥ १३ ॥
धर्म्मं सत्यं दया क्षान्तिः शौचमाहारमेव च ॥
अहिंसा चाप्यदम्भश्च रक्षालोकश्च सक्षिणे ॥ १४ ॥
वृषभाय नमस्तुभ्यमदृष्टाय नमो नमः ॥
नामभिः पूजयेदेभिर्धर्मं सत्यं पराक्रमं ॥ १५ ॥
उभयोः पक्षयोश्चैव वर्षमेकं सुयन्त्रितः ॥
याम्यदुःखैर्विमुक्तस्तु जायते पृथिवीश्वरः ॥ १६ ॥
यावज्जीवं समभ्यर्च्य तर्पयेच्चतिलोदकै : ॥
उत्तमां गतिमाप्नोति याङ्गत्वा न निवर्तते ॥ १७ ॥
केशवं पूजयित्वा च मार्गशीर्षे नरोत्तमः ॥
द्वादश्यां प्राश्य गोमूत्रमग्निष्टोमफलं लभेत ॥१८॥
पौषे नारायणं पूज्य द्वादश्यां समुपोषित : ॥
ज्योतिष्टोमफलन्तस्य कृत्वा गोमयभक्षणं ॥१९॥
माधवं माघमासे तु द्वादश्यां समुपोषितः ॥
पूजयित्वा पयः प्राश्य अश्वमेधफलं लभेत ॥२०॥
फाल्गुनेमासि गोविन्दं द्वादश्यां समुपोषितः ॥
षोडशी फलमाप्नोति कृत्वा तु दधिभक्षणं ॥२१॥
चैत्रे विष्णुं समभ्यर्च्य द्वादश्यां समुपोषितः ॥
आज्यं वै प्राशयित्वा तु वाजपेय फलं लभेत् ॥२२॥
उपोषितस्तु वैशाखे पूजयेन्मधुसूदनं ॥
द्वादश्यां प्राश्य दर्भोदमतिरात्रफलं भवेत् ॥२३॥
ज्येष्ठे त्रिविक्रमं पूज्यः द्वादश्यां समुपोषितः ॥
तिलोदकं प्राशयित्वा आप्तोर्योमफलं लभेत् ॥२४॥
आषाढे वामनं पूज्यं द्वादश्यां समुपोषितः ॥
फलं प्राश्य विशुध्दात्मा अश्वमेधफलं लभेत् ॥२५॥
श्रावणे श्रीधरं पूज्य द्वादश्यां समुपोषितः ॥
पर्णं प्राश्य विशुध्दात्मा राजसूय फलं लभेत् ॥२६॥
तथा भाद्रे हृषीकेशं समूपूज्य विधिवद् वुधः ॥
गवामयस्य यज्ञस्य ततः फलमवाप्नुयात् ॥२७॥

मासे चाश्वयुजे देवं पद्मनाभन्तु पूजयेत् ॥
नरमेधस्य यज्ञस्य फलं भवति मानवः ॥२८॥
दामोदरन्तु संपूज्य कार्तिके मासि यो नरः ॥
उपोषितस्तुद्वादश्यां बहुसौवर्णिकं फलं ॥२९॥
सुयाजी क्रतु माप्नोती पापात्मा मुच्यतेंहसा ॥
संवत्सरन्तु सम्पूज्य सर्वकामवाप्नुयात् ॥ ३० ॥
याजीवं समभ्यर्च्च्य पुष्पैर्गन्धैः सुगन्धकै : ॥
भक्ष्यभोज्यैश्च धूपैश्च छत्र ध्वजवितानकै : ॥३१॥
हेमजैर्भूषणैर्दिव्यैर्मणिरत्न विचित्रकै : ॥
वस्त्रपूजाविचित्रैश्च कृत्वा विष्णुपदं व्रजेत् ॥३२॥
अनङ्गश्च त्रयोदश्यां पूजयेद्यो विधानवित् ॥
भक्ष्यभोज्यान्नपानैष्नैश्च गन्ध धूपस्रगादिभिः ॥३३॥
अनङ्गं मन्मथं काममीशारिम्मोहनन्तथा ॥
पञ्चबाणधनुर्हस्त उन्मादश्च वशंकरं ॥३४॥
रतिप्रियं प्रीतिकरं हृयदयं पापहारिणं ॥
नामभिः पूजयेदेभि : कामदेवं महाबलं ॥३५॥
मासे मार्गशिरस्यादौ यावत्कार्त्तिकमेव च ॥
सौभाग्यधन धान्यं च पुत्रदार भवन्ति त ॥३६॥
कामदेवस्य सायोज्यं यावज्जीवस्य पूजनात् ॥
चतुर्दश्यां पुत्तर्देवं पूजयेत्परमेश्वरं ॥३७॥
हरं शर्वं भवं त्र्यक्षं शम्भुं चैव रिभुं शिवं ॥
स्थाणुं चाप्यथ रुद्रञ्जं च ईशानं शङ्करन्तथा ॥३८॥
संज्ञाभिः पूजयेदेभिर्देवदेवं वृषध्वजं ॥
मार्गशीर्षात्त्समारभ्य यावदब्दंव्रतञ्चरेत् ॥३९॥
पुष्पैर्धूपैश्च गन्धैश्च भक्ष्यभोज्यैः सुशोभनैः ॥
अलङ्कारैश्च विविधैश्छत्र ध्वजवितानकैः ॥४०॥
उभयोः पक्षयोश्चैव सर्वकामनवाप्नुयात् ॥
संवत्सरेण युक्तात्मा निष्कामस्तु गणो भवेत् ॥४१॥
यावज्जीवेन सायोज्यं पापी मुच्येत किल्विषैः ॥
अमावास्यां पितृणान्तु मासे वै मार्गशीर्षके ॥४२॥
कर्मणा श्राध्दयुक्तेन पिण्डेन च तिलोदकैः ॥
उद्दिश्य पितंर यस्तु विप्रान श्राध्दे निमन्त्रयेत् ॥४३॥

आहिताग्नी न धीयानासुवृत्तान सुपथे स्थितान् ॥
हीनाङ्गानतिरिक्ताङ्गाँश्चक्षुर्हीनाँश्च वर्जयेत् ॥४४॥
विप्रान् श्रेष्ठतमान् श्राध्देसर्वरोगविवर्जितान् ॥
आसने कुतपास्तीर्णे नियुञ्जीतोत्तरामुखं ॥४५॥
भूमौ दर्भोत्तरीयायां त्रीन् पिण्डान् वि! निर्वदेत् ॥
प्रथमं पितरं मन्ये द्वितीयञ्च पितामहं ॥४६॥
तृतीयञ्चैव मन्तव्य एष मे प्रपितामहः ॥
एवं सम्भावयित्वा तु यस्तु भोजयते द्विजान् ॥४७॥
भोजनं खङ्गमांसेन पायसं मधु सर्पिषा ॥
सुवणं दक्षिणान्दद्यादमावास्यान्तिलोदकं ॥४८॥
पिण्डनिर्वपणश्चैव कर्तव्यं दर्भसंस्तरे ॥
हुत्वाग्निं सर्पिषा तत्र येन मन्त्रेण तच्छृणु ॥४९॥
ॐ अग्नये कव्यवाहनाय स्वधायाङ्गिरसे नमः॥
ॐ सोमाय पितृपतये स्वधायाङ्गिरसे नमः ॥५०॥
ॐ यमायाग्निरोचिषे स्वधायाङ्गिरसे नमः ॥
अनेन विधिना पूर्वं हुत्वा सम्यक हुताशनं ॥५१॥
पिण्डनिर्वापणं कुर्यादपसव्येन पाणिना ॥
प्रथमं निर्वपेत् पिण्डमुद्दिश्य पितरं नरः ॥५२॥
पितामहं समुद्दिश्य निर्वपेच्च द्वितीयकं ॥
तृतीयं निर्वपेत् पिण्डमुद्दिश्य प्रपितामहं ॥५३॥
तिलोदकेन तान्सिञ्च्चेत् प्रणम्य शिरसा क्षितौ ॥
अनेन विधिना दत्वा स्पृत्वा वामेन दक्षिणं ॥५४॥
श्राध्देन पितरस्तेन यावदासप्तमं कुलं ॥
उध्दृत्य नरकाद्देवि! स्वयं स्वर्गे महीयते ॥५५॥
येषां पुत्रा दुराचाराः पितृदेवविवर्ज्जिताः ॥
न च तीर्थानि सेवन्ते ते नराः पापकर्म्मिणः ॥५६॥
ते मृतानरकं यान्ति दुःखानि प्राप्नुवन्ति च ॥
नरके पच्च्यमानानां त्राता तेषां न विद्यते ॥५७॥
पापकर्मक्षयो येषां विमोक्षो नरकाद्भवेत् ॥
पितरः सोमपा विप्रे क्षत्रिये तु हविर्भूजः ॥५८॥
आज्यपा वैश्ययोन्यै तु शूद्राणान्तु सुकालिनः ॥
यावज्जीवन्तु कुर्वाणः पक्षयोरुभयोरपि ॥५९॥

पापात्मा मुच्यते पापैरपापी स्वर्गमाप्नुयात् ॥
वसवः पितरश्चैव रुद्राश्चैव पितामहाः ॥६०॥
प्रपितामहास्तथादित्या एवं सञ्चिन्त्य पूजयेत् ॥
पौर्णमास्यां दधि प्राश्यं यावकं ताम्रभाजने ॥६१॥
सङ्गृह्येदगच्छते दद्याद् भक्त्या चन्द्रमसेनरः ॥
तेन दानेन भगवान् प्रीयते मृगलाञ्छनः ॥६२॥
प्रीयन्ते च सुराः सर्वे सोमस्यैति सलोकतां ॥
शीतङ्गवे नमस्तुभ्यं महादेवस्य मूर्तये ॥६३॥
इमं बलिं गृहाण त्वं मामप्यनुगृहाण च ॥
प्रतिपदि भोजयेद् विप्रान् पूजयित्वा प्रजापतिं ॥६४॥
सौवर्णमरविन्दस्तु कुर्यान्नामाङ्कितन्तथा ॥
ताम्रपात्रे घृतापूर्णे क्षिप्तादद्याद् द्विजन्मने ॥६५॥
इप्सितांल्लभते कामान्निकामो ब्रह्मलोकतां ॥
सम्पूज्याग्निं द्वितीयायां ब्राह्मणांस्तर्पयेत्पुनः ॥६६॥
तानि नामानि सौवर्णे वन्हे रालिख्य यत्नतः ॥
ताम्रिके सर्पिषा पूर्णे भाजने प्रक्षिपेत च ॥६७॥
तोयपूर्णे घृते स्थाप्य भक्ष्यभोज्यसमन्वितः ॥
उभाभ्यामपि पक्षाभ्यां दद्याद् विप्राय शोभने ॥६८॥
सर्वकामप्रदोबन्हिरब्दैकेन भविष्यति ॥
यावज्जीवकृतेनैव प्रयात्यमरमन्दिरं ॥६९॥
सम्पूज्यैलविलन्तस्य नामाङ्काङ्काञ्चनीङ्गदां ॥
क्षिप्त्वा दद्यात् तृतीयायां सघृते ताम्रभाजने ॥७०॥
चतुर्थ्यां रदनन्दद्यादेध्मन्नामाङ्कितं शुभं ॥
विघ्नेश्वारस्य देवस्य ताम्रपात्रे घृतान्विते ॥७१॥
विप्रञ्च भोजितं कृत्वादद्याद्भक्त्या घृतानपि ॥
संवत्सरेण सिध्दिः स्याद्यावज्जीवं गणेशतां ॥७२॥
पञ्चम्यां हेमजं सपँ दद्याद् विप्राय भोजिते ॥
घृतप्लुतन्तु तामाङ्क ताम्रभाजनसंस्थितं ॥७३॥
अनन्तं वासुकिं वापि तक्षकं वा त्रिरेखिनं ॥
पद्मं. महाकुलं शंखं कुलिकञ्च महोरगं ॥७४॥
सम्पूज्य च श तवापि गन्धपुष्पस्रगादिभिः ॥
भक्ष्यभोज्यान्नपानैश्च कामदर्पापहारिणं ॥७५॥

मयुरं हेमजं कृत्वा स्कन्दनामाङ्कितं शुभं ॥
षष्ठ्यान्दद्याच्च विप्राय ताम्रपात्रे घृतान्विते ॥७६॥
तोयपूर्णांश्च कलशान् भक्षभ्योज्यसमन्वितान् ॥
दत्वा कामानवाप्नोति पक्षयोरुभयोरपि ॥७७॥
संवत्सरेणकामांस्तु चिन्तितांल्लभते नरः ॥
पापी मुच्येत पापेन शुद्धात्मा स्कन्दमाप्नुयात् ॥७८॥
अश्वं हेममयं दद्याद्रवेर्नामाङ्कितं बुधः ॥
पक्षयोरुभयोश्चैव सघृते ताम्रभाजने ॥७९॥
वर्षेणैकेन शुद्धात्मा मुच्यते सर्व्वकिल्विषैः ॥
यावज्जीवकृतेनैव आदित्यपदमाप्नुयात् ॥८०॥
अष्टम्यां भव नामाङ्कं वृषन्दद्याद्द्विजन्मने ॥
उभाभ्यामपि पक्षाभ्यां सघृते ताम्रभाजने ॥८१॥
कलशैर्भक्ष्यसंयुक्तैः पयसा चसुपूरि तैः ॥
संवत्सरेण शुद्धात्मा प्राप्नुयादीप्सितंफलं ॥८२॥
यावज्जीवेन गणतां योऽ र्चयेन्नामभिर्हरं ॥
पूर्वोक्तविधिना सिंहं देव्या नामाङ्कितं शुभं ॥८३॥
दत्वा नवम्यां विप्राय स याति परमाङ्गतिं ॥
यमनामाङ्कितं हेमं महिषं ताम्रभाजने ॥८४॥
आज्यपूर्णं विनिक्षिप्य पयाघृतसमन्वितं ॥
दत्वा दशम्यां विप्राय भोजिताय तपस्विने ॥८५॥
याम्यदुःखैः प्रमुच्यन्ते महापातकिनोऽपि ये ॥
संवत्सरेण मुक्तात्मा जीवान्ते गतिमुत्तमां ॥८६॥
एकादश्यान्तु धर्मस्य वृषं दद्याद् द्विजन्मने ॥
नाम्नाङ्कं सघृतं न्यस्य ताम्रपात्रे घृतान्विते ॥८७॥
स धर्म्मगतिमाप्नोति शुद्धः संवत्सरेण तु ॥
कामी च लभते कामं निःकामी धर्मलोकतां ॥८८॥
द्वादश्याङ्गरुडन्दद्यान्नानाभक्षसमन्वितं ॥
पूर्वोक्तेन विधानेन पयोघृतसंमन्वितं ॥८९॥
विष्णुर्नाम समुच्चार्य पक्षयोरुभयोरपि ॥
संवत्सरेण शुद्धात्मा विपापः क्रतुमाप्नुयात् ॥९०॥
यावज्जीवन्तु सम्पूज्य भोजनैश्च सदक्षिणैः ॥
विष्णुलोकमवाप्नोति विष्णुना सहमोदते ॥९१॥

सौवर्णन्धनुषन्दत्वा पञ्चवाणसमन्वितं ॥
कामदेवं समभ्यर्च्च्य सघृते ताम्र भाजने ॥९२॥
भक्षाम्बुपूर्णं घटकं त्रिप्रान्सम्भोज्य चार्चयेत् ॥
सौभाग्यं धनधान्यञ्च विपाप्मालभते ध्रुवं ॥९३॥
यावज्जीवञ्च सम्पूज्य कामदेव पुरं व्रजेत् ॥
चतुर्दश्यां वृषंदद्यात्सम्पूज्य परमेश्वरं ॥९४॥
तस्य नामाङ्कितं कृत्वा ताम्र भाजनसंस्थितं ॥
प्रदद्याद् विप्रमुख्येभ्यो भोजयित्वा यथाविधि ॥९५॥
उभाभ्यामपि पक्षाभ्यां घटान् भक्ष्याम्बुपूरितान् ॥
अष्दात्पापविशुद्धिः स्याद् द्वादशाब्दैर्गणेश्वरः ॥९६॥
यावज्जीवकृतेनैव सायुज्यन्तु महेश्वरे ॥
पौर्णमास्याममावास्यां पक्षयोरुभयोरपि ॥९७॥
श्राध्दपिण्डासुदानेन पितृन्सन्तर्पयेन्नरः ॥
सौवर्णपुंरुषं कृत्वा पितृनामाङ्कितं बुधः ॥९८॥
प्रदद्याद् विप्रमुख्येभ्यस्ताम्रस्थन्तु घटप्लुतं ॥
भक्षाम्बुपूर्णघटकं कृत्वा चैव विकल्मषः ॥९९॥
अब्देनैकेन युक्तात्मा विपापी काममीप्सितं ॥
यावज्जीवकृतेनैव भोजनैश्च सदक्षिणैः ॥११००॥
पितृणां पदमाप्नोति भ्रष्टो भवति चोत्तमः ॥
धनधान्यसमृध्दन्तु बहुपुत्रः प्रजायते ॥१॥
देवानां पूजयेद्धेष विधिरुक्तो मयानघाः ॥
देव्या शङ्करसंवाद तन्मया परिकीर्तितं ॥२॥
इति शिव धर्मसङ्ग्रहेऽ ष्टमोऽ ध्यायः ॥८॥

वेदाः

अथ पशुपतिमते शिवधर्मे महाशास्त्रे शिवधर्मसङ्ग्रहे नवमोऽध्यायः

ॐ नमः शिवाय

॥ देव्युवाच ॥

वेदधर्मः कथन्देव ! कर्तव्योविधिमिच्छता ॥
स्वर्गापवर्गहेतोश्च प्रसादाद् बक्तुमर्हसि ॥३॥

॥ ईश्वर उवाच ॥

मेखली दण्डधारी च सन्ध्योपासनतत्परः ॥
स्वाध्यायी होमजापीं च भिक्षाशीत्यक्तमैथुनः ॥४॥
मधुमांसनिवृत्तश्च अक्षारलवणानि च ॥
वृक्षारोहणमेकान्तां ताम्बूलञ्च न भक्षयेत् ॥५॥
वर्जयेत्प्रेक्षणं कोपमघृष्टा स्नानमाचरेत् ॥६॥
स्त्रीप्रेक्षणं न कुर्कीत माल्यधूपञ्च वर्जयेत् ॥
वर्जयदञ्जनं गन्धं तथा विषमलङ्घनं ॥
षडिवंशदब्दिकां चर्यां गुरोस्त्रैवेदिकं व्रतं ॥७॥
तदर्द्धिकं पादिकं वा ग्रहणान्तिकमेव वा ॥
व्रह्मचारिव्रतं ह्येतदुक्तमेव मया पुरा ॥८॥
विप्लुता नरकं यान्ति आचारात्स्वर्गतिं व्रजेत् ॥
कृतदारोगृहे यस्तु यजेद्यज्ञं सदक्षिणं ॥९॥
स्वाध्यायं सततं कुर्यात्सायं प्रातश्च हावनं ॥
वलिञ्च वैश्वदेवानामतिथेश्चैव भोजनं ॥१०॥
दर्शनं पौर्णमास्यान्तु पशुबन्धेष्टिमेव च ॥
श्राद्धं सदक्षिणं कुर्य्यादृतुकाले स्त्रियं व्रजेत् ॥११॥
वर्जयेत्परदारादीन् स्वाचाराद्गतिमाप्नुयात् ॥
अहिंसानिर्म्मलत्वं हि तमस्तेय विवर्ज्जनात् ॥१२॥
कामक्रोधनिवृत्तिश्च गुरुपूजनमेव च ॥
क्षमा दमो दया दानं सत्यं शौचं धृतिर्घृणा कृपा ॥१३॥
विद्या विज्ञानमास्तिक्यमेतद् ब्राह्मणलक्षणं ॥

जीवेच्छिलोञ्छवृत्यैव प्रसृतेनैव वा पुनः ॥१४॥
वाणिज्यादि त्यजेत्कर्म भूतद्रोहञ्च सर्वदा ॥
जपाग्निहोसंयुक्तः स स्वर्गफलभाग्भवेत् ॥१५॥
पञ्च यज्ञमकुर्वाणो नरकं स ध्रुवं व्रजेत् ॥
अष्टम्याञ्च चतुर्द्दश्यामुपोष्य प्रयतात्मवान् ॥१६॥
बह्व वं शिवसङ्कल्पञ्जपेत्सम्पूज्य शङ्करं ॥
एवं संवत्सरैकन्तु भक्त्या यः कुरुते द्विजः ॥१७॥
सर्पनिर्मोकवत्पापैर्मुच्यते नात्र संशयः ॥
तथैवैकादशं रुद्रं जपेदध्वपुरोहितः ॥१८॥
दक्षिणायां स्थितं मूर्तौ सम्पूज्य परमेश्वरं ॥
स सर्वकलुषर्मुक्तः शुद्धः स्फटिकनिर्मलः ॥१९॥
रत्नालोकविमानेन याति माहेश्वरं पदं ॥
अथवोद्धृत्य तत्रैव मानस्तोकशतं शतं ॥२०॥
प्रत्यहन्तज्जपेद्देवि! गणत्वं योऽभिवाञ्छति ॥
वामदेवं जपेत्सोमन्देवव्रतमथापि वा ॥२१॥
पूर्वोक्तिविधिमास्थाय छन्दोगः शुचिमानसः ॥
दिवाकर इव व्योम्नि भ्राजमानः स्वतेजसा ॥२२॥
स गच्छेत्परमं स्थानं यत्र यान्ति बहुश्रुताः ॥
जपेद्रुद्रगणान् विद्वानथर्वशिर एव वा ॥२३॥
अथवाभ्यर्च्य देवेशं याति माहेश्वरं पदं ॥
विविक्षुर्देवदेवस्य शरीरं ब्रह्मवित्तमः ॥२४॥
पवित्रं परमं पुण्यं व्रतम्भौतिकमाचरेत् ॥
यज्ञब्रह्मार्पणेनैव यजेद्यज्ञान् सदक्षिणान् ॥२५॥
आत्मज्ञानरतश्चैव सिद्ध्यते देवधर्मवित् ॥
ध्यायन् प्रणवयोगेन सर्वगं ब्रह्म सर्वदा ॥२६॥
षोडशारेण चक्रेण यदीच्छेत्सिद्धिमात्मनः ॥
श्रध्दया चैकचित्तेन सर्व द्वन्द्वसहेन च ॥२७॥
नित्यं चालुब्धचित्तेन सर्वमेकत्वदशिना ॥
एवं यो वर्तते नित्यं जपध्यानाग्निकर्म्मसु ॥२८॥
न चासौ दुर्गतिं याति ब्रह्मलोकञ्च गच्छति ॥
केवलं कर्मकारीस्यादात्मध्यान विवर्जितः ॥२९॥
अजित्वा सर्वगं ब्रह्म स्वर्गमात्रफलं लभेत् ॥
अत ऊर्ध्वं वनेवासी जितक्रोधो जितेन्द्रियः ॥३०॥

वसेद् बनगतो विद्वान् वर्त्तयन् कुशविन्दुना ॥
कन्दमूलफलैः शाकैः श्यामानीवारकङ्गुभिः ॥ ३१ ॥
सायं प्रातश्च तैरेव होमयेज्जातवेदसं ॥
अट्टालकृष्टैर्व्वनजैर्देवव्राह्मणतर्पणैः ॥ ३२ ॥
पितृणां तर्पणञ्चैव जपहोमरतः सदा ॥
सर्वभूतहितो नित्यं सर्वदुःखसहिष्णुकः ॥३३॥
अभ्रावकाश्यं शीतोष्णौ पञ्चाग्निर्ज्जलशायि वा ॥
कुशवल्कलवासांसि कृष्णाजिनधरः सदा ॥ ३४ ॥
कृच्छ्रातिकृच्छ्रतप्तादिपराश्चान्द्रायणैस्तथा ॥
शीर्णपर्णोदकाहारैरात्मानं परिशोधयेत् ॥३५॥
मृगचारी वसेत्तैस्तु कष्टां वृत्तिं समास्थितः ॥
व्राह्मणः स्वर्गगामीस्याद्विप्लुतोनरकं व्रजेत् ॥३६॥
अग्निं कृत्वा तु कायस्थं खमाकाशे तु विन्यसेत्॥
चेष्टायां विन्यसेद्वायुमनलेऽग्निं पयोऽ म्भसि ॥३७॥
कायम्मूमौ मनश्चन्द्रे दिक्षु श्रोत्रे तु विक्षिपेत् ॥
मित्रे पाथ्विन्द्रि न्यस्य शिश्ने चैव प्रजापतिं ॥३८॥
सन्यासन्तु ततः कृत्वालोभमोहविवर्जितः ॥
अद्रोहः सर्वभूतानां सर्वमात्मनि पश्यति ॥३९॥
त्रिदण्डी कुण्डिपात्री च भैक्षग्प्रसाष्टतुट् सदा ॥
न शश्वदुपभुञ्जीत भैक्षवृतिं समाश्रितः ॥४०॥
ग्रामैकरात्रमुषितो न वसेत्पञ्चरात्रिकः ॥
वर्षास्वेकत्र सन्यासी नगरे पञ्चरात्रिकः ॥४१॥
दम्भकल्कविनिर्मुक्तः सर्वद्वन्द्वसहिष्णुकः ॥
ग्रामकर्मविवर्जी स्यात्सङ्गतौ दोषवर्जितः ॥४२॥
दयालु सर्वभूतेषु अनासक्तिं अहिंसकः ॥
आत्मभावरतिर्नित्यं ब्रह्मभावसमन्वितः ॥४३॥
एवं यो वर्तते नित्यं सयाति व्रह्मलोकिकं ॥
ब्रह्मणा सह मोदन्ते ब्रह्मण्येव तु लीयते ॥४४॥
विप्लुतो नरकं याति कामलोभ समन्वितः ॥
यण्थोक्तकारी ब्रह्मात्मा ब्रह्मलोकं स गच्छति ॥४५॥
वेदधर्म मया प्रोक्ताः स्वर्ग नैश्रेयसम्पदं ॥
उत्तरेणैव वक्त्रेण व्याख्यातश्च समासतः ॥४६ ॥
इति शिवधर्मसङ्ग्रहे नवमोऽध्याय ॥९॥

अथ पशुपतिमते शिवधर्म महाशास्त्रे शिवधर्मसङ्ग्रहे

दशमोऽध्यायः

॥ देव्युवाच ॥

त्वत्तोऽ खिलानि धर्माणि श्रुतानि च मया विभो ॥
भूयोपि श्रोतुमिच्छामि त्वत्प्रसादान्महेश्वरः ॥४७॥
लोकाल्लोकान्तरं कृत्स्नं द्वीपं द्वीपान्तरश्च यत् ॥
शरीर पाताद्गन्तव्यमेतध्दर्मानुसारिण ॥४८॥

॥ भगवानुवाच ॥

श्रूयतामभिधास्यामि पातालादनुपूर्वशः ॥
लोकलोकान्तरश्चैव द्वीपं द्वीपान्तरन्तथा ॥४९॥
आभासतालमुत्तालं श्रीतालश्च गभस्तिमान् ॥
शिलोच्चयंततोज्ञेयं शर्करा चयमेव च ॥५०॥
सौवर्णं सप्तमन्तेषां पातालाः परिकीर्तिताः ॥
छत्रकाराणि सर्वाणी पातालभुवनानि वै ॥५१॥
आयसी प्रथमा भूमिः पुरी भस्मवती यतः ॥
धनञ्जयस्यकामस्य रुद्रस्याच्छुष्मसंज्ञितः ॥५२॥
उच्छुस्मेति पुरी ख्याता आयसी हर्म्यमालिनी ॥
चण्डीशं पूजयेत्तस्यां निर्म्माल्यै पतनं यतः ॥५३॥
राक्षसी च पुन र्देवि दैत्या हुलहुला स्थिताः ॥
अन्ये मातृगणा रूद्रा भगिन्यश्च गणस्तथा ॥५४॥
द्वितीयं स्फटिका भूमिः कपिलो यत्र तिष्ठति ॥
शंखपालश्च नागेन्द्रः कम्वलाश्वतरावुभौ ॥५५॥
चैत्याभूमिस्तृतीये तु नागराक्षससंकुला ॥
मातरः पिङ्गला यत्र निवसन्त्योष्टहस्तिकाः ॥५६॥
गरुडश्च महापक्षी पक्षिभिर्बहुभिर्वृतः ॥
चतुर्थी तामृका भूमिःपुरी चन्द्रवती शुभा ॥५७॥
कर्कोटो निवसत्यस्यां नागेन्द्रैर्वहुभिर्वृतः ॥
वैद्युतीच पुरी चान्या शतयोजनमायता ॥५८॥
कपालमातरो यत्र वसन्ति दशकोटयः ॥
ऐरावती च तत्रैव अन्ये किंपुरुषादयः ॥५९॥
पञ्चमा रौप्य भूमिस्तु पुरी चन्दप्रभेतिच ॥
पद्मश्चैव महापद्मो नागेन्द्रौ यत्र संस्थितौ ॥६०॥

अग्निपाताग्निवर्णाभा वसंत्यग्निकुमारिकाः ॥
तथा कपालरुद्राश्च असंख्येयाः पुनः स्थिताः ॥६१॥
रत्नशर्कररचित्रन्तु षष्ठं पातालमुत्तमं ॥
पुरी रत्नवती नाम तत्र नागा वसन्ति वै ॥६२॥
अथर्वरुद्रास्तत्रैव यजन्ते योगकन्यका ॥
सप्तमश्चैव सौवर्णं पातालं नागसेवितं ॥६३॥
पुरा चैत्रवती नाम पुरी रुद्रसमाकुला ॥
आस्तेऽस्यां हाटको देवो दिव्यैर्विद्येश्वरैर्वृतः ॥६४॥
पुरी कान्तिवती नाम यत्र वैरोचनः स्थितः ॥
अनेकैः पूरुषैर्दिव्यै र्मयो वसति दानवः ॥६५॥
तक्षको नाम नागाश्च किंमुसोऽग्निकुमारकाः ॥
योगकन्या महावीर्यास्तथा वायुकुमारकाः ॥६६॥
महाकाया महावीर्याः सप्तैते सप्तसुस्थिता ॥
क्रीडन्ति च पुरी ह्वासु कोटिशः परिवारिताः ॥६७॥
असुराश्चैव नागाश्च वैरोचनबलिस्तथा ॥
एवमेते समुद्दिष्टाः पातालतलवासिनः ॥६८॥
सप्तद्वीपा च या पृथ्वी तेषामुपरि संस्थिता ॥
भूर्ल्लोकः कथ्यते सोऽ पत्र तस्य मध्ये महाव्रते ॥६९॥
जम्बुद्वीपं समाख्यातं नानाजनसमाकुलं ॥
योजनानां स्मृतं लक्षं विस्तारन्तस्य सर्वशः ॥७०॥
जम्वुद्वीपस्तथा प्लक्षः शाल्मलिश्च कुशस्तथा ॥
क्रौञ्चद्वीपञ्च शाकञ्च पुष्करञ्चेति कीर्तिताः ॥७१॥
जम्बुद्वीपप्रमाणेन द्विगुणादिक्रमेण तु ॥
शेषाणान्तु विनिर्दिष्टा द्वीपानां सागरैः सह ॥७२॥
क्षारोदेक्षुश्च मदिरा घृतोदो दधिसागरः ॥
क्षीरोदश्चेति स्वादूदः समुद्रा सप्तकीर्तिताः ॥७३॥
चक्रनेमिप्रकारस्तु सर्वतः परिमण्डलः ॥
पूर्व्वं पूर्वं समावृत्य संस्थिता विविधाः प्रिये ॥७४॥
नित्यं त्रेतायुगावस्थाः प्लक्षद्वीपादिषु त्रिषु ॥
तिष्ठन्तिः जन्तवः सर्वे तिष्ठन्त्येषु महाव्रते ॥७५॥
नित्यं कृतयुगावस्था वर्त्तन्ते सर्वतोजनाः ॥
दश वर्षसहस्राणि आयु र्वै परिकीर्तितं ॥७६॥

प्लक्षादिपुष्करान्तेषु स्वरूपा सृष्टिरेव हि ॥
वर्षाणि पर्वताश्चैव जम्बुद्वीपे सुमध्यमे! ॥७७॥
वर्णयिष्यामि तत्वेन अनेकाकारलक्षणान् ॥
हिमवान् हेमकूटश्च निषधोनील एव च ॥७८॥
श्वेतश्च श्रृङ्गवांश्चैव गन्धमादन एव च ॥
मालवानथ मेरुश्च नवैते वर्षपर्वताः ॥७९॥
योजनानां सहस्रन्तु चोत्सेधाद् द्विगुणायतः ॥
सर्वेषां पर्वतानान्तु मेरुस्त्वभ्यधिकः स्मृतः ॥८०॥
षट्पूर्वपश्चिमेनैवमुभयत्र व्यवस्थिताः ॥
लवणोदं विगाह्येव सहस्राणां शतायुतं ॥८१॥
श्वेतोऽथ हेमकूटश्च सहस्राशीतिदीर्घिका ॥
हिंमवत् श्रृङ्गवन्तौ च नाना रत्नमयौ शुभे ॥८२॥
योजनानाश्चतुस्त्रिंशत्सहस्रावयुतावुभौ ॥
गन्धवन्माल्यवन्तौ च मेरोस्तौ पूर्वपश्चिमौ ॥८३॥
प्रविष्टः षोडशाधस्तान्मेरोर्मूले च तत्समः ॥
द्वात्रिंशच्च तथा मध्ये ह्यग्रे षट्त्रिंशदेव हि ॥८४॥
योजनानां सहस्राणि चतुराशीतिमुच्छ्रितः ॥
शुकलवर्णः स्मृतः पूर्वो भृङ्गवर्णश्च दक्षिणे ॥८५॥
पश्चिमे पीतवर्णस्तु रक्तो मेरुस्तथोत्तरे ॥
चतुर्वर्णा मही मध्ये कर्णिका तस्य संस्थिता ॥८६॥
उक्ता वर्षनगा ह्येते परिणाहेन कीर्तिताः ॥
त्रिगुणेन प्रमाणेन त्रिभाग परिकल्पना ॥८७॥
विष्कम्भान्सम्प्रवक्ष्यामि नाम्ना वनसरांसि च ॥
मन्दरः पूर्ब विष्कम्भो दक्षिणे गन्धमादनः ॥८८॥
विपुलः पश्चिमे पार्श्वे सुपार्श्वश्चोत्तरे तथा ॥
रूद्रा नाम कदम्बश्च मन्दरस्योपरि स्थितः॥ ८९॥
सहस्रोच्छ्रितशाखश्च कुम्भपुष्पः सुगन्धिकः॥
गन्धमादनपूर्वेण जम्बूवृक्षःसनातनाः ॥९०॥
नाम्ना सुदर्शनो नाम सिध्दचारणसेवितः ॥
तस्य नाम्ना समाख्यातो जम्बूद्वीपोवनस्पतेः ॥९१॥
दश चैव दशान्येते योजनानां समुच्छ्रितः ॥
क्रोशप्रमाणैश्च फलैःपक्वैरमृतसन्निभैः ॥९२॥

उदितादित्यसङ्काशै:पतद्भि:पतितैस्तथा ॥
महास्रोतो महानद्यो जम्बूफलरसोद्भवा: ॥९३॥
मेरुं प्रदक्षिणीकृत्य जम्बूमूलं विशन्ति ता: ॥
तस्य सम्पर्कवच्चैव कनकं देव भूषणं ॥९४॥
विपुलस्य शिरेऽश्वत्थो जम्बूमूले विराजते ॥
नाम्ना कुरुरिति ख्यातो बहुशाखा फलोत्कट: ॥ ९५॥
रत्नमालान्ददच्छक्रो हत्वा दैत्यान् सुदुर्जयान्॥
केतुमालेति तेनासौ नाम्नालोके प्रकर्तित: ॥९६॥
सुपार्श्वे च महावृक्षो न्यग्रोधो नाम विश्रुत: ॥
इन्द्रनीलमयै: पत्रै: फलै द्रिमसन्निभै: ॥९७॥
द्वित्रै: काञ्चनणैश्च भाति चित्रैवमण्डित: ॥
मन्दरस्य समीपे तु वनं चैत्ररथं स्मृतं ॥९८॥
गन्धमादन विष्कुम्भ समीपे नन्दनं वनम् ॥
विपुलस्य समीपे तु वनं वैभ्राजकस्मृतं ॥९९॥
सुपार्श्वे पितृवनञ्च सदापुष्पफलान्वितं ॥
तरुणोदह्रदं दिव्यं वने चैत्ररथेस्थितं ॥१२००॥
मानसं नन्दनवने वैभ्राजे च सितोदकं ॥
महाभद्रह्रदं पुण्यं सुपार्श्वे मे वितुर्वने ॥१॥
सेव्यते दिव्यनारीभि: सिद्धविद्याधरैर्गणै: ॥
चतुस्त्रिंशत्पुरं मेरो: प्रवक्ष्याम्यनुपूर्वश: ॥२॥
काञ्चनी च पुरीसम्वा नाम्नायात्वमरावती ॥
शक्रस्ययोजनै: ख्याता सहस्राणि तु विंशति: ॥३॥
तत: कामवती नाम पुरी साप्सरसां शुभा ॥
सौवर्णीसिद्धिसङ्घस्तु नित्यकालं निसेविता ॥४॥
विश्वेषां रेवतीनाम तत्र चित्रा मनोरमा ॥
दिव्यरूपेति विख्याता रत्नाङ्गी विश्वकर्मण: ॥५॥
दक्षिणेन सुमेरोश्च नाम्ना संयमनी पुरी ॥
इन्द्रनीलमयी रंम्या यमस्तस्यां विलोकयन् ॥६॥
धर्मो धर्मवतां कर्माण्यास्ते धर्मासने प्रभु: ॥
तत्र गत्वा यथोपान्ते जन्तव: कर्मभि: स्वकै: ॥७॥
पुण्यकर्माण:कर्तार: स्वर्गेयान्त्यपरे तत: ॥
अधोबक्त्रा: सुसन्त्रस्ता: पाशपीडितकन्धरा: ॥८॥

महाद्वारेंण गच्छेयुरधस्तान्नरकोदरं ॥
यमः सूर्योऽथरुद्रश्च कालाग्निश्चेत्यभेदितः ॥९॥
एकएव चतुर्द्धातु भूत्वा कार्यम्प्रतिष्ठितः ॥
एकेनांशेन तपति द्वितीये नानुशास्ति च ॥१०॥
विभ्रल्लोकं तृतीयेन कालाग्निरिति विश्रुतः ॥
ब्रह्मणोऽ ङ्गश्चतुर्थैस्तु विख्यातो नीललोहितः ॥११॥
एकादशात्मा लोकेऽस्मिन् वीरभद्रः स उच्यते ॥
मातृनन्दा पुरी रम्या सर्वरत्न विचित्रिताः ॥१२॥
क्रीडन्ति मातरस्तत्र मधुपानविघूर्णिताः ॥
अतः परन्तु रुद्राणां रोहिता नाम काञ्चनैः ॥१३॥
तत्र शूलधरास्त्र्यक्षाः त्रैलोक्यपरिरक्षकाः ॥
एकादशानांरुद्राणां वासोवज्रमयी पुरी ॥१४॥
वज्रप्राकार वसना नाम्ना गुणवती शुभा ॥
नैर्ऋते पूर्व भागे तु पिङ्गला नाम सा पुरी ॥१५॥
सुशर्माण इति ख्याता पिशाचास्तत्र संस्थिताः ॥
मेंरो त्र्नैर्ऋतभागे तु नीलोत्पलसमप्रभा ॥१६॥
आयसी रक्षसां पत्युर्विरूपाक्षस्य विश्रुता ॥
अन्या कृष्णाङ्गना नाम लोहप्राकारवेष्टिता ॥१७॥
रत्नतोरणविन्यस्ता पताकाशतशोभिता ॥
अतः सुकालिका नाम जम्बूनदमयी पुरी ॥१८॥
अमासा नाम तिष्ठन्ति राक्षसा यत्र सर्वदार ॥
हेमरौप्यमयी दिव्या पुरी ख्याता सुखेति या ॥१९॥
मित्रा वसति तत्रैव बहुभृत्यसमावृतः॥
गन्धर्वा सोमजा नाम गन्धर्वास्तु वसन्ति वै ॥२०॥
दिव्यंकन्यापरिवृता दिव्यभोगसमन्विता ॥
दशकोटिसहस्राणि तेषां संख्या प्रकीर्तिता ॥२१॥
भूतानां सिद्धसेतूनां पत्रिभूताः सुसंस्थिताः ॥
अतः पश्चिमतो मेरोर्वरुणस्य सुखोदया ॥२२॥
पुरी विभावती दिव्या नानारत्नोपशोभिता ॥
उद्यानारामवापीभिर्न्नर नारी समाकुला ॥२३॥
दिव्यभोगैः समुदिता सर्वैश्वर्यसमन्विता ॥
हेमैर्भूषितसंज्ञा च वसूनां प्रवरा ततः ॥२४॥

महासिद्धवती नाम चामीकरमयी पुरी ॥
सर्वविद्याधराणान्तु सा पुरी परिकीर्तिता ॥२५॥
हास्यलास्यविलासेन कीडन्ति वरयोषितः ॥
अतः परन्तु सिद्धानां किन्नरैरभिवन्दिता ॥२६॥
सा त्वर्कहेमललिता रत्नतोरणमण्डिता ॥
पश्चिमोत्तरदिग्भागे नाम्ना गन्धवती पुरी ॥२७॥
पुष्पनागनिभा दिव्या वायोः पुरनिसेविता ॥
अतः परन्तु गान्धारी हेमी चित्ररथस्य च ॥२८॥
गन्धर्वराजमुख्यस्य दिव्यगन्धर्वसेविता ॥
तत्र साक्षाद् भगवती सप्तस्वरविभूषिता ॥२९॥
ग्रामत्रयपरीधाना मूर्च्छनोत्तरमेखला ॥
नानाभरणचित्राङ्गी जयतिदेहकलास्पदा ॥३०॥
लक्षणाव्यञ्जनोपेता मध्यमेनावगुण्ठिता ॥
गन्धर्वैर्गीयमाना सा तस्यां देवी सरस्वती ॥३१॥
नारदाद्यैर्मुनिवरैर्नागकिन्नरसेविता ॥
अतो मनोवती नाम तुम्बुरोर्नारदस्य च ॥३२॥
जाम्बूनदमयी चित्रा ऋषिसिद्धसमाकुला ॥
गुह्यकानां पुरी रम्या प्रमदा नाम विश्रुता ॥३३
हैमी सर्वगुणोपेता उत्तरस्यांदिशिस्थिता ॥
स्फटिका शशिनश्चित्रा महाभोगवती शुभा ॥३४॥
रत्नप्राकारवसना रत्नतोरणमण्डिता ॥
अतोऽ लकावती नाम कुवेरस्य महापुरी ॥३५॥
सर्वधातुमयी रम्या वनोपवन शोभिता ॥
वृता विमान कोटीभिर्विमानशतशोभिता ॥३६॥
सा विंशतिसहस्रैस्तु कोटीनां परिवारिता ॥
यक्षाणामीश्वरः श्रीमानास्ते भोगैरनुत्तमैः ॥३७॥
अतः शुभेति विख्याता जाम्बूनदमयी पुरी ॥
तत्र ते कर्म देवास्तु देवत्वं कर्मभिर्गताः ॥३८॥
इन्द्रनीलमयी विष्णोः श्रीपतिर्नाम नामतः ॥
तत्रास्ते श्रीपतिः श्रीमानतसीपुष्पसन्निभः ॥३९॥
शंखचक्रगदापाणिः पीतवासा जनार्दनः ॥
यशोवती च ज्योतिष्कैरैशान्यान्दिशिमाश्रिता ॥४०॥

चन्द्रकान्तिमयी दिव्या नानाभरणशङ्कुलाः ॥
सकलेन्दुप्रतीकाशा रत्नतोरणमण्डिता ॥४१॥
वृता विमान कोटीभि र्विमानशत शोभिता ॥
पताकाभिर्विचित्राभिर्मुक्तादामपरिच्छदा ॥४२॥
नानारत्नमयैर्दिव्यैर्गवाक्षैः सर्वतोऽ न्वितैः ॥
वापीभिर्दीर्घिकाभिश्च वनैरुपवनैस्तथा ॥४३॥
कल्पवृक्षैर्विचित्रैश्च विश्वरूपैर्मनोरमैः ॥
पद्मोत्पलवनैर्दिव्यैः षट्पदोदगीतनादितैः ॥४४॥
वेदिकाभिर्विचित्राभिः पद्मरागाख्यशोभितैः ॥
नानारत्नमयैर्दिव्यैर्वर्ण्यचामरभूषितैः ॥४५॥
नानारत्नैश्च दिव्यैश्च दर्पणैश्चावलम्बितैः ॥
किङ्किणीजालसंक्षिप्ता महाहारोपशोभिता ॥४६॥
किन्नरामरनारीणां गीतश्रुतिमनोहरैः ॥
तन्त्र्याः पणवभेरीणां प्रमथानाश्चनिस्वनैः ॥४७॥
गीतवादित्रनिर्घोषैर्नदतीव महापुरं ॥
जटिलैः शूलिभिस्त्र्यक्षैः समन्तात्परिवारितः ॥४८॥
रुद्रैर्वसुभिरादित्यैरप्सरोभिश्च शोभितः ॥
तत्रेशानः स्वयमन्देवः सुरसिद्धनमस्कृतः ॥४९॥
एकेनांशेन कैलासे द्वितीयेनात्र संस्थितः ॥
अतः पद्मवती नाम सर्वरत्नमयी पुरी ॥५०॥
महापद्मोपविष्टस्य पद्ममालाधरस्य तु ॥
पद्मपत्रायताक्षस्य ब्रह्मणः पद्मजन्मनः ॥५१॥
अतः पद्ममुखा नाम सर्वरत्नमयी पुरी ॥
अश्विनोः सा समाख्याता तथा धन्वन्तरेरपि ॥५२॥
अतो विनायकानान्तु महामेधेति विश्रुता ॥
हेमप्राकारवसना रत्नतोरणमण्डिता ॥५३॥
जाम्बूनदमयी दिव्या विनायकसमाकुला ॥
द (य) क्षकोटिसहस्राणि तेषां वीर्यवतां सदा ॥५४॥
विनायकानां दीप्तानां सूर्यज्वलनतेजसां ॥
असुराणां वधार्थाय मयाङ्गुष्ठाद्विनिर्मिताः ॥५५॥
अनर्चयित्वा यश्चैतान् सिद्धिमिच्छन्न सिदध्यति ॥५६॥
इति शिवधर्मसङ्ग्रहे दशमोऽ ध्यायः ॥१०॥

अथ पशुपतिमते शिवधर्मे महाशास्त्रे शिवधर्मसङ्ग्रहे

एकादशोऽध्यायः

॥ देवदेव उवाच ॥

नामाधिपत्यं वर्षाणां प्रवक्ष्याम्यनुपूर्वशः ॥
मनुः स्वायम्भुवो नाम तस्य पुत्रः प्रियव्रतः ॥५७॥
दश पुत्राश्च तस्यासंस्तैरियं पृथिवी तता ॥
अग्नीध्रश्चाग्निबाहुश्च मेधा मेधातिथिर्वसुः ॥५८॥
ज्योतिष्मान् द्युतिमान् हव्यः सवनः पत्र एव च ॥
इति पुत्रादशैते तु कीर्तिता हि मया प्रिये! ॥५९॥
पत्राग्निबाहुमेधाश्च त्रयस्ते तपसि स्थिताः ॥
धर्मप्रवर्त्तकाः शिष्टाः सप्तद्वीपाभिषेचिताः ॥६०॥
प्रजापालनयुक्ताश्च निग्रहानुग्रहे स्थिताः ॥
जम्बूद्वीपे स्मृतोऽग्नीध्रोः प्लक्षे मेधातिथिः स्थितः ॥६१॥
वसुश्च शाल्मलीद्वीपे ज्योतिष्मान् कुशसंज्ञके ॥
राजा क्रौञ्चेषु द्युतिमान् शोके हव्योऽभिषेचितः ॥६२॥
पुष्करे सवनो नाम सप्तैते सप्तसु स्थिताः ॥
जम्बूद्वीपेऽप्यथाऽग्नीध्रान्नव पुत्राः प्रजज्ञिरे ॥६३॥
नाभिस्तु प्रथमो राजा जज्ञे किंपुरुषस्ततः ॥
तृतीयस्तु हरिर्नाम चतुर्थः स्यादिलावृतः ॥६४॥
पञ्चमो रम्यको नाम हिरण्मानिति षष्ठकः ॥
सप्तमश्च कुरुः ख्यातो भद्राश्वश्च तथाष्टमः ॥६५॥
केतुमान् नवमः पुत्रः ख्यातोऽग्नीध्रश्च वीर्यवान् ॥
अग्नीध्रस्तेषु पुत्रेषु जम्बूद्वीपमकल्पयत् ॥६६॥
समुद्रो दक्षिणे पार्श्वे हिमवांस्तस्य चोत्तरे ॥
द्वयोर्मध्ये तु यो देशो नाभिन्तत्राभिषिक्तवान् ॥६७॥
पुत्रोऽथ नाभेर्ऋषभो भरतस्तु ततोऽभवत् ॥
तेन नाम्ना त्रयो वर्षा भारता इति कीर्तिताः ॥६८॥
धनुराकृतिविज्ञेयाश्चतुर्युगवती स्थितिः ॥
कर्मभूमिरियं ख्याता नरकस्वर्गमोक्षदा ॥६९॥
कृषिप्रायाब्रीहिभुजः राजानो गोधनायतः ॥
आदक्षिणात्समुद्रस्य यावद्बिन्दुसरः स्मृतः ॥७०॥

नवयोजनसाहस्रो भारतो वर्ष उच्यते ।
तस्य वै नव भेदास्तु भवेयुः सागरान्तरे ॥७१॥
सागरान्तरिता द्वीपा अगम्यास्ते परस्परं ।
इन्द्रद्वीपः कशेरुश्च ताम्रवर्णोगभस्तिमान् ॥७२॥
नागद्वीपश्च सौम्योऽथ गन्धर्वो वरुणः स्मृतः ।
कुमारीद्वीपसंज्ञश्च नव भेदाः प्रकीर्तिताः ॥७३॥
अस्मिन् कुमारीद्वीपे तु सप्तैते कुलपर्वताः ।
महेन्द्रो मलयः सह्यः शुक्तिमानृक्षपर्वतः ॥७४॥
विन्ध्यश्च पारिजातश्च सप्तैते कुलपर्वताः॥
गङ्गाद्याश्च महानद्यस्तेभ्यस्तेभ्यो विनिर्गताः ॥७५॥
महानदीनान्तु शतं नदीनां शतमेव च ।
प्रभासमादितः कृत्वा तीर्थानां कोटिरुच्यते ॥७६॥
अनुग्रहार्थलोकानां पञ्चपञ्चाष्टकन्तथा ।
भवन्त्येतेष्वयद्द्वीपा मध्यस्थालवणोदधेः ॥७७॥
अङ्गद्वीपो यवद्वीपो मलयः शंख एव च ।
कुमुदश्च वरारोहे षडेते सम्प्रकीर्तिताः ॥७८॥
मलये मलयो नाम लङ्कायस्य पदे स्थिता ।
हेम प्राकारवसना रत्नचित्रा मनोरमा ॥७९॥
राक्षसा यत्र तिष्ठन्ति सर्वभूत भयङ्कराः ।
वर्षस्योत्तरे हिमवान् कैलासः सह संयुतः ॥८०॥
हिमालयस्योत्तरतो हेमकूटस्य दक्षिणे ।
वर्षः किंपुरुषो नाम यत्र स्युरयुतायुषः ॥८१॥
जनाः प्लक्षरसाधारा गौराः काञ्चनसन्निभाः ।
हेमकूटस्योत्तरतो निषधस्य च दक्षिणे ॥८२॥
हरिवर्षस्तृतीयस्तु रुक्माभा यत्र ते जनाः ।
एकादश सहस्राणि जीवन्तीक्षुरसाशिनः ॥८३॥
तृष्णारागविनिर्मुक्ता दारिद्र्यव्याधिवर्जिताः ।
निषधस्योत्तरे चैव नीलस्यैव तु दक्षिणे ॥८४॥
भद्रश्चेलावृतश्चैव केतुमालस्तृतीयकः ।
मेरोश्चैव तु पूर्वेण माल्यवान् सुमहागिरिः ॥८५॥
गिरेर्माल्यवतः पूर्वे समुद्रस्य तु पश्चिमे ।
तयोर्मध्येतु भद्राश्वो यत्र चन्द्रनिभाजनाः ॥८६॥

कालाम्रातफलाहारा नीरोगा ह्ययुतायुषः ॥
वर्णमालाग्रः क्रौञ्चश्च श्वेतोनीलो नरस्तथा ॥८७॥
भद्राश्वश्च समाख्यातः पर्वतैःपञ्चभिर्युतः ॥
मेरोः पश्चिमतश्चैव पर्वतो गन्धमादनः ॥८८॥
गन्धमादनशैलस्य सरुद्रस्य तु पूर्वशः (तः) ॥
गिरिसागरयोर्मध्ये वर्षं वै केतुमालकं ॥८९॥
भद्राश्वतुल्यः स ज्ञेयो यत्रोत्पलनिभा जनाः ॥
पनसस्य फलाहारास्ते जना ह्ययुतायुषः ॥९०॥
विशालः कम्बलः कृष्णो जयन्तो हरिपर्वतः ॥
अशोको वर्धमानस्तु सप्तैते कुलपर्वताः ॥९१॥
तद्द्वयोर्वर्षयोर्मध्ये वर्षं तद्यदिलावृतं ॥
चतुरस्रं समन्तात्तु चतुस्त्रिंशत्सहस्रिकं ॥९२॥
चन्द्रसूर्यौ न तपतो मेरोर्भासा प्रकाशितं ॥
चितं पुरवरैर्दिव्यैर्भुवनोद्यानसङ्कुलैः ॥९३॥
पक्षिभिर्हेमवर्णैश्च तथा हेममृगैर्वृतम् ॥
रत्नवक्त्रैर्वज्रपादैर्दिव्यध्वनिनिनादितैः ॥९४॥
सौवर्णैश्च महापद्मैर्न्नालैर्वैदूर्यसन्निभैः ॥
दिव्यस्पर्शसुगन्धैश्च मत्तभ्रमरसङ्कुलैः ॥९५॥
शाखामृगैर्विचित्रैश्च भानुबिम्बैरिबोदितैः ॥
यक्षभूतपिशाचैश्च सिद्धविद्याधरोरगैः ॥९६॥
दिव्यैः पितृगणैर्यक्षै र्ऋषिगन्धर्वकिन्नरैः ॥
सेवितं योगिभिर्मुख्यैर्वर्षं मेरुसमन्वितं ॥९७॥
जम्बूफलरसाहारः पद्मवर्णायुतायुषः ॥
जरारोगविहीनास्तु अत्यन्तसुखिनो जनाः ॥९८॥
शीता लता सुवृक्षा च भद्रसोमा चतुर्ष्वपि ।
निपत्य गङ्गा मेरोस्तु चतुर्दिक्षूदधिङ्गताः ॥९९॥

॥ देव्युवाच ॥

कैषा गङ्गेति विख्याता त्वया शिरसि धारिता ॥
त्रायते च जगत् सर्वं कुतो जाता सुरोत्तम ! ॥१३००॥

॥ ईश्वर उवाच ॥

दक्षिणाक्षिविनिष्क्रान्ता ममैषा तु सुमध्यमे ॥
क्रियाशक्तिरिति ख्याता शुक्ल सा मम दक्षिणे ॥१॥

वामलोचनसम्भूता त्वं कृष्णा वामतः स्थिता ॥
ज्ञानशक्तिरिति ख्याता बन्धमोक्षप्रदायिका ॥२॥
तवतेजः समाक्षिप्य सा स्थिता बलशालिनी ॥
आत्मानं निर्जितं दृष्ट्वा विवादे रूपशोभया ॥३॥
विलयं व्रजेति सा शप्ता त्वया देवि ! सरिद्वरा ॥
त्वञ्च पश्चात्तया शप्ता मर्त्यभावं व्रजेति च ॥४॥
त्वं दक्षदुहिता देवि ! तस्याः शापेन चागता ॥
दक्षयज्ञे तनुं त्यक्त्वा गिरिराजसुतोद्भवा ॥५॥
उग्रन्तपः समास्थाय मम पत्नीत्वमागता ॥
सा विलीना करङ्कस्था वर्षाणामयुतं धृता ॥६॥
रूष्टता भेदितः सो हि करङ्कस्तु सुमध्यमे ॥
सोममध्ये मया पश्चात् स्थापिताब्दायुतं पुरा ॥७॥
ततो निष्क्रम्य वेगेन निरालम्बेन चागता ॥
ततो निपत्य मेरोस्तु चतुर्दिक्षूदधिङ्गता ॥८॥
एषा गङ्गासमुत्पत्तिः कथिता हि वरानने ॥
न मया संहृतः शापो लोकानां हितकाम्यया ॥९॥
जम्बूफलरसाहाराः पद्मवर्णायुतायुषः ॥
जरारोगविहीनाः स्युरत्यन्तसुखिनो जनाः ॥१०॥
इलावृतं मयाप्युक्तं संक्षेपेण यशस्विनि ! ॥
रम्यकं सम्प्रवक्ष्यामि सर्वकामेषु रम्यकं ॥११॥
नीलस्योत्तरभागे तु श्वेतस्यैव तु दक्षिणे ॥
नीलोत्पलदलश्यामा रम्यकेप्लक्षभोजिनः ॥१२॥
द्वादशाब्दसहस्राणि तत्र जीवन्ति ते जनाः ॥
श्वेतस्योत्तरभागेन दक्षिणे श्रृङ्गवदिगरेः ॥१३॥
वर्षं हिरण्मयन्नाम यत्रते लकुचाशिनः ॥
त्रयोदशाब्दसाहस्रन्निवसन्ति शशिप्रभाः ॥१४॥
त्रिश्रृङ्गो चारुभिर्युक्तः समुद्रस्यतु दक्षिणे ॥
उत्तरेण तु श्रृङ्गेन जनास्तु कुरुसंज्ञकाः ॥१५॥
तेषां मणिमयी भूमिः सूक्ष्मकाञ्चनबालुका ॥
तत्र युग्मंप्रसुयेत युग्मं नश्येत सर्वदा ॥१६॥
अकाले मरणं नास्ति विशोकाः स्थिरयौवनाः ॥
कल्पवृक्षरसं पीत्वा सहस्राणि चतुर्दश ॥१७॥

प्रियङ्गुकलिकाश्यामा जीवन्त्यत्र सुखञ्जनाः ॥
कुरुर्नाम महावृक्षः पुण्यसिद्धनिषेवितः ॥१८॥
चन्द्रकान्तः कुलनगः सूर्यकान्तो द्वितीयकः ॥
एतानि भारताद्यानि संक्षेपात् कथितानि ते ॥१९॥
अग्नीध्रनवपुत्राणां वर्षंनाम्नैव चाङ्कितं ॥
दिक्षु किम्पुरुषोऽ ष्टासु युगावस्था न विद्यते ॥२०॥
भारतङ् किम्पुमान् वर्षं हरिवर्षं तृतीयकं ॥
मेरोर्दर्क्षिणतः प्रोक्ता नवसाहस्र विस्तराः ॥२१॥
उत्तरेणतु ये चान्ये नवसाहस्रविस्तराः ॥
इलावृतं चतुस्त्रिंशद् द्वात्रिंशत्पूर्वपश्चिमौ ॥२२॥
भद्रास्वकेतुमालौतु द्वावेतौ तुल्यनिर्मितौ ॥
नवसाहस्रमुत्सेधा हैमाद्या वर्षपर्वताः ॥२३॥
गन्धवन्माल्यवन्तौ च सहस्रैकन्तु विस्तर ॥
मेरोर्योजनलसन्तु नर्वेते वर्ष यर्वत! ॥२४॥
दिशश्चोक्ताश्चतस्रस्तु ह्यार्धलक्षेणसम्मिताः ॥
लक्षयोजनविस्तीर्णो जम्बूद्वीपः प्रकीर्त्तितः ॥२५॥
लवणोदधिस्त्रिगुणस्तस्य वै लवणोदधेः ॥
पञ्चसाहस्रास्यान्तरेः उत्तरेण चतुर्द्वीपः ॥२६॥
योजनसहस्रमात्रः कामवृक्षफलाशिनः ॥
जना यत्र शशिप्रख्या जीवन्त्येते शतायुषः ॥२७॥
चत्वार्येव सहस्राणां योजनानां प्र विस्तरः ॥
महोदधेश्च वायव्ये दशसाहस्र विस्तरः ॥ २८॥
भद्रकालो भवेद्वीपः सर्वद्वन्द्व विवर्जितः ॥
जनायुतायुषस्तत्रा दिव्यामृतफलाशिनः ॥२९॥
पक्षच्छेदभयत्रस्ताः प्रविष्टाश्च महोदधिं ॥
ऋषभो दुन्दुभिर्दूवः पूर्वेणैव प्रविष्टकाः ॥३०॥
चन्द्रः कङ्कास्तयाद्रोण उत्तरेण प्रविष्टिकाः ॥
सोमकोषो वराहश्च नारदश्चैव पश्चिमे ॥३१॥
चक्रश्चैव तु मैनाको दक्षिणेन बलाहकः ॥
चक्रमैनाकयोर्मध्ये वडवाग्निस्तु संस्थितः ॥३२॥
अथ क्षारोदद्विगुणो बहिःस्थः पल्क्ष उच्यते ॥
शान्तोऽ भयः शिशिरश्च सुखदो नन्दिनः शिवः ॥३३॥

क्षेमकश्च शिवश्चेति सप्त मेधातिथेः सुताः ॥
तेषां नाम्ना तु निर्दिष्टा वर्षाः सप्त समासतः ॥३४॥
गोमेधश्चन्द्रकान्तश्च नारदो दुन्दुभिस्तथा ॥
सोमको ऋषभश्चैव वैभ्राजेतिकुलाद्रयः ॥३५॥
सुकृता चानुतप्ता च सुखी च सरितांवरा ॥
विपापा च क्रमूश्चैव त्रिदिवा कृतनासिका ॥३६॥
इत्येताः प्रतिवर्षन्तु नद्यः शैलाः पृथक् पृथक् ॥
पूर्वादारभ्य निष्क्रान्ता जना इन्द्रारसाशिन ॥३७॥
वृतश्चेक्षुरसोदेन खण्डः शर्करया सह ॥
चतुर्लक्षः शाल्मलीद्वीपो यत्र पुत्राश्चपुष्पतः ॥३८॥
श्वेतो लोहितजीमूता हरितो वैद्युतस्तथा ॥
मानसः सुप्रभश्चैव वर्षा नाम्नैव चाङ्किताः ॥३९॥
कुमुदो सुन्नतश्चैव वराहो द्रोणसंज्ञितः ॥
कङ्कश्च महिषश्चैव कुमुद्वान् सप्त वै नगाः ॥४०॥
यातितोयातितृष्णा च चन्द्रा शुक्रविमोचनी ॥
विवृता च विनिन्दा च सप्तैतास्तु सरिद्वरा ॥४१॥
मदालसाश्च घूर्णन्तो द्विगुणेन सुरोदकः ॥
परतस्तु कुशद्वीपो ह्यष्टलक्षः सुसंमितः ॥४२॥
ज्योतिष्मान् सप्त पुत्रांस्तु कुशद्वीपेऽभ्यसेचयत् ॥
उद्भेदो वर्षकश्चैव वेणुर्मण्डलसंज्ञितः ॥४३॥
रथाकारो लवणश्च द्युतिम्पञ्च प्रभाकर ॥
कपिलेति च राजानः सप्तैते वर्षसंज्ञकाः ॥४४॥
विद्युतो हेमनामा च द्युतिमान् पुष्पवास्तथा ॥
कुशेशायो हरिश्चैव मन्दरेति कुलाद्रयः ॥४५॥
मही च धूतपापा च शिवा च सरितांवराः ॥
पवित्राः सप्ततिश्चैव निम्नगाः शुभलक्षणाः ॥४६॥
द्युतिर्दभ्याति विख्याता नगेष्वेषु विनिःसृताः ॥
त्रिगुणेन घृतोदेन कुशद्वीपः समावृतः ॥४७॥
षोडशैव तु लक्षाणि क्रौञ्चद्वीपः प्रकीर्तित ॥
द्युतिमान्सप्तपुत्रस्तु क्रौञ्चद्वीपेभ्यषेचयत् ॥४८॥
मनोऽनुगोऽथ उष्णश्च पावनो ह्यन्धकारकः ॥
मनुर्दुन्दुभिवर्षञ्च कुशलेति क्रमात् स्थिताः ॥४९॥

क्रौञ्चोऽथ वामनश्चैव अन्धकारो दिवावृतः ॥
विविन्दः पुण्डरीकश्च दुन्दुभिश्चेति सप्त वै ॥५०॥
पुण्डरी कौशिकी गौरी तपा चैव कुमुद्वती ॥
सन्ध्या रात्रिश्च ख्यातिश्च सप्तैताः परिकीर्तिताः ॥५१॥
एता एव महानद्यः सप्तभ्यः सप्त निर्गताः ॥
द्राक्षोदर्विभुजो लोकास्तथा च दधिभोजनाः ॥५२॥
नरनारी समाकीर्णाः सर्वकामसुखोदिताः ॥
द्विगुणेन तु दध्योदः क्रौञ्चद्वीपः समावृतः ॥५३॥
क्रौञ्चद्विगुणतः शाको लक्षद्वात्रिंशविस्तरः ॥
हव्यराजसुताः सप्त शाकद्वीपेऽभिषिक्तकाः ॥५४॥
जनदश्च कुमारश्च सुकुमारो मणीचकः॥
कुमुदो ह्युन्नतश्चैव महाभद्रेतिकीर्तितः ॥५५॥
तेषां नाम्ना तु ते वर्षा अङ्किताश्च स्वनामभिः ॥
उदयः केशरी चैव जठरोशस (डंथस) नैर्ऋतः ॥५६॥
श्यामाम्बिकेयो मेरुश्चशैलाः सप्त प्रकीर्तिताः ॥
गभती सुकुमारी च कुमारी नलिनी तथा ॥५७॥
वेणुका तु तथैवेक्षुवेणुकेति सरिद्वराः ॥
क्षीराशिनः फलाहाराः सर्वत्रृद्धिसमन्विताः ॥५८॥
कीडन्ति दिव्यनारीभिर्जरारोगविवर्जिताः ॥
क्षीरोदेनावृतो ह्येष पुष्करं परतः श्रृणु ॥५९॥
सवनस्य सुतौ द्वौ तु महावीर्य च धातकिः ॥
पञ्चविंशसहस्राणि विस्तीर्णो मानसोत्तरः ॥६०॥
उच्छ्रयाद् द्विगुणः सोऽद्रिर्मध्ये च वर्षयोर्द्वयोः ॥
शशीन्द्रगुणप्राशानां चतुर्णां मानसे पुरी ॥६१॥
विश्वौकसा संयमनी सुखा देवि विभावरी ॥
बहिरेव महावीतो धातक्याभ्यन्तरेण तु ॥६२॥
ईर्ष्याभिर्मृगतृष्णाभिरीतिभिश्च विवर्जिताः ॥
सर्वत्र सुखिनस्तत्र तस्मिन् वर्षद्वये जनाः ॥६३॥
पुष्करस्त्रिगुणेनैव वृतः स्वादूदकेन तु ॥
स्वादूदकान्तो भूर्ल्लोकः संक्षेपेण तु वर्णितः ॥६४॥
कोटित्रयप्रमाणेन लक्षैकाशीतिंचाधिकं ॥
हिरण्मयी द्विगुणाभूर्लोकालोको यतः स्थितः ॥६५॥

विंशत्साहस्रविस्तार उच्छ्रयाच्च दशाहतः ।
सवितार्द्धन्तु तपसोऽ परश्चार्द्धेन तापयेत् ॥६६॥
विराजोऽ थ सुधाम्ना च शंखनात्कर्दमस्तथा ॥
हिरण्यरोमा पर्जन्यः केतुमानुषजेति च ॥६७॥
लोकालोकोपरिष्टात्तु सवितुर्दक्षिणायनं ॥
तथोत्तरायणन्तत्र उत्तरेण प्रकीर्तितम् ॥६८॥
अर्द्धरात्रोऽ मरावत्याः अष्टमेति यमस्य च ॥
मध्यान्ह एव वारुण्यां सोमपुर्यादयः स्मृताः ॥६९॥
तदिन्द्रस्यामरावत्यामुत्तिष्ठन् स तु दृश्यते ॥
मध्यान्हे सोमपुर्यान्तु आदित्यस्य गतागतिः ॥७०॥
सुवीथी उत्तरे तस्य अजवीथी च दक्षिणे ॥
पितृदेववीथिकैषा परितस्तु ततः स्मृता ॥७१॥
भूर्ल्लोकस्तु स विख्यातो ह्यत ऊर्ध्वस्तु वः श्रृणु ॥
दशवायुपथन्देवि ! अयुतान्तरमन्तरे ॥७२॥
प्रथमेऽ निलमार्गेऽ भ्रास्त्रिविधास्तत्र संस्थिताः ॥
धूमजा ब्रह्मजाश्चैव पक्षजा च महावलाः ॥७३॥
धूमजाः स्युरिमे मेघास्ते वर्षन्तीह योजने ॥
ब्रह्मनिश्वासजा ये तु द्रोणवर्षा द्वियोजने ॥७४॥
छिन्नपक्षा महामघा महासम्ल्पवकारकाः ॥
युगक्षये समुत्पन्ने प्रलये सर्वदेहिनां ॥७५॥
ब्रह्मदीनां विनाशेतु वर्षन्तीहमहाघनाः ॥
द्वितीये पथि सुन्दर्यामग्निका कन्यमातरः ॥७६॥
वसन्ति सगणोपेता रुद्रशंख्यास्त्वधिष्ठिताः ॥
तृतीये पथि तिष्ठन्ति सम्यक् संसिद्ध धारणाः ॥७७॥
समन्ताद्भोगसंसिध्दाः सर्व सिद्धैरधिष्ठिताः ॥
चतुर्थे पथि तिष्ठन्ति निशिता देवतायुधाः ॥७८॥
नाराचधनुश्चक्राद्यास्त्रिशूलशक्तितोमराः ॥
पञ्चमे पथिपद्माक्षि! वसन्त्यैरावतादयः ॥७९॥
ऐरावताञ्जनश्चैव वामनश्च महागजाः ॥
सुप्रतीकः सुरेन्द्रश्च पुष्पदन्तस्तथैव च ॥८०॥
कुमुदः पुण्डरीकश्च सार्वभौमेति चाष्टमः ॥
दिग्गजा इति विख्याताः खदेशे तु व्यवस्थिताः ॥८१॥

षष्ठे वायुपथे चैव पक्षिराजो महाबलः ॥
गरुत्मानिती विख्यातः दुर्जयो विनतासुतः ॥८२॥
सप्तमे व्योमगङ्गा तु नानाजलधराकुला ॥
पुण्या पुण्योदका पाण्डुर्वहन्ती विमलोदका ॥८३॥
अष्टमे वृषराजस्तु सुपत्नीकः सुनन्दनः ॥
वसत्यत्राप्रतीघातो धर्म्मः प्रत्यय एव सः ॥८४॥
नवमे वायुमार्गे तु दक्षोनाम प्रजापतिः ॥
ब्रह्मैव सततं साक्षाद् ब्रह्मशक्तया त्वधिष्ठितः ॥८५॥
दशमे बायुमार्गेऽस्मिन्नादित्यः सम्प्रतिष्ठितः ॥
नवसाहस्त्र विस्तारो द्विगुणश्चैव मण्डलः ॥८६॥
तपत्यादित्यरूपेण परमात्मा शिवोऽव्ययः ॥
सप्ताश्वः सप्त सामानि षडङ्गसपदक्रमाः ॥८७॥
ऋग्यजूंषि रथन्तस्य कतुश्चक्रः प्रकीर्त्तिताः ॥
सत्यसारो वायुजवः सर्वतेजःसमन्वितः ॥८८॥
नागा योक्त्राणि तस्यैव अरुणश्चैव सारथिः ॥
आदत्ते येन भूतानि आदित्यस्तेन स स्मृतः ॥८९॥

एवमेव भुवर्ल्लोको दशवायुसमन्वितः ॥
अत ऊर्ध्वं प्रवक्ष्यमि स्वर्ल्लोकोऽयं प्रकीर्तितः ॥९०॥
आदित्याद् द्विगुणेनैव सोमस्य परिकीर्तितः ॥
सोमात्तु द्विगुणेनैव स्थितस्त्वङ्गारको महान् ॥९१॥
तस्यापि द्विगुणे नैव सोमपुत्रो बुधः स्थितः ॥
बुधाच्च द्विगुणेनैव संस्थितश्च बृहस्पतिः ॥९२॥
तस्यापि द्विगुणेनैव शुक्रश्चोपरि संस्थितः ॥
द्विगुणश्च तथा शुक्रात्संस्थितश्च शनैश्चरः ॥९३॥
तस्यापि द्विगुणेनैव राहुस्तिष्ठति दर्पितः ॥
द्विगुणेन स्थितः केतुः केतोर्नक्षत्रमण्डलं ॥९४॥
तस्यापि द्विगुणेनैव संस्थितमृषिमण्डलं ॥
नामानि तेषांवक्ष्यामि ऋषीणाम्मण्डलासिनां ॥९५॥
विश्वामित्रो जमदग्निर्गौतमश्च तृतीयकः ॥
भारद्वाजस्तथात्रिश्च वशिष्ठो वत्ससप्तमः ॥९६॥
ध्रुवः सन्तिष्ठते चोर्ध्वं द्विगुणादृषिमण्डलात् ॥
उत्तरश्च हनुं स्वस्य ऋषिश्चोत्तानपादकः ॥९७॥
तस्याश्रमो गृहगतस्य बनाद्विशिष्टः ॥७१॥
गृहस्थ एव यजते गृहस्थश्चरते तपः ॥
आर्द्रपक्वकषायो हि रसः सर्वस्य सिद्ध्यतिं ॥७२॥
यथा मातरमाश्रित्य सर्वे जीवन्ति जन्तवः ॥
एवं गृहस्थमाश्रित्य सर्वे जीवन्ति चाश्रमाः ॥७३॥
राजनः सर्वपाखण्डा ये च रङ्गोपजीविनः ॥
व्यालग्रहाश्च संखाश्च चोरचारभटास्तथा ॥७४॥
येविद्याः सर्वशिल्पाश्च तथा सर्वचिकित्सकाः ॥
दूराध्वानं प्रपन्नाश्च क्षीणपक्षदमास्तथा ॥७५॥
एतेचान्ये च बहवस्तर्पयन्ति गृहाश्रमे ॥
गृहाश्रमेषु मे देवि ! सर्वे जीवन्ति जन्तवः ॥७६॥
मार्जारमूषिकाः श्वानो मयुरकुक्कुटाः शुकाः ॥
वटकाश्च कपोताश्च काकाः खरसशूकराः ॥७७॥
अरण्यवासिनो ये तु वराहशशका मृगाः ॥
गोजाविमहिषाश्चैव बलाका तित्तिरिस्तथा ॥७८॥
जन्तवो बहवोजीवा जङ्गमाः खचरास्तथा ॥
गृहे क्षेत्रे खले चैव सत्वाजीवन्त्यनेकश : ॥७९॥

गृहस्थे यत्कृतं कर्म शतशोऽथ सहस्रश: ॥
उपनयति मतिमांस्तस्माद्धर्म: प्रवर्त्तित: ॥८०॥
धर्ममित्येव मन्यन्ते तस्माद्धर्मकलं श्रृणु ॥
सर्वयज्ञप्रदानस्य अश्वमेधस्य यत्फलं ॥८१॥
प्राप्नोति च परन्देवि ! बर्षे द्वादशमे नर: ॥
एतत्प्रोक्तं मया देवि ! किम्भूय: श्रोतुमिच्छसि ॥८२॥

इति शिवधर्म उमामहेश्वरसंवादे गृहाश्रमेसप्तमोऽध्याय ॥७॥

अथ पशुपतिमते शिवधर्मे महाशास्त्रे उमामहेश्वरसंवादे

अष्टमोऽध्यायः

ॐ नमः शिवाय

॥ देव्युवाच ॥

गृहाश्रमेषु वर्त्तन्ते यथान्यायं दृढव्रताः ॥
नास्यां पृथिव्यां भगवन् ! नरनारीजनास्तथा ॥८३॥
यथोक्तं न चरिष्यन्ति आचारं गृहमेधिनां ॥

॥ भगवानुवाच ॥

युगदोषाद् वरारोहे ! नरनारीजनास्तथा ॥८४॥
भविष्यन्ति न सन्देहो लोभोपहतचेतसः ॥
कूटकापटिकाश्चैव सत्यार्जवविवर्जिताः ॥८५॥
नरानारीजनाश्चैव सुप्तलज्जा भवन्ति ते ॥
ततस्ते लुप्तमर्यादा गुरुदैवतवर्जिताः ॥८६॥
मातुला भागिनेयाश्च पिता पुत्राश्च बान्धवाः ॥
वञ्चनाबहुलोभाश्च भविष्यन्ति परस्परं ॥८७॥
माता पितृभ्यो निस्नेहा नरा भार्यावशानुगाः ॥
न श्रृणोति पितुः पुत्रो न स्नुषा भ्रातरो न च ॥८८॥
न भृत्या न कलत्राणी न भजन्ति नराधमाः ॥
उत्सृज्य दारकौमार परदारेषु रज्यते ॥८९॥
नष्टलज्जा दुराचाराः शीलभ्रष्टा नराधमाः ॥
सङ्करस्य च कर्त्तारो गोत्रनाशकुलानि च ॥९०॥
अगम्यगामिनश्चैव सततं लोभचक्षुषः ॥
एवं कलियुगे प्राप्ते नरनारीजनास्तथा ॥९१॥
त्यक्तलज्जा भविष्यन्ति शीलब्रतविवर्जिताः ॥

॥ उमोवाच ॥

कथं कलियुगन्नाम कुतश्चैव प्रवर्तते ॥९२॥
आदिमध्यावसानेषु प्रकृतिश्च यथाविधिः ॥
चातुर्वर्ण्यं महीपाला ये च पाखण्ड दीक्षिताः ॥९३॥

युगमासाद्य भगवन् ! प्रचरिष्यन्ति ते कथं ॥
तत्तथैवानुपूर्वेण भगवन् ! वक्तुमर्हसि ॥९४॥
उमया ह्येवमुक्तस्तु महादेवोऽव्रवीदिदं ॥

॥भगवानुवाच॥

पृथिव्या भूमिपालानां सर्वेषां निधनानि च ॥९५॥
महामात्येषु भृत्येषु समित्रगुरुबन्धुषु ॥
हतो दुर्योधनो देवि कुरुवंशक्षये कृते ॥९६॥
भारावतरणे वृष्टे राज्यं प्राप्ते युधिष्ठिरे ॥
ततः कलियुगे देवि ! व्यतिते द्वापरे युगे ॥९७॥
निवृत्ते युद्धसम्भूते प्रशस्ते नृपमण्डले ॥
यत्र धर्मो ह्यधर्मेण सत्यं यत्रानृतेन च ॥९८॥
वर्तते तद्युगं घोरं सर्वभूतभयावहं ॥
प्रायो दुर्भिक्षबहुलं सुभिक्षञ्चात्र दुर्ल्लभं ॥९९॥
भविष्यन्ति न सन्देहः सर्वदोषैरुपद्रवैः ॥
नारीणाञ्च नराणाञ्च चिन्ताशोकविवर्द्धनं ॥४००॥
अप्लसौख्यं वहुक्लेशं युगानामधमं युगे ॥
कलौ तु प्रथमो राजा धर्मपुत्रो युधिष्ठिरः ॥१॥
धर्मज्ञो राजधर्मज्ञः प्रजापालनतत्परः ॥
सत्यधर्मस्थितो राजा नित्यं राष्ट्रहिते रतः ॥२॥
धर्मेष्वभिरतो नित्यं देवतातिथिपूजकः ॥
रक्षते चैव धर्मेण प्रजारक्षणमेव च ॥३॥
युधिष्ठिरान्ता राजानः शेषाः कलिवशानुगाः ॥
कलिना त्वभिभूतास्ते लोभेन च वशीकृताः ॥४॥
भूमिपाला भविष्यन्ति राजधर्मविवर्जिताः ॥
धर्मवेदयमानास्ते कालेन वशमागताः ॥५॥
अधर्मेण तथा देवि ! प्रचरिष्यन्ति पार्थिवाः ॥
असद्भुतैस्तु ते दण्डात्तथाकरमुपद्रवाः ॥६॥
पीडयन्ति स्वराष्ट्राणि परराष्ट्रे हितरेताः ॥
यथैव परराष्ट्रेषु तथैव विषये नृपाः ॥७॥
ग्रामाणन्नगराणाञ्च चरिष्यन्ति धनक्षयं ॥
तैस्तैरुपायैर्वहुभिर्भूता भूतेषु पार्थिवाः ॥८॥
हिरण्यञ्च हरिष्यन्ति प्रजानां लोभमोहताः ॥
परस्परं विरुध्यन्ते पार्थिवास्तु यशस्विनि
भयार्त्ते परराष्ट्रेषु विद्रवन्ति यतस्ततः ॥९॥

परस्परेण हन्यन्ते देशा यास्यन्ति संक्षयं ॥१०॥
अपि क्षयेषु लोकेषु तादृग्ग्राह्यं भविष्यति ॥
एवं दुःखभयोद्विग्ना नरादुर्भिक्षपीडिताः ॥११॥
कथं धर्मञ्चरिष्यन्ति कलिनोपहता नराः ॥
भृत्यानाम्भरणार्थन्तु महाक्लेशेन मानवाः ॥१२॥
भविष्यन्ति न सन्देहः सत्याजवविवर्जिताः ॥
श्रेष्ठिनः सार्थवाहाश्च अमात्या मन्त्रिणस्तथा ॥२३॥
कार्याकार्यविशेषज्ञा लोभमोहतमोवृताः ॥
यथान्यायं यथाशास्त्रं न करिष्यन्ति तें तथा ॥१४॥
मूल्यैः क्रीतं विवादेन भविष्यन्तिनयोत्तरं ॥
कथं धर्मञ्चरिष्यन्ति कलिनोपहता नराः ॥१५॥
आदीं कृत्वा महीपालं ये च पाखण्डदीक्षिताः ॥
भविष्यन्ति न सन्देहः सर्वत्यागविवर्जिताः ॥१६॥
देवानामपि ये देवा भूमिदेवा द्विजोत्तमाः ॥
तथा विप्रा भविष्यन्ति वेदव्रतविवर्जिताः ॥१७॥
होममन्त्रक्रियाहीनाः शूद्रकर्मोपजीविनः ॥
दम्भकार्यानृता पापा मिथ्याचारे सदा रताः ॥१८॥
अहन्यहनि क्लिश्यन्ते पुत्रदारगृहादिषु ॥
लोभमोहव्रताश्चैव हिंसकाश्चौरकप्रियाः ॥१९॥
कुत्सितानाञ्च वर्णानां करिष्यन्ति प्रतिग्रहं ॥
ब्राह्मणास्तापसा ये च वर्तमानाः स्वकर्मसु ॥२०॥
यथा तेजस्विनः सर्वन्न भविष्यन्ति ते तथा ॥
ब्राह्मणानां यथा तेजो निर्द्दहेत्पृथिवीमपि ॥२१॥
युगदोषाद्वरारोहे ! तत्तथा न भविष्यति ॥
निस्तेजसो भविष्यन्ति यथा लेख्यगता नराः ॥२२॥
परिभूतास्त्रिवर्गस्य शूद्राणा वशवर्त्तिनः ॥
वृषलीपतयो विप्रा भविष्यन्ति न संशयः ॥२३॥
ब्राह्मणीपतयः शूद्राः शुद्रस्यैव तु ब्राह्मणी ॥
कुलानामकुलानाञ्च विशेषो नोपलभ्यते ॥२४॥
सर्वन्तत्समसङ्कीर्णं शूद्रकर्म्मप्रतिष्ठितं ॥
शूद्रा विप्रसमाचाराः शूद्राचाराश्च ब्राह्मणाः ॥२५॥

एवं शूद्रसमाचारा द्विजा देवि ! युगक्षये ॥२६॥
श्रुतवन्तात्मवन्तश्च देवतातिथिपूजका: ॥
शूद्रा वेदमधीयन्ते युगान्ते समुपस्थिते ॥२७॥
यथा शूद्रास्तथा विप्रास्तीर्थाभिगमन प्रिया: ॥
धर्माधर्मविशेषज्ञा : कालधर्मविवर्जिता: ॥२८॥
एवमन्तर्हिता धर्मा भविष्यन्ति युगक्षये ॥
विप्रा विप्रत्वमुत्सृज्य लुप्तलज्जानृतावृता: ॥२९॥
भविष्यन्ति न सन्देहो राजा पौरुषसेवका: ॥
छिद्रानुसारिणश्चैव प्रहरन्ति नृशंसता ॥३०॥
एवं प्रवर्तमानेषु ब्राह्मणो भ्रश्यते तदा ॥
प्रत्यन्त सेविनश्चैव नीचकर्मोपजीविन : ॥३१॥
शूद्रकर्म्मेण जीवन्ते द्विजा: शूद्रकुलेषु च ॥
एवमल्पोदका मेघा ह्यल्पसस्या च मेदिनी ॥३२॥
निष्पन्नानाञ्चशस्यानां राष्ट्रोत्पातो भविष्यति ॥
स्वराष्ट्रे पराराष्ट्रे वा उत्पातोपि भविष्यति ॥३३॥
मशका मक्षिका दंशा: प्रचुरा: बहव: शुका: ॥
देशान्तरेषु ग्रामेषु तथा क्षेत्रान्तरेषु च ॥३४॥
विषमा सस्यनिष्पत्तिर्मण्लेषु भविष्यति ॥
क्वचित्सम्पद्यते सस्यं क्वाचित्सस्यं विपद्यते ॥३५॥
एवं सुभिक्षदुर्भिक्षम्भविष्यन्ति जनक्षय: ॥
रसातलगता मेघा: अप: शोषसमुद्भव: ॥३६॥
नराणाञ्जीवनोपाय: पर्यायेण भविष्यति ॥
नात्यन्तसुखिनो देशा नात्यन्तदु:खभोगिन: ॥३७॥
तथैव दु:खदु:खानां प्राप्नुवन्ति न संशय: ॥
शुभाशुभमिदन्देवि ! युगदोषाद् भविष्यति ॥३८॥
एतत्सर्वं समाख्यातं कलिंदोषाद्वरानने ! ॥३९॥

इति शिवधर्मशास्त्रे उमामहेश्वरसंवादे कलियुगवर्णनन्नाम
अष्टमोऽध्याय : ॥८॥

अथ पशुपतिमते शिवधर्मे महाशास्त्रे उमामहेश्वरसंवादे

नवमोऽध्यायः

ॐ नमः शिवाय

॥ देव्युवाच ॥

यद्येवं युगदोषेण राजानो ब्राह्मणास्तथा ॥
लुप्तमर्यादनिर्लज्जाः स्वकर्मपरिवर्जिताः॥४०॥
एवं संक्षिप्यते धर्मः कलिमूले युगाधमे ॥
ग्रहा रुक्षविवर्णाश्च नक्षत्र ज्योतिषाणि च ॥४१॥
वियानेन गमिष्यन्ति न च युञ्जति तत्तथा ॥
तेषां दोषेणदुर्भिक्षं हाहाभूतं भविष्यति ॥४२॥
विरुध्यन्ति च राजानो नक्षत्राणां विरोधिता ॥
परस्परं विरुध्यन्ति निरुध्यन्ति परस्परं ॥४३॥
चन्द्रसूर्यग्रहास्तारा विषमा यान्ति ते कथं ॥
एतदिच्छाम्यहं श्रोतुं भगवन् ! वक्तुमर्हसि ॥४४॥

॥ भगवानुवाच ॥

श्रृणु देवि ! यथातत्वमनृतन्नह्यहम्वदे ॥
युगदोषा वरारोहे न च तथ्यम्भविष्यति ॥४५
पशुपालादयो मूर्खा ज्योतिषा ज्ञानपाठकाः ॥
ग्रामे ग्रामे भविष्यन्ति कालज्ञानविवर्जिताः ॥४६॥
न च तथ्यं वदिष्यन्ति नक्षत्राणि ग्रहाणि च ॥
एवं विलुप्यते योगी ते कथं पूज्यते तथा ॥ ४७ ॥
ग्रहाणाञ्च विवर्णानि न ज्ञायन्ति च ते तथा ॥
अवश्यन्ते गमिष्यन्ति नरा रोगेण मोहिताः ॥४८ ॥
ज्योतिषा ज्ञानआदेशा न भविष्णन्ति ते तथा ॥
तेषां दोषेण दुर्भिक्षं न च युज्यन्ति ते ग्रहाः ॥४९॥
अवशा राजमात्याश्च विरुध्यन्ति परस्परं ॥
देशानान्नगराणाञ्च तथा गोब्राह्मणाश्च ये ॥५०॥
ग्रामञ्जनपदानाञ्च राष्ट्राणि नगराणि च ॥
नक्षत्राणां वियोगेन राष्ट्रोत्पातो भविष्यति ॥५१॥

दुर्भिक्षं जनमारी चु प्रवर्तन्ते युगक्षये ॥
आयुः क्षयेणापदिष्टं युद्ध कुर्वन्ति पार्थिवाः ॥५२॥
अकार्येण वलं कोपं कारयन्ति च विक्रमाः ॥
देवाधीनञ्च योधानां रणेजयपराजयौ ॥५३॥
क्षीणायुर्वध्यते राजा भयं प्राप्नोति चापरः ॥
देशानान्नगराणाञ्च विनाशें पर्युपस्थिते ॥५४॥
आयुःक्षये नरेन्द्राणां विनियुज्यन्ति ज्योतिषः ॥
नक्षत्राणि वियुज्यन्ति मासानि च ऋतूनि च ॥५५॥
यत्किञ्चिदशुभं लोके पश्यन्ति मग पक्षिणाम् ॥
निवेदयन्ति ग्रामेषु तप्यन्ते मुपलक्षयेत ॥५६॥
काकाः श्येनकपोताश्च गध्रो यत्रैकपादपे ॥
समाबृतानि वर्त्तन्ते सर्वे मांसाशिनः खगाः ॥५७॥
निवेदयन्ति ते मारी ग्रामेषु नगरेषु वा ॥
अरण्यवासिनः सत्वा वराहमृगपक्षिणः ॥५८॥
सिंहव्याघ्रश्रृगालश्च स्वानः कुक्कटयथपाः ॥
प्रविशन्ति स्वयन्तत्र ग्रामेषु नगरेष वा ॥५९॥
तेषां विनाशो देशानाम्पत्तनानान्तथैव च ॥
महामेघागमाश्चैव यदा पश्यन्ति स्थीवरे ॥६०॥
मयूराः कोकिलाश्चैव पक्षिणो वहबस्तथा ॥
नदन्ति भैरवन्नादमूर्ध्वं तुण्डा दिशोदश ॥६१॥
मध्यान्हे चार्द्धरात्रे वा आदित्याष्तमनोदयो ॥
न प्रशस्तमुभे सन्ध्ये व्याधिन्तस्य समादिशेत् ॥६२॥
ग्रहाणाञ्चरितञ्चैव नक्षत्राणाञ्च या गतिः ॥
राष्ट्रोत्पातनिमित्तश्च तस्मिन्देशे महदभयं ॥६३॥
दुर्भिक्षं वा भवेत्तत्र राजावासं विरुध्यति ॥
मध्यदेशश्च यो राजा वध्यते नात्र संशयः ॥६३॥
प्रत्यन्तवासिनो राजःप्रभवन्ति नरेश्वराः ॥
यस्मिन् राष्ट्रेषु देशेषु ग्रामे जनपदेषु च ॥६४॥
निरुद्विग्ना वसन्त्येते तस्मिन्देशे नराधिपाः ॥
इत्युत्पातनिमित्तञ्च यथा तथ्य मुदाहृतं ॥६५॥

॥ देव्युवाच ॥

कथं ह्यृतूनान्देशस्य युगदोषो भविष्यति ॥

नोदिच्छाम्यहं श्रोतुम्भगवन् ! वक्तुमर्हसि ॥६६॥

॥ भगवानुवाच ॥

अकालजं पुष्पफलमकालपतितं शिरः ॥
अप्राप्तयौवनानाश्च प्रादुर्भावो भविष्यति ॥६७॥
नित्यं काम कथानाञ्च भविष्यन्ति न लज्जिताः ॥
नारीणाञ्च नराणाञ्च स्वच्छन्दगतिचारिणी ॥६८॥
दुर्लभाश्च स्त्रियो देवि ! भविष्यन्ति पतिव्रताः ॥
दौशील्याश्चापिनारीणान्न भृत्यवशगामिनी ॥६९॥
विकल्पबहुभिश्चैव वस्त्रा भरणभूषणैः ॥
दन्तानाश्चैव रङ्गेन केशसंयमनेन च ॥७०॥
लीलागति विमानेन तथा विपेक्षणेन च ॥
एवं बिकारैर्वहुभिस्सञ्चरिष्यन्ति योषितः ॥ ७१॥
स्त्रीणां व्युत्क्रान्तमर्यादा एवं यास्यन्ति संक्षयं ॥
पुरा क्रुद्धादिशेन्माता तुष्टा यच्चाभिनन्दति ॥७२॥
नातिक्रामन्ति तन्देवि ! धर्मस्तत्र प्रतिष्ठितः ॥
नाप्राप्ते दीयते ज्ञानं धर्मोयास्यति संक्षयं ॥७३॥
वृच्छनीया भविष्यन्ति रागोपहतचेतसा ॥
न च लज्जा न मर्यादा गुरुणामवमन्यकाः ॥७४॥
स्वयमेव तदा कन्या भर्त्तारं वरयिष्यति ॥
नरनारी भविष्यन्ति मद्यव्यसनसेविताः ॥७५॥
अवक्तव्यानि भाषन्ते लुप्तलज्जा भविष्यति ॥
भविष्यन्ति नसन्देहः स्वधर्मव्रतवर्जिताः ॥७६॥
वञ्चयन्ति च भर्तारं नैकोपायेन योषितः ॥
जायन्ते सङ्कराः सर्वे न वश्यपितृमातृगाः ॥७७॥
मोहिता द्वेषरागेण रूपदर्पबलेन च ॥
एवं संक्षीयते धर्मो रागोपहतचेतसां ॥७८॥

इति शिवधर्मशास्त्रे उमामहेश्वरसंवादे नवमोऽध्याय ॥९॥

अथ पशुपतिमते शिवधर्मे महाशास्त्रे उमामहेश्वरसंवादे

दशमोऽध्यायः

ॐ नमः शिवाय

॥ देव्युवाच ॥

यद्येवं युगदोषेण नरनारीजनास्थता ॥
लुप्तलज्जा भविष्यन्ति धर्मयास्यति संक्षयं ॥७९॥
कथं लज्जाभविष्यन्ति लज्जा संक्षीयते कथं ॥
कथं भर्तुर्वशा नारी भवतीह पतिव्रता ॥८०॥
एतदिच्छाम्यहं श्रोतुम्भगवन् ! बक्तुमर्हसि ॥
एवमुक्तस्तु देव्याया : प्रत्युवाच महेश्वरः ॥८१॥

॥ देवदेव उवाच ॥

विपरीत यदाकालवालो बृद्धो भविष्यति ॥
तथा बृद्धा भविष्यन्ति बालानां वशवर्त्तिनः ॥८२॥
पृच्छनीया भविष्यन्ति वालाः पण्डितमानिनः ॥
तथा बृद्धो भवेद्वालो भविष्यति युगाधमे ॥८३॥
सर्वारम्भेषु भृत्यानां कन्यानां वशवर्त्तिनः ॥
वालो बृद्धसमाचारा बृद्धावालाः सपण्डिताः ॥८४॥
ज्ञानिनः पण्डिता वाला न भविष्यन्ति ते तथा ॥
एवं कलियुगे प्राप्ते नरनारीजनास्तथा ॥८५॥
कृतघ्ना वहवोलोके कृतज्ञाश्चैव दुर्लभाः ॥
तरुणीं भार्यामिच्छन्ति बृद्धास्ते पुरुषाधमाः ॥८६॥
बृद्धापि च तथा नारी तरुणंपतिमिच्छति ॥
एवं नारी नराश्चैव भविष्यन्ति न लज्जिताः ॥८७॥
वैरै धर्मञ्जगत्सर्वे अन्योन्यवधमोषका : ॥
वसत्यसमयास्थाता भविष्यन्ति युगागमे ॥८८॥
अस्मिन कलियुगे धन्याः श्रुत्वागमपरायणाः ॥
धर्मशीला भविष्यन्ति दानशीलातिथिप्रियाः ॥८९॥
कृतज्ञाः सत्यसन्धाश्च जितक्रोधा जितेन्द्रियाः ॥
अल्पाल्पमपि ये धर्मं करिष्यन्ति युगाधमे ॥९०॥
फलं शतगुणं देवि ! लभिष्यन्ति न संशयः ॥
ततो बर्षशतं पूर्णं तपः कृतयुगे नराः ॥९१॥

युगान्ते वर्षमेकन्तु सममेतद् भविष्यति ॥
श्रूयतां कारणन्देवि ! यथा शतगुणं फलं ॥९२॥
भविष्यति युगस्यान्ते दानस्य च दमस्य च ॥
तपो दमसुचीर्णस्य तीर्थाभिगमनस्य च ॥९३॥
विपरीतं भवेत्सर्वे भविष्यन्ति युगक्षये ॥
वीर्यं रसायनानाञ्च मूलमन्त्रौषधानि च ॥९४॥
गवान्तेजो रसश्चैव सर्वे यास्यन्ति संक्षयं ॥
क्षीणवीर्यरसालोके प्रजा दौर्वल्यमागताः ॥९५॥
कः समर्थस्तदा देवि ! तपस्तप्तुं हि मानवः ॥
केशदन्तविनाशञ्च वलीपलितमस्तकं ॥९६॥
पूतिगन्धा मलीना च इन्द्रियघ्ना तथैव च ॥
सर्वेषामेव भूतानाञ्जरा रूपविनाशिनी ॥९७॥
प्राणक्षयकरी नित्यं प्रादुर्भूता भविष्यति ॥
यथोक्तानि स्वतेन्द्रेषु न करिष्यन्ति लिङ्गिषु ॥९८॥
पाखण्डा दूषयिष्यन्ति स्वाचारव्रतवर्जिताः ॥
भविष्यन्ति युगस्यान्ते सारम्भाः सपरिग्रहाः ॥९९॥
श्रवणा नाम पाखण्डाः येच काषायवाससः ॥
बुद्धापदेशिनो धर्मान् मोक्षमार्गशुभाङ्गतिं ॥५००॥
परेषां कथयिष्यन्ति न करिष्यन्ति वै स्वयं ॥
ते स्वकार्यपरिभ्रष्टाः शीलव्रतविवर्जिताः ॥१॥
स्त्रीषुलोभा भविष्यन्ति श्रवणा मैथुनप्रियाः ॥
विहरन्ति विहारेषु वसथावसथेषु च ॥२॥
कुलस्त्री भिन्नमर्यादा स्वदारपरिवर्जिताः ॥
गर्भस्योत्पादनङ्कृत्वा तेषान्धर्म्मः पराङ्मुखः ॥३॥
तेभ्योदत्तं वृथा दानं भस्मीभवति दारुवत् ॥
नहि तस्य फलन्दाता भुङ्क्ते चात्र परत्र च ॥४॥
उषरेषु यथा वृष्टिर्भस्मराशौ यथा हुतं ॥
तद्वन्नश्यति तद्धीनं मन्त्रा हविनियोजिताः ॥५॥
आमपात्रेषु यो दद्याद् दधि क्षीरं घृतं मधु ॥
पात्रदोषाद्विनश्यन्ति ते यथा तच्च भाजनं ॥६॥
शीलवृत्तिविनीतेषु स्वाचारनिरतेषु च ॥
अल्पाल्पमपि दीयेत तेभ्यो दानं विशिष्यते ॥७॥
लिङ्गिनो गृहिणश्चैव शीलवृत्तिविवर्जिताः ॥

भविष्यन्ति न सन्देहस्तपस्तप्तुन्न रज्यते ॥८॥
ये तु तेषां सुनियताः शास्त्रागमपरायणाः ॥
क्षान्ता दान्ता विनीताश्च जितक्रोधा जितेन्द्रियाः ॥९॥
स्वकार्यनिरता नित्यं यथोक्तव्रतचारिणः ॥
तेषान्न किञ्चिद् दुष्प्राप्यं लिङ्गिनां ब्रह्मचारिणां ॥१०॥
मोक्षमार्गोपपन्नानां मोक्षस्तेषां ध्रुवोगतिः ॥
चतुर्णाञ्चैववर्णानां तेषु भक्तिर्विशिष्यते ॥११॥
चातुर्वर्णविकर्मस्थैः पाखण्डैर्विवधीकृतं ॥
व्युत्पथप्रतिपन्नेषु धर्मा यास्यन्ति संक्षयं ॥१२॥
एवं सर्वेषु वर्णेषु विकर्मस्थेषु जातिषु ॥
वियोनिषु चरिष्यन्ति जायन्ते वर्णसङ्कराः ॥१३॥
वृथामुण्डेषु लुब्धेषु स्वाचारवर्जितेषु च ॥
लोके कषायवस्त्रेषु युगदोषा यशस्विनि ॥१४॥

॥ देव्युवाच ॥

चातुर्वर्ण्यस्य भगवन् ! स्वे कर्मसु गुहावहे ॥
यत्तेषामुचितं कर्म यश्च धर्मं समाचरेत् ॥१५॥
ये च पाखण्डिनो वर्णो ये च धर्मपरायणाः ॥
सर्वेषामेव वर्णानां तत्त्वतो वक्तुमर्हसि ॥१६॥

॥ देवदेव उवाच ॥

शूद्रे कर्म कृषिर्वैश्य सङ्ग्रामद्ध क्षत्रियेषु च ॥
ब्रह्मचर्यन्तपोमन्त्रं सदा सत्यं च ब्राह्मणे ॥१७॥
विकर्मस्थेषु वर्णेषु धर्मः संक्षीयते तदा ॥
अधर्मो वर्धते चापि धर्मो हीयेत भामिनि ! ॥१८॥
पार्थिवानामधर्मात्ते प्रजानामवसीदति ॥
धर्मविद्वेषणञ्चैव पार्थिवानां यशस्विनि ! ॥१९॥
उत्पद्यन्ते युगस्थान्ते नरनारीजनास्तथा ॥
अधर्मशीला दुर्वृत्ताः स्वाचारव्रतवर्जिताः ॥२०॥
पापकर्मरतानित्यं परदारविमर्दकाः ॥
मद्यमांसप्रिया नित्यं दुःशीलाः कुलदूषकाः ॥२१॥
कुलबंशक्षयकरा दुर्वृत्तश्चैव जायते ॥
अल्पायुषो दरिद्राश्च बहुपुत्राश्च पोषकाः ॥२२॥
परकर्मकराः पुत्राः परपिण्डोपजीविनः ॥

न धर्मं प्रचरिष्यन्ति तृड्बुभुक्षार्दिता नरः ॥२३॥
वाणिज्येनोपजीवन्ति पालयन्ति ह्यजाविकान् ॥
नष्टहोमक्रिया भ्रष्टाः स्वाध्यायव्रतचारिणः ॥२४॥
अन्योन्यन्न सहिष्यन्ति देवि ! ह्यल्पायुषो नराः ॥
द्विवर्षंवर्षमेकं वा परमायुर्भविष्यति ॥२५॥
पञ्चमे वाथ षष्टे वा वर्षे वा सप्तमाष्टमे ॥
तत्र प्राणान् विमोक्ष्यन्ति नरनार्यो युगागमे ॥२६॥
बर्षे हि दशमे कन्या पुत्रपौत्रान् प्रपश्यति ॥
एवं कलियुगस्यान्ते पर्यायेण भविष्यति ॥२८॥
सर्वभूतहितन्देवि! तद्युगंपरिवर्तते ॥
शतं वर्ष सहस्राणिपरमायुर्भविष्यति ॥२९॥
तदा धर्माः प्रवर्तन्ते दानशीलाश्च ब्राह्मणाः ॥
बहूदकास्तथा मेघा बहुसस्या च मेदिनी ॥२९॥
स्वयंरोहाणि धान्यानि भविष्यन्ति तदाव्ययं ॥
ब्राह्मणानान्तथा तेजः पुनरेव भविष्यति ॥३०॥
निर्दहेत्पृथिवीं कृत्स्नां सशैलवनकाननाम् ॥
अनुग्रहसमर्थाश्च दाने चाध्यापने रताः ॥३१॥
दमसत्यव्रतपरा भविष्यन्ति वरप्रदाः ॥
षट्कर्मनिरता विप्राः सदा ध्यानपरायणाः ॥३२॥
धर्मशीलाश्च राजानो ब्राह्मणाः सत्यवादिनः ॥
यज्ञस्वाध्यायदानेषु प्रजापालहिते रताः ॥३३॥
वैश्याः स्वकर्मनिरताः सत्यार्जवपरायणाः ॥
त्रिषु वर्णेषु ये शूद्राः शुश्रूषणपरायणाः ॥३४॥
स्त्रियः पतिव्रता नित्यं स्वदारनिरता नराः ॥
गुरुशुश्रूषका बाला मातापितृवशानुगाः ॥३५॥
न च व्युत्क्रान्तमर्यादा गुरूणां वशवर्त्तिनः ॥
रतायनानि सुश्रोणि मूलमन्त्रौषधानि च ॥३६॥
गवान्तेजो रसश्चैव पृथिवी सस्यवर्द्धनी ॥
महावीर्याणि सत्वानि जायन्ते सुकृते युगे ॥३७॥
युगानामानुपूर्वेण पर्यायेण भविष्यति ॥
गुणदोषाश्च ये देवि ! युगानामनुपूर्वशः ॥३८॥
ते तथैव भविष्यन्ति पुनरेवागते युगे ॥
धर्मः कृतयुगे देवि! चतुष्पादः प्रतिष्ठितः ॥३९॥

त्रिभिस्त्रेता युगे प्राप्ते द्वाभ्यां वै द्वापरेस्थितः ॥
एकपादावशेषस्तु धर्मः कलियुगे स्मृतः ॥४०॥
एष कालो मया प्रोक्तो युगानामनुपूर्वशः ॥
अतः परतरन्देवि ! किम्भूयः श्रोतुमिच्छसि ॥४१॥

इति शिव धर्मशास्त्रे उमामहेश्वरसंवादे युगान्त लक्षणन्नाम
दशमोऽध्यायः ॥१०॥

अथ पशुपतिमते शिवधर्मे महाशास्त्रे उमामहेश्वरसंवादे

एकादशो ऽध्याय:

ॐ नम: शिवाय

॥ देव्युवाच ॥

कथं सम्भवते जीव: शरीरेषु शरीरिणां ॥
पृथक्कर्मविपाकेन जायते यमलौकिकं ॥४२॥
एक कुक्षौ च सम्भूते वियुज्यन्ति च ते कथं ॥
कथं गर्भगताश्चैव जायन्ते कुक्षिकुष्टका: ॥४३॥
मण्डकुण्डविरूपाश्च खञ्जा विकट्वामना: ॥
जात्यन्धा बधिरा मूका वाचा चाव्यक्तभाषिण: ॥४४॥
सुखदु:खञ्च जीवानां सम्भवो निधनस्तथा ॥
श्रोतुमिच्छामि तत्वेन यथोक्तं वक्तुमर्हसि ॥४५॥

॥ देवदेव उवाच ॥

अरणीं मथ्यमानानां गोमयेन समायुतां ॥
यथा सञ्जायते बन्हिर्द्रुममारुतसम्भव: ॥४६॥
स्त्रीपुंसो: सन्निकर्षेण भगलिङ्गसमायुतं ॥
तथा सञ्जायते जीव: शुक्रशोणितसम्भव: ॥४७॥
लिङ्गाद् विनि:सृतं शुक्रं भगात् शोणितसम्भव: ॥
शुक्रशोणितसंयोगाज्जीव: सञ्जायते तदा ॥४८॥
वायु: संक्षिपते जीवं गर्भस्थानानि सेवयेत् ॥
एकधा द्विस्त्रिचत्वार: पञ्चधा बहुधा तथा ॥४९॥
यथा सञ्जायते वायुर्ज्जीव: सञ्जायते तथा ॥
एकस्मिन्नेव नक्षत्रे मुहूर्त्ते करणे तथा ॥५०॥
एकवीज प्रसूतानां यमलानां यशस्विनि ॥
आयु: कीर्ति: सुखं दु:खं पृथक् केन विधीयते ॥५१॥
यद्येतत्पूर्वविहितं तत्तथैव भविष्यति ॥
पुराकृतेषु कर्म्मसु स्त्रीणां गर्भेनियुज्यते ॥५२॥
यदा हन्यति दुर्वातैर्विकल्पो जायते तदा ॥
दुर्वातेन हते गर्भे जायन्ते कुक्षिकुष्ठका: ॥५३॥

मष्टकुष्टविरूपाश्च खञ्जंविकटवामना: ॥
जात्यन्धा बधिरा मूका वाचाचाव्यक्तभाषिण: ॥५४॥
अतिस्थूलोष्ठजिव्हाश्च तथा जडान्धमोहिता: ॥
अपूर्णसमये कश्चिन्मृतो गर्भ: प्रसूयते ॥५५॥
मूढगर्भहता नारी वदनान्त: प्रपद्यते ॥
य एवं पूर्वविहितं स्त्रीणां गर्भ: प्रसूयते ॥५६॥
पूर्वं विधीयते मृत्यु: पश्चाद्‌गर्भेषु जायते ॥
यस्मिन् वसति यत्कालं यस्मिन् काले निशाम्यते ॥५७॥
यस्मिन् मुहूर्ते सम्प्राप्ते तत्रैव निमिषान्तरे ॥
न चातिक्रमितुं शक्यं सर्वेषामेव जन्तुनां ॥५८॥
मर्त्तव्यस्य वरारोहे नहि शक्यं पलायितुं ॥
तत्रयेन च मर्त्तव्यं गन्तव्यमवशेन च ॥५९॥
अवशो नीयते तत्र मृत्युञ्च यमकिङ्करै: ॥
अध्वाने चाप्यरण्ये वा क्षेत्रे वा यदि वा खिले ॥६०॥
नदी तोयतडागे वा राजमार्गान्तरेण वा ॥
स्वदेशे स्वगृहेवापि स्वजनस्य परस्य वा ॥६१॥
परदेशे परजने परदारकृतेन वा ॥
विग्रहे गृहदाहे वा कूपप्रपतने न वा ॥६२॥
वनपर्वतदुर्गे वा सिंहशार्दूलराक्षसै: ॥
भुजङ्गमेन दष्टस्य तथान्यैर्विषकीटकै: ॥६३॥
समुद्रे वा वरारोहे मरुत् प्रपतने च वा ॥
द्रव्यमाशै: क्षुधा ग्राम्या गवां श्रृङ्गेन वा पुन: ॥६४॥
सङ्ग्रामेष्वथ शस्त्रेषु ह्यथवा गजवाजिषु ॥
कुन्तप्रहरणेनाथ तथा मृत्युरुपद्रवै: ॥६५॥
चोरकैर्वधवन्धाभ्यां शूलशल्यहतेन वा ॥
भृशं कशप्रहारेण तथा घोरैरुपद्रवै: ॥६६॥
दण्डेन लोष्टेना वापि श्रृङ्गिश्रृङ्गहतेन वा ॥
व्याधिक्षीणोथ रोगेन बज्राशनिहतेन वा ॥६७॥
मूलकर्मप्रयोगेण रज्जुग्रहणमृत्युना ॥
निशानशस्त्रोपहतो हतो वा वायुना तथा ॥६८॥
वुभुक्षो वा तृषार्त्तो वा जराशोकाग्निविद्रुत: ॥
भृगोश्चापतने चैव मद्यैर्वा विषभोजनै: ॥६९॥
आहारविषमे भुङ्क्ते तथा भक्षमजीर्णयो: ॥

मृत्युनामेवमादीनां संख्या एकोत्तरं शतं ॥७०॥
प्राप्तव्यं बै यथा येन दुःखं वा यदि वा सुखं ॥
तथा विधीयते मृत्युः सर्वेषामेव्र देहिनां ॥७१॥
धनीदारिद्र्यमैश्वर्यमाज्ञा प्रेष्यार्थमेव च ॥
भवितव्यं यथा येन स्वकर्मफलहेतु तः ॥७२॥
यत्रयत्र नियुज्येते जीवाः कर्मवशानुगाः ॥
तत्र तत्र गतिं यान्ति रञ्जितास्वेन कर्मणा ॥७३॥
एवं विधिर्यतस्तस्य गतिः संसारसागरे ॥
गर्भवासगतिः प्राप्ता नाना योनिषु दारुणा ॥७४॥
स्वयं कृतं कर्मफलं स्वयमेवोपभुज्यते ॥
जीवान्नां सुखदुःखञ्च सम्भवो निधनानि च ॥७५॥
एतत्ते कथितं देवि ! किम्भूयः श्रोतुमिच्छसि ॥७६॥

इति शिवधर्मशास्त्रे उमामहेश्वरसंवादे
एकादशोऽध्याय ॥११॥

अथ पशुपतिमते शिवधर्मे महाशास्त्रे उमामहेश्वरसंवादे

द्वादशो ऽध्यायः

ॐ नमः शिवाय

॥ देव्युवाच ॥

यदि ह्यायु:परीमाणङ्कर्म प्रत्ययिकस्य वा ॥
अल्पं वा यदि वा दीर्घञ्जीवानान्निधनन्तथा ॥७७॥
यदि पूर्वकृतैरेव न शक्यन्तन्निवर्त्तितुं ॥
किमर्थं शान्तिकर्माणि मूलमन्त्रौषधानि च ॥७८॥
आतुरेषु च युज्यन्ते वैद्यशास्त्रपरायणाः ॥
मङ्गलानि च युज्यन्ते किमर्थं दैवतानि च ॥७९॥
भवितव्यं यथा येन किं वैद्यैर्ह्यौषधैरपि ॥
एतन्मे भगवन् ! सर्वं श्रोतुमिच्छामि तत्वतः ॥८०॥
देव्यास्तु वचनं श्रुत्वा प्रत्युवाच महेश्वरः ॥

॥ महेश्वर उवाच ॥

औषधं मङ्गलं मन्त्रं ये नराश्चित्रजीविनः ॥८१॥
तेषां सिद्ध्यति सुश्रोणि ! प्रशीदन्ति च देवताः ॥
सहस्रमपि वैद्यानां मूलमन्त्रौषधानि च ॥८२॥
किङ्करिष्यति ते देवि ! नरस्यायुः क्षयो यदि ॥
विशेषकारका वैद्या नराणां चिरजीविनः ॥८३॥
तेषां सिध्यन्ति सुश्रोणि प्रसीदन्ति च देवताः ॥
येषामायु:क्षयो देवि ! विशेषस्तत्रदुर्लभः ॥८४॥
विशेषं यदि वैद्यो हि जीवितव्यं ध्रुवं भवेत् ॥
नराणान्न भवेन्मृत्युरक्षीणा पृथिवी भवेत् ॥८५॥
आतुराणां यदा वैद्यो भवेज्जीवतदायकः ॥
सिद्धं कर्म भवेन्नित्यं स्वयमेवाजरामरा ॥८६॥
निमित्तमात्रवैद्यो हि जीवितमौषधानि च ॥
मङ्गलं शान्तिकर्माणि तथा व्यापादितान्यपि ॥८७॥
व्याधयो हि वरारोहे कर्मजा देहसम्भवाः ॥
सर्वेषामेव भूतानां कर्मक्षयनिवर्त्तिनः ॥८८॥

कश्चिचकित्सति रोगार्त्तान् वराहमहिषान्मृगान् ॥
गजेन्द्रऋषभाश्चैव सिंहव्याघ्रभुजङ्गमान् ॥८९॥
सर्वेषामेव भूतानां दीर्घमायुर्महौषधं ॥
कर्म प्रत्ययिकं ह्यायुरल्पन्दीर्घञ्च देहिनां ॥९०॥
पुरा कृतानां कर्माणां वेपाज्यमिह भुज्यते ॥
आयुरल्पञ्च दीर्घञ्च यथात्मनः शुभाशुभं ॥९१॥
प्राप्नुवन्ति नरा देवि ! यथाकर्म तथात्मनः ॥
यदि स्वेच्छया ग्राह्यं धनमायुञ्चलभ्यते ॥९२॥
दरिद्रो न भवेत् कश्चित् तथैवाल्पायुषो नराः ॥
सुखदुःखञ्च सर्वेषाञ्जीवानामिह नायकं ॥९३॥
न रूपं धनलाभाय न विज्ञानन्न विक्रमः ॥
पुराकृतेषु कर्मेषु भवन्त्येते यथात्मनः ॥९४॥

॥ उमोवाच ॥

किमर्थञ्च प्रकुर्वन्ति ये रसायनिका नराः ॥
ओषधान्यगदाश्चापि महाक्लेशो न मानवाः ॥९५॥

॥ महेश्वर उवाच ॥

रसायनानि दिव्यानि यथोक्तानि यथाविधि ॥
निमित्तमात्रं सुश्रोणि ! नराणां चिरजीविनां ॥९६॥
अल्पायुषप्रयुक्तानि महादिव्यरसायनं ॥
अपथ्यमशनं पीत्वा विषसम्पीयते तथा ॥९७॥
विषश्चापि वरारोहे यदि दीर्घायुषो पिवेत् ॥
जीवितं रक्षितन्तस्य संपद्यतिरसायनं ॥९८॥
यद्वदति च मूढात्मा दीर्घायुस्वरसायनं ॥
अश्रद्धेयमिदं देवि ! कः कालंवञ्चयिष्यति ॥९९॥
रसायनस्य वीर्येण यदि मृत्युर्निवार्यते ॥
राजानो राजमात्याश्च धनिनाऽथ महाधनाः ॥६००॥
जीवितारोग्यमिच्छन्ति तेपि नित्यं रसायने ॥
नूनंलोके च विख्याता भवेयुरजरामराः ॥१॥
किन्नजीवन्ति ते देवि ! ये रसायनिनो जनाः ॥
चन्द्रादित्यौ भवेद्यावत्पर्वतश्च महीतले ॥२॥
एवं रसायनं दिव्यं भवेज्जीवितदायकं ॥
रसायनप्रयोगेण मूलमन्त्रौषधानि च ॥३॥

न तं पश्यामि त्रैलोक्ये यो भवेदजरामरः ॥
तस्मिन् कलियुगे वर्षे परमायुः शतंभवेत् ॥४॥
नरो वा यदि वा नारी जीवेद्वर्षशतं ध्रुवं ॥
कश्चते पुरुषो देवि ! दृष्टो वा यदि वा श्रुतः ॥५॥
पृथिव्यां सागरान्तायां ये रसायनिका नराः ॥
संवत्सरसहस्रेण ये तु जीवन्ति मानवाः ॥६॥
रसायनस्यवीर्येण न भूतन्न भविस्यति ॥
एवं रसायन प्रोक्तं किन्तत्र परिपृच्छसि ॥७॥

॥ उमोवाच ॥

अकालमृत्युर्भगवन् ! तत्वतो वक्तुमर्हसि ॥
किन्नु सत्यं भवेदेन ह्युताहो येकतम्भवेत् ॥८॥
एतन्मे सर्वमाख्याहि यथा तत्त्वमुदाहृतम् ॥
एवमुक्तस्तु देव्यासौ प्रत्युवाच महेश्वरं ॥९॥

॥ देवदेव उवाच ॥

अप्रमत्तप्रमत्तेषु तन्मनस्तत्परायणः ॥
कालः पचति भूतानि कालः संहरते प्रजाः ॥१०॥
न कालस्य प्रियः कश्चिचन्न द्वेष्यो न च मध्यमः ॥
समस्सर्वेषु भूतेषु कालः कालमपेक्षते ॥११॥
ततः पर्यागते काले न शक्यमिति वर्तितुं ॥
अरोगो म्रियते कश्चित् व्याधिक्षीणोपि जीवति ॥१२॥
अयुध्यमाने म्रियते युद्ध्यतश्च न हन्यते ॥
शक्तितोमरकुन्तैश्च असिशूलपरश्वधैः ॥१३॥
संभिन्नांगाश्च जीवन्ति आयुर्म्मर्माणि रक्षति ॥
तृणं वज्रीभवेद्देवि ! नरस्यायुः क्षयो यदा ॥१४॥
जीविते नास्ति मर्तव्यं मर्तव्ये नास्ति जीवितं ॥
मुहूर्त्तमपि सुश्रोणि नजीवन्ति गतायुषः ॥१५॥

स न दृश्यति लोकेस्मिन् भूतोलोके भविष्यति ॥
मानाद्दर्पान्नरो नारी विज्ञानाद्विक्रमेण च ॥१६॥
उपक्रमेण विद्यानां तथा ह्यायुश्चिकित्सकैः ॥
ग्रहातिथ्येन दानेन शान्ति कर्मशतैरपिः ॥१७॥
को हि वञ्चयितुं शक्तः कालस्य नियतं गतिं ॥
अकालमृत्युः सुश्रोणि ! सर्वेषामेवजन्तुनां ॥१८॥
नात्रमेतेमृषावादं वक्तुं शक्तिर्यशस्विनि ! ॥१९॥

इति शिवधर्मशास्त्रे उमामहेश्वरसंवादे द्वादशोऽध्यायः ॥१२॥

अजरामरता

अथ पशुपतिमते शिवधर्मे महाशास्त्रे उमामहेश्वरसंवादे

त्रयोदशो ऽध्याय:

ॐ नम: शिवाय

॥ देव्युवाच ॥

अपि चाल्पायुषा कश्चिद् भवेद् दीर्घायुषो नर: ॥
गर्भे सम्भवमानस्य यथापूर्वकृतेन वै ॥२०॥
कर्म प्रत्ययिकं ह्यायुरल्पदीर्घश्च देहिनां ॥
अल्पायुषो नरो यस्तु निर्माणेनैव निर्मिते ॥२१॥
श्रोतुमिच्छामि दीर्घायु: कथम्भूयो भविष्यति ॥

॥ देवदेव उवाच ॥

श्रूयतां कर्मणाकेन यथा दीर्घायुषो नरा: ॥२२॥
दीर्घायुषत्वं प्राप्नोति नरो नारी यशस्विनि ! ॥
यस्य ब्रह्मा वरन्दद्यादिन्द्रोग्निर्वरुणो यम: ॥२३॥
त्रैलोक्याधिपतिर्विष्णुर्ऋषयश्च तपोधना: ॥
अन्यथा तन्न पश्यामि यस्तु कालं व्यतिक्रमेत् ॥
तेषांवरप्रसादेन यथा दीर्घायुषो नरा: ॥२४॥
आत्मभावेन मां पश्येन्नारी वा यदि वा नर: ॥२५॥
अनुध्याय च मां देवि ! भवति ह्यजरामर: ॥

॥ देव्युवाच ॥

क: कालो दानवो देवो गन्धर्वोरगराक्षसा: ॥२६॥
पिशाच: किन्नरोवाथ कुत: कालस्य सम्भव: ॥
पिता माता च कालस्य किं वा कालो ह्ययोनिज: ॥२७॥
एतदिच्छाम्यहं श्रोतुं भगवान् वक्तुमर्हसि ॥

॥ भगवानुवाच ॥

शरीरमर्धं ते देवि मम चार्धं यशस्विनि ॥२८॥

द्वावेतावेकसङ्घातं रूपं कालस्य निर्मितं ॥
महाकालस्य तद्रूपं यस्य सर्वगतञ्जगत् ॥२९॥
भूतं भव्यं भविष्यञ्च त्रैलोक्यं सचराचरं ॥
एष कालः कलिर्मृत्युः कृतान्तो ह्यजरामरः ॥३०॥
लोकधाता विधाता च विधिरेष प्रजापतिः ॥
सृजते संहरेत्सर्वं लोकानां जीवमव्ययं ॥३१॥
लिङ्गं सृजति भूतानि रुद्रः संहरते पुनः ॥
जीवानां सुखदुःखञ्च सम्भवो निधनन्तथा ॥३२॥
भवितव्यं यथा येन सन्नियुज्यति तत्तथा ॥
स च मूलमिदं सर्वं स्थावरञ्जङ्गमानि च ॥३३॥
एष कालस्य सद्भावः कस्तं कालं व्यतिक्रमेत् ॥
मया दत्तमिदं देवि ! त्रैलोक्यं सचराचरं ॥३४॥
कालस्य सम्भवो ह्येष किन्देवि ! परिपृच्छसि ॥

॥ देव्युवाच ॥

यथा हि दूरमध्वानं मृत्युलोकस्य श्रूयते ॥३५॥
अकस्माच्च गतिस्तत्र क्षणेन पुनरेति सः ॥
जीव प्रविश्य तं देहं स्वप्नान्ते प्रतिबुध्यते ॥३६॥
यथादृष्टाश्चानुभूतं तत्सर्वं कथयेत्पुनः ॥
क्षणेन व्रजते तत्र क्षणेन पुनरेति सः ॥३७॥
एतदिच्छाम्यहं ज्ञातुं भगवन् ! वक्तुमर्हसि ॥

॥ महेश्वर उवाच ॥

षष्टि तानि सहस्राणि योजनानि शतानि च ॥३८॥
मानुषस्य च लोकस्य मृत्युलोकस्य चोत्तरं ॥
आयुःक्षये नरस्तत्र नीयते मृत्युकिङ्करैः ॥३९॥
मृत्युलोकमनुप्राप्तो भूयो भवतिमृत्युमान् ॥
चित्रगुप्तो वरारोहे आयुः सर्वपरीक्षति ॥४०॥
नारीणाञ्च नराणाञ्च पूर्वं सुकृतदुष्कृतं ॥
यदा मृत्युवशं प्राप्ता तदा संक्षिप्यते पुनः ॥४१॥
स्वयं कृतानां कर्म्माणामनभाव्यं हि पूज्यते ॥
गतिः प्रेतपिशाचेषु गन्धर्वोरगराक्षसे ॥४२॥
गणेश्वरेषु यक्षेषु किन्नरेषु नरेषु च ॥
मर्त्यलोकेषु वा भूयस्तिर्यग्योनिशरीसृपे ॥४३॥

मोकान्न लभते कश्चिद्वर्तते ह्यन्तरी भवेत् ॥
यावत्पुत्रोऽथवा पौत्रस्तन्जीवंस्तारयिष्यति ॥४४॥
जीवानां गतयोह्येता या यस्यविहिता गतिः ॥
अवशो नीयते तत्र क्षिप्यते मृत्युकिङ्करैः ॥४५॥
यस्तु यागेन दीर्घायुर्नीयते यमकिङ्करैः ॥
जीवितस्य विशेषेण क्षणेन पुनरेति सः ॥४६॥
गतिरेव हि जीवानां सम्भवो निधनन्तथा ॥
जीवः प्रविश्य स्वन्देहं स्वप्नान्ते प्रतिबुध्यते ॥४७॥
यच्छ्रुतं यच्च नो दृष्टं सर्वं कथय ते तथा ॥
क्षणेन व्रजते तत्र क्षणेन पुनरेति सः ॥४८॥
परस्परगतिर्ह्येषा किम्भूयः श्रोतुमिच्छसि ॥४९॥

इति शिव धर्मशास्त्रे उमामहेश्वरसंवादे त्रयोदशोऽध्यायः ॥१३॥

अथ पशुपतिमते शिवधर्मे महाशास्त्रे उमामहेश्वरसंवादे

चतुर्दशोऽध्यायः

ॐ नमः शिवाय

॥ देव्युवाच ॥

यक्षराक्षसगन्धर्वाः पिशाचोरगकिन्नराः ॥
गणेश्वराश्च जायन्ते धनवन्तो धनेश्वराः ॥५०॥
महाभोगकुलाद्याश्च पुत्रपौत्रप्रतिष्ठिताः ॥
सार्थवाहाश्च जायन्ते भगवन् ! केन कर्मणा ॥५१॥
किन्नु कर्म कृतन्तेन नरनारीजनास्तथा ॥
एतत्सर्वं यथान्यायं तत्वतो वक्तुमर्हसि ॥५२॥

॥ महेश्वर उवाच ॥

यक्षः कुण्डाक्षेरा नाम मणिरुद्रस्तथैव च ॥
यक्षाधिपतयो ह्येष यक्षलोकनिवासिनः ॥५३॥
तेषु भक्ता वरारोहे ! यक्षान् पूजन्ति ये नराः ॥
धूपमाल्योपहरेण पर्वणि सुदृढव्रताः ॥५४॥
उपवासरताश्चैव त्रिरात्रकचतुर्थकैः ॥
सीधुमांसदधिघृतम्मण्डकैर्विविधैः फलैः ॥५५॥
निवेद्य ये करिष्यन्ति यक्षस्थाने दृढव्रतः ॥
यक्षलोकमितो गत्वा यक्षनारीषु क्रीडते ॥५६॥
यदि पुण्यक्षये क्षीणाः कदास्वित्कालपर्ययात् ॥
मानुष्यमागतो भूयो भवन्ति सुखभागिनः ॥५७॥
महाधनपतिश्चैव जायते महती कुले ॥
समृद्धा सुभगाश्चैव सौम्याश्च प्रियदर्शनाः ॥५८॥
आलेख्ययज्ञप्रतिमा रूपवन्तो भवन्ति ते ॥
राजामात्यश्च पूज्यन्ते ग्रामेषु नगरेषु च्र ॥५९॥
एष ते सम्भवो देवि ! यक्षाणाम्परिकीर्त्तितः ॥
किन्नराणां वरारोहे ! श्रूयतां सम्भवो यथा ॥६०॥
मरुत्प्रपतते क्रुद्धा ये म्रियन्ति नराधमाः ॥
तेन रोषेण दश्यूनान्तेषां स्वर्गो न विद्यते ॥६१॥

गिरिदुर्गेषु ते देवि ! जायन्ते किन्नरा नराः ॥
कन्दमूलफलाहारा मधुका मधुभोजनाः ॥६२॥
किन्नरीनरनारीषु क्रीडन्ते गुह्यकन्दरे ॥
एवं संक्रीडमानस्य यदा कर्मक्षयो भवेत् ॥६३॥
मानुष्यं पुनरागम्य कदाचित्कालपर्ययात् ॥
गीतगन्धर्वकुशला भवन्ति मधुरस्वराः ॥६४॥
गीतेषु रमते नित्यं गीतेनार्थान् प्रसाधते ॥
नृत्यकानां कुले जाता येच गायन्ति विद्यया ॥६५॥
तस्मिन् गोत्रेषु जायन्ते रूपिणः प्रियदर्शनाः ॥
पूज्यन्ते गीतशब्देन ग्रामे जनपदेषु च ॥६६॥
तेषामर्थाभिसम्पन्ना भवन्ति सुखभागिनः ॥
एष ते सम्भवो देवि ! किन्नराणां न संशयः ॥६७॥
गन्धर्वाणां वरारोहे श्रूयतां सम्भवो यथाः ॥
गन्धमाल्योपहारेण गन्धर्वानर्चयेन्नरः ॥६८॥
गन्धर्वान् देवि ! पूजन्ति पर्वणी सु दृढव्रताः ॥
गन्धमाल्योपहारेण भक्तान्नैश्च सुसंस्कृतं ॥ ६९॥
आहारैर्विविधैः पानैर्भक्ष्यभोज्यान्नधूपनैः ॥
गन्धर्वगण सेवन्ति पूजयन्ति च ये सदा ॥७०॥
नाना भक्ष्य प्रदानेन सुरासींधुसुरासवैः ॥
मधुमांसमद्य मत्स्यैः फलैर्भक्ष्यैश्च षड्रसै ॥७१॥
पूजयन्ति च ये नित्यं गणान् गन्धर्वसेवया ॥
एवं यः सततं कुर्यात् स गच्छेत्परमाङ्गतिं ॥७२॥
गन्धर्वलोकं यास्यन्ति क्रीडयन्त्यालयोत्तमे ॥
उपचर्यमाणास्तिष्ठेयु गन्धर्वनगरोत्तमे ॥७३॥
नानाविद्याधरैः कीर्णैरप्सरोगणसेविते ॥
गन्धमाल्य प्रदानेन यान्ति गन्धर्वयोनयः ॥७४॥
यदा कर्मक्षयेक्षीणामानुष्यं पुनरागते ॥
मानुष्यमागता भूयोः कदाचित्कालपर्ययात् ॥७५॥
गन्धर्वाणां कुले तत्र जायते विपुले कुले ॥
गन्धमाल्यप्रियो नित्यं शुचिगन्धानुलेपनाः ॥७६॥
शुक्लवस्त्रधराश्चैव ततः स्नानरतिप्रियाः ॥
महाभोगकुलैश्वर्य जायन्ते सुखभागिनः ॥७७॥
गीतगन्धर्वकुशला बलवन्तो धनेश्वराः ॥

ग्रामे ग्रामेषु पूज्यन्ते गन्धमाल्यैश्च पानकैः ॥७८॥
पूज्या संस्कारलभ्यन्ते अर्घ्यासन सुखानि च ॥
तत्र भक्ष्यान्नपानानि आहारविविधानि च ॥७९॥
गन्धर्वश्रेष्ठा जायन्ते महत्वं लभते तु सः ॥
गन्धर्वगणपञ्चैव महागणपतिर्भवेत् ॥८०॥
तेषां हर्त्ता च दाता च भोक्ता चैव महात्मनां ॥
ग्रामिकै राष्ट्रिकैश्चैव पूज्यमानो भविष्यति ॥८१॥
राजसत्कारपूजाश्च भवन्ति विविधानि च ॥
ततः सम्पूज्यते नित्यं ग्रामे जनपदेषु च ॥८२॥
एतत्ते कथितन्देवि ! गन्धर्वाणां यथाविधि ॥
पिशाचाणां वरारोहे ! श्रूयतां सम्भवो यथा ॥८३॥
व्याधिक्षीणो नरा देवि ! शवलाः शौचवर्जिताः ॥
सोच्छिष्टको अधर्मेण देवतायतनेषु च ॥८४॥
उच्छिष्टकारा जायन्ते अशुचिर्भोजनप्रियाः ॥
जायन्ते नात्र सन्देहः पिशाचाः कामरूपिणः ॥८५॥
निशाचरेषु जायन्ते श्मशानेषुकृतालयाः ॥
देशानुपरिभ्राम्यन्तो निर्विशङ्कान्न भोजनाः ॥८६॥
चतुष्पथेषु वृक्षेषु देवतायतनेषु वा ॥
महाचत्वरसम्पाते शून्यागारे तथैव च ॥८७॥
छिद्रानुसारिणश्चैव गृह्यते पुरुषाधमान् ॥
छिद्रेषु प्रचरन्त्येते शरीरेषु शरीरिणां ॥८८॥
यथैवादर्शकं छाया प्रविशन्ती न दृश्यते ॥
प्रविष्टस्तु शरीरेषु विकारं कुरुते सदा ॥८९॥
जृम्भते हसते चैव रुदते गायते पुनः ॥
क्रीडते नृत्यते चैव गात्रस्फोटयते पुनः ॥९०॥
विजृम्भते चालयते अट्टहासं प्रमुञ्चति ॥
अवक्तव्यं वदन्त्येते गुरुविक्रान्तगौरवाः ॥९१॥
एवं शीलसमाचारा दारुणा ग्रहपीडिताः ॥
उपलभ्यन्त्यभिज्ञानं भूतग्रहविचक्षणाः ॥९२॥
उपक्रमैश्च विविधैर्भूतमन्त्रौषधानि च ॥
निशाम्यन्ति वरारोहे तथैव स्नापयेत च ॥९३॥
भक्ष्यभोज्यान्नपानेन मद्यमांससुरासवैः ॥
उत्सृज्यन्ति वरारोहे ये नराश्चिरजीविनः ॥९४॥

एष ते सम्भवो देवि ! पिशाचानां नराधमैः ॥
नागानां च वरारोहे ! श्रृणु तत्वं यथाविधि ॥९५॥
वासुकिस्तक्षकश्चैव अनन्तश्च महोरगः ॥
वीर्यवान् नागराजानो ये भक्ताश्च दृढव्रताः ॥९६॥
तेषां भक्तावरारोहे नागस्थानेषु ये नराः ॥
एकभक्ता वरारोहे ! त्रिरात्रकचतुर्थकैः ॥९७॥
जितेन्द्रियो जितक्रोधाः सत्यवादिशुचिव्रताः ॥
पूज्यन्ते नागपुष्पेण धूपेनागुरुचन्दनैः ॥९८॥
गुडोदनप्रियङ्गुस्त्यं घृतसिद्धार्थकैस्तथा ॥
गन्धमाल्योपहारेण तथा प्रतिसरादिभिः ॥९९॥
क्षीरेण पायसैश्चैव मधुमिश्रैश्च शर्करैः ॥
नागस्थाने निवेद्यन्ते ये कुर्वन्ति शुचिव्रताः ॥७००॥
यदामृत्युर्भवेत्तत्र नागलोके महीयते ॥
नागकन्यासु क्रीडन्ते भवने नागलौकिके ॥१॥
यदा पुण्यक्षये क्षीणे हेतुमात्रेण केनचित् ॥
तदा मानुष्यमायान्ति कदाचित्कालपर्ययात् ॥२॥
श्वेतपीतहरित्कृष्णसुवर्णाभञ्च जायते ॥
मनःकांक्षितवस्तूनि पावयिष्यन्ति स्वे करे ॥३॥
कोधनाः कृष्णवर्णाञ्च जायन्ते सुखभोगिनः ॥
समृद्धाः सुभगाश्चैव नीरोगा निरुपद्रवाः ॥४॥
महाधनसमृद्धाश्च महाभोगकुलेषु च ॥
तेषां क्षेत्रे गृहे चैव नित्यं वर्षति वासवः ॥५॥
नगरेषु समृद्धेषु बहुभृत्य जनेषु च ॥
भुक्तपीतेषु सम्पन्ना दासीदास समाकुले ॥६॥
महातेजो महाभोगा दीप्यन्ते पुरुषोत्तमाः ॥
न तेषां व्याधयः केचित् प्रभवन्ति कदाचन ॥७॥
नागानां सततं पूजा दीर्घमायु भविष्यति ॥
क्षेत्रे सस्यं समृद्धं हि काले प्राप्ते प्रवर्षति ॥८॥
न धनं व्ययमायाति वर्द्धते च दिनेदिने ॥
सत्यामेतद् भवेद्देवि ! प्रत्यक्षन्तु विदृश्यते ॥९॥
एष ते सम्भवो देवि ! नागानां परिकीर्तितः ॥
राक्षसानां व्ररारोहे श्रूयतां सम्भवो यथा ॥१०॥
रौद्रा रौद्र समाचाराः क्रूरकर्मोपजीविनः ॥

लुप्तलज्जा नरा देवि ! गुरूवृद्धावमन्यका: ॥११॥
अश्रद्दधाना सुसतां मृता जायन्ति राक्षसा: ॥
सुरामांसाशिनो नित्यमाक्रोशकलहप्रिया: ॥१२॥
विभीषणस्यानुचरा जायन्ते कामरूपिण: ॥
कृपणालुप्त लज्जाश्च दानपुण्य विवर्जिता: ॥१३॥
नित्यं मांसाशिनो नित्यं श्रद्धां कुर्वन्ति ये नरा: ॥
पितरन्दैवतञ्चापि पितृणाञ्च पितामहं ॥१४॥
तेषामर्थेन ये देवि ! जीवहत्यां करोति वै ॥
मृता जायन्ति ते देवि ! राक्षसा दारुणाधमा: ॥१५॥
प्रत्यन्तवासिनो नित्यं राक्षसा: शौचवर्जिता: ॥
प्रत्यधोमतितुल्यास्ते मृता: पशुभिरेव ते ॥१६॥
एष ते सम्भवो देवि ! राक्षसानान्दुरात्मनां ॥
गणेश्वरो यथा देवि ! श्रृणु मे सम्भवो यथा ॥१७॥
धर्ममन्वेषिणा नित्यं नित्यं धर्मपरायणा: ॥
शुश्रूषां परिचर्याश्च निवेद्यश्च यथाविधि ॥१८॥
आपद्भावेन कुर्वन्ति मन्मना मत्परायणा: ॥
प्रत्यन्ते कालपर्येण देवतायतनेषु च ॥१९॥
गणेश्वरसुतो देवि ! जायन्ते कामरूपिण: ॥
देवपार्श्वेस्थिता ह्येते भवन्ति अजरामरा: ॥२०॥
एवन्ते सम्भवो देवि ! गणेशानाम्प्रकीर्तित: ॥२१॥

इति शिवधर्मशास्त्रे उमामहेश्वरसंवादे चतुर्दशोऽध्याय: ॥१४॥

अथ पशुपतिमते शिवधर्मे महाशास्त्रे उमामहेश्वरसंवादे

पञ्चदशोऽध्यायः

ॐ नमः शिवाय

॥ देव्युवाच ॥

भगवन् ! कर्मणा केन जायन्ते गिरिकन्दरे ॥
महापर्वतदुर्गेषु निवसन्ति गुहालये ॥२२॥
नरसिंहाश्च सिंहश्च महावीर्या महाबलाः ॥
उदीर्णमृगयूथानां कुञ्जराणाञ्च शत्रवः ॥२३॥
एतदिच्छामि विज्ञातुं भगवन् ! वक्तुमर्हसि ॥

॥ महेश्वर उवाच ॥

अग्निप्रवेशनं क्रुद्धाः कुर्वन्ति पुरुषाधमाः ॥२४॥
तेन रोषेण दग्धानान्तेषां स्वर्गोनविद्यते ॥
शतयोजनविस्तीर्णः शतद्विगुणमायतः ॥२५॥
एवमादौ महाटव्यां पृथिव्यान्तु शिलोच्चये ॥
गुहान्तरेषु घोरेषु कन्दरेषु गुहासु च ॥२६॥
नानावृक्षसमाकीर्णे नानाविहगनादिते ॥
नानापुष्पफलोपेत नानालतानिरन्तरे ॥२७॥
नानावनौषधीच्छन्ने नानाश्वापदसेविते ॥
निकुञ्जानि च सेवन्ते नदी प्रस्रवणानि च ॥२८॥
हंसकारण्डवाकीर्णे चक्रवाकोपशोभिते ॥
सारसैराजहंशैश्च मयूरैर्जीवजीवकैः ॥२९॥
कादम्बैः सरसैः कौञ्चैश्चकोरैः कुररैः शुकैः ॥
शरारिशारिकारारैः कोकिलैश्च महामहैः ॥३०॥
विहङ्गमैश्च विविधैः सदा नीलोत्पलैरपि ॥
पद्मसौगन्धिकाकीर्णैः कुमुदोत्पलगन्धिभिः ॥३१॥
सिंहव्याघ्रवराहैश्च सेव्यन्ते महिषैस्तथा ॥
मृगयूथैश्च ऋक्षैश्च वानरैश्चामरैस्तथा ॥३२॥
घोरैर्गम्भीरनिर्घोषैर्बं दुस्वापदसेविते ॥
एवं ये गिरयो रम्याः सिद्धचारणसेविताः ॥३३॥

तत्र जायन्ति ते देवि ! घोरे गिरिगुहालये ॥
नरसिंहेषु सञ्जाता महावीर्यपराक्रमैः ॥३४॥
राजानो राजमात्याश्च जायन्ते च महाबलाः ॥
तेजसा महतायुक्ता महावीर्यो भवन्ति च ॥३५॥
मुदितेषु च देशेषु तथा राष्ट्रजनेषु च ॥
प्रधानभोगाजायन्ते बलवन्तश्च विक्रमाः ॥३६॥
सम्भवो नरसिंहानामेष ते परिकीर्तितः ॥

॥ देव्युवाच ॥

यदाशरीरमुत्सृत्य मृत्युलोकं प्रपद्यते ॥३७॥
श्रूयते नरकास्तत्र पापकर्मरताश्च ये ॥
कीदृशो नरकास्तत्र पापं यत्र क्षयीयते ॥३८॥
किमेको नरका ह्येते बहवो वा न संशयः ॥
एतदिच्छाम्यहं श्रोतुं भगवन् ! बक्तुमर्हसि ॥३९॥

॥ महेश्वर उवाच ॥

अष्टौ ते नरका देवि ! मृत्युलोके भिधीयते ॥
अविचिरौरवश्चैव कालसूत्रन्तथैव च ॥४०॥
कुम्भीपाकश्चनरकस्तथा यमलपर्वतौ ॥
कूटशाल्मलिवृक्षश्च असिपत्रवनन्तथा ॥४१॥
महारौरव इत्येते नरकाः परिकीर्तिताः ॥
इत्येते नरका देवि ! अष्टौ ते परिकीर्तिताः ॥४२॥
आत्मकर्मनियोगेन नियुज्यन्ति पृथक् पृथक् ॥
तथैव च प्रविष्टानां सुखदुःखञ्च प्राप्नुयात् ॥४३॥
पृथक्कर्मविपाकेन प्राप्नुवन्ति च ये पृथक् ॥
अष्टौ ते नरका देवि ! संख्याता श्रृणु तत्वतः ॥४४॥

॥ देव्युवाच ॥

केनकर्मविपाकेन अवीचीन्नरकन्नराः ॥
रौरवं वा प्रपद्यन्ते कालसूत्रञ्चमानवाः ॥४५॥
कुम्भीपाकञ्च नरकं तथा यमलपर्वतौ ॥
एवं शेषाश्च नरकान् व्रजन्ते केन कर्मणा ॥४६॥
तदहं श्रोतुमिच्छामि नरकाननुपूर्वशः ॥
यथा प्राकारसङ्गुप्तन्नरकन्तत्र कीदृशं ॥४७॥

॥ भगवानुवाच ॥

अवीची नरको देवि ! योजनायुत विस्तरः ॥
चतुर्द्वारश्चतुष्कोणः सुविभक्तश्चतुष्पथः ॥४८॥
रौद्ररूपा महाघोरा निर्घृणामृत्युकिङ्कराः ॥
द्वारे द्वारे च तिष्ठन्ति द्वारपाला महाबलाः ॥४९॥
अहन्यहनि क्षिप्यन्ति द्वाराणि सुसमाहिताः ॥
पापकर्मक्षयो येषां नराणां पापदेहिनां ॥५०॥
तेषांद्वारं प्रयच्छन्ति तदा सौम्या भवन्ति ते ॥
अवीचीनरके देवि ! नगरः प्रतिमः स्मृतः ॥५१॥
ज्वालामालासहस्रेषु तस्यमध्ये हुताशनः ॥
दहनः पापकर्म्माणामहन्यहनि क्षिप्यते ॥५२॥
हूयमानो यथा वन्हिर्नित्यं शुष्केन्धनेन वा ॥
एवन्तत्रापि हूयन्ते शतशोऽथ सहस्रशः ॥५३॥
श्रूयन्ते कर्मणा केन यत्र पश्यन्ति ते नराः ॥
तडागान् पदयानानि ये भिन्दन्ति नराधमाः ॥५४॥
प्राप्नुवन्ति नरा देवि ! अवीचीनरकन्नराः ॥
अग्निदा गरदाश्चैव विषदा विषभोजनाः ॥५५॥
गर्भपातनकर्त्तार आत्मघाताश्च ये नराः ॥
मुदितेषु च देशेषु भयदुर्भिक्षकारकाः ॥५६॥
येषां पूर्वप्रवृत्तानां नानुवर्त्तन्ति मानवाः ॥
अप्रवृत्तप्रवृत्तञ्च नरो राष्ट्रेषु पीडिकाः ॥५७॥
एवं शीलसमाचारा दारुणाः पुरुषाधमाः ॥
ते मृता नरकं यान्ति अवीची नरकं नराः ॥५८॥
रह्यन्ते तत्र पच्यन्ते मृत्युद्वारमुपावृताः ॥
ततः क्षिप्रं प्रधावन्ति अग्निज्वालाभयार्दिता : ॥५९॥
सम्प्राप्ताश्चैव ते द्वारं द्वारपालैः विधीयते ॥
गर्जितेस्वेषु रौद्रेषु विद्रवन्ति भयार्दिताः ॥६०॥
अथ पश्यन्ति ते भूयोद्वाराणि च परान्दिशं ॥
उद्घाटितं सुविस्तीर्णं ततो धावन्ति ते पुनः ॥६१॥
सम्प्राप्ताश्चैव ते द्वारा पुनः संक्षिप्यते नराः ॥
ततो विमुक्तास्तद् दुःखं न स्मरन्ति नराधमाः ॥६२॥
रौरवो नरको देवि ! निर्म्माणं तस्य श्रूयतां ॥
यथापि वा चतुष्कोणो योजनायुतविस्तरः ॥६३॥
निर्धूमकर्षकाग्निश्च ज्वालामाला हुताशनः ॥

मध्ये कृष्णायसस्तम्भमग्निवर्णसमप्रभः ॥६४॥
तत्र तिष्ठन्ति ते घोरा दारुणा यमकिङ्कराः ॥
प्रक्षिपन्ति महावीर्या रौरवे नरके नरान् ॥६५॥
परिक्रमन्ति ते ह्यग्निमवशास्ते भयार्दिताः ॥
अहन्यहनि क्षिप्यन्ते नरके भृशरौरवे ॥६६॥
येन कर्मविपाकेन विपच्यन्ते नराधमाः ॥
व्यजनन्तालवृन्तश्च छत्रं वस्त्रमुपानहौ ॥६७॥
निवेशंभृतकानाञ्च ये हरन्ति नराधमा : ॥
ते मृता नरकं यान्ति रौरवं प्रतिपद्यते ॥६८॥
पच्यन्ते नरके तत्र पापकर्मरता नराः ॥
ततो विमुक्तस्तद् दुःखं न स्मरन्ति नराधमाः ॥६९॥
हरेत्कृषिगतं यस्तु कर्षकोपस्करं स्वयं ॥
अल्पकानाञ्च सर्वेषां मात्रोपकरणानि च ॥७०॥
ये हरन्ति नरा देवि ! लोहपाके प्रपच्यते ॥
यत्र तिष्ठति ते देवि ! दारुणा मृत्युकिङ्कराः ॥७१॥
नरो वा यदि वा नारी यः पापः पापकर्मिणे ॥
भृशन्तप्तासु लोहास्सु प्रक्षिपन्ति ह्यधःशिरः ॥७२॥
पापकर्मक्षयन्तेषां कुम्भीपाकें यदाभवेत् ॥
ततो विमुक्तास्तद् दुःखं न स्मरन्ति नराधमाः ॥७३॥
प्राप्नुवन्ति च तद्दुःखं ये नराः पापकर्मिणः ॥
मुशलोलूखलं वापि तुलाभाण्डानि दारवं ॥७४॥
शयनाशनयानानि यच्चान्यद् दारुसम्भवे ॥
ये हरन्ति नरा देवि निर्घृणाः पापकर्मिणः ॥७५॥
ते मृता नरकं यान्ति कालसूत्रं नराधमाः ॥
तत्र तिष्ठन्ति ते रौद्रा दारुणा मृत्युकिङ्कराः ॥७६॥
अहन्यहनि क्षिप्यन्ते तीक्ष्णैः शस्त्रैश्च ते नराः ॥
यदा चापि वरारोहे कालसूत्रेण भिद्यते ॥७७॥
तदा संक्षीयते मांसं ह्येवं पापश्च क्षीयते ॥
तेषान्नरीयमानानां पापकर्मक्षयो यदा ॥७८॥
ततो विमुक्तास्तद् दुःखं नं स्मरन्ति नराधमाः ॥
यदा मानुष्यतां यान्ति कदाचित्कालपर्ययात् ॥७९॥
यमलौ यत्रजायेत तद्गृहं ह्यशुचिर्भवेत् ॥
न तत्र पितृदेवाश्च होममन्त्रक्रियापि च ॥८०॥

यतिभिक्षाञ्च यो दद्यात्कामलोभहते गृहे ॥
स्नापनन्तत्र कर्तव्यं दम्पत्योस्तु यशस्विनि ॥८१॥
ततः स्नातोद्विजान्देवि ! भक्ष्यभोज्येन तर्पयेत् ॥
उद्दिश्य यमलौ तत्र दद्याद्विप्राय दक्षिणां ॥८२॥
तेषां पुण्याहशब्देन शुद्धं भवति तद् गृहं ॥
अशुद्धे तु गृहे यस्तु बैश्यं पित्र्यं करोति यः ॥८३॥
बलिभिक्षाश्च यो दद्याच्छ्रुयतान्तस्य या गतिः ॥
ते मृता नरकं यान्ति नरा यमलपर्वतौ ॥८४॥
तत्र तिष्ठन्ति ते देवि ! निर्घृणा मृत्युकिङ्कराः ॥
प्रहरायुधहस्तैश्च प्रपद्यन्ते नराधमाः ॥८५॥
अहन्यहनि क्षिप्यन्ति पर्वतानांभयार्दिताः ॥
अथ तौ पर्वतौ देवि ! संयुज्येत परस्परं ॥८६॥
चूर्णितास्तेषुपात्रेषु न स्मरन्ति नराधमाः ॥
निरयन्तश्च ते पापाः प्रक्षिप्यन्ते ह्यनेकशः ॥८७॥
येपि चान्ये नरा देवि ! मृता गच्छन्ति ताङ्गतिं ॥
तेषां कर्म प्रवक्ष्यामि येनैवाचरिता नरैः ॥८८॥
आक्रोषते च पितरं मातरञ्च तथा गुरुं ॥
राजानस्तूक्त पूर्वश्च नारीन्निन्दन्ति ये नराः ॥८९॥
दाने कन्याप्रदाने वा व्याघातं कुरुते तु यः ॥
ते मृता नरकं यान्ति नरा यमलपर्वते ॥९०॥
तेषाञ्च चूर्णिताङ्गानां पापकर्म रता गुरुं ॥
राजानस्तूक्तपूर्वश्च नारीर्निन्दन्ति ये नराः ॥९१॥
ततो विमुक्तास्तद् दुःखं न स्मरन्ति नराधमाः ॥
यदा मानुष्यतां यान्ति कदाचित् कालपर्ययात् ॥९२॥
क्रूरकर्मकरा नित्यं कूटमानोपजीविनः ॥
कूटकापटिकाश्चैव कूटकर्मरताश्च ये ॥९३॥
ते मृता नरकं यान्ति कूटशाल्मलिकं द्रुमं ॥
तत्र तिष्ठन्ति ते रौद्रा निर्घृणा मृत्युकिङ्कराः ॥९४॥
तर्जितास्तेषु रौद्रेषु विद्रवन्ति भयार्दिताः ॥
अर्द्धशिरास्थितस्तत्र भयार्तामृत्युकिंङ्कराः ॥९५॥
कण्टकैस्तेषु तीक्ष्णाग्रैर्निपात्यन्ते ह्यधः शिराः ॥
तेषां सञ्छिन्नगात्राणां क्षताङ्गावेदनार्दिताः ॥९६॥
अस्थिशिरांशिमज्जन्ति यदा कर्मक्षयो भवेत् ॥

ततो विमुक्तास्तद् दुःखं न स्मरन्ति नराधमाः ॥९७॥
ते मृता नरकं यान्ति असिपत्रवनन्तथा ॥
सभाकूपतडागेषु देवतायतनेषु च ॥९८॥
चतुष्पथेषु वृक्षेषु यच्छिन्दंन्ति फलोपगान् ॥
ते मृता नरकं यान्ति असिपत्रवनन्तथा ॥९९॥
मानाभाण्डं तुलांश्चैव वाजीकरणमेव च ॥
आयुधानि हरन्त्येते नरा नरकनिर्भयाः ॥८००॥
असिपत्रवनन्देवि ! मृता गच्छन्ति ते नराः ॥
नीलकण्ठं वधं कृत्वा प्रपद्यन्ते नराधमाः ॥१॥
तर्जितास्तेषु रौद्रेषु नरास्ते पापकर्मिणः ॥
अथ तत्र प्रविष्टस्य पादपस्य महावने ॥२॥
तस्य वृक्षस्य यत्पत्रं शीर्यते मारुताहतं ॥
असिपत्रायुधं भूत्वा क्षणेन संप्रपद्यते ॥३॥
नराणामुपरि तेषान्निपतन्ति सहस्रशः ॥
नित्यं पतन्ति मांसेषु नरकेषु नराधमाः ॥४॥
विद्रवन्ति भयात्तत्र नरास्ते पापकर्मिणः ॥
छिद्यन्ते कर्णनासाश्च हस्तपादास्तथैव च ॥५॥
तेषां सञ्छिन्नगात्राणां पापकर्मक्षयो यदा ॥
ततो विमुक्तास्तद् दुःखं न स्मरन्ति नराधमाः ॥६॥
ते मृता नरकं यान्ति महारौरवमेव च ॥
आदिङ्कृत्वा तृणं काष्ठं यत्किञ्चित्सपरिग्रहं ॥७॥
अरण्ये यदि वा ग्रामे क्षेत्रे वा यदि वा गृहे ॥
पितृमातृगृहे वापि लोभात्तृष्णावलेन वा ॥८॥
ये हरन्ति नरा देवि ! पारक्यन्द्रव्यहारिणः ॥
पापकर्मकरन्देवि ! चण्डालास्ते जुगुप्सिताः ॥९॥
देवयज्ञश्च ये देवि ! दानपुण्यविवर्जिताः ॥
गुरुविप्राश्च धर्मी च यैश्च ते संप्रपीडिताः ॥१०॥
ते मृता नरकं यान्ति महारौरवमेव च ॥
पञ्चयोजनविस्तीर्णं समन्तात्परिमण्डलं ॥११॥
घोरं गिरिगुहाकारं ह्युच्छ्रितं पर्वतोपमं ॥
ततोन्धकारं सततं मेघाच्छवेन्न शर्वरी ॥१२॥
तत्र द्वारे स्थिता रौद्रा द्वारपाला महाबलाः ॥
प्रविष्टाश्चैव तद्द्वारे न घृणा करुणा न च ॥१३॥

तर्जितास्तेषु रौद्रेषु प्रविशन्ति भयार्दिताः ॥
तत्र तेषां प्रविष्टानान्नराणां पापकर्मिणां ॥१४॥
स्वशरीरास्थितो ह्यग्निर्दहत्यङ्गानि देहिनां ॥
सततो दह्यते ह्यग्निः स्वशरीरोत्थितो यदा ॥१५॥
स्वयं कृतेषु कर्म्मेषु नादम्मुञ्चन्ति दह्यतः ॥
यदा कर्मक्षयो क्षीणे नराणाम्पापकर्मिणां ॥१६॥
तेषां द्वारं प्रयच्छन्ति तदासौम्या भवन्ति ते ॥
ततो विमुक्तास्तद् दुःखं न स्मरन्ति नराधमाः ॥१७॥
प्राप्नुवन्ति नरा देवि ! स्वयं कर्म पुरा कृतैः ॥
यदा मानुष्यतां यान्ति कदाचित्कालपर्ययात् ॥१८॥
एवं पापसमाचारः प्राप्नोति सुकृते कथं ॥१९॥

इति शिवधर्मशास्त्रे उमामहेश्वरसंवादे
पञ्चदशोऽध्यायः ॥१५॥

अथ पशुपतिमते शिवधर्मे महाशास्त्रे उमामहेश्वरसंवादे

षोडशोऽध्यायः

ॐ नमः शिवाय

॥ देव्युवाच ॥

एवं पापसमाचारः दारुणापुरुषाधमाः ॥
नरके पच्यमानस्तु प्राप्नोति सुकृतं कथं ॥२०॥
उद्धरेत्पितरं पुत्रः पौत्रो वा ये न कर्मणा ॥
पितुरुद्धरणायेच्छेत्सन्तानं केन कर्मणा ॥२१॥
एतदिच्छामि विज्ञातुं भगवन् ! वक्तुमर्हसि ॥

॥ देवदेव उवाच ॥

तदहन्ते प्रवक्ष्यामि श्रूयतां धर्मचारिणि ! ॥२२॥
ग्रीलषण्ढप्रमोक्षेण अमावास्या तिलोदकं ॥
भूमिदानं सुवर्णञ्चकपिलाश्च यशस्विनि ॥२३ ॥
उद्दिश्य पितरन्दद्याच्छ्रोत्रियेभ्यो यथाविधि ॥
महत्पुण्याहनि प्राप्ते पर्वणी वा शिवाय च ॥२४॥
तिलान् कृष्णान् सुवर्णञ्च भूम्यन्नञ्च प्रदापयेत् ॥
तेन दानेन पितरं मातरं च पितामहं ॥२५॥
उद्धरेन्नरकाद् देवि ! यावदासप्तमं कुलं ॥
अथ पुत्रोथवा पौत्रो ये कुर्वन्ति यशस्विनि ॥२६॥
तेन पुण्येन च पितृन् स्वर्गे मोदन्ति ते नराः ॥
ईश्वरं शिवमादित्यं केशवं स्कन्दपार्वतीं ॥२७॥
भक्तिभावाद्यजेद्यस्तु पितृनुद्दिश्य मानवः ॥
नैवेद्यवस्त्रपानानि स्रग्गन्धश्च सुशोभनाः ॥२८॥
ददन्ति येन वा पुण्यं स्वर्गं भुञ्जन्तिचाक्षयं ॥
गङ्गाद्वारे प्रयागे वा भद्रकर्णह्रदे तथा ॥२९॥
अभिषेकन्नरः कृत्वा ब्रह्मचारी जितेन्द्रियः ॥
पितृदेवार्चनरतो ह्यतिथीनथ याचकान् ॥३०॥
विधूतः सर्वपापेभ्यो याति ब्रह्म सनातनः ॥
यस्य पुत्रोऽथवा पौत्रो गयां गच्छेत पण्डितः ॥३१॥

कुरुक्षेत्रे प्रयागञ्च तीर्थे रुद्राश्रमेषु च ॥
उद्दिश्य पितरं तत्र श्राद्धं कुर्वीत बुद्धिमान् ॥३२॥
वर्ज्जयेद्दीनवृद्धांश्च कुब्जविकटवामनान् ॥
चक्षुर्हीनश्च वर्जेतहीनाङ्गबधिरानपि ॥३३॥
वृषली वर्जयेन्नित्यं श्राद्धकाले तथैव च ॥
विप्रान् श्रेष्ठतमान् श्राद्धे ब्रह्मचारी जितेन्द्रियः ॥३४॥
स्वदाररतिसन्तुष्टानाहिताग्नीनसूयकान् ॥
स्वाध्यायनिरतान्विप्राञ्छ्राद्धकाले तु भोजयेत् ॥३५॥
शीलवृत्तिसमाधिस्थान् सत्यवादीदृढव्रतान् ॥
एतान् विप्रसमाचारान्छ्राद्धकाले नियोजयेत् ॥३६॥
आसनेकुतपोपात्रान्नियुज्यादुत्तरामुखं ॥
शुचिवस्त्रोत्तरश्चापि पिण्डत्रयन्निवेदयेत् ॥३७॥
प्रथमं पितरं मन्ये द्वितीयञ्च पितामहं ॥
तृतीयं नामतः पिण्डमेष मे प्रपितामहः ॥३८॥
एवं स श्रावयित्वा तु यश्च भोजयति द्विजान् ॥
शाल्यन्नं खड्गमांसेन पायसं मधुसर्पिषा ॥३९॥
सुवर्णदक्षिणान्दद्यात्सहिरण्यतिलोदकं ॥
पिण्डनिर्वापणञ्चैव कर्तव्यं दर्भसंस्तरे ॥४०॥
हुत्वाग्निं सर्पिषा युक्तं मन्त्रोयं श्रूयतामिति ॥
भगवन् ! पितरं मह्यं प्रीणये पितृदैवतं ॥४१॥
त्रिसप्तकुलजानान्तु तृप्तिं यास्यन्ति ते दिवं ॥
प्रदक्षिणं कृताः सप्तत्रयो वाथ च कारयेत् ॥४२॥
पिण्डनिर्वापणं कुर्यादपसव्येन पाणिना ॥
प्रथमं निर्वपेत् पिण्डमुद्दिश्य पितरन्नरः ॥४३॥
पितामहन्तथोद्दिश्य निर्वपेत द्वितीयकं ॥
तृतीयन्निर्वपेत् पिण्डमेष मे प्रपितामहः ॥४४॥
तिलोदकेन सिञ्चेत प्रणम्य शिरसा क्षितिं ॥
यदि ते नरकं प्राप्त दुर्गतिं वा तरन्ति ते ॥४५॥
अनेन विधिना दत्वा स्पृशेद्वामेन दक्षिणं ॥
श्राद्धेन सपितृंस्तेन यावदासप्तमं कुलं ॥४६॥
उद्धृत्य नरकाद्देवि ! स्वयं स्वर्गे च मोदते ॥
येषां पुत्रादुराचाराः पितृदैवतवर्जिताः ॥४७॥
न च तीर्थानि सेवन्ते ये नराः पापकर्मिणः ॥

ते नरा नरकं यान्ति दुःखं वा प्राप्नुवन्ति च ॥४८॥
एवं शुभाशुभं कर्मलभन्ते स्वकृतैर्न्नराः ॥
दानेन भोगमैस्वर्यं ब्रह्मचारी जितेन्द्रियः ॥४९॥
शीलवान् रूपसम्पन्न उपवासैस्तु शीलवान् ॥
उभाभ्यां दानपुण्याभ्यां स्वर्गे मर्त्ये च पूज्यते ॥५०॥
तपसा स्वर्गमाप्नोति दीर्घमायुरहिंसकः ॥
गुरुशुश्रूषया विद्यां न्यायान्मोक्षञ्च विन्दति ॥५१॥
जपस्वाध्यायकर्त्ता च दीर्घमायुर्विकिल्विषः ॥
एष श्राद्धविधिः प्रोक्तः किम्भूयः श्रोतुमिच्छसि ॥५२॥

इति शिवधर्मशास्त्रे उमामहेश्वरसंवादे षोडशोऽध्यायः ॥१६॥

अथ पशुपतिमते शिवधर्मे महाशास्त्रे उमामहेश्वरसंवादे

सप्तदशो ऽध्यायः

ॐ नमः शिवाय

॥ देव्युवाच ॥

किं कर्म सुकृतं कृत्वा देहमुत्सृज्य ते नराः ॥
मृत्युलोकमनुप्राप्य नरकन्न प्रपद्यते ॥५३॥
शुभां वा गतिमाप्नोति कां गतिं प्रतिपद्यते ॥
रूपवान् रूपसौभाग्यगुणवन्त कथं भवेत् ॥५४॥
एतदिच्छाम्यहं श्रोतुं भगवान् ! वक्तुमर्हसि ॥

॥ महेश्वर उवाच ॥

श्रूयतां कर्मणा येन नरकं चारुहासिनि ॥५५॥
मृत्युलोकमनुप्राप्तः स्वप्नान्तेऽपि न पश्यति ॥
अहिंसकाः कृतज्ञाश्च सत्यवादिदृढव्रताः ॥५६॥
क्षान्ता दान्ता विनीताश्च जितक्रोधो जितेन्द्रियाः ॥
परदारनिवृत्ताश्च स्वदारऋतुगामिनः ॥५७॥
मातापितृभ्यां शुश्रूषा देवतातिथि पूजकाः ॥
निवृत्ता मधुमांसाभ्यां परस्वहरणे तथा ॥५८॥
न पिवन्ति च ये मद्यं सदा ध्यानपरायणाः ॥
माधुर्ययुक्ताः सततं नित्यञ्च प्रियवादिनः ॥५९॥
अतिथिं गुरुवृद्धानां सर्वसत्वहिते रताः ॥
दीनान्धातुरसत्वानामनुकम्पादयापराः ॥६०॥
एवंशीलसमायुक्ताः गच्छन्ति परमाङ्गतिं ॥

॥ देव्युवाच ॥

किं कर्म सुकृतं कृत्वा लोकान्तं लभते नरः ॥६१॥
भगवन् ! कर्मणा केन वर्त्तन्ते ह्यन्तरा भवेत् ॥
कथं पारयते प्राणान्निराहारो निरोदकः ॥६२॥
आहारः कीदृशं वापि भोजनं वा कथं भवेत् ॥
एतदिच्छाम्यहं श्रोतुं भगवन् ! वक्तुमर्हसि ॥६३॥

॥ देवदेव उवाच ॥

श्रूयतां कर्मणा केन लोकान्तं लभते गतिम् ॥
बालं वृद्धं शिशुं वापि गोवृषं कपिलान्तथा ॥६४॥
गुर्विणीं घातयेत्स्वस्थां तथा विश्रम्भघातकाः ॥
बहुभृत्यदरिद्रो वा स्वामिनो लेखकारकः ॥६५॥
एतेषामेव नो हन्ति प्राणैर्वा मोक्षयेद्यदि ॥
तेषां प्राणातिपापानां मृतानां मृत्युशासने ॥६६॥
मृत्युर्विमृश्यते तत्र निश्चयन्नाधिगच्छति ॥
यदा विमृष्यते तत्र किङ्कृतं विकृतम्भवेत् ॥६७॥
मृतं पर्युषितं यत्र तद् गृहं ह्यशुचिर्भवेत् ॥
न तत्र बैश्वपित्र्यं वा कुर्यात्संवत्सरन्नरः ॥६८॥
बलिभिक्षाश्च यो दद्यात् पितृश्राद्धं करोति यः ॥
नहि तस्य फलं दाता भुञ्जीतेह परत्र च ॥६९॥
फलन्तस्योपभुञ्जन्ति ये स्वरा भुविका नराः ॥
तस्माद्रात्रौ मृतो देवि ! क्षिप्रं निर्वास्यतां गृहात् ॥७०॥
भूम्या भागे तृतीयायां वाह्यतः स्थापयेन्नरः ॥
एवमल्पेन कालेन तद् गृहं सेवयेच्छुचिः ॥७२॥
ब्राह्मणस्य दशाहेन द्वादशाहेन क्षत्रियाः ॥
तथा विंशतिरात्रेण गृहं वैश्यस्य शुद्ध्यति ॥७३॥
शूद्रस्य तु वरारोहे गृहं मासेन शुद्ध्यति ॥
चतुर्णामपि वर्णानामेतच्छौचंविधीयते ॥७४॥
न क्रिया क्रियते यस्य मृतस्यार्थे तु बान्धवैः ॥
तेषां शपति गोत्राणि निर्घृणा ये च मानवाः ॥७५॥
शपन्ति पितरस्तं हि न शौचं कर्तुमिच्छति ॥
शौचार्यकृतकर्मा यः सोपि याति परां गतिम् ॥७६॥
जायते यत्रदेशेसौ धनवांल्लोकवत्सल : ॥
एतत्तेकथितन्देवि ! किम्भूयःश्रोतुमिच्छसि ॥७७

॥ देव्युवाच ॥

स्वप्नो नानाविधो यश्च दूराध्वानेपि दृश्यते ॥
सचायं जीवभूतस्य देहमाश्रित्य तिष्ठति ॥७८॥
को वा व्रजति देशांस्तु प्रागदृष्टासु भूमिषु ॥
कथं शरीरमुत्सृज्य स्वप्नान्तेप्रति बुद्ध्यते ॥७९॥

अदृष्टमश्रुतन्देशन्तत्र गत्वा च पश्यति ॥
पुनर्निवर्तते जीवः स्वप्नान्ते प्रतिवुद्ध्यते ॥८०॥
यच्छ्रुतं यच्च नो दृष्टं तत्सर्वं कथ्यते पुनः ॥
एतदिच्छाम्यहं श्रोतुं परं कौतुहलं हि मे ॥८१॥
रहस्यमेतद् भवगन् ! कथयस्व महेश्वर ! ॥

॥ देवदेव उवाच ॥

यदिदं मन्यसे देवि ! जीवो देहन्न सन्त्यजेत् ॥८२॥
स्वपतो जाग्रतो वापि नरः स्वप्नानुदर्शनात् ॥
दृष्टन्न स्मरते नित्यं श्लेष्मप्रकृतिमानुषः ॥८३॥
यत्किञ्चित्पश्यते स्वप्ने शुभं वा यदि वा शुभं ॥
विपरीतफलं तेषां स्वप्नानामशुभं व्रजेत् ॥८४॥
यश्चेन्द्रियसमायुक्तं वायोशीघ्रतरंमनः ॥
मनो व्रजति तं देशं जीवस्तत्रैव तिष्ठति ॥८५॥
शरीरं रक्ष्यते जीवः सर्वेषामेव प्राणिनां ॥
न जीवेन विनादेहोदेहो जीवन्न मुञ्चति ॥८६॥
जीवः संरक्षते सर्वं न च जीवः परित्यजेत् ॥
जीवः शरीरन्त्यजति उष्णंशीतं परित्यजेत् ॥८७॥
विपरीतानि पश्यन्ति यदा ह्यायुःक्षयो भवेत् ॥
व्याधयो वधबन्धाश्च वेदना चातुला भवेत् ॥८८॥
दुःखं शोकं भयं क्रोधं तृष्णा भुक्षा पिपासया ॥
वातपित्तविकारेण श्लेष्मणां स्वप्नदर्शनं ॥८९॥
एतत्ते कथितं देवि ! जीवानामागतिङ्गतिं ॥
शुभाशुभानां स्वप्नानां गतिः सा सर्वदेहिनां ॥९०॥
वातिकाः पैत्तिकाश्चैव श्लेष्मिकाः सन्निपातिकाः ॥
रात्रिभागे चतुर्थे तु ग्राह्याः शेषास्तु निस्फलाः ॥९१॥
दुःस्वप्नमशुभं दृष्ट्वा पुनर्निद्रान्निषेवयेत् ॥
प्रसुप्तः सुशुभं दृष्ट्वा ह्यशुभन्तस्य नश्यति ॥९२॥
मृत्युप्राप्ते ह्यरिष्टे वा आदौ संरक्षते शुभं ॥
कल्यमुत्थाय स्वप्नन्ति शुचिर्भूत्वा समाहितः ॥९३॥
स्नानार्द्रशुक्लवासास्तु देवदेवाय शूलिने ॥
उमास्कन्दसमेताभ्यां स्वयम्भुवे महात्मने ॥९४॥
कृत्वा प्रणामं ताम्पूज्य जप्यं दुःस्वप्ननाशनं ॥

यथोत्पन्नेषुस्थानेषु धूपगन्धानुलेपनैः ॥९५॥
एतैर्देवार्चनं कृत्वा ब्रह्मविष्णुमहेश्वरान्॥
प्रणम्य शिरसा शुद्धो वटाश्वत्थौ च पादपौ ॥९६॥
परिपूज्य च बाहुभ्यां पूर्वन्दद्याज्जलाञ्जलिम् ॥
एवमस्य विधिंकृत्वा दुःस्वप्नस्तस्य नश्यति ॥९७॥
यथाविभववित्तैश्च तिलमाषयवाक्षतान् ॥
दद्याद्विप्रे यथा शक्त्या गोसुवर्णञ्च दक्षिणाम् ॥९८॥
ताम्रपात्रेघृतञ्चैव दद्यादाभरणानि च ॥
पात्रं द्विजेभ्यो दातव्य दुःस्वप्नञ्च प्रणश्यति ॥९९॥
गत्वा गङ्गाह्रदे पुण्ये गत्वा चापि महाह्रदे ॥
धर्मारण्यं गयां गत्वा सावित्रीं सन्ध्ययोर्जपेत् ॥१००॥
जलाभिषेकं कृत्वा तु ब्राह्मणान्तर्पयेच्छुचि ॥
दुःस्वप्नान्मुच्यते तेन सर्वदुष्कृतनाशनं ॥१॥
एवं शुभाशुभं कर्म मया प्रोक्तं वरानने ॥

इति शिवधर्मशास्त्रे उमामहेश्वरसंवादे

सप्तदशोऽध्याय ॥१७॥

अथ पशुपतिमते शिवधर्मे महाशास्त्रे उमामहेश्वरसंवादे

अष्टादशोऽध्यायः

ॐ नमः शिवाय

॥ देव्युवाच ॥

हविर्विप्रा महादेव ! वेदाध्ययनतत्परः ॥
किन्तु वेदस्य तत्पुण्यं भारताद्वा महेश्वर ! ॥३॥
नूनं तुलाधिकं वापि किन्तु वेदेषु भारतः ॥
किं पुण्यं भारतं वापि वेदाध्याये च संशयः ॥४॥
केन वा तपसाग्रेण यजनाध्ययनेन वा ॥
एतदिच्छाम्यहं श्रोतुम्भगवन् ! बक्तुमर्हसि ॥५॥

॥ महेश्वर उवाच ॥

किं पुण्यमन्यसे देवि ! वाक्यं वेदेषु भारते ॥
साङ्गोपाङ्गेषु वेदेषु शास्त्रेषु विविधेषु च ॥६॥
भारतं पञ्चमो वेद इतिहासेति नामतः ॥
अनुग्रहार्थं शूद्राणां व्यासेनामिततेजसा ॥७॥
ज्ञानमुत्पादितं पुण्यं ज्ञात्वा यान्ति पराङ्गतिम् ॥
ज्ञास्यन्ति चतुरा वर्णा वेदाञ्चैव न संशयः ॥८॥
यः समाप्तामिमान्देवि ! पठेद् भारतसंहितां ॥
यजुर्वेदं द्विजो यस्तु भारतज्ञाश्च भामिनि ॥९॥
श्रूयतां कारणन्देवि ! भारतंज्ञो यथाविधि ॥
साङ्गाश्च चतुरोवेदा भारतञ्चैव मेकतः ॥१०॥
एवन्देवैश्च दैत्यैश्च समेत्य तुलया धृतं ॥
अप्रमेयमतीतैश्च वर्तमानैरनागतैः ॥११॥
यस्माच्छ्रुतिशतैश्चापि महात्मशुभविस्तरैः ॥
चतुर्भिरधिकं वेदैर्भारतं न समे तुला ॥१२॥
तस्माच्च त्रिषु लोकेषु महाभारत उच्यते ॥
यः पठेत नरो नित्यं शुचिर्भूत्वा समाहितः ॥१३॥
भारतन्धारयेन्नित्यं श्लोकमेकन्तु यः पठेत् ॥
यदन्हा कुरुते पापं तदन्हा तस्य नश्यति ॥१४॥

किं पुनर्ब्राह्मणो वेद भारतं पठितेति वा ॥
यः पठेद् ब्रह्मचारी तु श्रृणु तस्यापि या गतिः ॥१५॥
यावन्ति रोमकूपानि तस्य गात्रे वरानने ॥
तावद्वर्षसहस्राणि स्वर्गलोके महीयते ॥१६॥
यदा मानुष्यकेलोके कदाचित्कालपर्ययात् ॥
ज्ञानविज्ञानसम्पन्नश्चतुर्वेदो भवेद् द्विजः ॥ १७॥
शीलवान् रूपसम्पन्नस्सर्वसत्वानुकम्पकः ॥
अहिंसको मृदुर्दान्तो भारतज्ञो भविष्यति ॥१८॥
साङ्गोपाङ्गेषु वेदेषु शास्त्रेषु विविधेषु च ॥
विमृश्यमाणे सर्वापि भारतज्ञः समः श्रुतः ॥१९॥
श्रुतीनामाकरो ह्येष रत्नानामिव सागरः ॥
सदेवासुरगन्धर्वाः सकिन्नरमहोरगाः ॥२०॥
न तद्विद्यति त्रैलोक्ये भारते यन्न गीयते ॥
ज्ञानानां परमं ज्ञानं पवित्राणां पवित्रकं ॥२१॥
माङ्गल्यं मङ्गलानाञ्च योगानां योग एव च ॥
ध्यायन्ति पुण्यकर्माणाः शान्तिं परममुत्तमं ॥२२॥
शूद्रयोनिप्रसूतस्य जिह्वाग्रे यस्य तिष्ठति ॥
शान्तिपर्वणि शुद्धात्मा शूद्रः सम्पद्यते द्विजः ॥२३॥
वेदानामितिहासोऽयं सोपि वेदस्य पारगः ॥
सोपिमान्यश्च पूज्यश्च यथाविप्रषडङ्गवित् ॥ २४ ॥
धर्मानुशासनयोनिः पूज्यः शूद्रोपि शीलवान् ॥
स्वयं च चित्रगुप्तेन चित्रितश्चित्रकर्मणा ॥
दन्तिकैर्द्वारपत्रैश्च सोपानै स्ताम्रसञ्चितैः ॥
चामरोत्क्षिप्तदण्डैश्च वीज्यमानो ह्यनेकधा ॥
तत्र हाहासशब्देन वीणातन्त्रीमनोरमं ॥
वेश्याभिस्तु समाकीर्णं निंत्यञ्च सततोत्सवं ॥
क्रीडमानो महाविद्यैरासने परमे शुभे ॥
तत्रोपविष्टो गणते आयुर्वै मानुषस्य च ॥
न चासौमुह्यते देवि ! मम शत्त्या नियोजितः ॥
यन्मया निर्मितं पूर्वमायुर्वै मानुषस्य तु ॥
न शक्नोत्यधिकं कर्त्तुं न च हर्तुं वरानने ॥
गणेद्दिनानि सर्वाणि अशुभानि शुभानि च ॥
चित्रगुप्तस्य पूर्वेणज्वरस्यतु महागृहं ॥
दक्षिणेन च शूलस्यं तथा विस्फोटकस्य वा ॥
पश्चिमे कालपाशस्य अजीर्णमशुभस्य च ॥
पितका उत्तरे ज्ञेया तथा चैव विसूचिका ॥
ऐशान्यान्तु शिरोर्त्तिस्तु आग्नेयाश्चैवमूर्च्छना ॥
वैश्रवाणान्तु नैर्ऋत्यां वायव्यान्ताप एव च ॥
तैस्तु परिवृतो नित्यं चित्रगुप्तस्तु तिष्ठति ॥
मम शक्ति निपातेन योजिता कारणेप्सया ॥

धर्मराजस्य पूर्वेण प्राच्यामैन्द्रीदिशा तथा ॥
तिष्ठन्ति पापकर्माणः पात्यमाना नराधमा ॥
यमदूतैर्महाघोरैर्हन्यमानास्तु निर्वरैः ॥
रुदन्ति विविधैः शब्दैः पूर्वकर्मकृतैस्तथा ॥
नाना प्रहरणैरुग्रैर्नानायन्त्रैस्तथा परैः ॥
छिद्यन्ते पापकर्माणः क्रकचैः काष्टयन्त्रवत् ॥
अन्ये च जलमानेषु अङ्गारेषु यशस्विनि ॥
पूर्वकर्मकृतैरेव धाम्यन्ते लोहपिण्डवत् ॥
अन्येऽपि वै दुराचाराः पीडिता धरणीतले ॥
कुठारेण तु छिद्यन्ते विमनोदुःखिताः सदा ॥
केचिच्च गुडपाकेन तैलयन्त्रैस्तथा परैः ॥
अन्येऽपि विविधा देवि ! हन्यमाना महावलैः ॥
उच्चैश्चैव महाघोरैर्महाशव्दै रुदन्ति च ॥
हन्यमानास्तु ते दूतैः शक्तिमुद्‌गर यष्टिभिः ॥
अन्योन्यकेशसम्बद्धा गृहीता यमदूतकैः ॥
ऋणानि प्रार्थयन्ते च प्राप्ता यमपुरन्तथा ॥
इहलोकेऽप्यसन्तुष्टा मानुषास्ते यशस्विनि ॥
न त्यजन्ति परद्रव्यं मनोवाक्कायकर्मभिः ॥
अङ्कुशैर्मुग्‌दरैः शूलैर्हन्यमानास्तु ते नराः ॥
महाहुङ्कारनादैस्तु ख्यापयन्ति पुरा कृतं ॥
नैव तत्र भवेत्साधुर्यस्ताङ्कश्चिन्निवारयेत् ॥
स्वकर्मकृतदोषेण नास्ति त्राता वरानने ॥
एवं प्रेतपुरीं घोरां पापचित्तानुसारिणीं ॥
ये नराः पापसंयुक्तास्तत्र गच्छन्ति मानवाः ॥
यमलोके पथं देवि ! दानेन च पृथक् पृथक् ॥
पूरितन्धर्मराजस्य कथितं तु वरानने ! ॥
किन्त्वं पृच्छसि मां देवि ! न कश्चिद्रहितो मया ॥
किमन्यत्कौतुकं देवि ! यन्मां त्वम्परिपृच्छसि ॥

॥उमोवाच॥

म्रियन्ते प्राप्तकालास्तु अनित्या मानवाः प्रभो ! ॥
सुषिरं न च पश्यामि पृथिव्यापस्तथा मनः ॥
ते नो गच्छन्ति वा कुत्र वायुराकाश एव च ॥

कर्मेन्द्रियाणि कुत्रैव पञ्च बुद्धीन्द्रियाणि च ॥
वायवः पञ्च तन्मात्रं कुतो गच्छन्ति शङ्करः ॥
कामक्रोधश्च लोभश्च मोहश्चैव तु कुत्र वा ॥
अहङ्कारस्तथा पुण्यं पापंवा कथयस्व मे ॥
नष्टे देहे कुतो यान्ति पवना विविधाश्च ये ॥
तत्सर्वं श्रोतुमिच्छामि भगवन्वक्तुमर्हसि ॥

॥ईश्वर उवाच॥

चोद्यंसश्चातितन्देवि शिवसिध्दान्तवेदनं॥
यन्न दृष्टं सुरेन्द्रैस्तु प्रवुध्दै : शास्त्रचिन्तकैः ॥
पूर्णकाले मृतानांच प्राणिनां तु यशस्विनि ! ॥
सूक्ष्मो भूत्वा अहन्तस्य निर्गच्छामि तदा प्रिये ! ॥
अथवा नवभिर्द्वारै रोमकूपेंन यास्यहम् ॥
ज्ञानवादिषु मूद्धर्नेण गुदया ब्रह्मवादिनं ॥
मयि विनिर्गते देवि निर्गच्छन्ति च देवताः ॥
मया विना निराधारः क्षिप्रं पतति काष्ठवत् ॥
कठिने लीयते पृथ्वी यैवेष्वापस्तथैव च ॥
तेजस्तेजसिलीयेत मारुते मारुते तथा ॥
आकाशश्चैव आकाशे सर्वव्यापि तु शङ्करः ॥
ततः कर्म च बुध्दिश्च वायवः पञ्च एव च ॥
कामः क्रोध अहंकार मन एकाग्रनायकं ॥
संहरामि अहन्देवि ! पुण्यं पापञ्च यद्भवेत् ॥
पुनर्देहोपि मुञ्चामि सुकृतं दुष्कृतं च यत् ॥
इन्द्रियैः पञ्चभिर्युक्तो देवतैः सर्वभिः सह ॥
न च देहे प्रविशामि गृहेदग्धेंगृही यथा ॥
यस्य देहे न तिष्ठामि पराधीनस्य मानवे ॥
षट्कौशिकसमुत्पन्ने मातृजा पितृजास्तथा ॥
तांश्चसर्वान् त्यजिष्याम्यिवयवा ये च देहिनां ॥
मूत्रपुरीषसंयोगाद्ये चान्य इन्द्रियास्तथा ॥
पित्तं श्लेष्मा तथा मज्जां मान्स मेदस्तथैव च॥
अग्नि शुक्रवहे देहे देवता न चदह्यते ॥
एतद्गुणसमायुक्तं शरीरं सर्वदेहिनां ॥
कथयामि पुनस्तेषां शरीरस्य यथाविधि ॥

आत्मानं ये न जानन्ति ते मर्त्ये पशवः स्थिताः ॥
एवञ्च दवतैर्देवि! शरीरं सर्वदेहिनां कथयामि पुनस्तेषां शरीरस्य यथाविधि ॥
एकस्तम्भमया प्रोक्तं स्थाणैस्तिसृभिरावृतं ॥
इन्द्रियैः पञ्चभिर्युक्तं शरीरं द्वारभिर्न्नवैः॥
विषयैस्तु समाक्रान्तं कामक्रोधसमाकुलं ॥
रागद्वेषसमाकीर्णं तृष्णा तस्करदुर्गमः ॥
लोभजाल परिच्छन्नं मोहवस्त्रेण वेष्टितं ॥
सुवद्धवैष्णवीमायां चेतनाधिष्ठितं पुरं ॥
तिष्ठन्ति देवताः सर्वे भुवनानि चतुर्दश ॥
एवमेतत्समाख्यातं शरीरं सर्वदेहिनां ॥
यथा सृष्टि विसृष्टिश्च तत्सर्वकथितं मया ॥

॥उमोवाच॥

पुत्रदारकुटुम्बेषु अर्थेषु च सुरेश्वर ! ॥
कुर्वन्ति पातकं मूढा तन्मे निगद हे प्रभो ! ॥
गोवधं ब्रह्महत्याञ्च परद्रव्यं हरन्ति ये ॥
किञ्चिद्भागं कुटुम्बस्य न वा भवति ईश्वर ॥

॥महेश्वर उवाच॥

न हन्यमानो पुत्रोऽस्य न भ्राता नैव तत्पिता ॥
भवन्ति भागिनो चैव कुटुम्बार्थे करोति यः ॥
पुरुषो भृत्यवर्गस्य भ्राते पुत्रकुटुम्बयोः ॥
कस्यार्थङ्कुरुते पापं सर्वम्भवति चात्मने ॥
यानि यानि च पापामि कुर्वन्ति तमसान्विताः ॥
स्वशरीरे तु तत्सर्वन्निस्तरन्ति यशस्विनि ! ॥
भार्या यत्कुरुते धर्मन्नतद् भवति भर्त्तरि ॥
अदत्तं चैव नारीणान्न धर्मः प्राप्यते क्वचित् ॥
भृत्यसम्बन्धयो भार्या पुष्कलेन धनेन च ॥
स्वामिसम्बन्धिनोर्भृत्यो दोष नैव तु गृह्यते ॥
अधर्म्मं कुरुते नारी भर्तृधर्मेण मोहिता ॥
स्त्रियः सर्वं भवेद् देवि ! न भर्त्ता भागमर्हति ॥
भिक्षास्तु पञ्च शौचञ्च यच्च भर्त्तुरसम्मतं ॥
सर्वं भवति नारीणां न भर्त्ता भागमर्हति ॥
भृत्यवर्गादिसम्बन्धा यानि पापानि मानवे ॥

स्वदेहे तानि सर्वाणि उपतिष्ठन्ति नान्यथा ॥
मृतेन यान्ति नो भार्या न पुत्रा न च बान्धवाः ॥
तत्र धर्मो ह्यधर्मो वा जीवेन सह गच्छति ॥
न च यास्यति मित्राणि न माता भ्रातरस्तथाः ॥
नैव ते बन्धुवर्गाश्च न चात्मनि व्रतङ्गृहं ॥
पुत्रदार कुटुम्बाश्च भार्याः प्रियतराश्च याः ॥
गृहा दग्धा निवर्तन्ते श्मशाने देवबान्धवाः ॥
प्रिया भार्या प्रियं मित्रं प्रिय पुत्रः प्रियोजनः ॥
निश्वसित्वा प्रियो याति धर्मा एको व्रजेत्सकृत् ॥
धर्माधर्मसमो वन्धुस्त्रैलोक्य सचराचरे ॥
गृहीते कालपुरुषैः सहायो वा न विद्यते ॥
न चार्था नैव पुत्राश्च न भार्या न च वान्धवाः ॥
आधूनान्तानिवर्त्तन्ते गच्छन्तस्तु महापथे ॥
सुकृतं दुष्कृतं वापि गच्छन्तमनुगच्छति ॥
पितायत्कुरुते धर्मं पुत्रो वापि करिष्यति ॥
यस्तु धर्ममधर्मं वा पिता पुत्रो परोजनः ॥
स्वशरीरेण ते पापान्निस्तरिष्यन्ति मानवः ॥
पृच्छ पृच्छ च मां देवि : ! कथयामि पुनः पुनः ॥
उग्रे स्मरसि यत्किञ्चित् तत् सर्वं कथयाम्यहम् ॥

॥उमोवाच॥

भगवन् ! कर्मणा केन यान्ति यमपुरीन्नराः ॥
अन्ये ऽपि बहवो जीवा न यास्यन्ति च ताम्पुरीं ॥
कर्मणा केन यास्यन्ति न यास्यन्ति च केन ते ॥
अधर्मेण क्वयास्यन्ति क्वच धर्मेण मानवाः ॥

॥ईश्वर उवाच॥

श्रृणुदेवि ! परन्धर्ममधर्मश्चापरं श्रृणु ॥
धर्मेण यत्र यास्यन्ति अधर्मेण च ये नराः ॥
क्षुद्राश्च ये नरा देवि ! नित्यमप्रियवादिनः ॥
कुत्सिता व्यवहारेषु याम्यांगच्छन्ति तां पुरीं ॥
मिथ्यावाक्याश्च ये देवि ! ये चान्ये कुत्सिताः सदा ॥
पुरी यमस्य गच्छन्ति तेन पापेन मानवाः ॥
ये गाः स्पृशन्ति पादेन अधिक्षिपन्ति च द्विजान् ॥

तान्ते दुष्टा दुराचाराः पुरी गच्छन्ति ॥
कन्यानृतश्च ये देवि ! कुर्वन्ति तमस ॥
ते पि यान्ति न सन्देहो यमस्य तु पुरीं ॥
एकारात्रोषितो राजा व्यापारं यः करेत्सकृत् ॥
स यास्यति पुरीं घोरान्तेन पापेन कर्मणा ॥
मित्रद्रोही च यो देवि ! परद्रव्यापहारकः ॥
नित्यमसत्यवादी च पुरं तां स प्रपद्यते ॥
अश्वानृतश्च ये देवि ! तथान्यच्चगवानृतं ॥
ये वदन्ति तमो मूढास्तेपि यान्ति यमालयं ॥
हृदये कल्मषं येषां तेषु दोषास्तु कारयेत् ॥
गुरौ चक्षुश्च संक्रुध्दं तेपि यान्ति यमालयं ॥
ये चान्ये दुष्टभावेन नराः पतितवुद्धयः ॥
कुर्वन्ति राज्यकर्मित्त्वं तेपि यान्ति यमालयं ॥
एकमप्यक्षरं देवि ! यो गृहीत्वा गुरोर्न्नरः ॥
नेच्छते स ततो ज्ञानं सोपि याति यमालयं ॥
अन्ये ऽ पि पुण्यकर्म्माणो नराः स्वच्छन्द देहिनः ॥
तां पुरी येन यास्यन्ति तान् सर्वान् कथयास्यहं ॥
तीर्थस्थाने म्रियन्ते ये पुण्य क्षेत्रे यशस्विनि ! ॥
मम ध्यानपरा ये तु न ते यान्ति यमालयं ॥
उत्तरे च कुरौ देवि ! हिमवन्ते च ये मृताः ॥
पुरीन्तेपि न यास्यन्ति कृतपुण्याश्च ये नराः ॥
केदारे चैव ये देवि ! म्रियन्ते च महालये ॥
तुङ्गीशे च मृता ये तु न पश्यन्ति यमालयं ॥
कर्मादीपतने देवि ! ये चान्ये मरकण्टके ॥
यक्षेश्वरे वैद्यनाथे खेचरे रत्नचूडके ॥
देवघट्टे महेशे च क्षेत्रे पाशुपते मृतः ॥
वाराहक्षेत्रे जानक्या मातृवेणी स्थले मृताः ॥
श्रीशैले च मृता ये तु न ते यान्ति यमालयं ॥
महेन्द्रे मलये विन्ध्ये सज्ये (ह्रो) च मरुकेश्वरे ॥
भद्रेश्वरे मृता ये तु नते यान्ति यमालयं ॥
कालञ्जरे प्रभासे च गङ्गासागरसङ्गमे ॥
श्रीकण्ठे च मृता ये तु न ते यान्ति यमालयं ॥

नैंमिषे च म्रियन्त य न ते यास्यन्ति तां पुरीं ॥
अम्रातिकेश्वरे देवि ! त्ये चान्येकुक्कुटेश्वरे ॥
चण्डेश्वरे मृता ये च न ते यान्ति यमालयं ॥
रुद्र कोदृचापि ये देवि ॥म्रियन्ते चैव मानवाः ॥
मह्यं गवां प्रदानेन न ते यान्ति यमालयं ॥
ये मृता दक्षिणे मूर्त्तौ मम ध्यानरताश्च ये ॥
पृथूदके मृता ये तु न ते यान्ति यमालयं ॥
एवमेतानि गुह्यानि पुण्य क्षेत्राणि यानि वै ॥
मृतास्तेषु न पश्यन्ति मम भक्ताश्च ये नराः ॥
सर्वमेतत्समाख्यातं यत्किञ्चिद्धृदि संस्थितं ॥
अद्यापि किन्न मर्म्मप्तं यत्पृच्छसिपुनर्म्मते ! ॥

॥उमोवाच॥

प्रयागं पुष्करं देव ! तुङ्गीशं विमलेश्वरं ॥
देवदारुवनं चापि सहस्रेश्वरमेव च ॥
केदारम्मध्यमश्चैव तथा चाम्रातिकेश्वरं ॥
वाराणसीं देवघट्टं श्रीशैलञ्च महाव्रतं ॥
कालञ्जरं प्रभासञ्च श्रीकण्ठं कुक्कुटेश्वरं ॥
गोकर्णञ्चैव कर्मारिं वाराहं वीरभद्रकं ॥
एतेषु च मृता गावो नरा देवास्तथा परे ॥
पशुपते केन कार्येण इदं कौतूहलं मम ॥
किङ्गावः किङ्गुणा गावः किंवा गौरिति लक्षणं ॥
देवताः किं शरीरेऽस्मिन् किंवा दानफलं भवेत्
कम्बलं ककुदश्चैव केन वा निर्म्मितं प्रभो ! ॥
उत्पन्नाश्च कुतोगाव एतदिच्छामि वेदितुं ॥

॥ईश्वर उवाच॥

अमृते मथ्यमाने तु क्षीरोदे सागरे शुभे ॥
तत्रगावः समुत्पन्नाः कामिकाऽमृतसम्भवाः॥
समुद्राः पर्वता द्वीपाः पातालवसुधास्तथा ॥
गवां गात्रेषु तिष्ठन्ति निर्विकारास्तु सुन्दरि ! ॥
स्कन्धे साक्षात् स्थितो ब्रह्माय ग्रीवायां नन्दिकेश्वरः॥
नव ग्रहा ललाटेषु श्रृङ्गे तौ मेरुमन्दरौ ॥

कर्णेतु अश्विनौ देवौ नेत्रे चन्द्रदिवाकरौ ॥
पिशाचा वक्त्रमध्येतु दन्तमध्येतु राक्षसाः ॥
जठरे हुतभुङ् नित्यं जिह्वाग्रे च सरस्वती ॥
खुरमध्ये तु गन्धर्वाः खुराग्रेषु च पन्नगाः ॥
ऋषयो रोमकूपेषु पृष्ठवंशे पुरन्दरः ॥
भद्रकाली स्थिता पुच्छे जङ्घायां वायुरेव च॥
वरुणो मूत्र विष्टेच अपाने जान्हवीतथा ॥
स्थिता देवाश्च हुङ्कारे समुद्राश्च पयोधराः ॥
असुरा अस्थिमध्ये तु मज्जायां किन्नराः स्थिताः॥
यक्षास्तु रोममध्यस्थाः श्रीश्च पृष्ठेप्रतिष्ठिताः ॥
सर्वदेवसमायुक्ता सर्वविद्याङ्ग सम्भवाः ॥
सर्वपापहरा नित्यमेतद्गुणशतोत्तमाः॥
ये स्पृशन्ति पदा देवि ! उच्छिष्टश्च ददत्यपि ॥
ब्रह्नहत्यादिकं पापं लभन्ते ते न संशयः ॥
पापकर्म दुराचार मया क्रुध्देन सुन्दरि ! ॥
वेशण्ढा इव जायन्ते मृता योनिचतुर्दश ॥
एतद्गुणसमायुक्ता गावस्तु कथिता मया ॥
वर्णन्तु कथयिष्यामि दानस्य च यथा फलं ॥
पीतरक्तास्तथा शुक्ला धूम्रा वै पाटला तथा ॥
श्यामा च कपिला नीला कृष्णा चैव तु सुन्दरि ! ॥
शुक्लया मम सन्तोषः शक्रः पाटलया तथा ॥
रक्तया तुष्यते ब्रह्मा श्यामया च हुताशनः ॥
ग्रहास्तुष्यन्ति धूम्राभिः पीताभिः पितरस्तथा ॥
कपिलानां प्रदानेन नरकस्थान् समुद्धरेत् ॥
अन्ये च पापकर्माणः पितरो ये च बान्धवाः ॥
नीला प्रापयते स्वर्गे कृष्णा दत्ता च (तथा) अक्षया ॥
वर्णस्तु कथितो देवि ! दानश्चैव यथाफलं ॥
सद्भावेन मया देवि ! त्वात्प्रयार्थं वरानने ! ॥

इति शिवधर्म उत्तरोत्तरे महासंवादे गोगुणो नाम पञ्चमोऽध्यायः ॥५॥

अथ पशुपतिमते शिवधर्मे महाशास्त्रे उत्तरोत्तरे महासंवादे वृषगुणो नाम षष्ठोऽध्यायः

ॐ नमः शिवाय

॥उमोवाच ॥

एतद्गुणसमायुक्ता यथा गौः कथिता मम ॥
वृषश्चापि च को धर्मो वदशीध्रं जगत्पते ! ॥

॥ईश्वर उवाच॥

नजानन्ति च लोकेऽस्मिन् मानवा मूढचेतसः ॥
चतुष्पादो भवेद्धर्मः शुक्लोऽयं मम वाहनः ॥
अग्निहोत्रस्य यज्ञस्य भक्ष्य भोज्यस्य वा फलं ॥
लोकस्य धनधान्यानि प्रजापतिप्रतिष्ठितं॥
दशानां यत्फलं देवि ! कपिलानां यशस्विनि ॥
एकदत्ते अनड्वाहें फलम्भवति सुन्दरि ! ॥
ब्राह्मणस्य दरिद्रस्य कुटुम्बापहतस्य च ॥
तेन यज्ञशतं चेष्टमनड्वाह ददाति यः ॥
अनड्वाहद्वयं दद्यात् सफलं युगधारिणं ॥
भूमिश्च सहवीजेन श्रृणु तस्यापि यत्फलं ॥
न पश्यामि क्षयं तस्य न मर्त्ये पुनरागमं ॥
दैवतैः सहितस्तिष्ठेद्यावत्तिष्ठति मेदिनी ॥
कपिलायास्तु यो धर्मो यो धर्मो वृषदानतः ॥
तन्मया कथितं सर्वं यच्चान्यत्कौतुकन्तव ॥

॥उमोवाच॥

अग्निहोत्राणि विप्राणामावसथ्यानि चापरे ॥

के तत्र अग्नयो देव ! यज्ञपात्राणि कानि च ॥
किमर्थं मण्डलं कुण्डः किमर्थं धनुराकृतिः ॥
चतुष्कोणेषु को ह्यग्निरेतत्पृच्छामि शङ्कर ! ॥
आहवनीये तु को देवो गार्हपत्येतथैव च ॥
दक्षिणाग्नौ तु को देवः को देवः समिधासु च ॥
दर्भे वा को भवेत्तत्र प्रणीतायां श्रुवेषु च ॥
घृतेषु उदकेष्वेव विष्टरेषु चको भवेत् ॥
अग्निषु कानिचाङ्गानि अङ्गारश्च तथा भवेत्॥
को होता हूयते कश्च किंवा कस्य तु दीयते ॥

॥ईश्वर उवाच॥

ॐ

इश्वर उवाच

साधु साधु महाप्राज्ञे पदं परमदुर्ल्लभं ।
त्वमेकां वर्ज्जयित्वा तु कस्यशक्तिर्वरानने ॥
अग्नयः कथयिष्यामि देवतास्तिथयस्तथा ।
ऋत्विजा यज्ञपात्राणि ये वा गृह्णान्ति आहुतिं ॥
मण्डले हूयते ब्रह्मा विष्णुश्च धनुषाकृतिः ।
चतुष्कोणे ह्यहन्देवि एवं वेदेप्रतिष्ठितम् ॥
दर्भेषु देवतानागाः प्रणीतापृथिवी तथा ।
श्रुक्श्रुवौवसवो देवि समिधायांवनस्पति : ॥
घृतेषुधेनवश्चैव अन्नाद्ये तु प्रजापतिः ।
आहूति स्वयं गृह्णामि होताश्चैव वृहस्पतिः ॥
उपस्पृश्यशुचिर्भूत्वा स्नातो वा मन्त्रवारिणा ।
वेदमन्त्रैस्तुसन्नद्धस्ततः कर्म्माणिकारयेत् ॥
आहुत्या च ततो ह्यग्निं गायत्रीं हृदयेन तु ।
प्रत्यक्षो जायते विप्रः कुण्डं ह्यग्निर्यशस्विनि ॥
पराङ्मुखस्तु आहूय यज्ञपात्रं समाहरेत् ।
कुशान्दद्यात्तु पूर्व्वस्यांश्चतुरस्रमथापि वा ॥
अभ्युक्षे ये च पात्राणि श्रुक्श्रुवौ च प्रतापयेत् ।
ब्रह्माणन्दक्षिणं स्थाप्य प्रणीताश्चोत्तरे न्यसेत् ॥
आहिताग्निस्तु सान्निध्यमङ्गान्येव तु चिन्तयेत् ।
मुखङ्कृत्वा तु मेधावी होमयेत्तं विचक्षणः ॥
ॐ कारेणशिखातस्य उकारेण शिरस्तथा ।
हूंकारेण ललाटन्तु वकारोवक्त्रमेव च ॥
चकारो हृदयं तस्य वकारो जठरः स्मृतः ।
सकारस्तस्यकवचं अग्नेश्चतस्रच प्रिये ॥
तकारस्तस्य वै ग्रीवा छिकारस्त्वंशयोस्तथा ।
तस्यमेढः पकारस्तु यकारमूरुमेव च ॥
सेकाराः जानुसन्धिश्च भकारो पृष्ठतोन्यसेत् ।
गोकारश्च भवेत्पादौ पुनरन्यङ्कथाम्यहम् ॥
देकारश्च वकारश्च केशास्तु परिकीर्तिताः ।
सकारस्य तु धीकारो जिह्वाग्नेस्तु प्रकीर्तिताः ॥
यो कारस्तस्य अग्नेस्तु नेत्राणि च विनिर्दिशेत् ।
मकारो दशनास्तस्य यकारः पद्म हृदयम् ॥

अग्नेयस्तस्य वाकारो स्त्रयाणां परिकीर्तितः ।
सर्व्वकर्म्मसु विज्ञेयो दकारश्च भकारकः ॥
एवं वैश्वानरो ज्ञात्वा देवि अङ्गानि वुद्धिमान् ।
अविदितेषुचाङ्गेषु होमञ्च नजुहेन्नरः ॥
वन्हिर्लीलायते यस्तु शुद्धस्फटिकनिर्म्मलः ।
तन्मुखञ्चैव विज्ञेयं चतुरङ्गुलमानतः ॥
तस्य मध्ये तु होतव्यं ततो गृह्णाति आहुतिं ।
एवं यो ज्ञायते ह्यग्निन्तस्य पुण्यफलंशृणु ॥
दैविकानांयुगानां च सहस्रपरिसंख्यया ।
शतं पैतामहन्तस्य अहोरात्रं प्रकीर्तितं ॥
तावत्ते पुण्ययष्टारोविधिलोक मुपागता ।
तिष्ठन्ति पुण्यकर्म्माणो जापिनो हि विधानतः ॥
पञ्चचैवमहायज्ञा ब्रह्मणा परिकीर्तिताः ।
कर्तव्यानि च कर्म्माणि अग्निहोत्रमुपासकाः ॥
तिथयः पूजनञ्चैव अतिथ्यागमनस्य च ।
चातुर्म्मास्यां यस्यरति ऋतुकालाभिगामिनाम् ॥
उषिते चैव होतव्य तथा मध्यन्दिनेषु च ।
आरण्यजोषधो चैव न तु ग्रामसमुद्भवे ॥
श्यामाकैर्विल्वपत्रैश्च कन्दमूलैर्फलैस्तथा ।
होमयेदग्निहोत्राणि न गृह्णीयात्प्रतिग्रहम् ॥
यथा वै कर्षको देवि भागंलभतिपञ्चमं ।
परद्रव्येण होता च तद्वद्भागेन युज्यते ॥
एवञ्चैव यथोक्तन्तु अग्निहोत्रमुपासते ।
ते यान्ति परमं स्थानं यत्र देवो पितामहः ॥
अग्निहोत्र फलावेदाः सषडङ्गपदक्रमाः ।
अग्निहोत्र समो धर्म्मो नभूतो न भविष्यति ॥

इति पशुपतिमते शिवधर्मोत्तरे महासंवादे षष्ठोऽध्यायः ॥

अथ पशुपतिमते शिवधर्मोत्तरे महासंवादे
सप्तमोऽध्याय ॥

ॐ नमः शिवाय

॥इश्वर उवाच॥

गुणा एते समाख्याता दोषान्वक्ष्यामि ताञ्छृणु ।
प्रयत्नेनापि ते देवि वर्ज्जनीयाद्विजादिभिः ॥१॥
अज्ञानेन तु यो देवि होमयेन्मूढचेतसः ॥
स वै वर्षसहस्रं तु जायते ब्रह्मराक्षसः ॥२॥
यो मतेन तु दम्भेन जीवसंरक्षणाय च ।
होमयेत्परवित्तेन नरकं स प्रपद्यते ॥३॥
अग्निहोत्रमिमंकृत्वा यो वृत्तिमुपरक्षति ।
कर्म्महानिर्भवेत्तस्य आत्मानं स विडम्वति ॥४॥
अशुद्धे न तु भावेन नैव जानन्ति देवताः ।
दम्भेनापि च ते देवि न तस्य फलमश्नुते ॥५॥
फलेन अग्निहोत्रस्य ये गुणास्ते यशश्विनि ।
लभन्ते नैव तां मूढा नित्यं क्लेशस्यभाजनाः ॥६॥
परद्रव्येणहोमस्य यक्षास्तस्य तु देवताः ।
विनामन्त्रेण होमस्य असुरास्तत्रदेवताः ॥७॥
वेलातिक्रमहोमस्य राक्षसास्तत्रदेवताः ।
अशुचेरन्नहोमस्य पिशाचास्तत्रदेवताः ॥८॥
पुत्रं पत्नीन्तथा शिष्यं होमकर्म्मसु कारयेत् ।
आहुतीं परदत्तास्तु क्षिप्रंगृह्णन्ति गुह्यकाः ॥९॥
ब्राह्मणानां हितार्थाय त्वमेवपरिपृच्छसि ।
तेन देवि मयाख्यातमग्निहोत्रस्य ये गुणाः ॥१०॥
दोषास्तु ये मयाप्रोक्तास्ते त्वयाविदिताः प्रिये ।
सर्व्वंव्रतानि वेदेषु ब्राह्मणायोदितानि वै ॥११॥
किमन्यत्कथयिष्यामि तत्प्रचोद्यं प्रियेमम ॥१२॥

॥उमोवाच ॥

को वेदः केगुणावेदे किञ्च वेदस्यलक्षणम् ॥
केन वा निर्म्मितावेदाः कथम्वेदोभिधीयते ॥१३॥

स्वरैश्च कीदृशैः शम्भो वेदमध्यापयन्ति ते ।
वेदस्यकीदृशीभूमि ब्राह्मणैर्यत्रपछ्यते ॥१४॥
त्यजन्ति कीदृशीं विप्रा भूमिमध्ययनार्थिनः ॥
ये च वेदं विनासन्ति ये चान्ये वेद विघ्नकाः ॥१५॥
तान्सर्व्वान्कथयास्माकं ये च वेदोपजीविनः ॥१६॥

॥ईश्वर उवाच॥

पर्व्वते चत्वरे वापि वने वा कन्दरेतथा ॥
विजने च समेवापि सदा वेदमुदीरयेत् ॥१७॥
यज्ञवाटेगवांगोष्ठेतीर्थेष्वायतनेषु च ॥
वेदानुदीरयेत्तत्र एकान्ते म्लेच्छवर्ज्जिते ॥१८॥
शालायामग्निहोत्रस्य देवतागुरुसन्निधौ ॥
एतेष्वेव हि पठ्यन्ते शेषभूमास्तु वर्ज्जयेत् ॥१९॥
यः पठेत्स्वरहीनस्वा लक्षणेनविवर्ज्जितं ॥
संकीर्णे ग्राममध्ये च सभवेद्वेदविघ्नकः ॥२०॥
रथ्यापर्य्यटमानस्तु चण्डालः शृणुतेक्वचित् ॥
तत्क्षणाज्जायते शूद्रे मृतः श्वानोऽभिजायते ॥२१॥
चितिवृक्षन्तु यः स्पृष्ट्वा यज्ञयूपंतथैव च ॥
वेदस्य विघ्नकं दृष्ट्वा स्नानमेवविधीयते ॥२२॥
आसनस्थः सुखासीनः सप्तस्वरविभूषितः ॥
न च सङ्कुचितग्रीवो वेदमभ्यसने सदा ॥२३॥
उत्तानौ तु करौकृत्वा लग्नोवैजानुसन्धिषु ॥
पश्यतो अंगुलीस्सर्व्वा उदात्तमनुदात्तकम् ॥२४॥
स्वरान्तत्रप्रवक्ष्यामि ये सूक्ष्मा वेदसम्भवाः ॥
सप्ताश्चैवतु विख्याताः यैरिदं वेष्टितंजगत् ॥२५॥
नतैर्व्विरहितावेदाः न तु विद्याविशेषतः ॥
वेदार्थे च मयासृष्टाः स्वराः सप्तप्रकीर्तिताः ॥२६॥
उदात्तौनिषधगान्धारौ अनुदात्तौ ऋषभधैवतौ ॥
शेषास्तु स्वरिताज्ञेयाः षड्जमध्यमपञ्चमाः ॥२७॥
एवं वै ये न जानन्ति स्वरलक्षणवर्जिताः ॥
ते रूपस्य यथान्धो वै नैवकिञ्चिद्विवुध्यति ॥२८॥
पठन्तिवेदान् ये देवि न तु विन्दन्तिदेवतां ॥
नरकंयान्ति ते घोरं भारवाहीचगर्द्दभः ॥२९॥

यत्तेपरतरंशास्त्रं मया वेदेषुभाषितं ॥
तद्वेदान्ते च वेदादौनविन्दन्तिद्विजातयः ॥३०॥
यच्चवेदमयंशास्त्रं सर्व्ववेदमयंजगत् ॥
शरीरं वेदजासर्व्वासिद्धान्तम्वेद सम्भवम् ॥३१॥
अहं वेदा अहम्विद्या अहं यज्ञा अहं तपः ॥
अग्निर्ज्योतिरहंवायुरहम्पर्ज्जन्यरेव च ॥३२॥
अहं ब्रह्मा अहं विष्णुरहमिन्द्रः प्रजापतिः ।
अहं यज्ञेषुपुरुषो अहं होता अहं क्रतुः ॥३३॥
विप्रायजन्तिमामेव स्वयमेवयजाम्यहं ।
रुद्राश्च वसवोदेवाः नक्षत्राणि च सागराः ॥३४॥
यज्ञपात्राणि मन्त्राश्च येचान्ये विप्रनायकाः ॥
अव्यक्तेन तु तिष्ठामि त्रैलोक्येसचराचरे ॥३५॥
येन्दे जानन्तिमावि न ते वेदस्यपारगाः ।
वेदञ्च ये न जानन्ति यो वेदः स तु शंकरः ॥३६॥
नकिञ्चिदन्तंरदेवि मूढाविन्दन्तिचान्यथा ॥
वेदात्परतरोधर्म्मो न वेदाच्च परन्तपः ॥३७॥
ये तु विन्दन्तिवेदार्थन्तएवज्ञानिनोमताः ॥
उपजीवन्ति ये वेदं पापकर्म्मद्विजातयः ॥३८॥
दिव्यवर्षसहस्रन्तु शूद्रोच्छिष्टेनजीविनः ॥
वेदोपजीविनो विप्राः स्त्रीलौल्यात्सततञ्च ये ॥३९॥
कोकाभवन्ति ते देवि सुचिरंविष्टीभक्षकाः ॥
आदेशात्पठते यस्तु राजद्वारेद्विजाधमः ॥४०॥
सोपिवृक्षोभवेद्देवि उषरेकण्टकावृतः ॥
वेदादेशेनगृह्णाति राजद्रव्यञ्च यो द्विजः ॥४१॥
पच्यते आमगर्भे तु वर्षकोटीशतानि च ॥
आदेशात्पठते यस्तु आदेशञ्च ददाति यः ॥४२॥
द्वावेतौपापकर्म्माणौ पातालतलवासिनौ ॥
स्वराणां ब्राह्मणानाञ्च कथितंतवसुव्रते ॥४३॥
किमन्यत्कारणन्देवि कथायामि पुनः पुनः ॥४४॥

॥उमोवाच॥

एते वेदस्वराः सप्तकथिता वेदकारणाः ॥
कीदृशास्ते तु विज्ञेयाः किंवर्णम्किञ्चलक्षणम् ॥४५॥

अष्टौ भावास्ततो देव मूर्च्छना एकविंशति ॥
एकैकस्य तु किन्नाम वदशम्भोप्रसीद मे ॥४६॥

॥इश्वर उवाच॥

स्वराश्चैव प्रवक्ष्यामि यैरिदं वर्तते जगत् ॥
स्वरहीनानिवर्तन्ते वायवः स्वरलक्षणाः ॥४७॥
स्वरं नदन्तिश्रोत्राणि वातश्चाङ्गिरते श्वरम् ॥
स्वरप्रणीतं त्रैलोक्यं स्वरेशब्दाः प्रतिष्ठिताः ॥४८॥
मयूरो वदतेषड्जं निषादंवदतेगजः ॥४९॥
कालेप्रावृषि वै देवि दर्दुरोधैवतंवदेत् ॥
पुष्पसाधारणेकाले कोकिलापञ्चमं वदेत् ॥५०॥
विप्यकाको ? वदेद्देवि स्वरमृषभमेव च ॥
एतेचैव स्वराः प्रोक्ताः वर्णम्वैकथयाम्यहम् ॥५१॥
षड्ज आरक्तवर्णाभो दाडिमीकुसुमप्रभः ॥
ॠषभस्तु भवेत्पीतः किंकरातसमप्रशः ॥५२॥
गान्धारः पाण्डराभञ्च शुक्लञ्चैव तु मध्यमः ॥
पञ्चमः श्यामवर्णस्तु अतसीकुसुमप्रभः ॥५३॥
कृष्णवर्णनिषादस्तु कोकिलाग्रीवसन्निभः ॥
एते देवि त्रयोग्रामे ब्रह्मविष्णुमहेश्वराः ॥५४॥
शादवप्रमुखाज्ञेयाः स्वरान्योन्यप्रभेदकाः ॥
सजातीषु विज़ातीषु सहस्रगुणविस्तराः ॥५५॥
पितृवन्हि समुत्पन्नाः पञ्च ये पञ्चमाः स्मृताः ॥
ॠषभागकुले देवि उत्पन्ना ॠषभ धैवताः ॥५६॥
जितान्यन्योन्य भेदेन प्रकृतं संस्कृतेन च ।
देवजातीकुलोत्पन्नाः षड्जगान्धारगध्यमाः ॥५७॥
असुराणां समुत्पन्नानिषदस्तु यशस्विनि ॥
मध्यान्हे शादवं कुर्यादपरान्हे च गध्यमम् ॥५८॥
सन्ध्याकाले तु संप्राप्ते कुर्यान्मालवकौशिकम् ॥
रात्रौ तु प्रथमेयामे निषादङ्गारयेद्बुधः ॥५९॥
द्वितीयेप्रहरे चैव धैवतन्तु विचक्षणः ॥
यामे तृतीयके चैव यानिभिन्नानिपञ्चमं ॥६०॥
तानि सर्व्वाणि मेधावी गायते शावितात्मवान् ॥
यामके तुं चतुर्थेस्मिन् भिन्नषड्जंसमाश्रयेत् ॥६१॥

गान्धारं पूर्व्वमादित्यैर्देविकायां प्रयुञ्जते ॥
दिवसेप्रथमेयामे कुर्याद्वैरक्र्ककैशिकं ॥६२॥
भुक्तेन्तरे तु कर्तव्यः सौराष्ट्रं पञ्चमानि तु ॥
एवं वेलाविशेषेण गान्धर्वंसुविचारितम् ॥६३॥
मूर्च्छनां कथयिष्यामि यथानामानि सुन्दरी ॥
नन्दीविशालासुमुखी चित्राचित्रवती तथा ॥६४॥
शुभावेला तु विज्ञेया देवानां सप्तमूर्च्छना ॥
आप्यायनी विश्वधृता चन्द्रहेमकपर्द्दिनी ॥६५॥
चैत्रीचावाहनीचैव पितृणां सप्तमूर्च्छनाः ॥
उत्तरा च तथा मन्दा द्वितीया चातिरङ्गिकाः ॥६६॥
अश्वक्रान्ता च भौम्येषु शुद्धषड्जस्तथैव च ॥
नारायणीतिरजनी ऋषीणां सप्तमूर्च्छना ॥६७॥
ये गायन्ति नरा देवि जायन्ते ते न मानुषा ॥
उपवेदाः स्मृता देवि वेदाँश्चैव मया पुरा ॥६८॥
कर्तव्या च प्रयत्नेन मानवैर्वेदचिन्तकैः ॥
यजुर्वेदस्य वेदोप धनुर्वेद यशस्विनि ॥६९॥
सामवेदस्य गान्धर्व्वमुपवेदः स्मृतो मया ॥
ऋग्वेदोऽ थर्ववेदश्च अर्थशास्त्राणि वा पुनः ॥७०॥
एतेचैव तु वेदाँश्च सामान्य नात्र शंसयः ॥
लिङ्गस्याश्रयणं कृत्वा लक्षभूतं मम प्रिये ॥७१॥
गायते मम भक्तस्तु तस्य पुण्यफलं शृणु ॥
अशुद्धं स्वरहीनं वा ये गायन्ति शिवालये ॥७२॥
सप्तक्रतु शतन्देवि तेषां पुण्य फलं भवेत् ॥
गायन्ति मम भक्तास्तु ताल लक्षण संयुता ॥७३॥
भविताश्चान्तरात्मानस्तेषां मोक्षं ददाम्यहम् ॥
यो पि गायती शाठ्येन परार्थे तु शिवालये ॥७४॥
सोपि क्रतुसहस्रस्य फलं प्राप्नोतिमानवः ॥
वृत्ति लोभेन यो देवि गायते च ममाग्रतः ॥७५॥
सोपि वर्षसहस्रन्तु ममतुल्यो भवेन्नरः ॥
भावस्यैव तु दानस्य नास्तिसंख्यायशस्विनि ॥७६॥
एवं समासृते गेये तस्यसंख्यानविद्यते ॥
नघृते तादृशीतृप्तिर्नक्षीरे न च गुग्गुलौ ॥७७॥
यादृशी चैव गान्धर्व्वैर्ममतृप्तिर्वरानने ॥
नोत्पलेन न विल्वेन न तु पद्मैः सुगन्धिभिः ॥७८॥

गान्धर्व्वैश्चैव तुस्यामि ताललक्षणवर्ज्जितैः ॥
हिमवन्ते च कैलासे अहं तिष्ठामि यद्यपि ॥७९॥
मम गायन्ति ये देवि तेषु तिष्ठामिचाग्रतः ॥
लभ्यते यन्न वेदेषु सिद्धान्तेषु विचक्षणैः ॥८०॥
लभन्ते गायकास्तानि मयितुष्टे स्वयंविभु ॥
गान्धर्व्वस्य मया देवि कथितं लक्षणं प्रिये ॥८१॥
अन्यद्वा पृच्छ यत्किञ्चिद्धितं लोकस्य सुन्दरि ॥८२॥

॥उमोवाच॥

तिर्थानि मर्त्यलोकेस्मिन् भवन्ति विविधानि च ॥
भस्मस्नानस्य किं पुण्यं येन स्नातः सुरेश्वरः ॥८३॥

॥इश्वर उवाच॥

इदंस्नानञ्च मे दिव्यन्दुर्वोध्यन्दैवतैरपि ।
स्नानन्देवो न वुध्यन्ति वर्ज्जयित्वा च मां प्रिये ॥८४॥
यत्फलं सर्व्वतीर्थेषु सर्व्वयज्ञेषु यत्फलम् ॥
तत्फलं लभते देवि मन्त्रहीनस्तु मानवः ॥८५॥
दीक्षांप्राप्य तु यो देवि भस्मस्नानं समाचरेत् ॥
न तं युगसहस्रेषु लभन्ते वेदचिन्तकाः ॥८६॥
भस्मं ये मन्त्रसंयुक्तं गुरुभक्त्या लभन्ति वै ॥
लब्धन्तैर्मुक्तिदंज्ञानं पदं परमदुर्ल्लभं ॥८७॥
दिनमेकं तु यो भस्म मन्त्रैसह समन्विते ॥
सूर्यग्रहे तु सुस्नातः फलं भवति मन्त्रविद् ॥८८॥
ब्रह्मचर्येण यो भस्म एकरात्रन्तु धारयेत् ॥
अग्निष्टोमस्य यज्ञस्य फलं भवति भष्मविद् ॥८९॥
त्रिकालञ्चापि यो भस्म यावज्जीवेन धारयेत् ॥
तस्य मोक्षो भवेद्देवि सत्यन्ते कथितं मया ॥९०॥
तस्मात्भूत शरीरस्तु सेवते यदि मैथुनम् ॥
यावती रेणुसंख्यास्यात्तावत्स नरकं व्रजेत् ॥९१॥
जटामुकुटधारी तु भस्मोद्भूतस्तु सुव्रते ॥
सेवते मैथुनं यस्तु तस्य पापङ्कथाम्यहम् ॥९२॥
जटायां चैव केशानां परिमाणन्तु तेपु यत् ॥
तावद्वर्षसहस्राणि नरके पच्यतेऽवुधः ॥९३॥

क्षीयन्ते ते यदा दोषा दीक्षितानां वरानने ॥
इष्टाँल्लभन्ते तस्यान्ते सुरलोकं हि मानवाः ॥९४॥
मम भक्तास्तु ये देवि पापेन नरकं गताः ॥
क्षयान्ते तस्य पापस्य उद्धरेहं गुणेन तु ॥९५॥
मयाख्यातं प्रिये तुभ्यं पृच्छसे किमतः परं ॥
कथयामि न संदेहस्तवस्नेहाद्विशेषतः ॥९६॥

॥ उमोवाचः ॥

देव देवीति मां ब्रूयात्कादेवीति अहं प्रभो ॥
अत्र मे शंसयो देव प्रसीद कथयस्व मे ॥९७॥

॥इश्वर उवाच ॥

किन्न वुध्यसि आत्मानं लोकसन्तान कारिणीं ॥
प्रकृतिस्त्वं महादेवि पुरुषोऽहं न शंसयः ॥९८॥
ब्रह्मरूपेण स्रष्टाहं विष्णोः स्थितिर्लयं स्वयं ॥
त्वया मया वरारोहे सर्व्वव्याप्तमिदं जगत् ॥९९॥
उमादेवीति गौरीति गायन्ति वरसुन्दरी ॥
कालिकाकालरात्री च सावित्री च वसुन्धरा ॥१००॥
शरण्यावरदा देवि भक्तानां भक्तिवत्सला ॥
कात्यायनीस्वधास्वाहावेतालीब्रह्मवादिनी ॥१०१॥
रौद्री च भद्रकाली च दुर्गादेवि वरप्रदा ॥
ब्रह्माणी चैव ऐशानी कौमारी च वरानने ॥१०२॥
वैष्णवी चैव वाराही माहेन्द्री वायेवेति च ॥
चामुण्डा चैव विज्ञेया महायोगेश्वरेश्वरी ॥१०३॥
आचार्या योगविद्या च विख्याता सुरसुन्दरि ॥
क्रिया पुष्टिः सुधा तुष्टिः द्युतिर्लक्ष्मी सरस्वती ॥१०४॥
मेधावुद्धिमतितृष्णानिद्राप्रीतिस्तडिच्छुभे ॥
लज्जाक्षान्तिरहिं सा च प्रकृतिस्त्रिगुणात्मिका ॥१०५॥
मन्दाकिनी तथा गङ्गा यमुना चैव नर्म्मदा ॥
गोदावरी तथातापी भीमगङ्गानदी शुभा ॥१०६॥
तुङ्गगङ्गा पद्मवती वेण्याचैव सरस्वती ॥
विपाशा घर्घराश्चैव सिन्धुश्चैव महानदी ॥१०७॥
कावेरी कपिलाख्याता याच्चान्या पुण्यवाहिनी ॥
नन्दा च उपनन्दा च करतोया महानदी ॥१०८॥

पातालेयाश्च मर्त्ये च सुरलोके च यास्त्रियः ॥
स्वर्लोके अन्तरिक्षे च दुर्गे चैव समेषु च ॥१०९॥
दिशायाम्विदिशायाञ्च सप्तलोकेषु यास्थिताः ॥
सर्व्वत्रैवस्थितादेवि यथाहं सर्वतोमुखः ॥११०॥
अरुन्धती तथा सीता देवीमन्दोदरी तथा ॥
लोकेयास्त्रीस्वरूपेण दीव्या वै देवि प्रोच्यते ॥१११॥
त्वयामया इदं व्याप्तं त्रैलोक्ये सचराचरे ॥
एतत्त्वंकथितादेवि किं भूय श्रोतुमिच्छसि ॥११२॥

॥उमोवाच ॥

यद्यहं सर्व्वगा शर्व्व सर्व्वलोके व्यवस्थिता ॥
गौरी सरस्वतीलक्ष्मी धरणी लोकधारणी ॥११३॥
सीता च पत्नीरामस्य दयितारावणस्य च ॥
तत्किमर्थमिमं जन्म गृहे वै जनकस्य तु ॥११४॥

॥महेश्वर उवाच॥

विश्वावसुर्न्नामऋषिः कुलसन्ततिकारकः ॥
तस्यपुत्रो महाभागः दशग्रीवो महावलः ॥११५॥
दशवर्षसहस्राणि वायुभक्षेण तेन वै ॥
आराधितो ह्यहं देवि छिन्दयित्वा शिराँसि च ॥११६॥
पश्चाद्गान्धर्व्वशब्देन अहं तुष्टो वरानने ॥
प्रजापति मुखेनैवं दत्तमिष्टवरम्मया ॥११७॥
पातालं मानुषं स्वर्गं त्रैलोक्यं सचराचरं ॥
स्ववश्यानि करिष्यन्ति मत्प्रसादाच्चराचरं ॥११८॥
एवं लब्धवरो देवि राक्षसो मदमोहितः ॥
त्वयावचोदितः पूर्व्वम् वरमिष्टन्ददाम्यहम् ॥११९॥
प्रत्युवाच स दीनात्मा स्त्रियायानेच्छतिवरं ॥
एवं ब्रुवतपौलस्त्य त्वञ्चापि रुषितानना: ॥१२०॥
यस्मात्त्वं नेच्छतेमूढ स्त्रीहेतोर्म्मरणं भव ॥
नन्दिना च तथैवोक्तं वरमिष्टं ददाम्यहम् ॥१२१॥
वानरेण वरंदत्तन्नकार्यं किञ्चिदस्ति मे ॥
त्वयाशप्तोदुरात्मानो मन्दवुद्धिस्तु राक्षसः ॥१२२॥
शापितो नन्दिकेशेन वानरैश्च वधिष्यसि ॥
तेन सीताभवेद्देवि रावणस्य वधाय वै ॥१२३॥

स्त्रीरूपेण सुवेषेण कृत्वामुत्पादितामया ॥
रावणस्यवधार्थाय नन्दिशाप प्रभावतः ॥१२४॥
देवतुल्यवलाः सर्व्वे वानराः सृजितामया ॥
येनासौ रामदेवेन मयादेवैस्तु वर्ज्जितः ॥१२५॥
वानरैस्तु विनादेवि को योधयति रावणं ॥
कथितं जन्मदेवेशि जनकस्य गृहे तव ॥१२६॥
पत्नीत्वं रामदेवस्य किमन्यत्कथयामि च ॥

॥उमोवाच ॥

कोदेवो रामदेवोयं कस्यपुत्रो सुरेश्वरः ॥
किंवीर्यं वानराणाञ्च के वा वानरपुंगवाः ॥१२७॥
एतत्कथय मे सर्व्वं प्रसीद भवशंकरः ॥

॥महेश्वर उवाच ॥

राजादशरथो नाम इक्ष्वाकुकुलसम्भवः ॥
अपुत्रस्त्वभवत्सो वै धर्म्मज्ञोसत्यवाक् नृपः ॥१२८॥
वेश्याभिर्मुनिरूपाभि रानयिष्यन्नृषेः सुतं ॥
लोभयित्वाउपायेन स्वपुरं पितुराश्रमात् ॥१२९॥
राज्ञश्चापत्यलाभाय ऋष्य शृङ्गं महामुनिं ॥
अश्वमेधं क्रतुश्रेष्ठमिष्ट्वावहु सुवर्णकं ।
रामश्च लक्ष्मणश्चैव शत्रुघ्नो भरतस्तथा ॥१३०॥
एते पुत्राः समुत्पन्नाः महावीर्यपराक्रमाः ॥
स एव रामदेवस्तु विख्यातगुणपौरुषः ॥१३१॥
नीलोत्पलदलश्याम अतसीपुष्प सन्निभः ॥
दीर्घवाहुर्विशालाक्षः पीनस्कन्धो महाद्युतिः ॥१३२॥
चापहस्तो वरारोहे अयोध्यस्त्रिदशैरपि ॥
स्वयंकृष्णश्च यो देवि शंखचक्रगदाधरः ॥१३३॥
सहस्रभुजशीर्षञ्च सहस्रायुधधृक्प्रभुः ॥
असुराणाम्बधार्थाय अवतीर्णोस्तुभूतले ॥१३४॥
ब्रह्मादीनां नियोगाद्धि विष्णुर्मानुष्यताङ्गतः ॥
त्वच्छापस्य प्रभावाच्च नन्दीशस्य च सुन्दरि ॥१३५॥
निवासितं वनेदेवि सीताहरणमोहितः ॥
वानराश्चैव ये देवि महावीर्या महावलाः ॥१३६॥

नियुक्तास्तु वराराह वधाथरावणस्य तु ॥
जम्भवस्तु भवेद्ब्रह्मा वालिइन्द्रः प्रकीर्तितः ॥१३७॥
सुग्रीवश्चैव आदित्य रुद्रोहं हनुमान्स्मृतः ॥
गवाक्षस्तु भवेद्यक्षो धनदः स्वयमेव तु ॥१३८॥
गवयरशिवनौदेवौ नलस्तु वरुणः स्मृतः ॥
वैश्वानरो भवेन्नीलो द्विजराजस्तु अंगदः ॥१३९॥
सुसेनस्तु महावीर्यः सोपि धन्वन्तरिः स्मृतः ॥
एवं रामः स्वयं विष्णुर्देवो वै वानराः स्मृताः ॥१४०॥
अशक्ता रावणं जेतुं देवरूपेण सुन्दरि ॥
विभीषणसहायस्तु रामः लक्ष्मण मारुतिः ॥
सुग्रीवप्रमुखा देवि देवकार्यं प्रचक्रिरे ॥
इत्येतत्कथितं देवि रामवानरराक्षसां ॥
अद्यापि त्वं न पर्याप्तं किंपृच्छसि वरानने

॥उमोवाच ॥

यदि विष्णुर्भवेद्देवः स्वयं स्रष्टा जगत्पतिः ॥
तत्किमर्थं भवेद्देव पुत्रोयं मानुषस्य तु ॥
एतत्कथय देवेश इदं कौतूहलं हि मे ॥

॥महेश्वर उवाच ॥

शृणुदेवि परं गुह्यं विष्णोर्जन्म महात्मनः ॥
ब्रह्मशाप प्रभावेन श्वांशेन निरयङ्गतः ॥
भृगुर्नाममहाभागो ब्राह्मण ऋषिरुत्तमः ॥
तेन संरक्षणार्थाय प्रार्थितो मधुसूदनः ॥
यज्ञं पुरुषमेधस्तु यजेहं तवतेजसा ॥
असुराद्राक्षसात्सर्व्वे तन्मेरक्षजनार्द्दनः ॥
वाचंदत्वा ततस्तेन ऋषयेस्मै महात्मने ॥
न रक्षितस्तु तद्यज्ञ असुरैस्तु विमर्द्दितः ॥
ततस्तदोग्रतेजसा भृगुणा केशवः प्रिये ॥
शपितस्तुवरारोहे गच्छत्वं नरकादिषु ॥
तस्यशाप प्रभावेन ऋषयस्य महात्मनः ॥
नरकान्साधयेद्देवि कथितस्ते जनार्द्दनः ॥
प्रथमं मत्स्यरूपेण पातालाच्च समुद्धृताः ॥
मधुकैटभहृतावेदाश्चत्वार शिरसा शुभे ॥
द्वितीये कूर्म्मरूपस्तु क्षीराब्धौप्रविशन्शुभे ॥

मन्दरंधरति विष्णुः पृष्ठेनामृतमन्थने ॥
तृतीये नारसिंहस्तु जन्मनारायणस्य तु ॥
हिरण्यकशिपोर्नाशं कुरुते स जनार्द्दनः ॥
भूत्वा यज्ञवराहस्तु हिरण्याक्ष्यं महासुरं ॥
पृथिवीमुद्धरन्विष्णुर्हत्वादेवि चतुर्थके ॥
पञ्चमेवामनो भूत्वागत्वादेवि महाध्वरं ॥
वञ्चयित्वासुरपतिं क्रामतिस्म त्रिविष्टकं ॥
षष्ठेतु भार्ग्गवोरामो गृहीतपरशुर्द्विजः ॥
देवि क्षत्रियहीनाञ्च करिष्यति वसुन्धरां ॥
सप्तगस्तु भवेद्रामः सुतोदशरथस्य तु ॥
वध्वामहौदधिन्देवि राक्षसानां कुलक्षये ॥
अष्टमे वासुदेवस्तु धनञ्जयसहायवान् ॥
भाराक्रान्तामिमामुर्व्वींलह्वीकर्त्ता सुचिस्मिते ॥
नवमे शाक्यगोत्रे तु सुद्धोदनसुतोवली ॥
वौद्धं धर्म्मंसमस्थाप्य करिष्येद्धर्म्म देशनः ॥
दशमेकल्किराजस्तु ब्राह्मणो हरिपिङ्गलः ॥
म्लेच्छान्संहरति देवि गृहीतस्तुः कुशायुधः ॥
ब्राह्मणो नावमन्तव्यास्त्रैलोक्यस्थितिहेतवः ॥
ये पूजिताः सुराः सर्व्वे पूजितास्तुनसंशयः ॥
विष्णोरपि प्रभुत्वेन शापानुग्रहकारकाः ॥
यै सन्तुष्टैर्भवेत्स्वर्गं नरकन्तद्विपर्ययात् ॥
तस्माच्च ब्राह्मणोमूल भोगनिश्रेयसादिषु ॥
ज्ञानमूलाः क्रियासर्व्वाः फलमूलाभियोजिताः ॥
एतत्ते कथितन्देवि किम्भूयच्छ्रोतुमर्हसि ॥

इति शिवधर्म्मोत्तरे महासम्वादे सप्तमोऽध्यायः ॥

अथ पशुपतिमते शिवधर्मोत्तरे महासत्ववादे अष्टमोऽध्यायः ॥

ॐ नमः शिवाय ॥

॥उमोवाच ॥

पृथिव्यां भगवन्देव नरनारीजनास्तथा ॥
यथोक्तान्न चरिष्यन्ति तद्भवान्वक्तुमर्हसि ॥

॥महेश्वर उवाच ॥

पृथिव्यां तु वरारोहे नरनारीजनास्तथा ॥
यथोक्तान्न करिष्यन्ति स्वांचर्यागृहमेधिनः ॥
युगदोषाद्वरारोहे तत्तथा न भविष्यति ॥
भविष्यन्ति नसंदेहो लोभमोहसमावृताः ॥
कूटकर्म्मकराश्चैव सत्यार्ज्जव विवर्ज्जिताः ॥
नरनारीजनाश्चैव भविष्यन्ति न संशयः ॥
मातुलं भगिनीञ्चैव पितरं भ्रातरं सुतं ॥
वञ्चका वहुधालोके भविष्यन्ति परस्परम् ॥
मातापितृभ्यान्निस्नेहा नराः कार्यवशानुगाः ॥
ततस्तु लुप्तमर्यादागुरुगौरववर्ज्जिताः ॥
नशृण्वन्तिपितुः पुत्रा नस्नुषा न च भ्रातरं ॥
नभृत्या न कलत्राणि हा कष्टं युगपर्य्य ये ॥
एवं कलियुगे प्राप्ते नरनारीजनास्तथा ॥
कथं धर्म्मङ्करिष्यन्ति कलिनोपहते शुभे ॥

॥उमोवाच ॥

कथंकलियुगन्नाम आदि मध्या वसानतः ॥
श्रोतुमिच्छामितत्वेन भगवन्वक्तुमर्हसि ॥
चातुर्व्वर्णा महीपाला ये च पाखण्डदीक्षिताः ॥
युगमासाद्यते देव प्रचरिष्यन्ति वै कथम् ॥
प्रकृति विकृतिञ्चैव यद्यथा च प्रवर्त्तते ॥
तत्तथैवानुपूर्वेण भगवन्वक्तुमर्हसि ॥

॥महेश्वर उवाच ॥

पृथिव्यां भूमिपालानां सर्व्वेषान्निधनेगते ॥
समानभृत्यससुतैः समित्र गुरुवान्धवैः ॥
धर्म्मेण चोद्यमानाश्च यथाकालवशागताः ॥
अधर्म्मेण तदा देवि प्रचरिष्यन्तिमानवाः ॥
अशक्यन्तेषु दण्डेषु तथाकरशतेषु च ॥
असद्वृत्तशतैश्चापि अमर्यादा शतैरपि ॥
स्वराष्ट्रान्नाशयिष्यन्ति परराष्ट्रन्तथैव च ॥
परराष्ट्रेयथादेवि वृथास्वविषये तथा ॥
हरिष्यन्ति च वित्तानि महाक्लेशेन पार्थिवाः ॥
अन्यायेन प्रवृत्तास्तु सत्यार्ज्जवविवर्ज्जिताः ॥
श्रेष्ठिनः सार्थवाहाश्च ब्राह्मणाः क्षत्रियास्तथा ॥
कार्याकार्यविशेषज्ञ लोभमोहसमावृत्ता ॥
यथाशास्त्रं यथान्यायं न करिष्यन्ति ते तथा ॥
मूल्यक्रीतविवाहैस्तु भविष्यन्ति च ये नरा ॥
आदीन्कृत्वा महीपालान् सर्व्वलोका यशस्विनि ॥
भविष्यन्ति नसन्देहो लोभमोहसमावृताः ॥
देवानामपि येदेवा भुविदेवद्विजातयः ॥
भविष्यन्ति तदा देवि मन्त्रजाप्य विवर्ज्जिताः ॥
अहन्यहनिक्लिश्यन्ते पुत्रदारान्तरीकृताः ॥
यतयोनिर्वृतादेवि वर्त्तमानविकर्म्मसु ॥
यथातेजस्विनः पूर्व्वन्तभविष्यन्ति ते तथा ॥
यतीनाञ्चपुरा क्रोधो निर्दहेत् पृथिवीमिमाम् ॥
युगदोषाद्वरारोहेतत्तथा न भविष्यति ॥
निष्प्रभावा भविष्यन्ति यथालेख्यगतानराः ॥
परिभूतस्त्रिवर्गस्य शूद्रकर्म्मोपजीविनः ॥
भविष्यन्ति न सन्देहो वृषलीपतयो द्विजाः ॥
ब्राह्मणी पतयः शूद्रा भविष्यन्ति न संशयः
कुलानामकुलानाञ्च विशेषो न भविष्यति ॥
सर्वसंकीर्णवर्णाश्च चातुर्वर्णं भविष्यति ॥
शूद्रा विप्रसमाचाराः शूद्राचारा द्विजातयः ॥
एवं शीलसमाचाराभविष्यन्ति युगक्षये ॥
श्रुतिमन्तः प्रपन्नास्ते देवतातिथि पूजकाः ॥
शूद्रावेदानधीयाना भविष्यन्ति युगक्षये ॥
विप्रा विप्रत्वमुत्सृज्य गुप्तानिस्तृंशधर्म्मिणाः ॥

भविष्यन्ति न संदेहो राज्यपौरुषगर्व्विताः ॥
चौरप्रभाश्च चौराश्च सुरापानपरिप्लुताः ॥
हस्त्यारोहाश्वरोहाश्च सुरापानैकपाणयः ॥
शूद्राचारा भविष्यन्ति आक्रोध कलहप्रियाः ॥
छिद्रस्यान्वेषणेत्यिं शूद्रकर्म्मोपजीविनः ॥
एवं प्रवर्तमानस्य मूषिका शलभाः शुकाः ॥
ग्राम देशान्तरेष्वेव तथा क्षेत्रेखलेषु च ॥
विषमासस्यनिष्पत्तिर्म्मण्डलेषु भविष्यति ॥
क्वचित्सम्पद्यते सस्यं क्वचिद्दोषान्न जायते ॥
एवं दुर्भिक्ष वहुलं भविष्यति युगक्षाये ॥
रसातलगताकूपाः श्रोतः श्रोतः समुद्भवा : ॥
नराणां जीवनोपाया भविष्यन्ति युगक्षाये ॥
नात्यन्तसुखिनो देशा न चात्यन्ता सुनिश्चिताः ॥
सुखं दुःखञ्च सर्व्वेषां पर्यायेण भविष्यति ॥

॥उमोवाच ॥

यद्येवं युगदोषेण राजानो ब्राह्मणा अपि ॥
लुप्तलज्जा भविष्यन्ति स्वचर्या परिवर्ज्जिताः ॥
ग्रहाणाञ्चरितञ्चैव ऋक्षोल्कापातसंघता ॥
वियानेन गमिष्यन्ति ग्रहाणाञ्चैव विग्रहः ॥
येषां दोषेण दुर्भिक्ष हाहाभूतम्भविष्यति ॥
विरुध्यन्ति च राजानो ग्रहाणांविग्रहे सदा ॥
एतदिच्छामि विज्ञातुं भगवन् वक्तुमर्हसि ॥

॥ईश्वर उवाच ॥

श्रृणु देवि यथातथ्यं न चाहमनृतं वदे ॥
पशुपालादयो मूर्खाः ज्यौतिषज्ञानपाठकाः ॥
ग्रामे ग्रामे भविष्यन्ति ज्ञानविज्ञानवर्ज्जिताः ॥
तेष्वेवच विलुप्यन्ते नक्षत्रेषु तिथीषु च ॥
ज्योतिर्ज्ञानिषु नष्टेषु देशनाशो भविष्यति ॥
ते तथा तु ग्रहासक्ता विवर्णा देवि पर्व्वतः ॥
मृगवीथींप्रपद्यन्ते दक्षिणांदिशि संश्रिताः ॥
अवसथ्यं गमिष्यन्ति ग्रहाणां विग्रहेषु च ॥
तेषां दोषेण दुर्भिक्षं हाहा भूतं भविष्यति ॥

अवस्याश्चैव राजानो विरुध्यन्तिपरस्परं ॥
देशानाञ्चकुलानाञ्च तथागौब्राह्मणस्य च ॥
ग्रामाणां नगराणाञ्च विनाशे समुपस्थिते ॥
राष्ट्राभिघातो दुर्भिक्षं जनमारकमेव च ॥
आयुः क्षयेनोपहता युगेयान्ति पराभवं ॥
अकारणम्वलन्तेषां विज्ञानं विग्रहन्ततः ॥
दैवाधीनौ तु योधानां रणे जयपराजयौ ॥
क्षीणायुर्वध्यतेराजा जय एव ततोऽन्यथा ॥
देशानान्नगराणाञ्च विग्रहेसमुपस्थिते ॥
आयुक्षये नराणाञ्च ग्रहायुध्यन्तिनित्यशः ॥
नक्षत्राविविधायानि ऋषयः पुरुषास्तथा ॥
चन्द्रसूर्योपरागञ्च नक्षत्रपतनन्तथा ॥
त्रैलोक्योष्वपि यत्किञ्चित् शुभंवा यदि वाशुभं ॥
निवेदयन्ति ते सर्व्वमरुणैर्नापलक्षिताः ॥
काकाः श्येनश्चगृध्राश्च शकुनाञ्चैव सर्व्वशः ॥
संपृक्तमनुशोचन्ति सर्व्वमांसाशिनः खगाः ॥
रावै सर्व्वे निवेदन्ति भविष्यं चैवमानवे ॥
त्वरान्निवेदयन्तिस्म परिसंघाः समागताः ॥
विनाशन्देशराष्ट्राणां दुर्भिक्षञ्च न संशयः ॥
मध्यान्हे चार्द्धरात्रे च आदित्यास्तमनोदये ॥
अशस्तन्तउभे सन्ध्यो व्याहृतं मृगपक्षिणम् ॥
ग्रहाणाञ्चरितञ्चैव नक्षत्राणाञ्च या गतिः ॥
राष्ट्रोत्पातनिमित्तानि यथातत्वमुदाहृतम् ॥

इति शिवधर्म्मे उत्तरोत्तरमहासम्वादे अष्टमोऽध्यायः ॥८॥

अथ पशुपतिमते शिवधर्मे उत्तरोत्तरमहासम्वादे
नवमोऽध्यायः

ॐ नमः शिवाय

॥उमोवाच ॥

कथं वै युगवेषस्य युगदोषो भविष्यति ॥
एतदिच्छामि विज्ञातुं भगवन्वक्तुमर्हसि ॥

॥महेश्वर उवाच ॥

अकालजं पुष्पफलं अकालपतिताः प्रजाः ॥
अप्राप्तयौवनानाञ्च प्रादुर्भावो भविष्यति ॥
नैवलज्जा नमर्यादास्त्रीणां नित्यं भविष्यति ॥
स्वयमेवतथा कन्या भर्त्तारं वरयिष्यति ॥
मद्यव्यसनिनोनित्यं नरनारीजनास्तथा ।
नरनारीजनाद्यैश्चगुरोः प्रक्रान्तगौरवाः ॥
अध्रुवंवा भविष्यन्ति न भवन्ति च लज्जिताः ॥

॥उमोवाच ॥

यद्येवंयुगदोषेण नरनारीजनास्तथा ॥
लुप्तलज्जा भविष्यन्ति धर्म्मोयास्यति संक्षयम् ॥
तदहं श्रोतुमिच्छामि भगवन्वक्तुमर्हसि ॥

॥इश्वर उवाच ॥

विपरीत तदा वुद्धिर्वृद्धोवालान्भविष्यति ॥
तदा वृद्धाः भविष्यन्ति वालानां वशवर्त्तिनः ॥
सर्वारम्भेषु वालानां कन्या सम्वरणेषु च ॥
पृच्छनीया भविष्यन्ति तदा वाला युगक्षये ॥
कृतघ्ना वहवोलोके कृतज्ञश्च नविद्यते ॥
नरनारीजनाश्चैव भविष्यन्ति न संशयः ॥
तस्मात् कलियुगे वाला धर्म्मश्रुतिपरायणाः ॥
धर्म्मशीला भविष्यन्ति दानशीलातिथिप्रिया ॥
कृतज्ञा सत्यशीलशाश्च जितक्रोधाजितेन्द्रियाः ॥
अल्पाल्पमपि योधर्म्मं करिष्यन्ति युगक्षये ॥
फलंशतगुणं तस्य भविष्यति न संशयः ॥
तपेद्वर्षशतंयस्तु तपः कृत युगे नरः ॥
युगान्ते वर्षमेकञ्च सममेतन्नसंशयः ॥
श्रूयताङ्कारणं देवि यथा शतगुणं फलं ॥
भविष्यतियुगस्यान्ते दानस्यच दमस्यच ॥
तपस्यश्च प्रचीर्णस्य तीर्थाभिगमनस्य च ॥
वेदाध्ययन यज्ञानां गुरुशुश्रूषणस्य च ॥
विपरीतन्तदा सर्व्वं भविष्यति युगक्षये ॥
वीर्यं रसायनानाञ्च मूलमन्त्रौषधस्य च ।

गवांतेजोरसश्चैव सर्व्वं यास्यति संक्षयं ॥
क्षीणवीर्यस्तदा लोको प्रजादौर्वल्यताङ्गताः ॥
कः समर्थस्तदा देवि तपस्तप्तुं हि मानवः ॥
केशदन्तविनाशाय वलीपलितसन्तति ॥
वलमल्पवलञ्चैव इन्द्रियाणां तथैव च ॥
सर्वेषामेवतत्वानाम् जराप्रादुर्भविष्यति ॥
प्राणक्षयकरीनित्यं जरारूपविनाशिनि ॥
यथोक्तानिस्वतन्त्रेषु नचरिष्यन्तिलिंगिनः ॥
पाषण्डा दुषयिस्यन्ति स्वचर्या परिवर्ज्जिताः ॥
भविस्यन्ति युगस्यान्ते सारात्सारपरिग्रहा ॥
अवर्णानामपाषण्डास्तेपि काषायवाससः ॥
ज्ञानोपदेशिकन्धर्म्मं मोक्षपन्थानमाश्रिताः ॥
परेषां कथयिष्यन्ति न करिष्यन्ति ते स्वयं ॥
तेषु चर्यापरिभ्रष्टाः परधर्म्मो पदेशकाः ॥
पूजनीयाभविष्यन्ति युगान्ते समुपस्थिते ॥
भक्ष्यभोज्यान्नपानेन दानेन च शमेन च ॥
तेषां पूजा करिष्यन्ति कलिनोपहते युगे
आदिङ्कृत्वा महीपालान्सहलोकैश्च शोभते ॥
परिवाररतानित्यं भविस्यन्ति न संशयः ॥
स्त्रीणांलोभङ्करिष्यन्तिअवर्णमैथुने रताः ॥
विचरिष्यन्ति देशेषु परस्त्रीषु न संशयः ॥
अपत्योत्पादनं कृत्वाभविष्यन्ति नलज्जिताः ॥
तेषुदत्तञ्चभुक्तञ्च भस्मीभवति दारुवत् ॥
न हि तष्यफलन्दातुं भवती हपरत्रच ॥
आपदेषुच दातव्यन्नतु विप्रस्य दापयेत् ॥
शीलवृत्तविहीनस्य दत्तम्भवति निस्फलं ॥
अल्पाल्पमपि यद्दत्तमक्षयन्तस्य तद्भवेत् ॥
लिङ्गिनो ये दुराचारा शीलवृत्तविवर्ज्जिताः ॥
गमिष्यन्ति न सन्देहो यत्रयास्यन्ति मानवाः ॥
विशिष्टो ज्ञानशीलस्य सर्व्वागम परायणः ॥
सान्तादान्ताविनीताश्चजितक्रोधाअमत्सराः ॥
स्वचर्याचरिता नित्यं यथोक्तव्रतचारिणः ॥
तदल्पमपियत्तेषु दानं भवतिचाक्षयं ॥
मोक्षमार्ग्गप्र पन्नानां मोक्षस्तेषां ध्रुवं भवेत् ॥

चतुर्णामपि वर्णानान्तेष्वशक्तिर्भविष्यति ॥
चतुर्वर्णबिकर्म्मस्थपाषण्डबिकृतिङ्गते ॥
उत्पथप्रतिपन्नेषु धर्म्मो यास्यतिनिस्फलः ॥
शुद्रेकर्म्मकृषिर्वैश्ये सङ्गामक्षत्रियेषु च ॥
ब्राह्मेणे वेदअभ्यास सत्यञ्च व्रतसेविता ॥
विकर्म्मस्थेषु वर्णेषु धर्म्मोयास्यति संक्षयं ॥
वृथा मुण्डेषुलुब्धेषु स्वचर्यावर्ज्जितेषु च ॥
लोकेकाषायवस्त्रेषु युगदोषाद्यसश्विनि ॥
अधर्म्मेणच धर्म्मस्तु संकीर्यतप्रजास्तथा ॥
पार्थिवानांह्यधर्म्मित्वम्प्रजाः सन्त्यक्तधर्म्मिकाः ॥
हतेदुर्योधनेराज्ञि कुरुणां संक्षयेकृते ॥
भारावतारणकृते प्राप्तराज्ये युधिष्ठिरे ॥
ततःकलियुगेदेवि व्यतीते द्वापरेयुगे ॥
प्रवृत्तिः सर्व्वभूतानामभावाय नसंशयः ॥
यत्रधर्म्मोह्यधर्म्मोवा यत्र सत्यानृतं तथा ॥
पश्यन्ति पश्यमानंवा सर्व्वभूतभयावहान् ॥
दुर्भिक्षं वहुलञ्चैव सुभिक्षं च सुदुर्ल्लभं ॥
भविष्यतिनसंदेहः स च दोषसमन्वितः ॥
नराणाञ्चैव नारीणां चिन्ताशोक विवर्द्धनं ॥
दुःखाद्यमल्पसौख्यञ्च युगानामधमं युगं ॥
कलौ तु प्रथमोराजा धर्म्मपुत्रो युधिष्ठिरः ॥
राजा वै सर्व्वधर्म्मज्ञोनित्यंराष्ट्रहितेरतः ॥
सत्यसन्धस्थितोवर्म्मः प्रजापालनवत्सलः ॥
युधिष्ठिरान्तराजानः शेषाः कलियुगे नृपाः ॥
कलिनाअभिभूताश्च लोभेन च वशीकृताः ॥
पापकर्म्मरताश्चैव नरनारी वहु श्रूताः ॥
उत्सृजन्ति कुलस्यान्ते कुलवंशक्षयेषु च ॥
अल्पायुषो नरादेवि भविष्यन्ति युगक्षये ॥
द्विरष्टवर्षमात्रं हि परमायुर्भविष्यति ॥
पञ्चमे वचतुर्थेवा त्रिवर्षा प्रसविष्यति ॥
युगदोषाद्वरारोहे अष्टवर्षा महायुषः ॥
एवं कलियुगस्यन्ते आत्मानन्न विदन्ति ते ॥
तत्सर्वञ्च मयाख्यातम् यथातत्वमुदाहृतं ॥
ततः कृतयुगे देवि पर्यायेण भविष्यति ॥

वहूदकास्तथा मेघावहुसस्यवती मही ॥
स्वयंरुहानिधान्यानि भविष्यन्ति न संशयः ॥
ब्राह्मणानान्तदातेजो विशेषेण तपस्विनां ॥
निर्दहेत्पृथिवीं सर्व्वां सशैलवनकाननां ॥
अनुग्रहसमर्थास्ते भविष्यन्ति वरप्रदाः ॥
तपश्चरणशीलाश्च भविष्यन्ति न संशयः ॥
धर्म्मशीलाश्च राजानो नित्यं राष्ट्रहिते रताः ॥
दानाध्ययन यज्ञेषु व्रतेषु नियमेषु च ॥
स्त्रियः पतिव्रताश्चैव स्वदारनिरतानराः ॥
गुरुशुश्रूषकाः शिष्याः मातापितृवशाः सुताः ॥
न चाज्ञयाव्यतिक्रान्तागुरुकार्येषु वत्सलाः ॥
तेषां सत्येन चरते तुष्यन्ते सर्व्वदेवताः ॥
चन्द्रः सूर्यश्च तपते नक्षत्राणि ग्रहास्तथा ॥
सौम्याचारास्ततः सर्व्वे सुख स्पर्शाश्च मारुताः ॥
गुणदोषास्तथा सत्ययुगानामनु पूर्व्वशः ॥
यथाच संस्थिताम् पृथ्वी पुनरेव युगे युगे ॥
धर्मः कृत युगे देवि चतुष्पादः प्रतिष्ठितः ॥
त्रीणि त्रेतायुगे प्राप्यद्विपादो द्वापरे स्थितः ॥
एकपादावशेषस्तु धर्म्मः कलियुगे स्थितः ॥
एतत्ते कथितं सर्व्वं युगदोषसमुद्भवम् ॥

इति शिवधर्म्मशास्त्रे उत्तरोत्तरे महासंवादे नवमोध्यायः

अथ पशुपतिमते शिवधर्मशास्त्रे उत्तरोत्तर महासम्वादे

दशमोऽध्यायः ।

ॐ नमः शिवाय ।

॥ईश्वर उवाच ॥

येमांचैवावमन्यन्ते विष्णुभक्ति परायणाः ॥
मद्भक्त्याचाथवाविष्णुमुभौ नरकगामिनौ ॥
यस्त्वेकं मान्यते चैव अर्धनारीगताङ्गतिम् ॥
न हि तस्याशुभं किञ्चिदिहलोके परत्र च ॥
ममलोकमवाप्नोति पापकर्मरतोऽपि सः ॥
अतिथिन्तृड्बुभुक्षान्तं शान्तं दान्तमुपागतः ॥
येऽर्चयन्ति वरारोहे तेषां पुण्यफलं श्रृणु ॥

पात्रमुद्दिश्य दातव्यं गृहस्थेन महात्मना ॥
किञ्चिद्वेदमयंपात्रं किञ्चित्पात्रं तपोगयं ॥
आगमिष्यन्ति यत्पात्रंतत्पात्रं तारयिष्यति ॥
काले देशे च पात्रे च अतिथिन्तु विचिन्तयेत् ॥
मन्ये दिष्टविदिष्टञ्च विकल्पन्नच कारयेत् ॥
नपृच्छेद्गोत्रचरणं स्वाध्यायं देशजन्मनी ॥
चित्तञ्चभावयेत्तत्र स्वयं देवो ऽयमागतः ॥
तस्य पूजां यथाशक्त्या सौम्यचित्तेग कारयेत् ॥
चित्तमूलोभवेद्धर्म्मो धर्म्ममूलोभवेद्यशः ॥
तस्मात्सौम्येन चित्तेन दातव्यमविशेषतः ॥
सौम्य चित्तस्तु यो दद्याद्दानं शतगुणम्भवेत् ॥
पीडया चैव यो दद्यात् पत्नीपुत्रादिवान्धवान् ॥
गावश्च धनधान्यानि नतस्य फलमश्नुते ॥
श्रेयोर्थिना तु दातव्यं परत्रेह च योगिने ॥
अल्पाल्पमपि दीयेत यद्यदस्तिमहीतले ॥
केदाराणितडागानि सराँसिसरितस्तथा ॥
तोयपूर्णा निदृश्यन्ते प्रधानानि यशस्विनि ॥
एवमल्पेन दानेन दत्तंभवति चाक्षयं ॥
यथा पुण्येनपूतास्ते स्वर्गे क्रीडन्तिमानवाः ॥
मानुष्यमागता भूयो भवन्ति बहुसंचयाः ॥
नास्तिभूमिसमन्दानं नास्ति दानसमोनिधिः ॥
नास्ति सत्यसमो धर्म्मो नानृतात्पातकं परं ॥
नास्ति गङ्गासमं तीर्थं न भूतमीश्वरात्परं ॥
ब्राह्मणेभ्यः परन्नास्ति व्रतंचैवमहाव्रतात् ॥
पितागुरुसमोनास्ति नास्तिराजासमो गुरुः ॥
मित्रम्विद्यासमं नास्ति नास्ति क्रोधसमोरिपुः ॥
दुःखंक्षुद्या समं नास्ति नास्त्याहार सगं सुखं ॥
नचारोग्यसमोवन्धुर्नच व्याधिसमोरिपुः ॥
नचापत्यसमः स्नेहो न व्याधिर्ऋणसन्निभाः
न च ज्ञानसमं चक्षुर्न भारतसमो श्रुतिः ॥
रामायणसमं पुण्यं यत्र विष्णुः प्रतिष्ठितः ॥
गृहाश्रमपरो देवि आश्रमो नैव विद्यते ॥
एक पादेन तिष्ठन्ति ऊर्ध्वपादमधोमुखाः ॥
गृहाश्रमस्य ते सर्वे कलां नार्हन्तिषोडशीं ॥

॥उमोवाच ॥

गृहाश्रमस्य या चर्या व्रतानिनियमास्तथा ॥
यच्च पूज्यतमं देव सततं गृहमेधिनां ॥
एतत्सर्वं समासेन भगवन्वक्तुमर्हसि ॥

॥इश्वरउवाच ॥

गृहाश्रमस्य यन्मूलं धर्म्मं वक्ष्यामि चोत्तमम् ॥
पादैश्चतुर्भिः सततं धर्म्मो यत्र प्रतिष्ठितः ॥
सारभूतं वरारोहे दध्नोघृतमिवोद्धृतं ॥
अहं ते संप्रवक्ष्यामि श्रूयतां धर्मचारिणी ॥
शुश्रूषये च पितरं मातरञ्च गृहाश्रमे ॥
भर्तारं चैव यानारी अग्निहोत्रञ्च योद्विजः ॥
तेषु प्रीतेषु तृप्यन्ते देवाः सेन्द्र पुरोगमाः ॥
पितरं पितृलोकस्था धर्म्मात्ते प्राप्नुवन्ति च ॥

॥उमोवाच ॥

एवंमातृपितृयुक्ता याचर्या गृहमेधिना ॥
विभक्तानाञ्च नारीणां भगवन्वक्तुमर्हसि ॥

॥इश्वर उवाच ॥

देवतागुरुशुश्रूषा गुरुवृद्धाभिवादनं ॥
अहिंसा सर्व्वभूतानामलोभसत्यसन्धता ॥
ब्रह्मण्यत्व शरण्यत्व शौचपूर्व्वाभिभाषितं ॥
सततं धर्मशीलञ्च त्रिकालस्नानमेव च ॥
पितृदेवार्च्चन रतोअग्निहोत्रातिथिप्रियः ॥
दीपंप्रतिश्रयं दद्यात् अर्घपाद्यासनानि च ॥
गवान्हिकप्रदानञ्च पितृदैवतपूजनं ॥
चतुर्थी चैव षष्ठी च सप्तमी द्वादशी तथा ॥
पञ्चमीचाष्टमी चैव ब्रह्मचर्य सदा भवेत् ॥
श्मश्रूकर्म्म शिरोभ्यङ्ग अञ्जनाभ्यञ्जनन्तथा ॥
नकुर्याद्दिवरोष्वेषु अलक्ष्मी स्तेषु तिष्ठति ॥
व्रतोपवास नियमं शैय्यादानं प्रशस्यते ॥
भरणंभृत्यवर्गस्य दीनानामनुकम्पकं ॥

परदारनिवृत्तिश्च स्वदारनिरतिस्तथा ॥
तस्मात्सदारनिरतो ब्रह्मचारी सदा भवेत् ॥
शीलवृत्तिनिवृत्तस्य जितद्वन्द्वस्य सुव्रते ॥
सत्यवादी च योनित्यं स मुनिस्तुप्रकीर्तितः ॥
गृहाश्रमपरस्थस्य आश्रमो नैव विद्यते ॥
इति शिवधर्म्मशास्त्रे उत्तरोत्तरे महासमवादे दशमोऽध्यायः ॥१०॥
श्री शिवाय पशुपतये नमो नमः ॥

अथ वृषसार संग्रह प्रारम्भ

श्री गणेशाय नमः
ॐ नमः शिवाय ॥
अनादिमध्यान्तमनन्त पारं सुसूक्ष्ममव्यक्त जगत्सुसारं ॥
हरीन्द्रब्रह्मादिभिरासमग्रं प्रणम्यवक्ष्ये वृषसारसंग्रहम् ॥
शतसाहस्रिकं ग्रन्थं सहस्राध्यायरुत्तमम् ॥
पर्व्वमस्य शतं पूर्णं श्रुत्वा नारदसंहिताम् ॥
अतृप्तापुनः पप्रच्छ वैसंपाय नमेव हि ॥
जनमेजयेन यत्पूर्व्वं तच्छ्रृणुत्वमतन्द्रितं ॥

॥जनमेजय उवाच ॥

भगवन्सर्व्वधर्म्मज्ञ सर्व्वशास्त्रविशारदः ॥
अस्ति धर्म्मं परंगुह्यं संसारार्णवतारणम् ॥
द्वैपायनमुखाद्गीर्णं धर्म्मवा यद्द्विजोत्तम ॥
कथयस्व हि मे तृप्तिं कुरु यत्नात्तपोधन ! ॥

॥वैशम्पायन उवाच ॥

श्रृणुराजन्नवहितो धर्म्माख्यानमनुत्तमम् ॥
व्यासानुग्रहसंप्राप्तं गुह्यधर्म्मं श्रृणोतु मे ॥
अनर्थयज्ञकर्तारन्तपो व्रत परायणम् ॥
शीलशौच समाचारं सर्व्वभूतदयापरं ॥
जिज्ञासनार्थ प्रश्नेकं विष्णुना प्रभविष्णुना ॥
द्विजरूपधरो भूत्वा पप्रच्छ विनयान्वितः ॥

ब्रह्मविद्या कथं भूयो रूपवर्णाविवर्जिता ॥
स्वरव्यज्जननिर्मुक्तमक्षरङ्किमुतत्परं ॥

॥अनर्थयज्ञ उवाच ॥

अनुच्चार्यमसन्दिग्धमविच्छिन्नमनाकुलम् ॥
निर्म्मलं सर्वगं सूक्ष्ममक्षरं किमु तत्परम् ॥

॥विगतराग उवाच ॥

देही देहक्षयंयाते भूजलाग्निशिवादिभिः ॥
यमदूतैः कथन्नीता निरालम्वो निरञ्जनः ॥
कालपाशैः कथंवद्धो निर्देहश्च कथंव्रजेत् ॥
स्वर्ग्गं वा स कथं यान्ति निर्देहो वहुधर्म्मकृत् ॥
एतन्मे संशयं व्रूहि ज्ञातुमिच्छामि तत्वतः ॥

॥अनर्थयज्ञ उवाच ॥

अतिशंसयकष्टम्मे पृष्टोऽहं द्विजसत्तम ॥
दुर्विज्ञेय मनुष्यैस्तु देवदानवपन्नगैः ॥

॥अनर्थयज्ञ उवाच ॥

कर्म्महेतु शरीरस्य उत्पत्तिनिधनञ्च यत् ॥
सुकृतन्दुष्कृतञ्चैव पाशद्वय मुदाहृतं ॥
तेनैव सहसंयाति नरकं स्वर्गमेव वा ॥
सुखदुःख शरीरेण भोक्तव्यं कर्म्मसम्भवः ॥
हेतुनानेन विप्रेन्द्र देहः सम्भवते नृणाम् ॥
यङ्कालपाशमित्याहु श्रृणुवक्ष्यामि सुव्रत ॥
न त्वया विदितंकिञ्चिद्विज्ञास्यसि कथं द्विज ॥
कालपाशञ्च विप्रेन्द्रं सकलं वक्तुमर्हसि ॥
कलाकलितकालश्च कालतत्वकलां श्रृणु ॥
त्रुटिद्वयं निमेषस्तु निमेषद्विगुणाकला ॥
कला द्विगुणिता काष्टा काष्टा वै त्रिंशतिः कला ॥
त्रिंशत्कलामुहूर्त्तञ्च मानुषेन द्विजोत्तम ॥
मुहूर्तं त्रिंशके नैवअहोरात्रं विदुर्व्वुधाः ॥
अहोरात्रं पुनस्त्रिंशत्माससमाहुर्मनीषिणः ॥
समाद्वादशमासश्च कालतत्वविदोजनाः ॥

शतवर्ष सहस्राणि त्रीणि मानुषसंख्यया ॥
षष्टिश्चैव सहस्राणि कालः कलियुगस्मृतः ॥
द्विगुणा कलि संख्यातो द्वापरे युगसंज्ञितः ॥
त्रेता तु त्रिगुणाज्ञेया चतुः कृत युगस्मृतः ॥
एषा चतुयुर्गासंख्याकृत्वा वै ह्येकसप्ततिः ॥
मन्वन्तरस्य चैकस्य ज्ञानमुक्तं समासतः ॥
कल्पमन्वन्तराणान्तु चतुर्दश तु संख्यया ॥
दशकल्पसहस्राणि ब्रह्माहः परिकल्पितः ॥
रात्रिरेतावती प्रोक्ता मुनिभिस्तत्वदर्शिभिः ॥
रात्र्यागमे प्रलीयन्ते जगत्सर्वञ्चराचरं ॥
अन्हागमे तथैवेह उत्पद्यन्ते चराचरं ॥
परार्द्धपरकल्पानि अतीतानि द्विजोत्तम ॥
अनागतन्तथैवाहुर्भृगुरादिमहर्षयः ॥
यथार्कग्रहतारेन्दु भ्रमतो दृश्यतेत्विह ॥
कालचक्रं भ्रमत्वैव विश्रमन्न च विद्महे ॥
कालः सृजतिभूतानि कालसंहरते पुनः ॥
कालस्यवशगासर्वे न काल वशकृतक्वचित् ॥
चतुर्द्दशपरार्द्धानि देवराज द्विजोत्तम ॥
कालेन समतीतानि कालो हि दुरतिक्रमः ॥
एष कालो महायोगी ब्रह्मविष्णुपरशिवः ॥
अनादिनिधनो धाता स महात्मा नमस्कुरु ॥

॥विगतराग उवाच ॥

श्रुतं वै कालचक्रन्तु मुखपद्मविनिसृतं ॥
परार्द्धञ्च परञ्चैव श्रोतुं यः प्रतिदीपितं ॥

॥अनर्थयज्ञ उवाच ॥

एकं दशंशतञ्चैव सहस्रमयुतन्तथा ॥
प्रयुतं नियुतं कोटिंमर्व्वुदम्वृन्दमेव च ॥
खर्व्वञ्चैव निखर्व्वञ्च शंख पद्मन्तथैवच ॥
वृन्दञ्चैव महावृन्द द्विपरानन्तमेवच ॥
परात्परतरन्नास्ति इति मे निश्चितामतिः ॥
पुराणवेदपठिता मयाख्यातं द्विजोत्तम ॥

॥विगतराग उवाच ॥

ब्रह्माण्डं कति विज्ञेयं प्रमाणञ्चापि तं क्वचित् ॥
कतिचाङ्गुलिमूर्द्धेषु सूर्यस्तपति वै मही ॥

॥अनर्थयज्ञ उवाच ॥

ब्रह्माण्डानाञ्च संख्यातुं मयाशक्यं कथं द्विज ॥
देवास्तेऽपि नजानन्ति मानुषाणाञ्च का कथा ॥
पर्यायेण तु वक्ष्यामि यथाशक्यं द्विजोत्तम ॥
ब्रह्मणा यत्समाख्यातो मातरिस्वा यथातथा ॥
शिवाण्डाभ्यन्तरेणैव सर्व्वेषामेव भूरिमां ॥
दशनामदिशाष्टानां ब्रह्माण्डे कीर्तितं शृणु ॥
सहासह सहः सज्ञो विसहः संहतो सता ॥
प्रसहेः सप्रहः सानु पर्व्वतो दशनायकाः ॥
प्रभासो भासतो भानुः प्रद्योतो द्युतिनो द्युतिः ॥
दीप्ततेजश्च तेजाश्च तेजातेजवहोदश ॥
आग्नेयेत्वेतदाख्यातं याम्ये शृण्वथ भोद्विज ॥
यमोथयमुनायामः संयमोयमुनायमः ॥
संयमो यमनो यानो यनियुग्मा नयोनय ॥
नगजो नगनो नन्दो नगरोन्नगनन्दनः ॥
नगर्भो गहनो गुह्ये गूढजो दशतत्परः ॥
वारुणेच प्रवक्ष्यामि मृद्धे (?) विप्रनिवोध मे ॥
वभ्रून्सतुर्भवोद् भद्रः प्रभवोद्भव भाजन ॥
भरणां भुवनो भर्ता दशैते वरुणालया ॥
नृगर्भोसुरगर्भाश्च देवगर्भोमहीधरः ॥
वृषभो वृषगर्भश्च वृषाङ्को वृषभध्वजः ॥
ज्ञानवाञ्च तथासत्यवृषजो वृषनन्दनः ॥
नायका दश वायव्येकीर्तिता ये मया द्विज ॥
सुरभः सुमनः सौम्यः सुप्रजः सुतनुः शिवः ॥
सतसत्यालयः शम्भुर्दशनायक उत्तरे ॥
इन्दु विन्दु भुवोवज्र वरदो वरदर्य्य च ॥
इलिनो वलिनो ब्रह्मा दशेशाानेषु नायकाः ॥
अपरो विमलो मोहो निर्मलोमनमोहनः ॥
अक्षयञ्चाव्ययो विष्णुर्वरदो मध्यमे दशः ॥
सर्व्वेषां दशरीशानां परिवार शतं शतं ॥

शतानां पृथगेकैकं सहस्रैः परिवारिता ॥
सहस्रेषु च एकैकमयुतैः परिवारितमाः ॥
अयुतं प्रयुतैर्व्वृन्दैः प्रयुतं नियुतैर्वृतः ॥
एकैकस्य परिवारो नियुतः पृथगेवच ॥
कोटिभिः दशकोट्येन एकैकः परिवारितः ॥
दशकोटिषु एकैकं वृन्दं वृन्दं वृतैर्वृतः ॥
वृन्दवर्ग्गेषु एकैकं खर्व्वभिः परिवारितः ॥
खर्व्व वर्गेषु एकैकं दशखर्व्व गणैर्वृतः ॥
दशखर्व्वेषु एकैकं शङ्खुभिः परिवारितः ॥
शङ्खुभिः पृथगेनैव पद्मेन परिवारितः ॥
पद्मवर्गेषु एकैकं समुद्रैः परिवारितः ॥
समुद्रेषु तथैकैकं मध्येशङ्ख्यायुतैर्वृतः ॥
मध्येशंखेषु एकैकमनन्तैः परिवारितः ॥
अनन्तेषु च एकैकं परार्धैः परिवारितः ॥
परार्द्धेषु च एकैकं परेण परिवारितः ॥
एष वै कथिता विप्र शक्यं संख्यामुदीरितं ॥
प्रमाणं श्रृणु मे विप्र संक्षेपाद्ब्रुवतोमम ॥
चन्द्रोदये पूर्णमास्यां वपुरण्डस्यतादृशं ॥
कोटि कोटि सहस्रन्तु योजनानां समन्ततः ॥
अण्डानाञ्च परीमाणं ब्रह्मणा परिकीर्तितं ॥
सप्तकोटि सहस्राणि सप्त कोटि शतानि च ॥
विंशकोटिषु गुल्मेषु उर्द्धतस्तपते रवि ॥
प्रमाणं नाम संख्या च कीर्तितानि समासतः ॥
ब्रह्माण्डाश्चाप्रमेयाणां लक्षणं परिकीर्तितम् ॥
पुराणाशी सहस्राणि शतानि द्विजसत्तम ॥
ब्रह्मणा कथितं पूर्णं मातरिस्वा यथा तथम् ॥
वायुना पादसंक्षिप्य प्राप्तश्चोशनसं पुरा ॥
तेनापि पादसंक्षिप्य प्राप्तवाञ्च वृहस्पतिः ॥
वृहस्पतिस्तु प्रोवाच सूर्यं त्रिंशत्सहस्रिकं ॥
पंञ्चविशत्सहस्राणि मृत्युंप्राह दिवाकरः ॥
एकविंशत्सहस्राणि मृत्युनेन्द्राय कीर्तितं ॥
इन्द्रेणाह वशिष्ठाय विंशश्लोक सहस्रिकं ॥
अष्टादशसहस्राणि तेन सारस्वताय तु ॥
सारस्वता त्रिधामाय सहस्रदशसप्त च ॥

षोडशानां सहस्राणिभरद्वाजाय वै ततः ॥
दशपञ्च सहस्राणि त्रिवृषाय अभाषतः ॥
चतुर्द्दश सहस्राणि अन्तरीक्षाय वै ततः ॥
त्रैयारुणि सहस्राणि त्रयोदशह्यभाषत ॥
त्रैयारुणिस्तु विप्रेन्द्रो धनञ्जयमभाषतः ॥
द्वादशानि सहस्राणि संक्षिप्य पुनरव्रवीत् ॥
कृतञ्जयाय संप्राप्तो धनञ्जय महामुनिः ॥
कृतञ्जयाद्द्विज श्रेष्ठो ऋणञ्जय महात्मने ॥
ऋणञ्जयात्पुनः प्राप्तौ गौतमाय महर्षिणे ॥
गौतमाच्च भरद्वाजस्तस्माद्दम्याद्दमाय तु ॥
राजश्रवततः प्राप्तः सोमशुष्माय वै तत : ॥
सोमशुषात्ततः प्राप्तस्तृणविन्दु स्तु भो द्विज ! ॥
तृणविन्दुस्तु वृक्षाय वृक्षः शक्तिमभाषतः ॥
शक्तिः पराशरं प्राह जतुकर्णाय वै ततः ॥
द्वैपायनाय प्रोवाच जतुकर्णमहर्षिणा ॥
रोमहर्षाय संप्राप्तो द्वैपायन महामुनि ॥
रोमहर्षणाय प्रोवाच पुत्राया मित बुद्धये ॥
दशद्वेच सहस्राणि पुराणं संप्रकाशितं ॥
मानुषाणां हितार्थाय किंभूय श्रोतुमिच्छसि ॥

इति वृषसारसंग्रहे ब्रह्माण्डसंख्या नाम प्रथमोऽध्याय ॥१॥

अथ पशुपतिमते शिवधर्म्मे वृषसारसंग्रहे शिवाण्डसंख्या नाम द्वितीयोऽध्यायः ।

ॐ नमः शिवाय ।

॥विगतराग उवाच ॥

श्रुतंमया जनाग्रेण ब्रह्माण्डस्यतु निर्णयं ॥
प्रमाणं वर्णरूपञ्च संख्यातस्य समासतः ॥
शिवाण्डेति त्वया प्रोक्तो ब्रह्माण्ड लयकीर्तितः ॥
कीदृशं लक्षणं ज्ञेयं प्रमाणं तस्य वा कति ॥
कस्यवा लक्षणंज्ञेयं प्रमाणंवात्रवासिनः ॥
किंवा तत्र प्रजाज्ञेया को वा तत्र प्रजापति : ॥

॥अनर्थयज्ञ उवाच ॥

शिवाण्ड लक्षणं विप्र तत्वं प्रष्टुमिहार्हसि ॥
देवतैरपि काशक्ति ज्ञातुं द्रष्टुञ्च तत्वतः ॥
अगम्य गमनं गुह्यं गुह्यादपि समृद्धिदं ॥
न प्रभुर्नेतरस्तत्र नदण्ड्या नच दण्डकः ॥
नसत्यौ नानृतस्तत्रा शुशीलो नो दुःशीलवान् ॥
नाऋृजुर्न्न च दम्भित्वन्नतृष्णा नच इर्ष्यता ॥
नक्रोधो नच लोभोस्ति नमानोस्ति न स्तेयकः ॥
ईर्ष्या द्वेषो न तत्रास्ति न शठे नच मत्सराः ॥
नव्याधिर्न्न जरास्तत्र नशोकोस्ति न विक्लव ॥
नाधमः पुरुषस्तत्र नोत्तमोनच मध्यमः ॥
नोत्कृष्टो मानवस्तस्मिन् स्त्रियश्चैव शिवालये ॥
न निन्दा न प्रशंसाश्च मत्सरी पिशुनो न च ॥
गर्व्वदर्पन्नतत्रास्ति क्रूरमायादिकन्तथा ॥
याचमानो न तत्रास्ति दाता चैव न विद्यते ॥
अनर्थी व्रजतत्रस्थः कल्पवृक्ष समाश्रितः ॥
न कर्म्मणा प्रियस्तत्र न कलि कलहो न च ॥
द्वापरो न च न त्रेता कृतश्चापि न विद्यते ॥
मन्वन्तरं न तत्रास्ति कल्पश्चैव न विद्यते ॥
आभूतसंप्लवन्नास्ति ब्रह्मरात्रि दिवस्तथा ॥
नजन्ममरणन्तत्र अपदन्नाप्नुयात् क्वचित् ॥
न च सायाशवृद्धोस्ति रागमोहन्न विद्यते ॥
न देवा नासुरास्तत्र न यक्षोरगराक्षसाः ॥
न भूता न पिशाचाश्च गन्धर्वो ऋषयस्तथा ॥
ताराग्रहन्नतत्रास्ति नागकिन्नरगारुडं ॥
नजपो नान्हिकस्तत्र नाग्निहोत्री न यज्ञकृत् ॥
नव्रतन्नतपश्चैव नतीर्थन्नरकन्तथा ॥
तस्येशानस्य देवस्य ऐश्वर्यगुणविस्तरं ॥
अपि वर्षशतेनापि शक्यंववक्तुन्न केनचित् ॥
हरेच्छाप्रभवा सर्व्वे पर्यायेण व्रवीमिते ॥
देवमानुषवज्ज्ञानि वृक्षगुल्मलतादयः ॥
परार्ध द्विगुणाच्छ्रेधा विस्तारं च तथा विधा ॥
अनेकाकारपुष्पाणि फलानिच मनोहरं ॥

बहुकाञ्चन वृक्षाणि मणिवृक्ष्याण्यथापरे ॥
प्रवालमणिघण्टाश्च पद्मराग सहानि च ॥
स्वादुमूलफलास्कन्द लताविटपपादपाः ॥
कामरूपाश्च ते सर्व्वे कामदाः कामभाषिणः ॥
तत्र विप्र प्रजाः सर्व्वे अनन्त गुणसागराः ॥
तुल्यरूपवलाः सर्व्वे सूर्यायुतसमप्रभाः ॥
परार्धद्वयविस्तारं परार्धद्वयमायतं ।
परार्धद्वय विज्ञेया योजनानां द्विजोत्तम ॥
ऐश्वर्यत्वन्न संख्यास्ति तवशक्तिश्च भो द्विज ! ॥
अधोर्ध्वोनच संख्यास्ति न तिर्यञ्चेति कश्चन ॥
शिवाण्डस्यच विस्तारमायामञ्च नवेद्म्यहम् ॥
भोगमयास्तुतत्रैव जन्ममृत्युर्नविद्यते ॥
शिवाण्ड मध्यमाश्रित्य गोक्षीरसदृश प्रभा ॥
परार्ध परकोटीनामीशानानां स्मृतालया ॥
बालसूर्य प्रभा सर्व्वे ज्ञेयातत्पुरुषालयं ॥
परार्धपरकोटीनाम्पूर्व्वस्यांदिशमाश्रिताः ॥
भिन्नाञ्जनप्रभासर्व्वे दक्षिण दिशिमाश्रिताः ॥
परार्धपरकोटीनामधोरालयमाश्रिता ॥
कुन्देन्दुहिमशैलाभाः पशिचमान्दिशमाश्रिता ॥
परार्ध परकोटीनां सद्यमिष्टालयः स्मृतः ॥
कुंकुमोदकसङ्काशा उत्तरान्दिशमाश्रिताः ॥
परार्ध परकोटीनाम्वामदेवालयः स्मृतः ॥
ईशानस्य कलापञ्च वक्रस्यापि चतुष्टके ॥
अघोरस्य कला अष्टौ वामदेवास्त्रयो दश ॥
सद्यश्चाष्टौ कला ज्ञेया संसारार्णवतारकाः ॥
अष्टत्रिंश कलाज्ञेयाः कीर्तिताद्विजसत्तमः ॥
सन्ध्या वर्णा दिशश्चैव एकैकस्य पृथक्पृथक् ॥
पूर्व्वोक्तेन विधानेन वोद्धव्या तत्वचिन्तकैः ॥
शिवाण्ड गमनाकृष्ट्याशिवयोगं सदाभ्यसेत् ॥
शिवयोगविना विप्र तत्र गन्तुन्न शक्यते ॥
अश्वमेघादि यज्ञानां कोट्यायुत शतानि च ॥
कृच्छ्रादि तप सर्व्वाणि कृत्वा कल्पशतानि च ॥
तत्र गन्तुन्न शक्येते देवैरपि तपोधन ॥
गंगादि सर्व्वतीर्थेषु स्नात्वा तप्त्वा च वै पुनः ॥

तत्र गन्तुं न शक्यन्ते ऋषिभिर्वा महात्मभिः ॥
सप्तद्वीप समुद्राणि रत्नपूर्णानि भो द्विज ॥
दत्वा वा वेदविदुषे श्रद्धाभक्तिसमन्वितः ॥
तत्र गन्तुंनशक्यन्ते विनाध्यानेन निश्चयः ॥
स्वदेहात्मां समुद्धृत्य दत्वार्थिभ्यश्च निश्चयात् ॥
स्वदारपुत्रसर्व्वस्वं शिरोर्थिभ्यश्च यो ददेत् ॥
न तत्र गन्तुं शक्येत अन्यैर्व्वापि सुदुष्करैः ॥
यज्ञंतीर्थतपोदानवेदाध्ययनं पारगः ॥
ब्रह्माण्डात्तस्य भोगास्तु भुक्त्वा कालवशानुगः ॥
कालेनसमप्रेष्येण धर्मोयाति परिक्षयः ॥
अलातचक्रवत्सर्व्वङ्कालो यान्ति परिभ्रमन् ॥
त्रैकाल्य कलनात्कालस्तेन कालः प्रकीर्तितः ॥

इति वृषसारसंग्रहे शिवाण्डसंख्या नाम द्वितीयोऽध्यायः ॥२॥

अथ पशुपतिमते शिवधर्मे वृषसारसंग्रहे अहिंसाप्रशंसा नाम तृतीयोऽध्याय

ॐ नमः शिवाय ।

॥विगतराग उवाच ॥

किमर्थंधर्म्ममित्याहु कतिमूर्तिश्चकीर्त्यते ॥
कतिपादवृषोज्ञेयो गतिस्तस्य कतिस्मृतः ॥
कौतुहलममोत्पन्नं संशयं छिन्धितत्वतः ॥
कस्यपुत्रो मुनिश्रेष्ठ प्रजाःतस्य कतिस्मृताः ॥

॥अनर्थयज्ञ उवाच ॥

धृतिरित्येष धातुर्वै पर्यायः परिकीर्तितः ॥
आधारेणमहत्वाच्च धर्म्म इत्यभिधीयते ॥
श्रुतिस्मृतिर्द्वयोमूर्तिश्चतुस्पादवृषः स्थितः ॥
चतुराश्रम यो धर्म्मः कीर्तितानि मनीषिभिः ॥
गतिश्च पञ्चविज्ञेयः श्रृणुधर्म्मस्य भो द्विज ! ॥
देवमानुष तिर्यञ्च नरकस्थावरादयः ॥
ब्राह्मणो हृदयम्भित्वा जातोधर्म्माः सनातनः ॥
तस्य पत्नी महाभागा त्रयोदशसुमध्यमाः ॥
दक्षकन्या विशालाक्षिश्रद्धाद्या सुमनोहराः ॥

तस्य पुत्रा अनेकाश्च तथा पौत्रा वभूवहः ॥
एष धर्म्मनिसर्ग्गोयं किंभूयः श्रोतुमिच्छसि ॥

॥विगतराग उवाच ॥

धर्म्म पत्नी विशेषेण पुत्रस्तेभ्यः पृथक् पृथक् ॥
श्रोतुमिच्छामि तत्वेन कथयस्व तपोधन ॥

॥अनर्थयज्ञ उवाच ॥

श्रद्धालक्ष्मी धृतिस्तुष्टी पुष्टिमेधा क्रियालज्जा ॥
वुद्धिःशान्तिर्व्वपुःकीर्तिः सिद्धिश्च भूतिसम्भवा ॥
श्रद्धाधर्मसुतोजातो दर्पोलक्ष्मीसुतः स्मृतः ॥
धृत्यास्तुनियमः पुत्रः सन्तोषस्तुष्टिजः स्मृतः ॥
पुष्ट्या लाभसुतोजातो मेधापुत्र श्रुतस्तथा ॥
क्रियायास्तूभयः पुत्रौ दण्डसमय एवतु ॥
लज्जायाः विनयपुत्रो बुद्ध्यावोधस्सुतः स्मृतः ॥
लज्जायाः सुधियः पुत्रः अप्रमादश्चतावुभौ ॥
क्षेमः शान्ति सुतो विन्द्याद्व्यवसायो वपोः सुतः ॥
यशः कीर्तिसुतोज्ञेयः सुखं सिद्धिर्व्यजायते ॥
स्वयम्भुवेऽन्तरेवासि कीर्तिता धर्म्मसूनवः ॥

॥विगतराग उवाच ॥

मूर्त्तिद्वयं कथम्धर्मः कथयस्व तपोधन ! ॥
कौतूहलमतीवम्मे कीर्त्तय ज्ञानसंशयं ॥

॥अनर्थयज्ञ उवाच ॥

श्रुतिः स्मृति द्वयोर्मूर्त्तिधर्मस्य परिकीर्तिता ॥
दाराग्निहोत्रसम्वन्ध इज्या श्रुतस्यलक्षणम् ॥
स्मार्त्तवर्णाश्रमाचारो यमैश्चनियमैर्य्युतः ॥
यमश्च नियमश्चैव द्वयोर्भेदमतः श्रृणु ॥
अहिंसा सत्यमस्तेयमनृशंस्यो दमोऽघृणा ॥
धन्याप्रमा दोमाधुर्यमार्जवश्च यमादश ॥
एकैकस्य पुनर्पञ्च भेदमाहुर्म्मनीषिणः ॥
अहिंसादि प्रवक्ष्यामि शृणुष्वावहितोद्विज ॥
त्रासनं ताडनम्वन्धमारणं वृत्ति नाशनम् ॥
हिंसा पञ्चविधप्राहुर्म्मुनयस्तत्वदर्शिनः ॥
काष्ठ लोष्टकशाद्यैस्तु ताडयन्तीहनिर्दयाः ॥

घृतं क्षीरं दधिमूत्रं शकृत्कर्षणमेव च ॥
पञ्चामृतं पञ्चपवित्र पूतं येपञ्चगव्यं पुरुषः पिवन्ति ॥
ते वाजिमेधस्य फलं लभन्ति तदक्षयं स्वर्ग्गमवाप्नुवन्ति ॥
नगावतुल्यं धनमस्ति किञ्चिद् दुह्यन्ति वाह्यन्ति वहिश्चरन्ति ॥
तृणानि भुक्त्वा अमृतं स्रवन्ति विप्रेषुदत्ताकुलमुद्धरन्ति ॥
गवान्हिकं यः प्रकरोति नित्यं शुश्रूषणं यः कुरुते गवानाम् ॥
अशेषयज्ञजपदानपुण्यं भवत्यसौ धर्ममशेष कर्ता ॥
अतिथिं योऽनुगच्छेत अतिथिं यो नु मन्यते ॥
अतिथिं यो नु पूज्येत अतिथिं यः प्रशंसते ॥
अतिथिं यो न पीड्येत अतिथिं यो न दुष्यति ॥
अतिथिं प्रियकर्ता यः अतिथेः परिचारकः ॥
अतिथिं कृत सन्तोषस्तस्य पुण्यमनन्तकं ॥
आसनेनार्घ्यपाद्येन पादशौच जलेन च ॥
अन्नवस्त्रप्रदानै र्वा सर्वम्वापि प्रदापयेत् ॥
पुत्रदारात्मको वापि योऽतिथिमनुपूजयेत् ॥
श्रद्धायाचाविकल्पेन अक्लीवमानसेन च ॥
नपृछेद्गोत्रप्रवरं स्वाध्यायं देश जन्मनी ॥
चिन्तयेन्मनसा भक्त्या धर्म्मः स्वयमिहागतः ॥
अश्वमेधसहस्राणि राजसूय शतानि च ॥
पुण्डरीक सहस्रञ्च सर्वतीर्थतपः फलम् ॥
अतिथिर्यस्य तुष्येत न संशय समश्नुते ॥
स तस्य सकलं पुण्यं प्राप्नुयान्नात्र संशयः ॥
नतिथिमतिथिज्ञस्य गतिमाप्नोति कर्हिचित् ॥
तस्मादतिथिमायान्तमभिगच्छेत् कृताञ्जलिः ॥
शक्तुप्रस्थेन चैकेन यज्ञ आसीन्महद्भुतं ॥
अतिथिप्राप्तदानेन सशरीरन्दिवंगतम् ॥
नकुलेन पुराधीतं विस्तरेण द्विजोत्तमः ॥
विदितञ्चत्वयापूर्व्वं प्रस्थवार्ता च कीर्तिताः ॥
दम एव मनुष्याणां धर्म्मभार समुच्चयः ॥
दमो धर्मो दमः स्वर्गः दमः कीर्तिर्दमः सुखं ॥
दमो यज्ञो दमस्तीर्थन्दमः पुण्यं दमः तपः ॥
दमहीनमधर्म्मश्च दमं कामकुलप्रदः ॥
निर्दमः करिमीनश्च पतङ्ग भ्रमरमृगाः ॥
त्वग्जिह्वा च तथा घ्राणा चक्षुः श्रवणमिन्द्रियः ॥

दुर्ज्जयेन्द्रियमेकैकं सर्वेप्राणहरास्मृताः ॥
दमं यो जयते सम्यक् निर्द्दमो निधनं व्रजेत् ॥
मृगोश्रोत्रवशान्मृत्युः पतङ्गाचक्षुषोर्मृताः ॥
घ्राणया भ्रमरो नष्टो नष्टोमीनश्च जिह्वया ॥
स्पर्शेन च करीनष्टो वन्धनावास दुःसहः ॥
किं पुनः पञ्चभुक्तानां मृत्युस्तेभ्य किमद्भुतं ॥
पुरुरवातिकामेन अतिलो भेन पुण्डकः ॥
सगरश्चातिदर्प्पेण अतिमानेन रावणः ॥
अतिक्रोधेन सौदास अतिपापेन यादवाः ॥
अतितृष्णा च मानाच्च च नहुषोद्विजवज्ञया ॥
अतिदानाद्वलिर्न्नष्ट अति शौर्येण अर्जुनः ॥
अतिख्यातान्नलो राजा नृगो गो हरणेन तु ॥
तस्माद् दमसदासरक्षेत् अतिसर्व्वत्रवर्ज्जयेत् ॥
दमेन हीनं पुरुषंद्विजेन्द्रः स्वर्ग्गञ्च मोक्षञ्च सुखञ्च नास्ति ॥
विज्ञानधर्म्मकुलकीर्तिनाशो भवन्ति विप्र दमयाविहीनाः ॥
निर्घृणे न परत्रास्ति निर्घृणे न इहास्ति वै ॥
निर्घृणे नं च धर्म्मोऽस्ति निर्घृणे न तपोऽस्ति वै ॥
परस्त्रीषु परार्थेषु परजीवोपकर्षणे ॥
परनिन्दा परान्नेषु घृणा पञ्चसु कारयेत् ॥
परस्त्री श्रृणुविप्रेन्द्र घृणीकार्या सदा वुधैः ॥
राज्ञी विप्री परिव्राज्या स्वयोनि परयोनिषु ॥
परार्थे श्रृणु भूयोऽन्य अन्यायार्थमुपार्ज्जनं ॥
आढप्रस्थ तुलाव्याजैः परार्थं यो पकर्षति ॥
जीवापकर्षणे विप्र घृणां कुर्वीत पंण्डितः ॥
वनजा वनजाजीवा विलगोचर गोचरः ॥
परनिन्दा च का विप्र श्रृणुवक्ष्या समासतः ॥
देवानां ब्राह्मणानाञ्च गुरुमातातिथिद्विषः ॥
परान्नेषु घृणाकार्य्याअभोज्येषु च भोजनम् ॥
सूतके मृतके सौण्डो वर्णभ्रष्टकुले नटे ॥
एते पञ्चघृणासु सक्त पुरुषः स्वर्गार्थमोक्षार्थिनां ॥
लोकेनन्दनवायुवान्ति सततं कीर्तिर्यशोऽलंकृतम् ॥
प्रज्ञावोध श्रुतिस्मृतिञ्च लभते मानञ्च नित्यं लभेत् ॥
दाक्षिण्यं स भवेत् स मानुष परं प्राप्नोति निः संशयः ॥
चतुर्म्मौन श्चतुश्शत्रु चतुरायतनन्तथा ॥

सत्यं प्रोक्तः परत्रार्थं सत्यं यज्ज्ञान विस्तरं ॥
सत्यमिष्टगतिः प्रोक्तं सत्यं यज्ञमनुत्तमम् ॥
सत्यं तीर्थात्परंतीर्थं सत्यन्दानमनन्तकम् ॥
सत्यं शीलन्तपो ज्ञानं सत्यं शौचं दमः शमः ॥
सत्यं सोपानमूर्ध्वस्य सत्यं कीर्तिर्यशः सुखः ॥
अश्वमेधसहस्रन्च सत्यन्च तुलया धृतम् ॥
अश्वमेधसहस्राद्धि सत्यमेवं विशिष्यते ॥
सत्येन तपते सूर्यः सत्येन पृथिवीस्थिताः ॥
सत्येन वायवोवान्ति सत्यात्तोयन्च शीतलम् ॥
तिष्ठन्तिसागराः सत्ये सत्येन च प्रियव्रतः ॥
सत्ये तिष्ठति गोविन्दो वलिवन्धन कारणात् ॥
अग्निर्दहति सत्येन सत्येन शशिभाष्करः ॥
सत्येन तिष्ठते विन्ध्योवर्द्धमानो न वर्द्धते ॥
लोकालोकः स्थितः सत्यं मेरु सत्ये प्रतिष्ठितः ॥
वेदातिष्ठन्ति सत्येषु धर्म्मः सत्ये प्रतिष्ठति ॥
सत्यं गौः क्षरते क्षीरं सत्यं क्षीरंस्थितंघृतम् ॥
सत्यं जीवस्थितो देहे सत्यं जीवः सनातनः ॥
सत्यमेकेन संप्राप्तो धर्मसाधन निश्चयः ॥
रामराघववीर्य्येण सत्यमेकं सुरक्षितम् ॥
एतत्सत्य विधानस्य कीर्तितं तव सुव्रतं ॥
सर्व्वलोकहितार्थाय किमन्यच्छ्रोतुमिच्छसि ॥

॥ विगतराग उवाच ॥

नहि तृप्तिं विजानामि धर्मं श्रुत्वा तथाप्यहम् ॥
उपरिष्टादतो भूयः कथयस्व तपोधनः ! ॥

॥ अनर्थयज्ञ उवाच ॥

स्तेयं श्रृण्वथ विप्रेन्द्र पन्चधापरिकीर्तितम् ॥
अदत्तादानमादौ तु उत्कोचन्चानृतः परं ॥
प्रस्थव्याजस्तुलाव्याजः प्रसह्यस्तेय पन्चमः ॥
धृतदुष्टप्रभावेन परद्रव्यापकर्षणम् ॥
वार्य्यमाणोऽपि दुर्व्वुद्धिरद्रत्तादानमुच्यते ॥
उत्कोचं श्रुणु विप्रेन्द्र धर्मसंहारकारकम् ॥
मूलकार्य्यविनाशार्थमुत्कोच परिगृह्यते ॥

तेन चासौ विजानीयाद् द्रव्यलोभवलात्कृतम् ॥
प्रस्थव्याज उपायेन कुटुम्वमन्त्रातुमिच्छति ॥
सोऽपि तेन विजानीयाद् परद्रव्यापहारकम् ॥
तुलाव्याज उपायेन परस्यार्थं हरेद्यदि ॥
चौरलक्षणकाश्चान्ये कूटकार्यटिका नराः ॥
दुर्व्वलार्ज्जव वालेषु छद्मना वा वलेन वा ॥
अपहृत्य धनं मूढः सचोरश्चोर उच्यते ॥
नास्ति स्तेयसमोऽविद्या नास्ति तेन समो खलः ॥
नास्तिस्तेय समोअज्ञः नास्ति तेनसमोऽलसः ॥
नास्ति तेनसमो द्वेष्यो नास्तिस्तेय समोऽप्रियः ॥
नास्ति तेन समं दुःखं नास्ति तेन समो ऽयशः ॥
प्रच्छन्नोह्रियतेच वित्तमथवा प्रत्यक्ष्यमन्येहरेत् ॥
निक्षेपात्रयहारिणोऽन्यविधयो व्याजेनचान्याहरेत् ॥
अन्योल्लेख्य विकल्पनाहृत धनाअन्योहृताद्वैहृता ॥
अनाश्रीतधनं मदा ह्यपहृतं एते जघन्यः स्मृताः ॥
स्तेनस्तुल्य न मूढमस्ति पुरुषो धर्मार्थहीनोऽधमः ॥
यावत्रज्जीवति शङ्कया नरपतिस्सन्त्रास्यमानो शठः ॥
प्राप्तः शासनतीव्रसद्य विषमः प्राप्नोतिकर्म्मेरितः ॥
कालेन म्रियते स याति नियममाक्रन्द्रमानो भृशं ॥
नीत्वा दुर्ग्गतिकोटिकल्पनिरयान्तिर्यक्त्वमायान्ति ते ॥
तिर्य्यक्त्वं च तथैकमेकसकिकं प्रभ्रम्य वर्षाम्वुदः ॥
मानुष्यन्तदवाप्नुवन्ति विपुलं दारिध्ररोगाकुलं ॥
तस्माद्दुर्गतिहेतुकर्म्म सकलं त्यक्त्वा शिवञ्चाश्रयेत् ॥
अष्टमूर्त्तिशिवद्वेष्टा पितुर्मातुश्च यो द्विषेत् ॥
गवाम्वा अतिथेर्द्वेष्टा नृशंसा पञ्चएव ते ॥
अष्टमूर्त्ति शिवः साक्षात्पञ्च व्योमसमन्वितः ॥
सूर्यसोमश्च दीक्षुश्च दूषकः स नृशंसकः ॥
पिताऽकाशसमो ज्ञेयो जन्मोत्पत्तिकरः पिता ॥
पितृदैवतमादित्य मानृशंस ततोन्वितः ॥
पृथ्व्यांगुरुतरीमाता को न वन्देत मातरं ॥
यज्ञदानतपो वेदास्तेन सर्व्वकृतम्भवेत् ॥
गावः पवित्रं माङ्गल्यं देवतानाञ्च देवता ॥
सर्व्वदेवमयागावस्तस्माद् गावं न हिंसयेत् ॥
जातमात्रस्य लोकस्य गावस्त्राता न संशयः ॥

तत्प्रहारविभिन्नाङ्गा मृतवध्यमवाप्नुयात् ॥
वद्ध्वा पादौभुजौरश्च शिरोरुः कण्ठपाशिताः ॥
अनाहता म्रियन्त्येवम्वधवन्धनजस्मृतः ॥
शत्रुचौरभयैर्घोरैः सिंहव्याघ्रगजोरगैः ॥
त्रासनाद्वधमाप्नोति अन्यैर्व्वापि सुदुःसहैः ॥
यस्ययस्य हरेद्वित्तं तस्य तस्य वधस्मृतः ॥
वृत्ति जीवाभिभूतानान्तद्द्वारान्निहतः स्मृतः ॥
विषवन्हिशरशस्त्रैर्म्मया योगवलेन वा ॥
हिंसकेत्याहु विप्रेन्द्र मुनयस्तत्वदर्शिनः ॥
अहिंसा परमन्धर्म्मं यस्त्यजेत्सदुरात्मवान् ॥
क्लेशायास विनिर्मुक्तं सर्वधर्मफल प्रदं ॥
नातः परतरो मूर्खो नातः परतन्तमः ॥
नातः परतरं दुःखं नातः परतरोऽयशः ॥
नातः परतरं पापं नातः परतरं बिषम् ॥
नातः परतराविद्या नातः पर तपोद्यमाः ॥
यो हि नास्ति न भूतानि उद्भिजादि चतुर्विधम् ॥
स भवेत्पुरुषश्रेष्ठःसर्वभूतदयान्वितः ॥
सर्वभूतदयान्नित्यं यः करोति स पण्डितः ॥
स यज्वा स तपस्वीच स दाता स दृढव्रतः ॥
अहिंसा परमंतीर्थमहिसा परमं तपः ॥
अहिंसा परमंदानं अहिंसा परमं सुखं ॥
अहिंसा परमो यज्ञः अहिंसा परमं व्रतं ॥
अहिंसा परमो ज्ञानमहिंसा परमाकृया ॥
अहिंसा परमो लाभ अहिंसा परमं यशः ॥
अहिंसा परमाकीर्ति अहिंसा परमो दमः ॥
अहिंसा परमोधर्म्म अहिसा परमो गतिः ॥
अहिंसा परमं ब्रह्म अहिंसा परमो शिवः ॥
मांसाशनान्निवर्तेत मनसापिनकांक्षयेत् ॥
स महत्फलमाप्नोति यस्तु मांसविवर्जयेत् ॥
स्वमांसं परमांसेन यो वर्द्धयितुमिच्छति ॥
अनभ्यर्चपितृन्देवान् न तदन्योस्ति पापकृत् ॥
मधुपर्केच यज्ञे च पितृदैवत कर्म्मणि ॥
अत्रैव पशवो हिंस्यानान्यत्र मनुरव्रवीत् ॥
कृत्वा स्वयं वाप्युत्पाद्यापरोपहितमेव च ॥
देवान् पितृश्चार्पयित्वा खादन्मांसन्न दोषभाक् ॥
वेदयज्ञतपस्तीर्थदानशीलक्रियाव्रतैः ॥

मांसाहार निवृत्तीनां षोडशांशन्न पूर्य्यते ॥
मृगाः पर्णातृणाहारादजमेषगवादिभिः ॥
सुखिनो वलवन्तश्च विचरन्ति महीतले ॥
वानराः फलमाहाराद्राक्षसारुधिरप्रियाः ॥
निहताराक्षसाः सर्वे वानरैः फलभोगिभिः ॥
तस्मात्मांसन्न हीहेत वलकामेन भो द्विज ॥
वलेनच गुणा कुर्यात्परतोभयभीरुणा ॥
अहिंसकसमो नास्ति दानधर्म्मसमीहय ॥
इह लोके यशः कीर्त्तिः परत्रच पराङ्गतिः ॥
त्रैलोक्यं मणिरत्नपूर्णमखिलं दत्वोत्तमे ब्राह्मणे ॥
कोटीयज्ञ सहस्रपद्ममयुतं दत्वा महीं दक्षिणाम् ॥
तीर्थानाञ्च सहस्रकोटीनियुतं स्नात्वासकृत्मानवः ॥
एतद् पुण्यफलमहिंसक जनः प्राप्नोति निः संशयं ॥

॥ इति वृषसारसंग्रहे अहिंसाप्रशंसानामस्तृतीयोऽध्यायः ॥३॥

अथ पशुपतिमते शिवधर्म्मशास्त्रे वृषसारसंग्रहे यमविभागो नाम

चतुर्थोऽध्यायः

ॐ नमः शिवाय

॥अनर्थयज्ञ उवाच ॥

सद्भावसत्यमित्याहुर्दृष्टप्रत्यक्षमेव वा ॥
यथाभूतार्थकथनन्तत्सत्यकथनंस्मृतं ॥
आक्रोषताडनादीनि यः सहेत सुदुःसहं ॥
क्षमते यो जितात्मातु स च सत्यमुदाहृतं ॥
वधार्थमुद्यतः सत्य यदिपृच्छेत कर्हिचित् ॥
न तत्र सत्यवक्तव्यमनृतं सत्यमुच्यते ॥
वधार्हः पुरुषः कश्चिद् व्रजेत्पथिभयातुरः ॥
पृच्छतेऽपि नवक्तव्यं सत्यन्तद्वापि उच्यते ॥
न नर्म्मयुक्तमनृतं हि नास्ति नस्त्रीषुराजन्न विवाहकाले ॥
प्राणात्यये सर्व्वधनापहारे पञ्चानृतं सत्य मुदाहरन्ति ॥
देवमानुषतिर्य्येषु सत्यधर्म्मपरायणः ॥
सत्यं श्रेष्ठवरिष्ठञ्च सत्यं धर्म्मसनातनः ॥
सत्यं सागरमव्यक्तं सत्यमक्षयते नरं ॥

चतुर्ध्यानं चतुष्पादं धन्यपञ्चविधोच्यते ॥
चतुर्म्मौनस्य वक्ष्यामि श्रृणुष्वावहितो भव ॥
पारुष्यपिण्डानामिथ्यासम्भिन्नानिच वर्ज्जयेत् ॥
कामः क्रोधश्च लोभश्च मोहश्चैव चतुर्व्विधः ॥
चतुः शत्रुर्न्निहन्तव्यः सर्व्वथा वीतकल्मषः ॥
चतुरायतनं विप्र कथयिष्यामि तच्छृणु ॥
करुणामुदितौपेक्षा मैत्रीचायतनं स्मृतम् ॥
चतुर्ध्यानाऽधुनावक्ष्ये संसारार्णवतारणम् ॥
आत्मविद्याभवं सूक्ष्मं ध्यानयज्ञश्चतुर्व्विधम् ॥
आत्मतत्वः स्मृताधन्या विद्या पञ्चसुपञ्चधा ॥
षट्त्रिंशाक्षरमित्याहुः सूक्ष्मतत्वमलक्षणम् ॥
चतुष्पादः स्मृतो धर्मः चतुराश्रममाश्रितः ॥
गृहस्थो ब्रह्मचारी च वानप्रस्थोऽथ भैक्षकः ॥
धन्यास्ते यैरिदंवेत्ति निखिलेन द्विजोत्तम ॥
पावनं सर्व्वपापानां पुण्यानाञ्च प्रवर्धनः ॥
आयुः कीर्तिर्य्यशः सौख्यं धर्मादेव प्रवर्धते ॥
शान्तिः पुष्टिः स्मृतिर्म्मेधा जायते धन्यमानवः ॥
प्रमादस्थानं पञ्चैवं कीर्तयिष्यामि तच्छृणु ॥
ब्रह्महत्या सुरापानं स्तेयो गुर्व्वङ्गनागमम् ॥
महा पातकमित्याहुः तत्संयोगी च पञ्चमः ॥
अनृतञ्च समुत्कर्ष राज्ञीगामी च पैशुनः ॥
गुरोश्चालीक निर्वद्धस्समानि ब्रह्महत्यया ॥
ब्रह्मऋग्वेद निन्दा च कूटसाक्षी सकृद् वुधः ॥
गर्हितान्नश्च यो विप्रः सुरापानसमानिषट् ॥
रेतोत्सेकः स्वयोन्यासु कुमारीष्वन्त्यजासु च ॥
सख्यपुत्रीषुचास्त्रीषु गुरुतल्पसम स्मृतः ॥
निक्षेपस्यापहरणन्नराश्वरजतस्य च ॥
भूमिवज्ज्रमणीनाञ्च हृतस्तेयसमस्मृतः ॥
चत्वार एव संभूय यत्पापं कुरुते नरः ॥
महापातक पञ्चैतन्तेन सर्व्वं प्रकाशितम् ॥
पञ्चप्रमाद एतानि वर्ज्जनीयं द्विजोत्तम ॥
कायवाङ्मनसा भूयश्चक्षुर्व्वुद्धिश्चपञ्चमः ॥
सौम्यदृष्टिप्रदानश्च क्रूरदृष्टिञ्च वर्ज्जयेत् ॥
प्रसन्नमनसा ध्यायेत् प्रियवाक्यमुदीरयेत् ॥

यस्य शक्तिप्रदातश्च स्वाश्रमाभ्यागतो गुरुः ॥
इन्धनोदकदानञ्च जातवेदमथापि वा ॥
सुरभानि च दत्तानि इन्धनाग्न्युदकानि च ॥
शतञ्जीवेति वा नोक्तन्तस्य किं परतः फलम् ॥
पञ्चार्ज्जवा प्रशसन्ति मुनयस्तत्व दर्शिनः ॥
कर्म्मवृत्याभिवृद्धिश्च पारतोषिक मेवच ॥
स्त्रीधनङ्गो च वित्तञ्च आर्ज्जवेनाभिनन्दति ॥
आर्ज्जवो न वृथा यज्ञश्चार्ज्जवो न वृथातपः ॥
आर्ज्जवस्य सदा देवाः काये तस्य रमन्ति ते ॥
इति नियम परिभागः कीर्तितोऽयं नरेन्द्रः ॥
इहपरतसुखार्थं कारयेत्तन्मनुष्यः ॥
इरितमलपहारी शङ्करस्याज्ञयास्ते भवति ॥
पृथिविभर्त्ता ह्येकछत्रप्रवृत्ताः ॥

इति वृषसारसंग्रहे यम विभागो नामश्चतुर्थोऽध्यायः ॥४॥

अथ पशुपतिमते शिवधर्म्मशास्त्रे वृषसारसंग्रहे शौचाचारविधिर्न्नाम

पञ्चमोऽध्यायः ॥

ॐ नमः शिवाय

॥ विगतराग उवाच ॥

कथयति यमतत्वं साप्रतं त्वं विशेषात्,
अमृतवदनतुल्यं श्रोतुकामा गतोऽस्मि ॥
प्रकृतिवदनदग्धं ज्ञानतोयैर्न्निषिक्तं,
अपरवदन तज्ज्ञान्नास्ति धर्म्मेषु तृप्तिः ॥

॥ अनर्थयज्ञ उवाच ॥

श्रवण।सुखमनोन्यत्कीर्तयिष्ये द्विजेन्द्रः
नियमकलविशेषः पञ्चपञ्च प्रकारः ॥
हरिहरमुनिभीष्टं धर्म्मसारं द्विजेन्द्र ! ॥
कलिकलुषविनाश प्रायमोक्ष प्रसिद्धम् ॥
शौचमिज्यातपोदानं स्वध्यायोपस्थ निग्रहः ॥
व्रतोपवासमौनश्च स्नानश्च नियमो दश ॥
तत्र शौचादि निर्देशं वक्ष्यामीह द्विजोत्तम ॥

शारीरशौचमाहारो मात्राभावश्च पञ्चमः ॥
ताडयेन्न च वन्धेत न च प्राणैर्व्वियोजयेत् ॥
परस्त्री परद्रव्येषु शौचं कायिकमुच्यते ॥
श्रोत शौचं द्विजश्रेष्ठ गुदापस्थमुखादयः ॥
मुखस्याचमनं शौचमाहारवचनेषु च ॥
मूत्रविष्टासमुत्सर्ग्गे देवताराधनेषु च ॥
मृत्तोयैस्तुगुदोपस्थ शौचयीत विचक्षणः ॥
एकोपस्थे गुदेपञ्च तथैकश्चकरेदश ॥
उभयोः सप्तदातव्यो मृदः शुद्धिं समाहिता ॥
एतच्छौचगृहस्थानां द्विगुणं ब्रह्मचारिणां ॥
वानप्रस्थस्य त्रिगुणं यतीनान्तु चतुर्ग्गुणम् ॥
आहारशौचं वक्ष्यामि श्रृणुष्वावहितो भव ॥
भागद्वयस्तु भुञ्जीत भागमेकञ्जलं पिंवेत् ॥
वायुसञ्चारणार्थाय चतुर्थमवशेषयेत् ॥
स्निग्धस्वादरसैः षड्भिराहारषड्रसैर्व्वुधः ॥
धातुवैषम्य नश्यन्ति न च रोगाः सुदारुणः ॥
अभक्षञ्च न भक्षेत अपेयञ्च न पाययेत् ॥
अगम्यन्न च गम्येत अवाच्यन्न च भाषयेत् ॥
लशुनञ्च पलाण्डुञ्च गृञ्जनं च कचानि च ।
गौरश्च शूकरं मासं वर्ज्जयेच्च विधानतः ॥
छत्राकं विड्वराहश्च गोमांस न्न च भक्षयेत् ॥
चटकञ्च कपोतञ्च जलापादाँश्च वर्ज्जयेत् ॥
हंससारसचक्राङ्क कुक्कुटान् शुकश्येनकान् ॥
काकोलूकवलाकञ्च मत्स्यांदींश्चापि वर्ज्जयेत् ॥
अमेध्यश्चापवित्राँश्च सर्व्वानेव विवर्ज्जयेत् ॥
शाकमूलफलानाञ्च अभक्ष्यं परिवर्ज्जयेत् ॥
मानवेषु पुराणेषु शैवभारत संहिते ॥
कीर्त्तितानि विशेषेण शौचाचारमशेषतः ॥
त्वया जिज्ञासतोस्म्यद्य संक्षिप्तः कथितंमया ॥
सत्यवादी शुचिर्न्नित्यं ध्यानयोगरतः शुचिः ॥
अहिंसकः शुचिर्दान्तौ दयाभूतक्षमा शुचिः ॥
सर्व्वेषामेव शौचानामर्थशौचयनं स्मृतः ॥
योर्थे हि सुशुचिर्व्विप्र नमृद्वारिशुचिः शुचि ॥
कायवाङ्मनसां शौचं स शुचिः सर्व्ववस्तुषु ॥

शौचाशौच विधिर्ज्ञात्वा मुच्यते सर्व किल्विषात् ॥
शौचाशौचविधिज्ञमानव यदि कालक्षयेतिश्च यः ॥
सौभाग्यत्वमवाप्नुवन्ति सततं कीर्तिर्यशोऽलंकृतः ॥
प्राप्तन्तेन इहैव पुण्यसकलं सद्धर्मशास्त्रोदितः ॥
जीवान्ते च पवित्रमीहितगतिः प्राप्नोति निःसंशयः ॥

इति वृषसारसंग्रहे शौचाचारविधिर्न्नाम पञ्चमोऽध्यायः ॥५॥

अथ पशुपतिमते शिवधर्म्मशास्त्रे वृषसार संग्रहे यज्ञ विधिर्न्नाम षष्ठोऽध्यायः ॥

ॐ नमः शिवाय

अथपञ्चविधामीज्यां प्रवक्ष्यामि द्विजोत्तम ॥
धर्म मोक्षेशसिद्ध्यर्थं श्रृणुष्वावहितोभव ॥
अर्थयज्ञक्रिया यज्ञो जप यज्ञस्तथैव च ॥
ज्ञानं ध्यानञ्च पञ्चैतत्प्रवक्ष्यामि पृथक् पृथक् ॥
अग्न्युपासन कर्म्मादि अग्निहोत्रक्रतुक्रिया ॥
अष्टका पार्व्वणी श्राद्धं द्रव्य यज्ञः स उच्यते ॥
आरामोद्यानवापीषु देवतायतनेषु च ॥
स्वहस्तैः कृतसंस्कारः क्रियायज्ञ स उच्यते ॥
जपयज्ञन्ततो वक्ष्ये स्वर्ग्गमोक्षफलप्रदं ॥
वेदाध्ययनकर्तर्व्यं शिवसंहितमेवच ॥
इतिहासपुराणश्च जपयज्ञः स उच्यते ॥
इदं कर्म्मकर्म्मेदमूहापोह विशारदः ॥
शास्त्रचक्षुः समालोक्य ज्ञानयज्ञः स उच्यते ॥
ध्यान यज्ञं समासेन कथयिष्यामि ते श्रृणु ॥
ध्यानं पञ्चविधंचैव कीर्तितं हरिणा पुरा ॥
सूर्य्यः सोमाग्निस्फटिकः सूक्ष्मां तत्वश्चपञ्चमम् ॥
सूर्य्यमण्डलमादौतु तत्वं प्रकृतिरुच्यते ॥
तस्यमध्ये शशिंध्यायेत् तत्वंपुरुषउच्यते ॥
चन्द्रमण्डलमध्येतु ज्वालामग्निं विचिन्तयेत् ॥
प्रभुतत्वं स विज्ञेयो जन्ममृत्युविनाशनम् ॥
अग्निमण्डल मध्ये तु ध्यायेस्फटिकनिर्म्मलम् ॥
विद्यातत्वं सविज्ञेयः कारणमजमव्ययम् ॥
विद्यामण्डलमध्ये तु ध्यायेत्तत्त्वमनुत्तमं ॥

अकीर्त्तितमनौपम्यं शिवमक्षयमव्ययम् ॥
पञ्चमं ध्यानयज्ञञ्च तत्वमुक्तं सनातनम् ॥

॥ विगतराग उवाच ॥

एकैकस्यहितत्वस्य फलं कीर्त्तयकीदृशं ॥
कानिलोका प्रपद्यन्ते कालंवास्यतपोधन ॥

॥ अनर्थयज्ञ उवाच ॥

ब्रह्मलोकन्तु प्रथमं तत्वञ्च कृतिचिन्तय ॥
कल्पकोटिसहस्राणि शिववन्मोदते सुखं ॥
द्वितीयं तत्त्वपुरुषं ध्यायमानो मृतोयदि ॥
विष्णुलोकमितो यान्ति कल्पकोट्ययुतंसुखी ॥
प्रभुतत्वं तृतीयस्तुधयायामानोमरिष्यति ॥
रुद्रलोके वसेन्नित्यं कल्पकोट्ययुतं शतम् ॥
विद्यातत्वामतं ध्यायेत्सदा शिवमनामयं ॥
अक्षयलोकमाप्नोति कल्पानान्तपरन्तथा ॥
पञ्चमं शिवतत्वन्तु सूक्ष्मं चात्मनिसंस्थितं ॥
न कालसंख्या तत्रास्ति शिवेन सह मोदते ॥
पञ्चध्यानाभियुक्तौ भवति न पुनर्ज्जन्मसंस्कारवन्धः ॥
जिज्ञास्यन्तां द्विजेन्द्र भवदहनकरः प्रार्थनाकल्पवृक्षः ॥
जन्मेनैकेनमुक्तिर्भवति किमु न वा मानव साधयन्तु ॥
प्रत्यक्षान्नानुमानं सकलमलहरं स्वात्मसंवेदनीय ॥
मानसं तपमादौतु द्वितीयं वाचिकन्तपः ॥
कायिकञ्च तृतीयन्तु मनोवाक्कर्मतत्परं ॥
कायिकं वाचिकञ्चैव तयोमिश्रकपञ्चमं ॥
मनः सौम्यप्रसादञ्च आत्मनिग्रहमेव च ॥
मौन भाव विशुद्धिञ्च पञ्चैतन्तपमानसं ।
अनुद्वेगकरवाणी प्रियंसत्यं हितञ्चयत् ॥
स्वाध्यायाभ्यसनञ्चैव वाचिकन्तप उच्यते ॥
आर्ज्जवत्वमहिंसाश्च ब्रह्मचर्य्यसुरार्च्चनं ॥
शौचपञ्चममित्येतत् कायिकन्तप उच्यते ॥
इष्टं कल्याणभावश्च धन्यं सत्यं हितं वदेत् ॥
मनमिश्रंक पञ्चैंतान्तपमुक्तं महिर्षभिः ॥
स्वस्तिमङ्गलमाशीर्भिरतिथिं गुरुपूजनं ॥

कायमिश्रकपञ्चैतन्तप मुक्तं महात्मभिः ॥
मण्डूकयोगी हेमन्ते गृष्मे पञ्चतपास्तथा ॥
अभ्रावकाशे वर्षासु तपः साधनमुच्यते ॥
स्वमांसोद्धृत्यदानश्च हस्तपादशिरस्तथा ॥
पुष्पमुत्पाद्यदानश्च सर्व्वे ते तप साधनाः ॥
कृच्छ्रातिकृच्छ्रन्नक्तञ्च तप्तकृच्छ्रमयाचितः ॥
चान्द्रायण वराकश्च तपसान्तपनादयः ॥
येनेदं तपतप्यते सुमनसः संसारदुःखच्छिदं ॥
आशापाशविमुच्य निर्म्मलमतिस्त्यक्त्वाजगत्यं फलं ॥
स्वर्ग्गाकांक्षनृपत्वभोगविषयं सर्वान्तिकं तत्फलं ॥
जन्तुः शास्वतजन्ममृत्यु भवने तन्निष्टसाध्यम्वदेत् ॥

इति वृषसारसंग्रहे षष्ठोऽध्यायः ॥६॥

अथ पशुपतिमते शिवधर्म्मशास्त्रे वृषसारसंग्रहे दानप्रशंसा नाम सप्तमोऽध्यायः ॥

॥ ॐ नमः शिवाय ॥

दानानिचतथेत्याहुः पञ्चधा मुनिभिः पुरा ॥
अन्नं वस्त्रं हिरण्यञ्च भूमिगोदानपञ्चमं ॥
अन्नाद् भवन्ति भूतानि अन्नात् पुष्टिर्व्वपुः सुखम् ॥
अन्नाच्छ्री कान्तिवीर्श्यञ्च अन्नात्सत्वश्च जायते ॥
अन्नाज्जीवन्ति भूतानि अन्नन्तुष्टिकरः सदा ॥
अन्नात्कामोमदोदर्प्पो अन्नाच्छौर्य्यश्च जायते ॥
अन्नात्क्षुधातृषाव्याधा सद्यएव विनाशयेत् ॥
अन्नदानाच्च सौभाग्यं ख्यातिः कीर्त्तिश्च जायते ॥
अन्नद प्राणदश्चैव प्राणदश्चापिसर्व्वदः ॥
तस्मादन्नसमन्दानन्नभूतो न भविष्यति ॥
वस्त्राभावान्मनुष्यस्य श्रियादपि परित्त्यजेत् ॥
वस्त्रहीनो न पूज्येत भार्यापुत्रसखादिभिः ॥
विद्यावान्सुकुलीनोऽपि ज्ञानवान् गुणवानपि ॥
वस्त्रहीनः पराधीनः परिभूतः पदें पदे ॥
अपमानमवज्ञञ्च वस्त्रहीनो ह्यवाप्नुयात् ॥
जुगुप्सति महात्मापि सभास्त्रीजनसंसदि ॥
तस्माद्वस्त्रप्रदानानि प्रशंसन्ति मनीषिणः ॥

नजीर्णस्फटितं दद्याद् वस्त्रं कुत्सितमेववा ॥
नवं पुराणरहितं मृदु शुक्लं सुशोभनं ॥
सुसंस्कृत्य प्रदातव्यं श्रद्धाभक्तिसमन्वितं ॥
श्रद्धा स च विशेषेण देशकालविधेनच ॥
पात्रद्रव्यविशेषेण फलमाहुः पृथक् पृथक् ॥
यादृशं दीयते वस्त्रं तादृशं प्राप्यते फलं ॥
जीर्णवस्त्रप्रदानेन जीर्णवस्त्रमवाप्नुयात् ॥
शोभनं दीयतेवस्त्रं शोभनं वस्त्रमाप्नुयात् ॥
दद्याद्वस्त्र सुशोभनं द्विजयिने एकाशुभं सादरं ॥
सौभाग्यमतुलं लभेत स नरो रूपं तथा शोभनम् ॥
तस्मिन् याति सवस्त्र कोटिशतशः प्राप्नोति निः संशयः ॥
तस्मात्त्वं कुरु वस्त्रदानमसकृत् पारत्रिकोत्कर्षणं ॥
सुवर्णदानविप्रेन्द्र संक्षिप्य कथयाम्यहं ॥
पवित्रं मङ्गलं पुण्यं सर्वपातकनाशनं ॥
धारयेत्सततंविप्र सुवर्णकटकाङ्गुलिं ॥
मुच्यते सर्व पापेभ्यो राहुणा चंद्रमा यथा ॥
दत्वासुवर्णं विप्रेभ्यो देवेभ्यश्च द्विजर्षभ ॥
त्रुटिमात्रोपि योदद्यात्सर्व्व पापैप्रमुच्यते ॥
रत्तिमाषककर्षम्वापलार्द्धं पलमेववा ॥
एवमेव फलं वृद्धिर्ज्ञेयादान विशेषतः ॥
सर्व्वाधारमहीदानं प्रशंसन्ति मनीषिणः ॥
अन्नवस्त्रहिरण्यादि सर्व्वं वै भूमिसम्भवं ॥
भूमिदानेन विप्रेन्द्र सर्व्वदान फलं लभेत् ॥
भूमिदान समं विप्र यद्यस्ति वदतत्वतः ॥
मातृकुक्षिविमुक्तिस्तु धरणीशरणांभवेत् ॥
चराचराणां सर्व्वेषां भूमिः साधारणास्मृता ॥
एकहस्तद्विहस्तं वा पञ्चाशच्छतमेव वा ॥
सहस्रायुत लक्षंवा भूमिदानं प्रशस्यते ॥
एकहस्तान्च यो भूमिं दद्याद्विजवराय तु ॥
वर्ष कोटिशतं दिव्यं स्वर्गलोके महीयते ॥
एवं वहुषु हस्तेषु गुणागणिफलं स्मृतं ॥
श्रद्धाधिक फलं दानं कथितन्ते द्विजोत्तम ॥
जामदग्नेन्न रामेण भूमिंदत्वा द्विजाय वै ॥
आयुरक्षयमाप्तन्तु इहैव हि द्विजोत्तम ॥

हेमश्रृङ्गां रौप्यखुराञ्चैलघण्टां द्विजोत्तम ॥
विप्राय वेदविदुषे दत्वान्त फलं स्मृतं ॥
दानाभ्यासरतः प्रवर्त्तन भवां शक्यानुरूपं सदा ॥
अन्नं वस्त्र हिरण्यरौप्यमुदकं गावस्तिलं मेदिनीं ॥
दद्यात्पादुकछत्रपीठकलशं पात्रेषु लव्धेषु वै ॥
दत्वादानमभिन्नराग वदनं कृत्वामनोनिर्म्मलं ॥
दानादेव यशः श्रियः सुखकराः ख्यातिश्च तुल्यं भवेत् ॥
दानादेवनिगर्हणं रिपुगणैश्चानन्दसौख्यप्रदं ॥
दानाद्दुर्ज्जयता प्रसादमतुलं सौभाग्यं दानाल्लभेत् ॥
दानादेव अनन्त भोगनियतं स्वर्ग्गञ्च तस्माद्भवेत् ॥
दानादेव च शक्रलोकमतुलं दानाज्जनानन्दनं ॥
दानादेवमहीयसां स वुभुजे सम्राड्महीमण्डले ॥
दानादेव सुरूपयोनिसुभग चन्द्राननोविक्षते ॥
दानादेव अनेक संभव सुखं प्राप्नोतिनिः संशयः ॥

इति वृषसारसंग्रहे दानप्रसंसा सप्तमोध्यायः ॥७॥

अथ पशुपतिमते शिवधर्म्मशास्त्रे वृषसारसंग्रहे नियमप्रशंसा नाम-

अष्टमोऽध्यायः ॥

॥ ॐ नमः शिवाय ॥

पञ्चस्वाध्यायनं कार्य्यमिहामूत्रसुखार्थिना ॥
शैवं सांख्यं पुराणञ्च स्मार्त्तं भारतसंहितां ॥
शैवंतत्वं विचिन्तेत शैवाः पाशुपत द्वये ॥
अत्र विस्तरतः प्रोक्तं तत्वसारसमुच्चयं ॥
संख्यातत्व तु सांख्येषु वोधव्यं तत्व चिन्तकैः ॥
पञ्चतत्व विभागेन कीर्तितानि महर्षिभिः ॥
पुराणेषु महीकोषो विस्तरेण प्रकिर्तितः ॥
अधोर्ध्वमध्यतिर्य्यञ्च यत्नतः संप्रवोधयेत् ॥
स्मार्तवर्णाश्रमाचारं धर्म्मन्याय प्रवर्तन ॥
शिष्टाचारविकल्पेन ग्राह्यस्तत्र अशङ्कितः ॥
इतिहासमधीयानः सर्व्वज्ञः स नरोभवेत् ॥
धर्मार्थकाममोक्षेषु संशयस्तेनछिद्यते ॥
श्रृणुष्वावहितो विप्र पञ्चोपस्थविनिग्रहं ॥
स्त्रियो वा गर्हितो स्वर्गः स्वयं मुक्तिश्च कीर्त्यते ॥

स्वप्नोपघात विप्रेन्द्र दिवास्वप्नञ्च पञ्चमः ॥
अगम्या स्त्री दिवापर्व्वे धर्मपत्न्यपिवा भवेत् ॥
द्विरुद्धास्त्रीन्न सेवेत वर्णभ्रष्टापिकासु च ॥
अजमेषगवादीनां वडवा महिषीषु च ॥
गर्हितोत्सर्ग्गमित्येतद्यत्नेन परिवर्ज्जयेत् ॥
अन्योन्यकर्षणावापि अपानकर्षणापि वा ॥
स्वयंमुक्तिरियं ज्ञेया तस्मात्स्त्री परिवर्ज्जयेत् ॥
स्वप्नघातं द्विजश्रेष्ठ अनिष्टम्पण्डितैः सदा ॥
स्वप्नेस्त्रीषुरमन्तो च रेतः प्रस्खलतस्ततः ॥
दिवाशयन्न कर्तव्यं नित्यं धर्म्मपरेण तु ॥
स्वर्गमार्ग्गार्गलाह्येता स्त्रीयोनाम प्रकीर्तिताः ॥
मार्ज्जारकश्च श्वानाश्च गोमहीवकपञ्चकम् ॥
स्वविष्टामूत्रं भूमीषु छादयेद्द्विजसत्तम ॥
सूर्यसोमानुषादन्तिमार्ज्जारव्रतिकेषु च ॥
वकवच्चेन्द्रियग्रामं सुनियम्य तपोधनं ॥
साधयेच्च मनस्तुष्टिं मोक्षसाधनतत्परः ।
मूत्रविष्टेच भूमीषु कुरुते च्छादनं सदा ॥
तुष्यते भगवान्शर्व्वः श्वानव्रतचरो यदि ॥
मूत्रवर्च्चानरुद्ध्येत सदा गोव्रतिको नरः ॥
भीमस्तुष्टिकरश्चैव पुराणेषु निगद्यते ॥
कुद्दालैर्दारयन्तोपि कीटकोटीशतैरपि ॥
क्षमेत पृथिवीदेवी एवमेव महीव्रतः ॥
व्रतपञ्चकमित्येतद्यश्चरेत जितेन्द्रियः ॥
सचोत्तममिदं लोकं प्राप्नोति न च संशयः ॥
शेषाणामन्तराणाञ्च नक्तायाचितमेव च ॥
उपवासञ्चपञ्चैतत्कथयिष्यामि तच्छृणु ॥
वैश्वदेवातिथिशेषं पितृशेषञ्च यद्भवेत् ॥
भृत्यपुत्रकलत्रेभ्यः शेषाशींविषसासनः ॥
अन्तसप्प्रान्तराशीच नियमाशी तथैवच ॥
सदोपवासी भवति यो न भुङ्क्ते कदाचन ॥
नदिवा भोजनं कार्य्यं रात्रौ नैवच भोजयेत् ॥
नक्तवेलेवभोक्तव्यं नक्तधर्म्मः समीहितः ॥
अनारम्भस्य आहारं कुर्य्यान्नित्यमयाचितं ॥
परैर्दन्तन्तु यो भुङ्क्ते तमयाचित मुच्यते ॥

भक्ष्यं भोज्यञ्च लेह्यञ्च चोष्यं पेयञ्च पञ्चमं ॥
नकांक्षेन्नोपभुञ्जीत उपवासः स उच्यते ॥
मिथ्यापिशुनयाभिन्ना पृष्टेवाकप्रलापनं ॥
मौनं पञ्चकमित्येतद्धारयन्नियतव्रतः ॥
असम्भूतमदृष्टञ्च धर्म्मञ्चापि वहिः कृतः ॥
अनर्थप्रियवाक्यंयन्तन्मिथ्यावचनंस्मृतं ॥
परस्त्रीनाभिनन्दन्ति परस्यैश्वर्यमेवच ॥
अनिष्टदर्शनाकांक्षी पिशुनः समुदाहृतः ॥
मृत मातापिता चैव हानिस्थानं कथंम्भवेत् ॥
भुक्ता काममममृष्टानां पारुष्यं समुदाहृतं ॥
हृदि नस्फुटसे मूढ शिरो वा न विदार्य्यसे ॥
एवमादीन्यनेकानि तीक्ष्णवादी स उच्यते ॥
द्यूतभोजनयुद्धश्च मद्यस्त्रीकर्षमेवच ॥
असत्प्रलापः पञ्चैतत्कीर्त्तितं ते द्विजोत्तम ॥
मौनमेव सदा कार्य्यं वाक्यसौभाग्यमिच्छता ॥
अपारुष्यमसन्दिग्धं वाक्यं सत्यमुदीरयेत् ॥
यस्तु मौनस्य नो कर्ता भूषितः स कुलाधमः ॥
जन्मे जन्मे च दृगन्धो मूकश्चैवोपजायते ॥
तस्मान्मौनव्रतं सदैव सुदृढं कुर्व्वीत यो निश्चिम् ॥
वाचा तस्य अलंघ्यताञ्च भवति सर्व्वांसभां नन्दति ॥
वक्त्रांच्चोतरगन्धमस्य सततं वायन्ति गन्धोत्कटाः ॥
शास्त्रानेकसहस्स्र सोगिरिनरः प्रोच्चार्य्यते निर्मलः ॥
स्नानं पञ्चविधञ्चैव प्रवक्ष्यामि यथा तथं ॥
आग्नेयं ब्राह्मणं ब्राह्म्यं वायव्यं दिव्यमेवच ॥
आग्नेयं भस्मनास्नानं तोयाच्छतगुणं फलं ॥
भष्मपूतं पवित्रञ्च भस्मपापप्रणाशनं ॥
तस्माद्भस्मप्रयुञ्जीत देहिनान्तु मलापहम् ॥
सर्व्वशान्तिकरं भस्म भस्मरक्षकमुत्तमं ॥
भस्मना त्र्यायुषं कृत्वा ब्रह्मचर्यव्रतस्थितं ॥
भस्मना ऋषिभिर्सर्वैः पवित्रीकृतमात्मनः ॥
भस्मना विवुधामुक्ताः वीरभद्रभयार्द्दिताः ॥
भस्मना शं प्रदृश्यैवं ब्राह्मणानुमतोकृतः ॥
चतुराश्रमतोऽधिक्यं व्रतं पाशुपतं कृतं ॥
तस्मात्पाशुपतं श्रेष्ठं भस्मधारणहेतवः ॥

वारुणं सलिलस्नानं कर्तव्यं विधिवन्नरैः ॥
नदीतोयतडागेषु प्रस्स्रवेषु ह्रदेषु च ॥
ब्रह्मस्नानञ्च विप्रेन्द्र आपोहिष्ठं विदुर्व्वुधाः ॥
त्रिसन्ध्यमेव कर्तव्यं ब्रह्मस्नानं तदुच्यते ॥
गोषुसञ्चारमार्ग्गेषु यत्र गोधूलि सम्भवः ॥
तत्र गत्वावसीदेत स्नानमुक्तं मनिषिभिः ॥
वर्षतोयाम्वुधाराभिः प्लावयित्वा स्वकान्तनुं ॥
स्नानंदिव्यं वदत्येव जगदादिमहेश्वरः ॥
इति नियम विभागः पञ्चभेदेनविप्र ॥
निगदित तव पृष्टः सर्व्वलोकानुकम्प्यः ॥
सकलमलपहारे धर्म्मपञ्चाशमेतन् ॥
नभवति पुनर्ज्जन्म कल्पकोट्यायुतेपि ॥

इति वृषसारसंग्रहे नियमप्रशंशा नाम अष्टमोऽध्याय ॥८॥

अथ पशुपतिमते शिवधर्म्मशास्त्रे वृषसारसंग्रहे त्रैगुण्य विशेषणीयोनाम नवमोऽध्यायः

ॐ नमः शिवाय

त्रिकालगुणभेदेन भिन्नं सर्व्वचराचरं ॥
तस्मात्त्रिगुणवन्धेन वेष्टितन्निखिलञ्जगत् ॥

॥विगतराग उवाच ॥

त्रैकाल्यमितिविज्ञेयन्त्रैधायुक्तशरीरिणः ॥
किञ्चिद्विस्तरमेतद्धि कथयस्व तपोधन! ॥

॥ अनर्थयज्ञ उवाच ॥

त्रैकाल्यं त्रिगुणं ज्ञेयं व्यापीप्रकृतिसम्भवः ॥
अन्योन्यमुपजीवन्ति अन्योन्यमनुवर्तिनः ॥
सत्वंरजतमश्चैव रजसत्वतमस्तथा ॥
तमः सत्वरजश्चैव अन्योन्यमिथुनाः स्मृताः ॥
सात्विको भगवान् विष्णु राजसः कमलोद्भवः ॥
तामसो भगवानीशः सकलं विकलेश्वरः ॥
सत्वंकुन्देन्दुवर्णाभं पद्मरागनिभंरजः ॥

तमश्चाञ्जनशैलाभा कीर्तितानि मनीषिभिः ॥
सत्वं जलं रजोङ्गरन्तमोधूमसमाकुलं ॥
एतद् गुणमयैर्व्वद्धाः पच्यन्ते सर्व्व देहिनः ॥

॥ विगतराग उवाच ॥

केन केन प्रकारेण गुणपाशेन वध्यते ॥
चिन्हमेषां पृथक्त्वे न कथयस्व तपोधन ॥

॥अनर्थयज्ञ उवाच ॥

अनेकाकार भावेन वध्यन्ते गुणवन्धनैः ॥
मोहितानाभिजानन्ति जानन्ति शिवयोगिन्नः ॥
उर्ध्वाङ्गो नित्य सत्यस्थो मध्यमो रजसावृतं ॥
अधोगतिस्तमोवस्था भवन्ति पुरुषाधमाः ॥
स्वर्ग्गेऽपि हि त्रयोवैते भावनीयास्तपोधन ॥
मान्षेषु च तीर्य्येषु गुणभेदास्त्रयस्त्रयः ॥
ब्रह्माविष्णुश्च रुद्रश्च धर्म्मरिन्द्रप्रजापतिः ॥
सोमोग्निवरुणः सूर्यो दशः सत्वोत्तमाः स्मृताः ॥
रुद्रादित्यवसुसाध्याः विश्वेशमरुतो ध्रुवः ॥
ऋषयः पितरश्चैव दशैते सत्व मध्यमाः ॥
ताराग्रहाऽसुरायक्षाः गन्धर्व्वाः किन्नरोरगाः ॥
रक्षोभूतपिशाचाश्च दशैते सात्विकाधमाः ॥
ऋत्विक् पुरोहिताचार्य यज्वानोऽतिथि विज्ञकौ ॥
राजमन्त्रिव्रतोवेदी दशैते राजसोत्तमाः ॥
सूतोम्वष्टवणिश्वोग्रः शिल्पकारुकमागधाः ॥
वेणवैदेचकौमात्यादशैते रजमध्यमाः ॥
चर्मकृत्कुम्भकृत्काली लोहकृत्त्रपुतीलिका ॥
नटमुष्टिकचाण्डालः दशैते रजसाधमाः ॥
गोगजगवयो अश्वमृगवानरकिन्नराः ॥
सिंहव्याघ्रव्राहश्च दशैते तमसोत्तमाः ॥
अजमेषमहिष्याश्च मूषिकानकुलादयः ॥
दंष्ट्रिरङ्कुशगण्डाश्च दशैते तममध्यमाः ॥
ऋक्षगोधामृगश्रृङ्गिवकवानरगर्द्दभः ॥
शूकरश्वानगोमायुः दशैते तमसाधमाः ॥
क्रौञ्चहंसशुकश्येन भासवारुण्डसारसाः ॥

चक्राङ्गशुकमायूरा दशैते तमसात्विकाः ॥
वलाककुक्कुटोकाका चिल्ललावकतित्तिरिः ॥
गृध्रकंकवकश्येन दशैते तमराजसाः ॥
कोकिलोलूककिञ्जल्ककपोताः पञ्च एवच ॥
शालिका च कुलिङ्गा च दशैतेतमसाधमाः ॥
मकरगोहनक्राश्च ऋषाच तम सात्विकाः ॥
कच्छपशुशुकम्भीरा मण्डुकास्तम राजसाः ॥
शंखशुक्तिक शम्वूका कवंध्यास्तमतामसाः ॥
चन्दनागुरुपद्मञ्च प्लक्षोदुम्वर पिप्पलाः ॥
वटदारुशमीविल्वा दशैते तम सात्विकाः ॥
जाम्वीरलकुचाम्रातदाडिमाकोलवेतसाः ॥
निम्वनीपो धुवावश्च दशैते तम राजसाः ॥
वृक्षवल्लीलतावेणुत्वक्सारस्तृण भूरुहाः ॥
मीरजाच शिलाशस्या दशैते तम सात्विकाः ॥
भ्रमरादिपतङ्गानां किमिकीटजलौकसां ॥
युक्तोदंशमशानाश्च विष्टजा तम सात्विकाः ॥
दया सत्यन्दमः शौचं ज्ञानं मौनन्तपः क्षमा ॥
शिलञ्चनाभिमानाञ्च सात्विकाश्चोत्तमा जनाः ॥
कामतृष्णारतिद्यूतमानोयुध्दमदः स्पृहा ॥
निर्घृणा कलि कर्त्तारो राजसे ह्युत्तमोजनाः ॥
हिंसासूयाघृणामूढनिद्रातन्त्री भयालसाः ॥
कोधमत्सरमायी च तामसे ह्युत्तमा जनाः ॥
लघुप्रीति प्रकाशी च ध्यानयोगे सदोत्सुक : ॥
प्रज्ञावुद्धिविरागी च सात्विकं गुणलक्षणं ॥
वालको निपुणो रागी मानो दर्पश्च लोभकः ॥
स्पृहाईर्ष्याप्रलापी च तामसं गुण लक्षणं ॥
उद्वेग आलसोमोहः क्रूरतस्करनिर्दयः ॥
कोधः पिशुननिद्राच तामसं गुणलक्षणं ॥

॥विगतराग उवाच ॥

केनचिन्हेन विज्ञेय आहारः सर्व्वदेहिनां ॥
त्रैगुण्यस्य पृथक्त्वेन कथयस्व तपोधन ॥

॥अनर्थयज्ञ उवाच ॥

आयुः किर्तिः सुखं प्रितिवलारोग्य विवर्धनं ॥
हृदस्वादुरसा स्निग्ध आहारः सात्विकः क्रियाः ॥
अत्युष्णमल्ललवणं रूक्षं स्तीक्षं विदाहिकः ॥
राजसे श्रेष्टमाहारो दुःख शोकाभय प्रदः ॥
अभक्ष मद्य पूती वै पूती पर्य्युषितञ्चयत् ॥
आयासरसविस्वाद आहारस्तामसः प्रियः ॥

॥ विगतराग उवाच ॥

गुणातीतं कथं ज्ञेयं संसारपरपारगं ॥
गुणपाशनिवद्धामो मोक्षं कथय तत्वतः ॥

॥ अनर्थयज्ञ उवाच ॥

आत्मवत्सर्व भूतानि सम्यक्पश्येत भोद्विज ॥
गुणातितं सविज्ञेयः संसारपरपारगः ॥
इर्ष्याद्विषसमोयस्तु सुखदुःखसमाश्च ये ॥
स्तुतिनिन्दासमा ये च गुणातीतः स उच्यते ॥
तुल्य प्रियाप्रियोयश्च अरिमित्रसमोतथा ॥
मानापमानयो तुल्यो गुणातीतः स उच्यते ॥
एष ते कथितो विप्र गुणमद्भाव निर्णयः ॥
गुणयुक्तस्तु संसारी गुणातीत पराङ्गतिः ॥

इति वृषसारसंग्रहे त्रैगुण्यविशेषनीयो नाम नवमोध्यायः ॥९॥

अथ पशुपतिमते शिवधर्म्मशास्त्रे वृषसारे संग्रहे कायतीर्थेवि वर्णनं नाम दशमोऽध्यायः

ॐ नमः शिवाय

॥विगतराग उवाच ॥

कतमं सर्वतीर्थानां श्रेष्ठमाहुर्म्मनीषिणः ॥
कथयस्व मुनिश्रेष्ठ यद्यस्ति भूरिकामदं ॥

॥अनर्थयज्ञ उवाच ॥

अति गुह्यंमिदं प्रश्नं पृष्टः स्नेहाद्द्विजोत्तम ॥
व्रविमि वः पुरावृत्तन्नन्दिना कथितोऽस्म्यहं ॥

॥नन्दिकेश्वर उवाच ॥

कैलाशेशिखरेरम्ये सिद्धचारणसेविते ॥
तत्रासीनं शिवं साक्षाद्देवी वचनमव्रवीत् ॥

॥ देव्युवाच ॥

भगवन्देवदेवेश सर्व्वभूत जगत्पते ॥
प्रष्टुमिच्छाम्यहं त्वेकं धर्मगुह्यं सनातनं ॥
अति तीर्थ परं गुह्यं संसाराद्येन मुच्यते ॥
मनुष्याणां हितार्थाय ब्रूहितत्त्वं महेश्वर ॥

॥ महेश्वर उवाच ॥

को मां पृच्छति तत्प्रश्नं मुक्तात्वामेव सुन्दरि ॥
श्रृणु वक्ष्यामि तत्प्रश्नं देवैरपि सुदुर्ल्लभं ॥
कुरुक्षेत्रं प्रयागञ्च वाराणसीमतः परं ॥
गङ्गाऽग्निसोमतीर्थञ्च सूर्य्यपुष्करमानसं ॥
नैमिषं विन्दुसारञ्च सेतुवन्धसुरह्रदं ॥
घण्टिकेश्वरवागीशं ज्ञात्वा निश्चयपापहा ॥

॥उमोवाच ॥

एवमादि महादेव पूर्ववत् कथितोऽस्म्यहं ॥
स्वर्गभोगप्रदन्तीर्थमेतेषां सुरनायकं ॥
कथं मुच्येत संसाराज्ज्ञानमात्रेण ईश्वर ॥
कौतूहलं महज्जातं छिन्धि संसयकारकं ॥

॥रुद्र उवाच ॥

किन्नजानासि तत्तीर्थं सुलभं दुर्ल्लभञ्च यत् ॥
सुलभं गुरुसेवीनां दुर्ल्लभं तद्विवर्ज्जनात् ॥
कुरुः पुरुषविज्ञेयः शरीरं क्षेत्र उच्यते ॥
शरीरस्थं कुरुक्षेत्रं सर्वतीर्थफलप्रदं ॥
सर्व्वयज्ञ फलावाप्तिः सर्व्वदान फलानिच ॥
सर्व्वव्रततपश्चीर्णं तत्फलं सकलं भवेत् ॥
एवमेव फलं तेषां तीर्थपञ्चदशेषुच ॥
स्नानध्यानं महापुण्यं महातीर्थं महासुखं ॥

॥देव्युवाच ॥

अतीव रोमहर्षोमे जातोऽस्ति त्रिदशेश्वर ॥
सुलभं सुकरं सूक्ष्मं श्रुत्वा तुष्टिश्च मे गता ॥
चतुर्दशपरोभूयः कथयस्व मनोहरं ॥
प्रयागादि पृथक्त्वेन तत्त्वतस्तु सुरेश्वर ॥

॥रुद्रउवाच ॥

सुषुम्णा भवती गङ्गा इडा च यमुना नदी ॥
एताश्रोतवहानद्यः प्रयागः सविधीयते ॥
दक्षिणा वारुणी नासा वामनासा असिस्मृता ॥
वारुणा असिमध्येन तेन वाराणसी स्मृता ॥
आकाशगंगा विख्याता तस्याः स्रवति चाऽमृतं ॥
अहोरात्रमविच्छिन्नङ्गङ्गा सा तेन उच्यते ॥
सोमतीर्थमिडानाडीकिङ्किणीरावचिन्हिता ॥
तन्तुश्रुत्वा न सन्देहः सर्व्वपापक्षयो भवेत् ॥
सूर्यतीर्थं सुषुम्णा च नीरवारवसंयुता ॥
श्रुतिमात्राद्विमुच्येत पापराशिर्म्महानपि ॥
अग्नितीर्थार्ज्जुनं नाडी ब्रह्मघोष मनोरमाः ॥

तत्तदक्षरमाकर्ण्य अमृतत्वाय कल्पते ॥
पुष्करं हृदिमध्यस्थमष्टपत्रं सकर्णिकां ॥
चिन्तयेत्सूक्ष्मं तन्मध्ये जन्ममृत्युविनाशनं ॥
मानसं सरमध्यस्थं सहंसकमलोपरि ॥
सलीलालीलयाचारी परतः परपारगः ॥
नैमिषं श्रृणु देवेशि निमिषा प्रत्ययो भवेत् ॥
सम्यग्छायां निरीक्षेत स्वात्मनो वा परस्य च ॥
आयातप्यङ्गुलीमध्ये निमिषाक्षि स पश्यति ॥
दृष्ट्वा प्रत्ययमेवं हि नैमिषज्ञस्स उच्यते ॥
तीर्थमिन्दुसरन्नाम श्रृणुवक्ष्यामि सुन्दरि ॥
देहमध्ये हृदिज्ञेयं हृदिमध्येतु पङ्कजं ॥
कर्णिकापद्मसमध्येतु विन्दुः कर्णिकमध्यतः ॥
विन्दुमध्ये स्थितो नादः स नादः केन भिद्यते ॥
उकारश्च मकारश्च भित्वानादो विनिर्गतः ॥
तं विदित्वा विशालाक्षि सोमतत्वं लभेत वा ॥
वक्ष्येते सेतुवन्धन्दुरितमलहरं नादतोयप्रवाहं ॥
जिह्वा कण्ठोरुकूलासुरगणपुलिनावर्त्तघोषा तरङ्गाः ॥
कुम्भीराघोषमाना दशगणमकरा भीमनक्राविसर्ग्गाः ॥
सानुस्वारे गभीरे मदसुखरमणं सेतुवन्धं रमस्व ॥
सप्तद्वीपान्त मध्ये श्रृणु शशिवदने सर्व्वदुःखान्तलाभं ॥
ईशानेनाभिजुष्टं हृदिह्रदविमलन्नामशिताम्वुपूर्णं ॥
तत्रैकञ्जातपद्मं प्रकृतिदलयुतं केशरं शक्तिभिन्नं ॥
पञ्चव्योमप्रशस्तङ्गतिपरमपदं प्राप्तुकामेन सर्व्वं ॥
नाड्यैकासङ्गतानि निपतितममृतं घण्टिकायाङ्करेण ॥
तृप्यन्ते तेन नित्यं हृदिकमलपुटं स्थानभूतान्तरात्मा ॥
यं पश्यन्तीशमक्षा कलिकलुषहरं व्यापिनं निष्प्रपञ्च ॥
देवेशं घाण्टकेशामरभवमभवन्तीर्थमाकाशविन्दुं ॥
मीमांसा रत्नकूला क्रमपदपुलिना शर्वशास्त्रार्थ तोया ॥
मीनौघापञ्चशत्रं श्रुतिकुटिलगतिस्मार्त्तवेगास्तरङ्गा ॥
योगावर्त्तातिशोभा उपनिषदिवंहा भांरतावर्त्तफेना ॥
पञ्चासद्व्योमरुपी रसभवननदी तीर्थ वागीश्वरीयं ॥
यस्तं वेत्ति स वेत्ति वेद निखिलं संसारदुःखच्छिदं ॥
जन्मव्याधिवियोगतापमरणं क्लेशार्णवदुःसहं ॥
गर्भोवासमतीव सह्यविषमं दुस्तीर्य्य दुःखालयं ॥

प्राप्तन्तेन न संशयं शिवपदं दुष्प्राप्य देवैरपि ॥

इति वृषसारसंग्रहे कायतीर्थोपवर्णनोनाम दशमोध्यायः ॥१०॥

अथ पशुपतिमते शिवधर्म्मशास्त्रे वृषसारसंग्रहे चतुराश्रम धर्म्मविधानो नामैकादशोऽध्यायः ॥

ॐ नमः शिवाय

॥देव्युवाच ॥

सर्वयज्ञः परश्रेष्ठ अस्तिचान्या सुरोत्तम ॥
अल्पक्लेशमनायास अथाम्नाय सुरेश्वर ।
सर्वयज्ञ फलावाप्ति दैवतैश्चापि पूजितं ॥
कथयस्व सुरश्रेष्ठ मानुषाणां हिताय वै ॥

॥महेश्वर उवाच ॥

नतुल्यन्तवपश्यामि दया भूतेषु भामिनि ॥
किमन्यत्कथयिष्यामि दयायत्र न विद्यते ॥
सदाशिवमुखात्पूर्व्वं श्रुतं मे वरसुन्दरि ॥
श्रृणु ते देवि वक्ष्यामि धर्म्मसारमनुत्तमं ॥
विनार्थेन तु यो यज्ञः स यज्ञ सार्व्वकामिकः ॥
अक्षयश्चाव्ययश्चैव सर्व्व पातकनाशनं ॥
वहु विघ्नकराह्येर्थो वह्वायास करतस्था ॥
ब्रह्महत्या ईवेन्द्रस्य प्रविभोग प्रदः स्मृतः ॥
पञ्चशोध्येन शोध्येत अर्थ यज्ञो वरानने ॥
शोधितेतु फलं शुद्धमशुद्धन्निष्फलं भवेत् ॥

॥देव्युवाच ॥

पञ्चशोध्यः सुरश्रेष्ठ संशयोऽत्रा भवन्मम ॥
कथयस्व विभागेन श्रोतुमिच्छामि तत्वतः ॥

॥रुद्रउवाच ॥

मनः शुध्दिस्तु प्रथमं द्रव्यशुद्धिरतः परं ॥
मन्त्रशुद्धिस्तृतीयातु कर्मशुध्दिरतः परं ॥
पञ्चमं सत्व शुद्धिश्च क्रतु शुध्दिश्च पञ्चधा ॥

मनः शुद्धिर्न्नाम अविपरीत भावनया ॥
द्रव्य शुद्धिर्न्नाम श्वल्पोन्यायोपार्ज्जितद्रव्येन ॥
मन्त्रशुद्धिर्न्नाम स्वरव्यञ्जनयुक्ततया ॥
क्रियाशुद्धिर्न्नाम यथाक्रमाविपरीततया ॥
सत्वशुद्धिर्न्नाम रजस्तम अप्रधान तया ॥
विधिमेवं यदा शूद्ध्य यदि यज्ञङ्करोति हि ॥
तस्य यज्ञफलावाप्तिर्ज्जन्ममृत्युश्च नोभवेत् ॥
विनार्थेन तु यो यज्ञं करोति वर सुन्दरी ॥
न तस्य तत्फलावाप्तिः सर्व्व यज्ञेषु शेषतः ॥
यज्ञ वाट कृतक्षेत्रं सत्वावास कृतालयः ॥
प्रत्याहार महादेवि कुशप्रस्तर संयमः ॥
विधिर्न्नियम विस्तारो ध्यानवृद्धिर्प्रदीपिनः ॥
योगेन्धन समिज्ज्वाला तपोधूम समाकुलः ॥
पात्रन्यास शिवज्ञानं स्थालीपाक शिवात्मकः ॥
आज्याहुतिमविच्छिन्नं त्र्यम्वक श्रुवपातितं ॥
धारणा धर्म्मवत्कृत्वा प्राणायामश्च ऋत्विजः ॥
तर्क्कयुक्तः सविस्तारः समाधिर्व्वयतापनः ॥
ब्रह्मविद्यामयो यूपः पशुवन्धो मनोन्मनः ॥
श्रद्धापत्नी विशालाक्षी संकल्प पद शाश्वतं ॥
पञ्चेन्द्रिय जयोत्पन्नः पुरोभागेऽमृताशनः ॥
ब्रह्मनादो महामन्त्रः प्रायश्चित्तानिलोजलाः ॥
सोमपानपरिज्ञानमुपाकर्म्मचतुर्य्यमः ॥
इतिहासजलस्नानं पुराणं कृतमम्वरः ॥
इडा सुषुम्ना सम्वेद्ये स्नानमाचमनं सकृत् ॥
संतोषातिथिमादृत्य दयाभूत द्विजार्च्चितः ॥
ब्रह्मकूर्च्चगुणातीत हविर्गन्ध निरञ्जनः ॥
ब्रह्मसूत्रं त्रयस्तत्वंवोधना मुण्डितं शिरः ॥
निर्वृत्यादि चतुर्व्वेदश्चतुः प्रकर शासन ॥
दक्षिणामभयम्भूते दत्वायज्ञददत्सदा ॥
विनार्थं यज्ञसंप्राप्तिः कथितस्ते वरानने ॥
आसहस्रस्य यज्ञानां फलं प्राप्नोति नित्यशः ॥
आश्रमः प्रथमस्यैवं कथितोस्मि वरानने ॥
सदा शिवेन सद्धर्मे देवतैरपि पूजितं ॥
ब्रह्मचर्यन्निवोधेदं श्रृणुष्वावहिता शुभे ॥

द्वितीयमाश्रमन्देवि सर्व्वपापविनाशनं ॥
व्रतं ब्रह्मपरिज्ञानं सावित्रीप्रकृतिर्ल्लयं ॥
ब्रह्मसूत्राक्षरं सूक्ष्मं तृगुणालय यत् फलं ॥
दम दण्डादयो पात्रं भिक्षा संसारमोचनं ॥
त्र्यायुषं द्व्यक्षरातीतं ज्ञानभष्ममलङ्कृतं ॥
स्नानव्रतसदासत्यं शीलशौचसमन्वितं ॥
अग्निहोत्रत्रयस्तत्वं जपब्रह्म विलेश्वर ॥
द्वितियमाश्रमं देवि यदाह भगवान् शिवः ॥
मयापि कथितो तुभ्यञ्जन्ममृत्यु विनाशनं ॥
वानप्रस्थविधिंवक्ष्ये श्रुणुष्वायत लोचने ॥
यथा श्रुतं यथा तथ्यमृषिदैवतपूजितं ॥
वैराग्या बनमाश्रित्य नियमाश्रममाहरेत् ॥
शीलशैलदृषद्वारे प्राकारे विजितेन्द्रियः ॥
अधिभूतः स्मृतौ माता अध्यात्मश्च पिता तथा ॥
अधिभौतिकमाचार्य्यो व्यवसायश्च भ्रातरः ॥
श्रुतिः स्मृतिः स्मृताभार्या प्रज्ञापुत्रः क्षमानुजः ॥
मैत्रीवन्धुर्ज्जटाचापं करुणा सुपवित्रकं ॥
मुदितामौनचत्वारः सर्व्वकार्यमुपेक्षया ॥
यमवल्कलसान्वीतस्तपः कृष्णाजिनंपरः ॥
उत्तरासङ्गमासीनो योगपट्ट दृढ व्रतः ॥
वेदघोषेण घोषेण प्राणायामोग्निहावनं ॥
जितप्राणमृगाकूलो धृतियज्ञः क्रियाजपः ॥
अर्थसंग्रहशास्त्रेषु सखा दम दयादयं ॥
शिवयज्ञं प्रयुञ्जीत साधनाष्टक पूजनं ॥
पञ्चब्रह्मजलैः पूतः सत्यतीर्थं शिवह्रदे ॥
स्नानमाचमनं कृत्वा सन्ध्यात्रयमुपाश्रयेत् ॥
अक्षमालापुराणार्थं जपशान्तं दिवानिशं ॥
ज्ञानसलीलसम्पूर्णमितिहासकमण्डलु ॥
पञ्चकर्मक्रियोऽक्रान्ति जपपञ्च विधः सुखं ॥
साधनं शिवसंकल्पो योगसिद्धिफलप्रदं ॥
संतोषफलमाहारः कामक्रोधपराजितः ॥
आशापाशजयाभ्यास ध्यानयोगरतिः प्रियः ॥
आर्त्तिभ्यश्चाऽभयेन्दत्वा वानप्रस्थश्चरेद्व्रतम् ॥
वानप्रस्थमयं धर्म्मं यत्पूर्वमवधारितं ॥

संसारोद्धरणंमनित्यहरणमज्ञाननिर्म्मूलनं ॥
प्रज्ञावृद्धिकरं प्रवोधकरणं शोकार्णवोत्तारणं ॥
जन्मब्याधिहरमकर्म्मदहनं सेवेत्सधर्म्मोत्तमं ॥
श्रद्धापूर्वकमेव यः सनियमं साक्षाच्चजीवन्‌शिवः ॥
परिव्राजकधर्म्मोऽयं कीर्तयिष्यामि तच्छृणु ॥
सुखदुःखसमं कृत्वा लाभालाभ विवर्ज्जितः ॥
वर्ज्जयेत्मधुमांसानि परदाराँश्च वर्ज्जयेत् ॥
वर्ज्जयेच्चिरवासश्च परवासश्च वर्ज्जयेत् ॥
वर्ज्जयेन्मृष्ट भोज्यानि भिक्षामेकश्च वर्ज्जयेत् ॥
वर्ज्जयेत्संग्रहन्नित्यमभिमानञ्च वर्ज्जयेत् ॥
सुसूक्ष्मं मनसा ध्यात्वा शुचौपादविनिक्षिपेत् ॥
नकुप्येतमनालाभे लाभे वापि न हर्षयेत् ॥
अथ तृष्णास्वनुद्विग्नो रोषेवापि सुदारुणे ॥
स्तुतिनिन्दासमङ्कृत्वा प्रियंवाप्रियमेववा ॥
नियमास्तु परीधानं संयमानृत मेखलः ॥
निरालम्वमनङ्कृत्वा वुध्दिकृत्वा निरञ्जनं ॥
आत्मानं पृथिवीङ्कृत्वा खञ्च कृत्वा मनोन्मनैः ॥
तृदण्डं तृगुणं कृत्वा पात्रं कृत्वाऽक्षरोद्वयं ॥
न्यसेद्धर्म्ममधर्म्मञ्च ईर्ष्याद्वषं परित्यजेत् ॥
निर्द्वन्द्वो नित्य सत्यस्थो निर्म्ममोनिरहङ्कृतिः ॥
दिवसस्याष्टमे भागे भिक्षां सप्तगृहं चरेत् ॥
न चासीत न तिष्ठेत न च देहीतिं वा वदेत् ॥
यथालाभेन वर्त्तेत अष्टपिण्डान्दिने दिने ॥
वस्त्रभोजनशैय्यासु न प्रसह्येत विस्तरः ॥
नाभिनन्देत मरणं नाभि नन्देत जीवितं ॥
इन्द्रियाणि वशंकृत्वा कामं हत्वा यतव्रतः ॥
अतीतञ्च भविष्यञ्च न भिक्षु चिन्तयेत्सदा ॥
क्रोधमानमददर्प्पान्परिव्राड्वर्ज्जयेत्सदा ॥
विरागन्तु धनुष्कृत्वा प्राणायामगुणैर्वृतं ॥
धारणा शरतीक्ष्णेन मृगं हत्वा मनेन्द्रियं ॥
मैत्रीखड्गसुतीक्ष्णेन संसारारिन्निकृन्तयेत् ॥
करुणावर्तचक्रेण क्रोधमत्तगजञ्जयेत् ॥
मुदिताबर्म्मवद्धाङ्गस्तूणीपूर्णमुपेक्षया ॥
अनाक्षरपरं ब्रह्म चिन्तयेत्सततं द्विज ॥

ब्रह्मणो हृदयं विष्णु:विष्णोश्चहृदयं शिवः ॥
शिवस्यहृदयं सन्ध्या तस्मात् सन्ध्यामुपाश्रयेत् ॥
संसारार्णवतारणं शुभगतिः स ब्रह्मसन्ध्याक्षरं ॥
ध्यायेन्नित्यमतन्द्रितोह्यनुपमं व्यक्तात्मवेद्यं शिवं ॥
रूपैर्व्वर्णगुणादिभिश्च रहितं दुर्ल्लक्ष्यलक्षोत्तमं ॥
यत्नाध्दृत्य समाश्रयेत्सुरगुरुं संर्व्वार्त्तिहन् शंकरम् ॥

इति वृषसार संग्रहे चतुराश्रमधर्म्म विधानो नाम एकादशोध्यायः ॥११॥

अथ पशुपतिमते शिवधर्म्मशास्त्रे वृषसारसंग्रहे विपुलोपाख्यानोनाम

द्वादशोऽध्याय

ॐ नमः शिवाय

॥ देव्युवाच ॥

अहिंसा परमोधर्म्मः सततं परिकीर्त्यते ॥
आतिथ्यकानान्धर्म्मञ्च कथयस्वयदुत्तमम् ॥

॥महेश्वर उवाच ॥

अहिंसातिथ्यकानाञ्च शृणु धर्म्मयदुत्तमां ॥
त्रैलोक्यमखिलन्देवि रत्नपूर्णां सुलोचने ॥
चतुर्व्वेदविदेदानं नतत्तुल्यमहिंसकः ॥
श्रृणुधर्म्ममतिथ्यानां कीर्त्तयिष्यामि सुन्दरि ॥
आसीद्वृत्तंपुराख्यातं नगरे कुसुमाह्वये ॥
कपिलस्यसुतो विद्वान्विपुलोनामविश्रुतः ॥
धर्म्मनित्यो जितक्रोधः सत्यवादी जितेन्द्रियः ॥
ब्रह्मण्यश्च कृतज्ञश्च मद्भक्तकृतनिश्चयः ॥
धनाढ्योऽतिथिपूज्यश्च दातादान्तो दयालुकः ॥
न्यायार्ज्जितधनोनित्यमन्यायपरिवर्ज्जितः ॥
भार्य्याच रूपिणी तस्य चन्द्रविम्वशुभानना ॥
पीनोत्तुङ्गस्तनीकान्ता सकलानन्दकारिणी ॥
पतिव्रतापतिरतापतिशुश्रूषणेरता ॥
अथ केनापिकालेन सूर्य्यरागमभूत्ततः ॥
ग्रस्तभागत्रयस्त्वासीत्कृष्णमाधवमासिके ॥
स्नातुकामाच तीर्थन्ते सर्व्वे पौरनृपादयः ॥

देवाश्च पितरश्चैव तर्प्यन्ते विधिवत्तथा ॥
केचिज्जुह्वतितत्राग्निं केचिद्विप्राँश्चतर्प्पयेत् ॥
केचिद्ध्यानोपतिष्ठन्ति केचित्स्तुन्वन्तिदेवताम् ॥
ध्यानयोगरताः केचित्केचित्पञ्च तपेरताः ॥
एवं प्रवर्त्तमानेषुराजानादिषुसर्व्वशः ॥
विपुलोऽपिचतत्रैवगङ्गागण्डकिसङ्गमे ॥
भार्यायासह तत्रैव स्नात्वाक्षोमविभूषणः ॥
देवतागुरुविप्राणामन्येषान्तर्प्पणारतः ॥
तत्रावसरसंप्राप्तो ब्राह्मणोतिथिरागतः ॥
भार्य्या तस्यातिरूपेण मोहिता ब्राह्मणस्य च ॥
ब्राह्मणोऽपितथैवेहरूपिणाप्रतिमो भवेत् ॥
अन्योन्यदृष्टिसंसक्तौ जातौतौतु परस्परम् ॥
....(?)
विपुलेनाञ्जलिङ्कृत्वा ब्राह्मणः संश्रितव्रतः ॥
आज्ञापय द्विजश्रेष्ठ अद्यमऽनुग्रहंकुरु ॥
भार्य्याभृत्यपशुग्रामरत्नानि विविधानि च ॥
विपुलेनैवमुक्तस्तु गृहीतोब्राह्मणो व्रवीत् ॥
यदिसत्यं प्रदातासि सुप्रसन्नमनस्तव ? ॥

॥ विपुलउवाच ॥

सुप्रसन्नं मनोमऽद्य सुप्रसन्नं तपः फलम् ॥
शीघ्रमाज्ञापयविप्र यच्चाभिलषितन्तव ॥
अदेयन्नास्तिविप्रस्य स्वशिरः प्रभृतिर्द्विज ॥

॥ब्राह्मण उवाच ॥

यद्येवं वदसे भद्र भार्य्याम्मेदेहिरूपिणीं ॥
स्वस्तिर्भवतु भद्रम्वः कल्याणन्तवशाश्वतम् ॥
....(?)

॥विप्रउवाच ॥

प्रतीच्छभार्य्यां सुश्रोणीं रूपयौवनशालिनीम् ॥
अकुत्सितां विशालाक्षीं पूर्णचन्द्रनिभाननाम् ॥

॥ भार्य्योवाच ॥

परित्याज्याकथन्नाथ अपापान्त्यजसे कथम् ॥
अतीवहिप्रियां भार्य्यां निर्द्दोषां स कथंत्यजेत् ॥
सखाभार्य्यामनुष्याणामिहलोकेपरत्र च ॥
दानं वा सुमहद्दत्वा यज्ञोवा सुवहून्कृतः ॥
अपुत्रोनाप्नुयात्स्वर्गन्तपोभिर्व्वा सुदुष्करैः ॥
श्रुतोमेपितृभिः प्रोक्तो ब्राह्मणैश्च ममान्तिके ॥
अपुत्रोनाप्नुयात्स्वर्गं श्रुतम्मे वहुशः पुरा ॥
मन्दपालो द्विजश्रेष्ठो गतः स्वर्गन्तपोवलात् ॥
दानानि च वहून्दत्वा यज्ञाश्च विविधास्तथा ॥
वेदाश्च जपयज्ञाश्च कृत्वातद् द्विजसत्तमः ॥
प्राप्तद्वारोऽपियस्याहि देवदूतैर्न्निवारितः ॥
अपुत्रोनाप्नुयात्स्वर्गं यदि यज्ञशतैरपि ॥
इत्युक्तस्तु च्युतः स्वर्ग्गान्मन्दपालोमहानृषिः ॥
पुत्रानुत्पादयामासशारङ्गाच्चतुरोद्विजः ॥
तेनपुण्यप्रभावेण स्वर्गप्राप्तोह्यवारितः
कलत्राणाङ्कलत्रास्मि भरणाद्भार्य एव च ॥
दारसंग्रहपात्रार्थे क्रियते शास्त्रदर्शनात् ॥
यानि सन्ति गृहेद्रव्यं ग्रामघोषगृहाणि च ॥
दातुमर्हसि विप्राय नमांदातुमिहार्हसि ॥
भार्य्यायावचनं श्रुत्वा विपुलः पुनरव्रवीत् ॥

॥ विपुलउवाच ॥

साधुभामिनि जानामि साधुसाधुपतिव्रते ॥
जितोस्म्यनेन वाक्येन अनेनास्मि हि तोषितः ॥
अद्यग्रहणकाले च द्विजआगत्ययाचते ॥
ददामीति प्रतिज्ञाय अदत्वा नरकंव्रजेत् ॥
नरकं यदिगच्छामि कुलेन सहसुन्दरि ॥
कल्पकोटिसहस्राणिं नरकस्थो यशश्विनि ॥
मुक्तिमेवन्नपश्यामि जन्मकोटिशतैरपि ॥
अदानाच्चाशुभं देवि पश्यामिवरवर्णिनि ॥
दानेन तु शुभंपश्ये स्वर्गलोकं यदक्षयम् ॥
नोक्तं मयानृतं पूर्व्वं नित्यंसत्यव्रतस्थितः ॥
सत्यधर्म्ममतिक्रम्य नान्यधर्म्मं समाचरेत् ॥

भार्य्याधर्म्मसखेत्येवं त्वयिपूर्व्वमुदाहृतम् ॥
यदि धर्म्मसखायासि सोऽद्यकाल इहागतः ॥
द्विजरूपधरो धर्म्मः स्वयमेवइहागतः ॥
जिज्ञासार्थमहंभद्रे न विघ्नं कर्त्तुमर्हसि ॥
माताव्यक्तः पिताब्रह्मा वुद्धिभार्य्या दमः सखा ॥
पुत्रोधर्म्मः क्रियाचार्य्य इत्येते ममवान्धवाः ॥
कालश्रेष्ठः ग्रहः सूर्य्यो गङ्गाश्रेष्ठा नदीषु च ॥
चन्द्रक्षयेदिनश्रेष्ठंनरश्रेष्ठो द्विजोत्तमः ॥
शुश्रुषणार्थं विप्रस्य मयादत्तानिसुन्दरि ॥
सर्व्वस्वं ब्राह्मणेदत्वा वनमेवाश्रयाम्यहम् ॥

॥महेश्वर उवाच ॥

तूष्णीभूतां ततोभार्य्यां अश्रुपूर्णाकुलेक्षणाम् ॥
करेगृह्यविशालाक्षीं ब्राह्मणाय निवेदिता ॥
यानिसन्ति गृहेद्रव्यं हिरण्यपशवस्तथा ॥
ददामि ते द्विजश्रेष्ठ ग्रामघोषगृहादिकम् ॥
मुक्तावैदूर्य्यवासांसि दिव्याण्याभरणानिच ॥
सर्व्वान्गृहाणविप्रेन्द्र श्रध्दयादत्तसत्कृताम् ॥
प्रीयतां भगवान्धर्म्मः प्रीयताञ्चमहेश्वरः ॥
प्रीयतां पितरः सर्व्वे यद्यस्ति सुकृतंफलम् ॥

॥महेश्वरउवाच ॥

विपुलस्य वचः श्रुत्वा ब्राह्मणेन तपस्विना ॥
आशीः सुविपुलन्दत्वा विपुलायमहात्मने ॥
वसतेच गृहंरम्ये भार्य्यामादाय तस्य च ॥
विपुलस्तुनमस्कृत्वा कृत्वा च विप्रदक्षिणं ॥
ब्राह्मणमभिवाद्येवं गतः शीघ्रं वनान्तरम् ॥
वनेमूलफलाहारो विचरेत महीतले ॥
एकाकीविजने शून्येचिन्तयाच परिप्लुतः ॥
क्वगच्छामि किंभोक्ष्यामि कुत्रवा किं करोम्यहम् ॥
नपथंविषयं वेद्मि ग्राममम्वा नगराणि वा ॥
खेटखर्वटदेशं वा जानामीह नकश्चन ॥
अमुं सुशैलं पश्यामि विपुलोदरकन्दरं ॥
तमारुह्यनिरीक्ष्यामि ग्रामं नगरपत्तनं ॥

एवमुक्त्वातु विपुलः शनैः पर्व्वतमारुहत् ॥
वृक्षच्छायां समालोक्य निशशाद श्रमान्वितः ॥
एतस्मिन्नेव कालेन वृक्षशाखावतार्य्य च ॥
अपूर्व्वञ्च सुरूपञ्च सुगन्धत्वञ्च शोभनम् ॥
फलंगृह्य विचित्रञ्च हृदयानन्दनं शुभं ॥
विपुलस्याग्रतः कृत्वा पुनर्व्वृक्षं समारूहत् ॥
विपुलश्चित्रवद्दृष्ट्वाविस्मयं परमङ्गतः ॥
अहो वा स्वप्न भूतोस्मि अहोवा तपसः फलम् ॥
न पश्यामि नजिघ्रामि नच स्वादञ्चवेद्म्यहम् ॥
वार्त्तापि न च मे श्रोताप्रति जानामिकश्चन ॥
एवमुक्त्वा ह्यनेकानि फलंगृह्यमनोरमं ॥
सुनिरीक्ष्य पुनर्ज्जिघ्रन्पुनर्ज्जिघ्रन्निरीक्ष्य च ॥
फलञ्चात्रनिरूप्यन्तो देशम्वाप्यवलोकयन् ॥
पाथेयरहितश्चास्मिदेवदत्तफलंमम ॥
तत्फलं प्रतिगृह्यैव नगरं प्रविशाम्यहम् ॥
प्रार्थयित्वाच यत्किञ्चिज्जीवनार्थञ्चराम्यहम् ॥
ततः शैलमतिक्रम्य नगरं प्रविवेशह ॥
पथिकश्चिज्जनः पृष्टः किन्नामनगरन्त्विदम् ॥
सहोवाच पथीकेन किमपूर्व्वमिहागतः ॥
दक्षिणापथ देशोऽयं नरवीर पुरं स्वयम् ॥
राजसिंह यतो नाम राज्ञीतस्य च केकयी ॥
अतिवृद्धो जराग्रस्तः केकयी च तथैव च ॥
दाता सर्व्व कलाज्ञश्च युद्धेवीर्यवलान्वितः ॥
ब्रह्मण्यो वत्सलोलोके सर्वशास्त्र विशारदः ॥

॥ विपुलउवाच ॥

अत्रश्रेष्टिमुपाश्यमि नामंवा तस्यकिम्वद ॥
कृतमोदेशस्तद्वासः कथयस्व न संशयः ॥
विपुलेनैवमुक्तस्तु पथिकोवाच तं पुनः ॥
श्रेष्टिकस्यगृहागतः ॥पथिकोऽहमिदानिञ्च ।
को भवान् तस्यविषये किं वा ज्ञातुं चिकीर्षसि ॥
श्रेष्टिकः पुण्डकोनाम ख्यातः श्रेष्टिक उच्यते ॥
कौतुकन्तवयद्यस्ति तदागच्छ मयासह ॥
एवमस्त्विति तेनोक्तौ विपुलेनमहात्मना ॥
तेनैवसहनिर्य्यातः श्रेष्टिकस्य गृहं प्रतिः ॥
श्रेष्टिकः स्वगृहासीनोदृष्टः स विपुलेन तु ॥
तस्यान्तिकमुपागम्य तत्फलं सनिवेदितः ॥
अहोफलमिदं श्रेष्टमहोफलमिहानितम् ॥
अहोरूपमहोगन्ध महोफलसुशोभनम् ॥
यत्फलन्न महीजातं नमेरौ न च कन्दरे ॥
देवलोकिक सुव्यक्तं नमह्यामुपजायते ॥
अद्योस्मि तत्फलं भोक्ता राजार्हश्च न संशयः ॥
ढौकयित्वा फलंदिव्यं राजानन्तोषयाम्यहं ॥
ततस्त्वरितगत्वैव फलंगृह्यमनोरमं ॥
आदरेणोपसृत्यैव राजानं तत्फलन्ददौ ॥
राजा च तत्फलं दृष्ट्वा विस्मयं परमङ्गतः ॥
कुतः श्रेष्ट ! त्वयानीतं फलं सर्व्वमनोहरम् ॥
स्वादुमूलफलस्कन्ददृष्टापूर्व्वन्न यादृशम् ॥
रूपगन्धगुणोपेतं हृदयानन्दकारकम् ॥
सत्य एव प्रभुञ्जामि त्वयादत्तमिदं फलम् ॥
कीदृशं स्वादु विज्ञातुमिच्छामिकुरुमाचिरम् ॥
ततः स भक्षयामास फलञ्चामृतसन्निभं ॥
अमृतोपमसुस्वादं सर्वञ्च वुभुजे नृपः ॥
सद्य षोडशवर्षस्य यौवनं समपद्यते ॥
न वलिपलितं सद्यो नजरा न च दुर्वलः ॥
केशदन्तनखस्निग्धो दृढदेहो दृढेन्द्रियः ॥
तेजश्चक्षुवलप्राणं सद्य सर्वानवाप्तवान् ॥
मन्त्रीपुरोहितामात्य सर्वे भृत्यजनास्तथा ॥

पौरस्त्रिबालबृद्धाश्च सर्व्वे ते विस्मयङ्गताः ॥
राजा सिंहजटोनाम तुष्टिमेवपराङ्गतः ॥
प्रहर्षमतुलञ्चैव प्राप्तवान् स नरेश्वरः ॥
उवाच राजा तं श्रेष्ठं स्वार्थतत्परनिर्दय ॥
श्रृणुभीमवस्त्वेवं फलमानय अद्य वै ॥
पुनर्म्मे यौवनप्राप्तिस्त्वत्प्रसादान्नरोत्तमः ॥
केकयी दुर्वलावृद्धा पुनः प्रापय यौवनं ॥
स राज्ञा एवमुक्तस्तु श्रेष्ठी भीमबलस्तथा ॥
प्रत्युवाचाह राजानं प्राञ्जलिः प्रणतः स्थितः ॥
न फलेदं वने राजन् ! न वाणिज्य कृषेण वा ।
केनापि कुलपुत्रेण तवदर्शन कांक्षया ॥
दत्तोस्मि तव राजेन्द्र मयाप्राप्तोषि भूपते ॥
न च शक्नोम्यहं राजन् वक्तुञ्च देहि तन्नरं ॥
श्रुत्वाभीमवलं वाक्यं प्रत्युवाच ततः पुनः ॥
अमात्य कुलपुत्रस्त्वं ब्रूहि मद्वचनं पुनः ॥
यदि नास्ति किमेतत्तं मया वा प्रार्थितो भवान् ।
यत्रश्चैको वहून्तत्र जायन्ते नात्रसंशयः ॥
आगमोपायमार्गञ्च तेनैव स तु गम्यतां ॥
अवश्यन्तेन गन्तव्यं तेन मार्गेण मार्गयः ॥
अदत्वाफलमन्यच्च शिरश्छेद्यामि दुर्म्मते ॥
छेद्य चण्डविचण्डाभ्यां रक्षभीमवलाधमः
ततो भीमवलः क्रुद्धः खड्गंगृह्यशशीप्रदं ॥
उवाचवचनं राज्ञः कुलपुत्र व्रजत्वरम् ॥
मारुष कुलपुत्रस्त्वं मया वध्योभविष्यसि ॥
यद्यस्ति फलमन्यद्वा देहि राजानमद्य वै ॥
यत्रप्राप्ति फलन्दिव्यन्तत्र वा देशयन्तव ॥
तत्फलेन विना भद्र दुर्ल्लभन्तवजीवितं ॥

॥विपुलउवाच ॥

जीविताशामहंप्राप्तो वैदेशि भवनन्तव ॥
कृतकर्त्ताकथं वध्यः प्राप्तोयमहमद्य वै ॥
फलं वा नपुनस्त्वन्यद्दातुं शक्यन्न केनचित् ॥
सह्य पर्व्वतशैलाग्रे आशीनः श्रान्तमानसः ॥
वानरस्तत्फलं गृह्य मह्यंदत्वा पुनर्गतः ॥

मयादत्तमिदंतुभ्यं त्वयापि च नराधिपे ॥
तत्र गच्छावभोश्रेष्टि दृश्यतेयदिवानरः ॥
त्वयामयाच गत्वैव योवासः प्लवगाधिपः ॥
श्रेष्टिनाचतथेत्याह गच्छामः सहितावयम् ॥
यत्रप्राप्तफलंतुभ्यं मोक्षयामो नसंशयः ॥

॥रुद्रउवाच ॥

तमारुह्यगिरिंसह्यंमार्गमाणाः समन्ततः ॥
विपुलेन ततोदृष्टो वानरः प्लवगाधिपः ॥
अयं स वानरः श्रेष्ठो वृक्षछायासमाश्रितः ॥
ममपुण्यवलेनैव दृश्यतेऽद्यापि वानरः ॥
वानरकुरुमित्रार्थं सद्योमृत्युर्भवेन्मम ॥
पूर्व्वदत्तं फलमन्यद्देहि वा न च जीवये ॥

॥वानरउवाच ॥

गन्धर्व्वेणममदत्तं फलन्दत्तन्तुते मया ॥
पुनरन्यत्कथं दास्ये तत्र गच्छयदीच्छसि ॥

॥विपुलउवाच ॥

अदत्वातत्फलं तुभ्यं जीवितुंसंशयो भवेत् ॥
अथवा तत्र गच्छामो यत्रचित्ररथः स्वयं ॥
वानरः पुनरेवाह एवं कुर्व्वामहे वयम् ॥
तत्र चित्ररथावासमुपगम्येदमव्रवीत् ।
गन्धर्वराज । कार्य्यार्थीत्वत्तूह्यहं पुनरागतः ॥
पूर्व्वदत्तफलं त्वन्यद्देहि मां यदि शक्यते ॥

॥ गन्धर्व्वराजोवाच ॥

सूर्य्यलोकगतश्चास्मि तेनदत्तं फलोत्तमम् ॥
मयादत्तफलं तुभ्यमत्यन्तसुहृदोसि मे ॥
कुतोन्यफलदास्यामि मत्तोस्तिप्लवङ्गमः ॥
सूर्य्यलोकं गमिष्यामि तत्र याचस्व भास्करग् ॥
गन्धर्व्वेनैवमुक्तस्तु तथेत्याहप्लवङ्गमः ॥
सूर्य्यलोकन्ततः प्राप्तागन्धर्व्वादयः सर्व्वशः ॥

॥गन्धर्व्वराजोवाच ॥

काय्यार्थेनपुनः प्राप्तस्त्वत्सकाशं खगेश्वर ! ॥
पूर्व्वदत्तफलं स्त्वन्यद्देहिजीवमनाशयः ॥

॥सूर्य्य उवाच ॥

सोमलोकगतश्चास्मि तेनदत्तंफलोत्तमम् ॥
सफलंदत्तमेवाभिः सचदत्वामयातव ॥
अन्यद्दातुन्न शक्नोमि गच्छसोमपराद्य वै ॥
तं प्रार्थयाविकल्पेन अत्रिपुत्रं ग्रहेश्वरम् ॥

॥महेश्वर उवाच ॥

गतः सूर्य्याग्रतः कृत्वा सोमलोकन्तथैव हि ॥
उवाचसूर्य्यः सोमाय कारणापेक्षयाशशि ॥

॥सोम उवाच ॥

किमर्थमागतोभूयः कर्तव्यन्तव भास्करः ॥
फलंदातुं पुनस्त्वन्यत्मुक्तात्वन्यङ्करोम्यहम् ॥

॥सूर्य्य उवाच ॥

यदिशक्यंफलन्देहि अन्यान्न प्रार्थयाम्यहम् ॥
नदत्तासिफलंमन्ये मयावध्दोभविष्यसि ॥

॥सोम उवाच ॥

आगमन्तस्यवक्ष्यामि शृणुष्वावहितो भव ॥
इन्द्रेणास्मिफलं दत्तं सफलन्दत्तमेभवान् ॥
गन्धर्व्वेन्द्रसदस्त्वन्यत्प्रार्थयामः सहैवतु ॥
एवं सोमइतिप्राहगत्वेन्द्रसदनं प्रति ॥
सोमेनेन्द्रमुवाचेदं फलकामा इहागताः ॥
पूर्व्वदत्तफलमन्यद्देहि शकममाद्यवै ॥

॥इन्द्र उवाच ॥

यदर्थमिहसंप्राप्तः स च नास्तिनिशाकरः ॥
विष्णुहस्तात्मयाप्राप्तमेकमेवफलं शुभम् ॥
सर्व्वएवहिगच्छामो विष्णुलोकं ग्रहेश्वर ॥
सर्व्वएवोपजग्मुस्ते फलार्थं मधुसूदनम् ॥
एवमुक्तागताः सर्व्वे देवराजपुरस्कृताः ॥
मुहूर्तेनैव संप्राप्ता विष्णुलोकं यशश्विनि ॥
उपसृत्य तत इन्द्रः प्रणिपत्यजनार्द्दनम् ॥
सर्व्वेषामुपरोधेनप्रार्थयामि यशोधरम् ॥

॥विष्णुउवाच ॥

पूर्वदत्तं फलस्यार्थि तच्च सर्वमिहागताः ॥
नशक्नोमि फलन्दातुं किं वात्वन्यङ्करोम्यहम् ॥

॥इन्द्रउवाच ॥

ब्रह्माण्डमपिभर्त्तुंत्वं शक्नोसि गरुडध्वज ! ॥
अशक्यन्तवनास्तीति जानामि पुरुषोत्तमम् ॥
एवमुक्त्वापुनर्विष्णुः प्रत्युवाचपुरन्दरम् ॥
फलमेकं परित्यज्य सर्व्वंशक्नोमि कौशिक ॥
उपायोत्रप्रवक्ष्यामि आगमं शृणु गोपते ॥
ब्रह्मणाच ममादत्तंतत्फलैकं पुरन्दर ॥
मयादत्तफलं त्वेकं किमन्यद्दातुमिच्छसि ॥
प्रार्थयाचगत्वैवं परमेष्टिंप्रजापतिम् ॥
ततोपराधाद्देवेन्द्र प्रार्थयामि पितामहम् ॥
एवमुक्त्वा गतासर्व्वे पुरस्कृत्यजनार्दनम् ॥
इन्द्रः सोमश्च सूर्य्यश्च गन्धर्वोवानरस्तथा ॥
विपुलः श्रेष्टिकश्चैव राजदूतद्वयन्तथा ॥
ब्रह्मलोकं मुहूर्त्तेन प्राप्तवान्सुरसुन्दरि ॥
दृष्ट्वाब्रह्मसदंरम्यं सर्व्वकामपरिच्छदम् ॥
अनेकानि विचित्राणि रत्नानि विविधानि च ॥
मन्दारतरुशोभानि वैदूर्य्यमणिकुट्टिमम् ॥
प्रवालमणिस्तम्भानि वज्रकाञ्चनवेदिका ॥
प्रवालस्फाटिकोजाला इन्द्रनीलगवाक्षकः ॥
दृश्यन्ते विपुलास्तत्र नानावृक्षमनोरमाः ॥

पुष्पनामितवृक्षाया फलनामितकां भवेत् ॥
सर्व्वरत्नमयावृक्षाः सर्व्वेरत्नमयञ्जलं ॥
वृक्षगुल्मलतावल्ली कन्दमूलफलानि च ॥
सर्व्वेरत्नमयादृष्टा विपुलोविपुलेक्षणः ॥
अनेक भौमंप्रासादं मुक्तादामविभूषितं ॥
अप्सरोगणकोटीभिः सर्व्वाभरणभूषितं ॥
ब्रह्मलोकसभारम्यासूर्यकोटिसमप्रभा ॥
तत्रब्रह्मासुखासीनो नानारत्नोपशोभिते ॥
चतुर्म्मूर्त्तिश्चतुर्व्वक्त्रश्चतुर्व्वाहुश्चतुर्भुजः ॥
चतुर्वेदधरोदेवश्चतुराश्रमनायकः ॥
चतुर्वेदावृतस्तत्र मूर्त्तिमन्तमुपासते ॥
गायत्रीवेदमाता च सावित्री च सुरूपिणी ॥
व्याहृतिः प्रणवश्चैव मूर्त्तिमान्समुपासते ॥
वौषट्कारोवषट्कारो नमस्कारः समूर्त्तिमान् ॥
श्रुतिः स्मृतिश्च नीतिश्च धर्म्मशास्त्रसमूर्त्तिमान् ॥
इतिहासः पुराणश्च सांख्ययोगः पतञ्जलि ॥
आयुर्व्वेदोधनुर्व्वेदोवेदोगान्धर्व्वरिव च ॥
अर्थवेदोन्यवेदाश्चमूर्तिमान्समुपासते ॥
ततोब्रह्मासमुत्थाय अभिगम्य जनार्द्दनं ॥
गाञ्चअर्घ्यञ्च दत्वैवमास्यतामितिचाव्रवीत् ॥
मणिरत्नमयेदिव्ये आसने गरुडध्वजः ॥
देवराजोशशीसूर्य्योगन्धर्व्वः प्लवगेश्वरः ॥
विपुलश्चमहासत्व आस्यतां रत्नशाशने ॥
साधु भो ! विपुलश्रेष्ठ साधु भो ! विपुलं तपः ॥
साधु भो ! विपुलप्राज्ञ साधु भो ! विपुलश्रियः ॥
तोषितास्मवयं सर्व्वेब्रह्मविष्णुमहेश्वराः ॥
आदित्यावसवोरुद्रा साध्यायक्षोमरुत्तथा ॥
भुंक्षभोगान् यथोत्साहं ममलोके यथासुखं ॥
इयं विमानकोटीनां तवार्थायोपकल्पितान् ॥
सहस्राणां सहस्राणि अप्सराकामरूपिणि ॥
तवार्थेयोपसर्प्पन्तिसर्व्वालंकारभूषिताः ॥
यावत्कल्पसहस्राणि परार्द्धानि तपोधनाः ॥
यत्र यत्र प्रयासित्वं तत्रतत्रोपभुज्यतां ॥

॥महेश्वर उवाच ॥

इतिश्रुत्वा वचस्तस्य विपुलो विपुलेक्षणः ॥
वेपमानोभयत्रस्त अश्रुपूर्णाकुलेक्षणः ॥
प्रणम्य शिरसाभूमौ प्रणिपत्य पुनः पुनः ॥
उवाच मधुरं वाक्यं ब्रह्मलोके पितामहम् ॥

॥विपुल उवाच ॥

भगवन्सर्व्वलोकेश सर्व्वलोकपितामह ॥
स्वप्नभूतमिवाश्चर्य्यं पश्यामि त्रिदशेश्वर ! ॥
स्मृतिभ्रंसश्चमेजातोवुद्धिर्ज्जातोन्धचेतनः ॥
मूढोऽहंत्वांकथंस्तौमि ज्ञानातीतंपरात्परम् ॥
नमस्त्रैलोक्यवन्धो भवममशरणं त्राहिसंसारघोरं ॥
भीतोहंगर्भवासाज्जनुमरणभयात् त्राहिमां मोहवन्धात् ॥
नित्यं रागाधिवासमनियतवपुषं त्राहिमांकालपाशात् ॥
तिर्य्यश्चान्योन्यभक्षं वहुयुगशतशस्त्राहिमोहान्धकारात् ॥
श्रुत्वैववाचब्रह्माविपुलमतिपुनर्म्मानयस्वा यथावत् ॥
आभूतसंप्लवन्तेअविपलितवयजन्मलाभानु भूयः ॥
गर्भावासानुवन्धन्नच पुनमरणं क्लेशमायासपूर्णं ॥
छित्वामोहान्धशत्रूं व्रजसिच परमं ब्रह्मभूयत्वमेसि ॥

॥महेश्वर उवाच ॥

ब्रह्मणा एवमुक्तस्तु विष्णुना प्रभविष्णुना ॥
एवं भवतु भद्रम्वो यथोवाच पितामहः ॥
इन्द्रेण शशिना चैव सूर्य्येण च पुनः पुनः ॥
साध्यादित्यैर्म्मरुद्रूद्रैर्व्विश्वेभिर्वसवैस्तथा ॥
अहोतपः फलं दिव्यं विपुलश्य महात्मनः ॥
सशरीरं दिवं प्राप्तं श्रद्धया तिथिपूजनात् ॥
एवमादिन्यनेकानि विपुले परिकीर्तितं ॥
ब्रह्माणं पुनरेवाह विष्णुर्विश्वजगत्प्रभुः ॥

इति वृषसारसंग्रहे विपुलोपाख्यानोनाम द्वादशोध्यायः ॥१२॥

अथ पशुपतिमते शिवधर्मे वृषसार संग्रहे गर्भोत्पत्तिर्न्नाम

त्रयोदशोऽध्यायः

ॐ नमः शिवाय

॥ देव्युवाच ॥

अहिंसातिथ्यकानाञ्च श्रुतोधर्म्मः सुविस्तरः ॥
किन्नकुर्व्वन्तिमनुजाः सुखोपायं महत्फलं ॥
स्वशरीरस्थितो यज्ञः स्वशरीरे स्थितं तपः ॥
स्वशरीरे स्थितं तिर्थं श्रुतो विस्तरतो मया ॥
किमर्थं भगवन् ब्रूहि सुखोपायं महत्फलम् ॥
किन्निवृत्तास्तुदेवेश ऋषिदैवतमानुषाः ॥

॥भगवानुवाच ॥

अद्यपृष्टेन कथितं गोपितं ऋषि सुन्दरि ॥
मानुषाणां हितार्थाय तव च वरवर्णिनि ॥
अद्य प्रभृति देवेशि ख्यातिर्ल्लोके भविष्यति ॥
धन्याएवं चरिष्यन्ति अधन्या न रमन्ति तं ॥
त्रिगुणेन तु वन्धेन वध्दापाशदृढेन तु ॥
तेनार्थेनरमन्त्यत्र जानन्तोपि विमोहिताः ॥

॥देव्युवाच ॥

किम्वात्रिगुणवन्धेति ब्रूहि संशयछेदक ॥
अद्यापि ममदेवेश मोहोत्पन्नस्त्रिवन्धनैः ॥

॥ भगवानुवाच ॥

प्राकृतं वैकृतञ्चैवदक्षिणावन्धमेव च ॥
एतेनैव तु वन्धेनवद्धाः वर्णाश्रमाः सदा ॥
ज्ञानहीना निवर्त्तन्तेपरमं प्राप्यतत्परं ॥
इष्टस्त्रीणानिवर्त्तन्ते धनधान्यसमुच्चये ॥
स्नेहादाकृष्यमनसाम्बन्धः प्राकृत उच्यते ॥
योगयुक्तेन मनसा यद्यदैश्वर्यमाप्यते ॥
तच्चवैकृतवन्धस्तु यदितत्रानुरज्यते ॥

आरामोद्यानवापीषु दानक्रतुफलेषु च ॥
आशक्तमनसावाच्चादक्षिणावन्धः कथ्यते ॥
अनेनैव तु पाशेन वद्धावानरवद्यथा ॥
मोक्षितुं न च शक्नोति इतश्चेतश्च धावति ॥
देवासुरमनुष्येषु तिर्य्येषुनरकेषु च ॥
भ्रमन्ते चक्रय न्त्रेवयावत्तत्वन्नविन्दति ॥
गर्भवासपरिक्लेशौ जन्मसृत्यु पुनः पुनः ॥
व्याधिः शोकभयायास चिन्तया जरयाहतः ॥

॥देव्युवाच ॥

गर्भोत्पत्तिः कथन्देव योगीलभति कीदृशीं ॥
कीदृशंलभतेगर्भः श्रोतुन्नः प्रत्युदीर्यताम् ॥

॥भगवानुवाच ॥

शृणुदेविप्रवक्ष्यामि गर्भोत्पत्तिर्यथाक्रमम् ॥
यथासंशयविच्छेदं भविष्यसि वरानने ॥
अक्षरात्प्रभवो ब्रह्मा कर्म्मवद्धसमुद्भवम् ॥
कर्म्मतो यज्ञप्रभवो यज्ञतोधूमसम्भवः ॥
पर्ज्जन्यादन्नमुत्पत्तिरन्नाद् भूतानिजज्ञिरे ॥
अन्नाद्रससमुत्पत्तिरसाच्छोणितसम्भवः ॥
शोणितात्मांससमुत्पत्तिर्मांसाद्मेदसमुद्भवः ॥
मेदसोस्थीनिजायन्ते अस्थिभ्योमज्जसम्भवः ॥
मज्जायास्तुभवेच्छुक्रन्नरः शुक्रसमुद्भवः ॥
शुक्रशोणितसंयोगाद्गर्भोत्पत्तिस्ततः स्मृतः ॥
अग्निसोमात्मकन्देवि शरीरद्वयधातुतः ॥
सोमधातुस्मृतं शुक्रमग्निधातुरजस्मृतं ॥
अग्निसोमाश्रयन्देवि शरीरमिति संज्ञितम् ॥
मासी मासी ऋतुः स्त्रीणां भवतीह न संशयः ॥
ऋतुकाले प्रसर्प्येत न सुखार्थम्वरानने ॥
पुत्रकामप्रयुञ्जीत धर्मार्थश्चयशस्विनि ॥
पुमान्स्त्रीपुंप्रयुञ्जीत अरणीवहुताशनः ॥
पुमान्शुक्राधिकोज्ञेयः कन्यारक्ताधिका भवेत् ॥
सम शुके च रक्ते च स च जायेन्नपुंसकः ॥

॥देव्युवाच ॥

द्वियमात्रियमाचैव कथञ्जायेत गुर्व्विणी ॥
कथंस्त्रीद्वियमाजायेत्कथम्वापुरुषद्वयम् ॥

॥भगवानुवाच ॥

रक्ताधिकास्मृता कन्या जायते वरवर्णिनि ॥
वायुना च द्विधाभिन्नाकन्यकद्वियमा स्मृता ॥
शुक्राधिकास्तु पुरुषद्विधाभिन्नानिलेन तु ॥
द्वियमापुरुषोज्ञेया त्रियमास्तुत्रिधाकृते ॥
ऋतुस्नाता यदानारी यदि गर्भादिगृह्यति ॥
प्रथमे च द्वितीयेच तृतीये च स जीवति ॥
समेषु जनयेत्पुत्रः कन्यकाविषमे दिने ॥
षष्ट्याष्टमौ च दशमीद्वादशी च पुमान्भवेत् ॥
पञ्चमी सप्तमी चैव नवमेकादशीस्त्रियः ॥
समरक्ते च शुक्रे च श्यामः सञ्जायते पुमान् ॥
रुधिरं त्वेकरात्रेण कललं प्रतिपद्यते ॥
कललं पञ्चरात्रेण अर्व्वुदत्वंप्रजायते ॥
अर्व्वुदः सप्तरात्रेण मांसपेशी समुद्भवः ॥
द्वितीयं सप्तरात्रेण तत्सर्व्वंमांसंशोणितम् ॥
तृतीयं सप्तरात्रेण हृदयं जायते ततः ॥
ततः सर्व्वाणि गात्राणि शिरश्चैवो पजायते ॥
हृदयेजायमाने तु मूर्च्छान्तन्द्रिररोचकः ॥
स्त्रियाः छर्दिः प्रशेकश्च दौर्व्वल्यंचोपजायते ॥
तस्याह्िहृदयं नारीयदिभक्ष्यति किञ्चन ॥
भक्ष्यं लेह्यंतथापेयमुपभोगास्तथाययत् ॥
शयनाशनयानानि वस्त्राण्याभरणानि च ॥
यद्यदाकांक्षते किञ्चित्तत्तदास्यै प्रदापयेत् ॥
नायासंकारयेच्चास्या नचैवमवमानयेत् ॥
मुखमापाण्डुरंस्निग्धङ्कपोलस्तनकेशयोः ॥
शरीरश्च श्रियाजुष्टं पीनोरुश्रोणिवक्षसं ॥
लिङ्गेरेभिर्व्विजानीयाङ्गर्भे जीवं प्रतिष्ठितं ॥
चतुर्थे सप्तरात्रेण शिरश्चैवोपजायते ॥
पञ्चमसप्तरात्रेण ग्रीवातत्रोपजायते ॥
षष्ठम सप्तरात्रेण स्कन्ध गात्रंप्रजायते ॥

सप्तम सप्तरात्रेणपृष्ठ वंशप्रजायते ॥
अष्टमसप्तरात्रेण पाणीजायत चोभयौ ॥
सप्तरात्रन्नवप्राप्य जायते हृदिपञ्जरं ॥
दशमेसप्तरात्रे च पादौ जायेत चोभयौ ॥
उदरश्चोपजायेत सप्तैकादशरात्रिके ॥
द्वादशसप्तरात्रेण कुक्षिपार्श्वैः प्रजायते ॥
सप्तत्रैदशरात्रेण कटिं सूत्रोपजायते ॥
नवत्यष्टमरात्रेण जायते सूत्र विंशति ॥
सप्तपञ्चदशाहेनसर्व्वमेदः प्रजायते ॥
षोडशसप्तरात्रेण अस्थिसर्व्वाणिजायते ॥
सप्तसप्तदशाहेन जायतेस्नायुवन्धनं ॥
सप्तमाष्टादशाहेन जायते मुखमण्डलं ॥
सप्तोनविंशरात्रेण घ्राणवंशः प्रजायते ॥
सप्तविंशतिरात्रेण नैत्रनालिंप्रजायते ॥
सप्तैकविंशरात्रेण कर्णयुग्मं प्रजायते ॥
द्वाविंशसप्तरात्रेण जायते द्वौभ्रुवौततः ॥
सप्तत्रिविंशरात्रेण गण्डयुग्मं प्रजायते ॥
चतुर्व्विंशतिसप्ताहेओष्ठ युग्मं प्रजायते ॥
पञ्चविंशतिसप्ताहे जिह्वाजायेत सुन्दरि ॥
षड्विंशसप्तरात्रेण दन्तपङ्क्ति प्रजायते ॥
सप्तविंशतिसप्ताहे जायत्रेवृषलद्वयं ॥
अष्टाविंशतिसप्ताहे भगलिङ्गं प्रजायते ॥
उनविंशतिसप्ताहे जायते च त्वगेवच ॥
त्रिंशतसप्तरात्रेण जायते नाभिमण्डलं ॥
सप्तैकत्रिंशरात्रेण सर्व्वरन्ध्रं प्रजायते ॥
द्वात्रिंशसप्तरात्रेण नखविंशति जायते ॥
त्रित्रिंशसप्तरात्रेण लोमकेशश्च जायते ॥
चतुस्त्रिंशसप्तरात्रेणसर्व्वेसन्धिः प्रजायते ॥
पञ्चत्रिंशति सप्ताहे सर्व्वमर्म्म प्रजायते ॥
षड्त्रिंशसप्तरात्रेण वेदनाचोपजायते ॥
सप्तत्रिंशतिसप्ताहे ईर्ष्याद्वेषः प्रंजायते ॥
अष्टत्रिंशतिसप्ताहे पञ्चात्मकसमन्वितं ॥
सर्वाङ्गमङ्गसंपूर्णः परिपक्व स तिष्ठति ॥
मातुस्वाशितपीतश्चनाभिसूत्रागमेन तु ॥

अजातस्योपधार्य्यन्ते गर्भस्थस्यैवजन्तवः ॥
ततः प्रविशतेदेहेनिद्रास्वप्नयथातथा ॥
नोपलभ्यति सूक्ष्मत्वादरण्यग्निर्य्यथातथा ॥
गर्भोदकेनसिक्ताङ्गजरायापरिवेष्टितः ॥
जातिस्मरति तत्रस्थोजन्तुश्चेतः समन्वितः ॥
मृतश्चाहं पुनर्ज्जातोभूयश्चैव पुनर्म्मृतः ॥
स्थावराणांसहस्रेषु जातोस्मि विविधेषु च ॥
चतुर्व्वर्ण विवर्णेषु मानुषेषु सहस्रशः ॥
साम्प्रतञ्चपुनर्गर्भः क्लेशः प्राप्तः सुदुःसहः ॥
इदानींजातमात्रोहं संस्कारैश्चापि संस्कृतः ॥
योगमेवाभिसेवामि साख्यं वा पञ्चविंशकं ॥
यत्र जन्मजरानास्ति यत्रमृत्युश्च नास्ति वै ॥
यत्रब्रह्मपरंवेद्यं चरिष्यामि यतव्रतः ॥
एवमादीन्यनेकानि चिन्तयित्वा पुनः पुनः ॥
यावत्तिष्ठति गर्भस्थो जातिस्मरतिपूर्व्विकां ॥
ततोजायतिकष्टेन महाक्लेशेन मानवः ॥
योनियन्त्रसुतीव्रेण पीड्यमानसुदुःखितः ॥
जातमात्रोस्मृतिभ्रंशोभवतीहअचेतनः ॥
मायामुद्गरतीव्रेण हतः किं शुभमाचरेत् ॥
एषगर्भसमुत्पत्तिः कथितोस्मि वरानने ॥
दुःखसंसारप्रशमं किंभूयः श्रोतुमिच्छसि ॥

इति वृषसारसंग्रहे गर्भोत्पत्तिर्न्नाम त्रयदशोऽध्यायः ॥

अथ पशुपतिमते शिवधर्मे वृषसारसंग्रहे प्रश्नव्याकरणे नाम चतुर्दशोऽध्यायः

ॐ नमः शिवाय

॥ देव्युवाच ॥

अतिदीर्घाति ह्रस्वश्च पुमान्केनोपजायते ॥
अतिगौरोऽतिकृष्णश्च नरोभवति किं प्रभो ॥

॥ भगवानुवाच ॥

गृहीतगर्भायानारी नित्यमुत्तानशालिनी ॥
प्रसारितविमुक्तात्मासोऽतिदीर्घः प्रजायते ॥

गृहीतगर्भायानारीशेते सङ्कुचिता सदा ॥
रसोऽन्नादीनिकटुकं सेवनाः ह्रस्वजायते ॥
गृहीतगर्भायानारी नित्यं क्षीरोपसेविता ॥
वरकोद्रवशालीच भुक्ताचापि यवोदनं ॥
शुक्लवस्त्रस्रजायुक्ता सातिगौरं प्रजायते ॥
गृहीतगर्भायानारी वालधान्यानि सेवते ॥
कृष्णकोद्रव तैलादि माषकृष्णयवोदनं ॥
कृष्णवस्त्रस्रजादीनि तस्याः कृष्णः प्रजायते ॥

॥देव्युवाच ॥

जात्यन्धो जायतेकस्मान्षण्ढोभीरुर्हतेन्द्रियः ॥
कुजोवा वामनोवापि पङ्गवः स्थूलशिरःकथं ॥

॥भगवानुवाच ॥

गृहीत गर्भायानारी तीक्ष्णोष्णान्युपसेवते ॥
लशुनानिपलाण्डूनिकरञ्जमूलकानि च ॥
पिप्पलीशृङ्गवेरञ्च सर्षपान्मरिचानि च ॥
आसवश्च परिक्लिष्टायेचान्येकटुतिक्तकाः ॥
तीक्ष्णन्तुसेवमानायाजात्यन्धो जायते सुतः ॥
मिथ्यापचाराः स्त्रीपुंसोव्यापन्नेशुक्रशोणिते ॥
यदागर्भाशयेरक्तंस्त्रियाः पूर्व्वन्निषिच्यते ॥
पश्चाच्छुक्रंरक्तकाले तदाषण्ढः प्रजायते ॥
त्रस्तोद्विग्नोयदाभीतस्त्रीपुंसांसूपजायते ॥
तत्र यो जायते गर्भभिरुः क्रन्दनको भवत् ॥
निसर्गकाले शुक्रस्य विघ्न उत्पद्यते यदा ॥
इन्द्रियावर्त्त विघ्नेतु तदा जायेदतिन्द्रियः ॥
गृहीतगर्भायानारी वातलान्युपसेवते ॥
कटुकानिकषायानितिक्तानि च विशेषतः ॥
वातः प्रकुपितस्तस्यागर्भमातुह्यतिष्ठति ॥
कुब्जस्तु जायते तस्माद्गर्भाद्वातनिपीडनात् ॥
नित्यसासवशीलाया तथा चोत्कटुकाशना ॥
तस्या संहन्यते गर्भो वामनस्तेनजायते ॥
अतिव्यायामशीलातु यानारीविषमासनी ॥
गर्भः संक्षुभ्यते तस्याः पषण्डस्तेनो पजायते ॥

गृहीतगर्भायानारी रूक्षधान्यानि सेवते ॥
वातश्लेष्मशिरस्थोवै तस्यागर्भस्य कुप्यते ॥
ततः स्थूलशिरास्तेन पुमान् जायत्यसंशयः ॥

॥देव्युवाच ॥

करालाङ्गाहनुः पङ्गूर्मूकोगद्गदभाषकः ॥
विकृताक्षस्त्वनक्षोवा भवद्रस्वगुंदः कथं ॥

॥भगवानुवाच ॥

करालस्तेनदोषेण जायतेमानवस्तथा ॥
अथकरालं कुरुते नारीलम्वोतिचूचूका ॥
तस्मादनेनदोषेण करालो जायते पुमान् ॥
गृहीतगर्भायानारी रक्तपित्तामयार्दिता ॥
गोहनुंजनयेत्येषा रक्तपित्तप्रकोपतः ॥
गृहीतगर्भायानारी वातशूलैरुपद्रूता ।
शुक्रोदा वर्त्तनी चापि पङ्गूजनयते सुतम् ॥
क्षुधार्त्तावेदनार्त्ताच सततश्चोपवासिनी ॥
मूकंजनयते बालं दौहृदश्च विमानिता ॥
गृहीत गर्भायानारी विसृजेत्मासमासिकम् ॥
अनक्षोजायतेतस्या गर्भशोणित संक्षयात् ॥
अथग्रस्ता यदानारी वातोदावर्त्तपीडिता ॥
गृहीतगर्भारुक्षाणि वातलान्युपसेवते ॥
वातस्थानन्ततस्तस्यागर्भस्या पीडितम्भवेत् ॥
अगुदोजायते तस्माज्जातश्चापि नजीवति ॥

॥देव्युवाच ॥

हीनाङ्गो जायतेकस्मादधिकाङ्गोऽपि वा कथं
श्वेतपिङ्गेक्षणः कस्मात्कथं लोहितलोचनः ॥

॥भगवानुवाच ॥

गर्भस्य जायमानस्य यदङ्गे जायतेनिलः ॥
वाताभ्यां श्लेष्मणातस्यतदङ्गं परिहीयते ॥
हीनाङ्गोजायते तस्मात्पुमान् वातप्रकोपतः ॥
गृहीतगर्भायानारी मधुराण्युपसेवते ॥

शृङ्गाटककलोत्यानि शालूकानि विशानिच ॥
मोचन्तालफलञ्चैव नारिकेलफलन्तथा ॥
अती:क्ष्णं सेवमानातु अधिकाङ्गं प्रसूयते ॥
पिङ्गाक्षः श्लेमपित्ताभ्यां श्वेताक्षः श्लेष्मणाभवेत् ॥
वातपित्तेन रक्ताक्षः पुरुषसूपजायते ॥

॥देव्युवाच ॥

कथम्वा जायतेपुत्रः कन्यका केन जायते ॥
अपुमान्केनजायेत द्वियमात्रियमातथा ॥

॥भगवानुवाच ॥

शुक्राधिकः पुमान्ज्ञेयः कन्यारक्ताधिकाभवेत् ।
रक्तशुक्रसमत्वेन जायते स नपुंसकः ॥
पिण्डीभूतोयदागर्भमारुतो विभवेद्द्विधा ॥
एवन्तेद्वियमाज्ञेयास्त्रियमाच त्रिधाकृते ॥

॥देव्युवाच ॥

शोणितं मांसमेदश्च अस्थिमज्जा च पञ्चमी ॥
शरीरस्थानि दृश्यन्तेशुक्रस्थानन्न दृश्यते ॥
तस्योत्पत्तिश्चस्थानञ्च ज्ञातुमिच्छामितत्वतः ॥
कथयस्व त्रिलोकेश छेत्तुमर्हसि संशयः ॥

॥भगवानुवाच ॥

मनः शुक्रस्यप्रभवं घ्राणं श्रोत्रंतथाक्षिणी ॥
स्थानन्तु सर्व्वाङ्गसमस्पर्शात्स्पर्शः प्रवर्त्तते ॥
यथानिषिक्तं क्षीरन्तु पयसाद्दधिजायते ॥
प्रमथ्यमानदध्नस्तु सर्प्पिसोपि तथागमः ॥
एवं शरीरनिर्गच्छेत् शुक्रं शुक्रवहाशिराः ॥
पूरयित्वानु पूर्व्वेण अस्थयोप्रतिपद्यते ॥
ततस्तु ताः शुक्रवहामेढ्रनाभीमनुसृताः ॥
नाशुक्रं तत्तु सिञ्चन्ति तस्माद्गर्भस्य सम्भवः ॥

॥देव्युवाच ॥

कथम्वेदयते जाति कथं जातिस्मरोभवेत् ॥
एतस्मिन्संशयं मेऽद्य छेत्तुमर्हसि शङ्कर ! ॥

॥ भगवानुवाच ॥

भावितात्मां च यो जन्तुर्देवि भोगाधिकञ्च यत् ॥
ब्रह्मविद्ज्ञानसंयुक्तः स जातिंस्मरते पुमान् ॥

॥देव्युवाच ॥

कथंसद्योगृहीतस्य लिङ्गगर्भस्य दृश्यते ॥
एतत्कथय देवेश रहःकाले महेश्वर ! ॥

॥ भगवानुवाच ॥

पिपाशारोमहर्षञ्च वेपनङ्गात्रसीदनम् ॥
निद्रास्वेदञ्चतन्द्रा च मुहूर्तमुपजायते ॥
निक्लेदत्वं खरत्वञ्च योन्यात्समुपजायते ॥
नचार्द्रवंस्वै दृश्येत शुक्रस्यरजसो ऽपिवा ॥
सद्योगृहीतगर्भाया लिङ्गान्येतानि तत्वतः ॥

॥ देव्युवाच ॥

केनलिङ्गेन विज्ञेयं पुत्रजन्ममहेश्वर ॥
कन्यका केनलिङ्गेन ज्ञायते कथयस्व मे ॥

॥ भगवानुवाच ॥

पादोरुजंघपार्श्वश्च दक्षिणं यदिह्युन्नतः ॥
दक्षिणं विपुलंतत्र तदा पुत्रः प्रजायते ॥
वामश्चैव यदा पश्येत्तदाजायेत कन्यका ॥
उन्नतंमध्यमस्थाश्च तदाजायेत्नपुंसकम् ॥

॥ देव्युवाच ॥

पुंसाकपोलरोमानि खलितं केनजायते ॥
कथंस्त्रीणां नजायेत रोमाणि खलितन्तथा ॥

॥ भगवानुवाच ॥

तथावृषण गाजन्तोर्य्यस्यरेतोवहाशिरः ॥
निवद्धामस्तके तालु कपोलास्तु समाश्रिताः ॥
तैः कपोलेषु रोमाणि जायन्ते अन्तरेतसः ॥
खलितं शुक्रदोषेण नराणामुपजायते ॥
शिराशुक्रवहास्त्रीणां न शून्यस्यान्नजायते ॥
यात्मापालो चकास्त्वग्नि दृष्टिमण्डल संश्रितः(?) ॥
शोणितै सोक्तिकोष्टस्थन्निशोषयति तत्वतः ॥
निवद्धन्त्यक्षिपक्ष्माणि तेनरोमाणि च भ्रुवोः ॥
अशुक्रत्वाच्चनारीणां खलितन्नोपजायते ॥
छायाव्यपगतस्नेहारुक्षागात्रशिरोरुहा ॥
ग्रसतोस्माभजठरा मृतगर्भः प्रजायते ॥

॥ देव्युवाच ॥

सोमधातु कथंरज्ञेया अग्निधातुस्तथेश्वर ! ॥
पृथग्भाग विशेषेण कथयस्व महेश्वर ॥

॥ भगवानुवाच ॥

श्लेष्ममेदस्तथास्नायुः अस्थिदन्तनखानि च ॥
स्त्रियास्तन्यश्च शुक्रश्च यच्चश्वेतन्तथाक्षिषु ॥
एतेषां सौम्यभागत्वाच्छ्वेतत्वमुपजायंते ॥
आग्नेय भावाद्रक्तत्वं कृष्णत्वञ्चापि गच्छति ॥
त्वग्मांसरुधिरंमज्जादृष्टिरोम तथैव च ॥
आग्नेयधातुसोमश्च कथितोस्मि वरानने ॥
ब्रूहि ब्रूहि विशालाक्षि यद्यस्ति तव संशयः ॥

इति वृषसारसंग्रहे प्रश्नव्याकरणोनामश्चतुर्दशोऽध्यायः ॥

अथ पशुपतिमते शिवधर्मे वृषसारसंग्रहे जीवनिर्णयो नाम

पञ्चदशोऽध्यायः

ॐ नमः शिवाय

॥देव्युवाच ॥

जीवभूतेति यत्प्रोक्तं लक्षणं कीदृशं भवेत्
स्थानमस्य नजानामि रूपवर्णञ्च ईश्वर ॥
एतत्कौतुहलंछिन्धि संशयं परमेश्वर ॥
नचान्यदेवपश्यामि जीवनिर्णय कीर्तय ॥

॥भगवानुवाच ॥

जीवस्य लक्षणं देवि कथितुं केन शक्यते ॥
न रूपवर्णजीवस्य विद्यतेस्थानमेव च ॥
व्यापीसर्व्वगतं सूक्ष्मं सर्व्वमावृत्यतिष्ठति ॥
निरालम्वमनाधारमनौपम्यन्निरञ्जनम् ॥
अरणिस्थो यथा वन्हिः काष्ठेषु नोपलभ्यते ॥
तद्वज्जीवं नपश्येत शरीरस्थोपि सुन्दरि ॥
दधिवच्च यथा सर्पिर्दृश्यते न च दृश्यते ॥
तद्वज्जीवंशरीरस्थो दृश्यते न च दृश्यते ॥

॥देव्युवाच ॥

अदृष्ट प्रत्ययो ह्यस्ति नास्ति प्रत्यय दर्शनम् ॥
व्यापिकथं महादेव सर्व्वत्र वस्थितः कथम् ॥

॥भगवानुवाच ॥

असंशयो महादेवि व्यापी सर्व्वगतः शिवः ॥
दृश्यन्तेन्द्रियसंयोगाज्जीवप्रत्ययदर्शनम् ॥
यथाकाशस्थितो वायुः शब्दस्पर्शगुणान्वितः ॥
तद्वद्देहीविजानीयाद्गुणवेष्टेन नान्यथा ॥

॥देव्युवाच ॥

व्यापीति कथितः पूर्व्वं जीवः सर्व्वगतोपि च ॥
तं वृथा कथितो ऽस्म्यद्य म्रियते केन हेतुना ॥

॥भगवानुवाच ॥

न जीवोम्रियतेदेवि सर्व्वेषां सुरसुन्दरि ॥
घटान्तस्थो यथाकाशो वहिराकाशवद्यथा ॥
घटभिन्ने बिशालाक्षि विशेषो नोपलक्ष्यते ॥
देह भिन्ने तथा देही विनाशो नो पलभ्यते ॥
स सूक्ष्मः सर्व्वगोव्यापी परमात्मानमव्ययः ॥
वहिरन्तश्च भूतानामचरन्चरएव स ॥
अप्रमेयोऽविनाशीच अप्रपञ्चः प्रपञ्चकः ॥
सर्व्वेन्द्रियगुणाभासः सर्व्वेन्द्रिय विवर्ज्जितः ॥
एवमेष महादेवि जीवस्य वरवर्णिनि ॥
कथितोस्मि समासेन किमन्यच्छ्रोतुमिच्छसि ॥

॥देव्युवाच ॥

सारश्रेष्ठं महादेव कथयेशान ईश्वर ॥
श्रोतुमिच्छामि देवेश मानुषाणां हितंवदः ॥

॥भगवानुवाच ॥

आश्रमाणां गृहीश्रेष्ठो वर्णश्रेष्ठो द्विजातयः ॥
अश्वमेधक्रतुश्रेष्ठो जपश्रेष्ठोऽघमर्षणः ॥
देवतानां हरिश्रेष्ठो श्रेष्ठागङ्गानदीषु च ॥
अनाशनस्तपः श्रेष्ठस्तीर्थश्रेष्ठः सुरहृदः ॥
क्षौमं वस्त्रेषु च श्रेष्ठं यशः श्रेष्ठं विभूषणम् ॥
भारतं श्रुतिषु श्रेष्ठं व्रतश्रेष्ठो दयापरः ॥
दानेषुचाभयं श्रेष्ठं मनः श्रेष्ठेन्द्रियेषु च ॥
विद्या संग्रहषु श्रेष्ठो सत्यं श्रेष्ठं वचस्सु च ॥
आयुधानां धनुः श्रेष्ठं बान्धवेषु च मातरः ॥
ज्ञानमौषधिषु श्रेष्ठं वैद्योश्रेष्ठः शिवाक्षरः ॥
अकारश्चाक्षरः श्रेष्ठो धर्मश्रेष्ठो ह्यहिंसकः ॥
पशुसु सौरभिश्रेष्ठा नरेषु च नराधिपः ॥
मासीमार्गशिरोश्रेष्ठो कृतः श्रेष्ठश्चतुर्युगे ॥
वसन्तऋतुषुश्रेष्ठः श्रेष्ठश्चायनमुत्तरं ॥
अमावास्यादिन श्रेष्ठो वसुश्रेष्ठो हुताशनः ॥
ऋषिषुउषणः श्रेष्ठः कान्तिश्रेष्ठो निशाकरः ॥

नक्षत्रेष्वभिजित् श्रेष्ठो कलिः श्रेष्ठ कलेषु च ॥
वेदेषु च वरंसाम स्थावरेषु हिमालयः ॥
अश्वत्थोवरवृक्षेषु भूतेषु वरचेतनः ॥
अध्यात्मवरविद्यासु वाचः सत्य वरस्मृतः ॥
प्रह्लादो वरदैत्येषु यक्षरक्षो धनेश्वरः ॥
मरीचिवरवातेषु हरिः श्रेष्ठो मृगेषु च ॥
साध्यनारायणः श्रेष्ठ पितृणाञ्च पितामहः ॥
एतत्समासतोदेवि कथितोस्मि वरानने ॥
सर्व्वसारं समुद्धृत्य किं भूयः कथयाम्यहं ॥

इति वृषसारसंग्रहे जीवनिर्णयोनाम पञ्चदशोऽध्यायः

अथ पशुपतिमते शिवधर्मे वृषसार संग्रहे अध्यात्मनिर्णयोनाम

षोडशोऽध्यायः

ॐ नमः शिवाय

॥देव्युवाच ॥

अधुना श्रोतुमिच्छामि योगसद्भावनिर्णयः ॥
करणश्च यथान्यायं कथयस्व सुरेश्वरः ॥

॥भगवानुवाच ॥

शृणुदेवि प्रवक्ष्यामि योगसद्भावमुत्तमम् ॥
यं विदित्वा न पश्यन्ति जनाः सन्सारवन्धनम् ॥
ब्रह्महा गुरुतल्पी वा सुरापस्तेय एव च॥
अथवाशंकरेजातस्तसर्व्वमपनोदति ॥
मुहूर्त्तार्द्धमुहूर्तं वा प्राणायामपरायणः ॥
ध्येयचिन्त्तयमानस्य तत्पापं क्षीयते नरान् ॥
न यमो नान्तकः क्रुद्धोन मृत्युर्नापविग्रहः ॥
विशन्तिस्म माहात्मानो योगिनो वरवत्तरा ॥
यथावै सर्व्वधातुनां दोषान्दह्यन्ति धाम्यताम् ॥
तथापापः प्रदह्यन्ते ध्रुवं प्राणस्य निग्रहात् ॥
अश्वमेधसह्स्रञ्च राजसूयशतन्तथा ॥
प्राणायामशतन्चैव नतत्तुल्यं कदाचन ॥
यज्ञेन देवानाप्नोति राज्यं वै तपस : फलं ॥

सन्यासात् ब्रह्मणः स्थानं वैराग्यात् प्रकृतालयं ॥
ज्ञानात् प्राप्नोति कैवल्यं परं ब्रह्मसनातनं ॥
इत्येतागतयः पञ्च विधिवत्परिकीर्तिताः ॥
मुहूर्त्तार्द्धमुहूर्त्तं वा योगं युञ्जीत योगवित् ॥
निस्तरेत् सर्व्वपापानि अमृतत्वञ्च गच्छति ॥
युञ्जानोपि प्रयत्नेन यावत्तत्वं न विन्दति ॥
ब्रह्मलोके ध्रुवंवासो विष्णुलोके च सुन्दरि ॥
भुक्त्वा कर्म सहस्राणि सर्व्वकामसमन्वितः ॥
क्षीणपुण्यस्ततो मर्त्यां जायतेविपुलेकुले ॥
योगमेवाभिसेवेत पूर्व्वजातिस्मरो नरः ॥
संसारार्णवमुत्तीर्य स शिवत्वमवाप्नुयात् ॥

॥देव्युवाच ॥

योगस्य विधिमिच्छामि श्रोतुं मे पुरुषोत्तमः ॥
ध्यानधारणसिद्धानां कथयस्व सुरेश्वरः ॥

॥भगवानुवाच ॥

श्रृणु योगविधिं वक्ष्ये भवपाशनिकृन्तनं ॥
शुचिरेकाग्रचित्तस्तु ध्यान शब्द विवर्ज्जितम् ॥
तत्रासीनासने योगी परमात्मानं चिन्तयेत् ॥
पद्मकं स्वस्तिकञ्चैवं निष्कलमकञ्जलिन्तथा ॥
अर्द्धचन्द्रञ्चदण्डञ्च पर्य्यङ्कम्भद्रमेव च ॥
एतदासनवन्धेन वद्धायोगसमभ्यसेत् ॥
समं कायशिरोग्रीवं धारयन्नचलस्थितः ॥
प्रत्यहारस्तथा ध्यानं प्राणायामञ्च धारणा ॥
तर्क्कश्चैवसमाधिश्च षडङ्गोयोगउच्यते ॥
विषयाशक्तचित्तानामिन्द्रियाणां प्रतिष्ठति ॥
मनमाकर्षयेद्यस्तु प्रत्यहारस्तदुच्यते ॥
शब्दादिविषयान्देवि वर्त्तुलीकृत्यधारयेत् ॥
वीतरागसमाधिस्थो ध्येयवस्तुनियोजयेत् ॥
आत्मध्याता मनोध्यान ध्येयः शुद्धः परशिवः ॥
यत्परं परमैश्वर्य्यमेकन्तत्र प्रयोजनम् ॥
पूरकः कुम्भकश्चैव रेचकस्तदनन्तरं ॥
प्रशान्तश्चेतिविख्यातः प्राणायामश्चतुर्विधाः ॥

पुरकः स्थापयेत् वन्हि पादाङ्गुष्ठेनवुद्धिमान् ॥
कुम्भकेन निरुध्येत दैह्यमानविचिन्तयेत् ॥
भस्मीभूतन्तथात्मानं रेचकेन विचिन्तयेत् ॥
शुद्धदेहस्ततश्चात्मा शुद्धस्फटिकनिर्म्मलः ॥
तालाशब्दस्तु निर्वाणं दशद्वेच प्रकीर्तितः ॥
प्राणायामान्नसन्देहो द्विगुणाधारणास्मृताः ॥
योगेतु त्रिगुणाप्रोक्ताः संक्रमेण चतुर्गुणाः ॥
तथाक्रतौ पञ्चगुणा योगसिद्धिस्तु षड्गुणाः ॥
षडङ्गेनसमायुक्तो योगमुक्तस्तु नित्यशः ॥
मानसोयोगपद्यञ्च द्विरूपोयोग उच्यते ॥
अकृत्वाप्राणसंरोधं मनसैकेन केवलम् ॥
ध्यायेत परमंसूक्ष्मं स योगोमानसःस्मृतम् ॥
संयम्यमनसाप्राणं प्राणायामात्मनस्तथा ॥
एवं ध्यायेत्परं सूक्ष्मं यौगपद्यः सउच्यते ॥
सिद्धिर्लक्षणयोगस्य श्रृणुवक्ष्यामि सुन्दरि ॥
शंखभेरीमृदङ्गश्च वेणुदुन्दुभिरेव च ॥
ताडितन्नच विन्देत यदातन्मयतांगतः ॥
शीतोष्णं सुखदुःखञ्च तृड्वुभुक्षान्तथैव च ॥
वेदनान्नैव जानाति योगयुक्तस्तु सुन्दरि
एष योगविधिर्देवि तवपृष्टेन सुन्दरि ॥
कथितोस्मि समासेन किमन्यत्कथयाम्यहम् ॥

॥देव्युवाच ॥

विनायोगेन देवेश संसारतारणं मम ॥
कथयश्व महादेव निर्विकल्पकरं मनः ॥

॥भगवानुवाच ॥

सदाशिवस्तु निश्वास अर्द्धश्वासः परः शिवः ॥
तयोर्मध्येतु विज्ञेयः परमात्माशिवोऽव्ययः ॥
ध्यानयोगंनृतस्यास्ति करणञ्च न विद्यते ॥
ज्ञानमात्रेण मुच्यन्ते किमन्यत्परिपृच्छसि ॥
ज्ञानमन्यत् प्रवक्ष्यामि श्रृणुदेवि निवोध मे ॥
शास्त्रपञ्चसु यत्प्रोक्तं श्रृणुसंक्षेपनिर्णयम् ॥
सांख्ययोगे पञ्चरात्रे शैववेदे च निर्म्मितम् ॥

यत्सांख्यसिद्धं कथयाम्यहन्ते संसारघोरार्णवयोगसारं ॥
योगेषुसारेष्वथपञ्चरात्रे वेदेषु शैवेषु च निश्चयन्ते ॥
घ्राणेन्द्रियाद्येषु च यत्समस्तं नभश्चलीनंभवतीवयस्य
बुद्ध्यानियम्यशकलांहिभावान् स लब्धलक्ष्यशिवमभ्युपैति ॥
श्रोत्रादिसर्व्वेन्द्रियनिश्चलत्वमेकाग्रचितं मनसानियम्य ॥
स्वदेह शून्य सभवेच्चिरेण स योगसिद्धिं प्रवदन्ति तज्ज्ञाः ॥
आदावेवमनः शनैरुपरमेत्कृत्वा च वश्येन्द्रियं ॥
यावत्तत्तपतां व्रजेत मनसा निः संज्ञदेहस्तथा ॥
एतद्ध्यानसमाधियोगशकलं प्राप्नोति निस्संशयं ॥
चित्सच्छास्त्रसहस्रकोटिमथितं सारन्तयेरिष्यति ॥
आत्मारामः जितः समाधिनिरतो वैरागशैय्याश्रितः ॥
चित्तं यस्य परिक्षयो यदिभवेत्तिष्ठेत्तनुत्वं यथा ॥
तज्ज्ञेयं गतिमुत्तमं शिवपदं संसारदुखच्छिदम् ॥
वेदान्तेषु च निष्ट एषकथितः किं शास्त्रमन्यद्विशेत् ॥
हृत्पद्मकर्णिकायामुपरिरविरतद्योतयन्तोऽन्तरालं
यस्तेजस्तेजमार्गो वहुलतमघनैर्द्योतनाद्दीप्त दीपं ॥
भित्वायत्तालुदेशे मुखमुपरिगतं तालुदेशेनमूर्ध्नि ॥
मूर्द्ध्न्याद्द्वारान्तरेण शिवपरमपदं यान्ति योगेनयुक्ताः ॥
कृत्स्नं कृष्णतमोतमोतिमहतो यस्तेजतेजात्मकः ॥
लोकालोक धराधरः श्रियपतिः प्राणप्रतिष्ठालयः ॥
कर्त्ताकारणमव्ययोऽव्ययमसौ व्यापीविभक्ताविदं ॥
विष्णुर्भावमयैर्विभक्तविषयैर्विश्वेश्वरो विश्ववित् ॥
एषतत्ववरः परः परमयस्तेजः परः स्थानदः ॥
वुध्याभावनभावयन्नियमनो देहान्तरोस्तोकयन् ॥
हृत्पद्मायतनस्थितः सपुरुषोनिश्वासमुच्छ्वासदां ॥
नादन्तस्य सदा सदानपतितन्नादोपरिष्टद्वरः ॥
यस्तेजस्तेजसो वा वहुनिविदुघनः ग्रथिमानोपगूढः ॥
मूर्तिर्मूर्त्यानुसारी वहुकरणभृतं कारणं देहवन्धः ॥
भित्वा ग्रन्थिन्सपाशं विषमिवविषयं त्यक्तसंगैकभावाः
पश्यन्त्येतेनमीशं गुणकलरहितं निर्विकारं प्रकाशम् ॥
योसौ तेजान्तरात्मा कमलपुटकुटिसंकटस्थानलीनः ॥
इन्दोर्भासानुरूपि विमलदलसदाच्छादितः कर्णिकायाम् ॥
तत्र स्थानेस्थितोसौ त्रिभुवननिलयः सर्व्वभूताधिवासः ॥
आकाशादूर्ध्वतत्वसितविकसकलासंहतो मुक्तिवन्धः ॥

एतानितत्वान्यखिलानि देवि संक्षेपतः कीर्तितः पञ्चभेदः ॥
श्रोत्तकिमन्यद्द्विजिगीषितार्थं संसारमोक्षेण च तत्परोस्ति ॥

॥देव्युवाच ॥

तुष्टोस्मिदेव ममसंशयमद्यनष्टंद्यप्रसन्नपरमेश्वरईश्वरम त्वं ॥
अद्यश्रुतं त्वयिच पुण्यफलप्रभावं पूर्णानिचाद्यमम इष्टमनोरथानि ॥
अज्ञानपङ्कघनमध्यनिलीयमानं उत्तारयेशसकलार्त्तिविनाशनाय ॥
सर्व्वेशतत्वपरमार्थनमोनमस्ते अद्यापितृप्तिरिहनास्ति ममापिशम्भो ॥
पीत्वामृतञ्चोत्तमवक्त्रजातं आख्याहि दानं फलधर्म्मसारं ॥
कृपांमयीशानकुरुप्रसीदसंसारपारंपरमं नयस्व ॥

इति वृषसार संग्रहे अध्यात्मनिर्णयोनाम षोडशोऽध्यायः ॥१६॥

अथ पशुपतिमते शिवधर्मे वृषसारसंग्रहे पूर्वकर्म्मविपाकचिन्हाऽष्टादशोऽध्यायः ।

ॐ नमः शिवाय

॥देव्युवाच ॥

पृथग्दानस्य इच्छामि माहात्यं वक्तुमर्हसि ॥
अन्नवस्त्रहिरण्यानां गोभूमिकनकस्य च ।

॥भगवानुवाच ॥

सुसंस्कृतमन्नमितिप्रदद्यात् घृतप्रभूतमवदंशयुक्तं ॥
घृतप्रपक्वं सुकृतम्मपूपंसितेन खण्डेन गुडेनयुक्तं ॥
मार्गखगश्चोदकजङ्गमश्च दद्याद्वटनागरवंशमूलम् ॥
शाकंफलञ्चाम्लमधूरतिक्तं पानंपयः शीतसुगन्धतोयं ॥
दधिप्रदद्याद्गुडमिश्रितञ्च मृणालशालूकवनालका च ॥
सदक्षिणा लेपपवित्रपुष्पं श्रद्धान्वितः सक्ततया प्रणम्य ॥
प्रयातिलोकंजगदीश्वरस्य विमानयानैः सहितोऽप्सरोभिः ॥
एकैकसिष्टस्य सहस्रवर्षमन्नप्रदो मोदतिदेवलोके ॥
च्युतश्च मर्त्ये स भवेद्धनाढ्यःकुलोद्गतः सर्व्व गुणोपपन्नः ॥
यशः श्रियंसर्व्व कलज्ञताच भवेत्सभोगी सकलत्रपुत्रः ॥
दद्याद्दरिद्रःकृपणार्त्तदीनो वालागदत्वातुरमागतानां ॥
तृष्णावुभुक्षागतिकागतानान्दत्वा संधर्मस्यफलंकनिष्ट ॥
वाणिज्य धर्म्मादिफलाश्रितानान्धर्मो हि तस्य नच निर्म्मलोऽस्ति ॥
तोयञ्च्दद्याल्लघुपूर्णकुम्भं शीतं सुगन्धं परिवासितञ्च ॥
स यातिलोकं सलिलेश्वरस्य नतस्यजन्मानितृषाभिभूतः ॥
उपानहं यो ददतिद्विजाय सुशोभनं तैलसुदी सुरपितञ्च ॥
तेयान्ति लोकममराधिपस्य यमालयंकष्टपथानयान्ति ॥
प्रक्षीणपुण्यापुनरत्रलोके जातोभवेद्दिव्यकुलोपपन्नः ॥
धनैः समृद्धोधिपतित्वताश्च रथाश्च नागाप्रभवन्ति तस्य ॥
वस्त्रप्रदानेन भवन्ति देवि रूपोत्तमसर्व्वकलज्ञताञ्च ॥
समृद्धिसौभाग्यगुणान्विताश्च स्वर्गच्युतास्ते पुरुषाभवन्ति ॥
वस्त्रप्रदानाभिरतस्य पुंसः अन्यत्प्रवक्षामि ततः प्रशस्तां ॥
वस्त्रं तु लोकेष्वति पूजनीयं वस्त्रं नराणांत्वतिमाननीयं ॥
वस्त्रं तु भूयो न च मानलाभः पराभवश्चाति जुगुप्सनश्च ॥

तस्माद्धि वस्त्रं सततंप्रदेयं यशः श्रियः स्वर्गसमन्त लाभं ॥
यावन्तिसूत्राणिभवन्तिवस्त्रे तावद्युगं गच्छतिसोमलोकं ॥
पुण्य क्षयाज्जायति मृत्युलोके वस्त्रप्रभूते धनधान्यकीर्णो ॥
सुरूपसौभाग्ययशश्विनश्च विद्याधरोलोकप्रभुत्वताश्च ॥
द्विजेभ्यछत्रंसुकृतं प्रदद्यात् वर्षातपत्रं दृढशोभनञ्च ॥
अङ्गारवर्षत्रषु खड्गमाद्यं असंशयन्त्रायति याम्यमार्गे ॥
स्वर्गञ्चयान्ति ग्रहनायकश्च स वर्षकोट्यायुतमन्तकाले ॥
जायन्ति ते मानुषमर्त्यलोके गृहोत्तमेभोगपतिर्भवन्ति ॥
कृत्वामठंशोभनविप्रदाता द्रव्येण शुद्धेन तु पूरयित्वा ॥
सयाति देवेन्द्रसदंयथेष्टं सवर्षकोटिशतदिव्यसंख्यैः ॥
तदन्तकाले यदि मानुषत्वं जायन्तिते सप्तमही प्रभोक्ता ॥
स राप्तरथ्यत्रयसंप्रयुक्ता वलाधिको यज्ञसहस्रकर्ता ॥
भूमिप्रदाताद्विजहीनदीनं संमृद्धसस्योजलसन्निकृष्ट ॥
स याति लोकममराधि पस्य विमान यानेन मनोहरेण ॥
मन्वन्तरं यावदभुक्तभोगान्तदन्तकाले च्युतमर्त्यलोके ॥
स जबमुखण्डाधिपतिर्भवेत वीर्यान्वितो राजसहस्रनाथः ॥
सचैलघण्टांकनकाग्रश्रृङ्गां दोग्ध्रींसवत्सांपयसांद्विजानाम् ॥
दत्वाद्विजेभ्यः समलङ्कृतानाम् प्रयान्तिलोकंसुरभीसुतानाम् ॥
यावन्तिरोमाणि भवन्तिगावः तावद्युगानामनुभूयभोगान् ॥
तस्माच्च्युतामर्त्यमहीभुजास्ते सहस्रराजानुगतोमहात्मा ॥
सुवर्णकांस्यायसरौप्यदाता ताम्रप्रवालामणिमौक्तिकाद्यान् ॥
दत्वाद्विजेभ्यो वसुसाध्यलोके प्राप्नोतिवर्षन्दशपञ्चकोट्यो ॥
भुक्त्वायथेष्टंक्रमदेवलोकान्च्युतञ्चमर्त्ये स भवेन्नरेन्द्रः ॥
सुदुर्ज्जयः शक्रसहस्रजेता सुदीर्घमायुश्च पराक्रमश्चः ॥
यत्प्रेक्षणन्दर्शयितुम्प्रदाता सुरूपसौभाग्य फलं लभेत ॥
तृणाशनामूलफलाशनेन लभेतराज्यानि कण्टकानि ॥
लभेतपर्णाशनस्वर्ग्गवासं पयः प्रयोगेन च देवलोके ॥
शुश्रूषणो यो गुरवे च नित्यं विद्याधरो जायति मर्त्त्यलोके ॥
दद्याद्गवांधासतृणस्यमुष्टिः गवाढ्यतांजायतिमर्त्यलोके ॥
श्राद्धञ्चदत्वाप्रयतोद्विजाय समृद्धसन्तानभवेद्युगान्ते ॥
अहिंसको जायति दीर्घमायुः कुलोत्तमंजायति दीक्षितेन ॥
कालत्रयंस्नानकृतेन राज्यं पीत्वा च वायुस्त्रिदशाधिपत्वम् ॥
अनश्नतायाः फलमीशलोके तृप्तिर्भवेत्तोयप्रदानशीलः ॥
अन्नप्रदाता पुरुषः समृद्धस्स सर्व्वकामालभतीहलोके ॥

श्रद्धामतिर्यः प्रविशेद्धुतासनं स यातिलोकं प्रपितामहस्य ॥
सत्यंवदेद्योपि च धर्म्मशीलो मोदत्यसौदेवि सहाप्सरोभिः ॥
रसास्तुषड्यो परिवर्ज्जयन्ति अतीवसौभाग्यलभेत साध्वी ॥
दानेनभोगानतुलंलभेत चिरायुतांयाति हि ब्रह्मचर्यात् ।
धनाढ्यतां यान्ति हि पुण्यकर्मान् मौनेन आज्ञा लभते अलङ्घ्यां ॥
प्राप्नोति कामं तपसः सुतप्तं कीर्त्तिर्यशः स्वर्गमनन्तभोगं ॥
आयुः श्रियारोग्यधनप्रभुत्वं ज्ञानादिलाभं तपसा लभेत ॥
त्रैलोक्याधिपतित्वशक्रमगमत् कृत्वातपोदुष्करं ॥
यक्षेशोपि तपः प्रभावगुरुणा गुह्याधिपत्वं महत् ॥

रक्षेशोपिविभीषणस्त्वमरतां प्राप्तास्तपस्यैव तु ॥
रुद्राराधनतत्परास्तपफलात् नन्दीगणत्वंगतः ॥
ज्ञानं द्विजान्तपसो आह विष्णुः क्षत्रन्तपोरक्षणमाहसूर्य्यः ॥
वैश्यन्तपश्चाञ्जनमाहवायुः शूद्रं हि शिल्पंतपआह इन्द्रः ॥
रणोत्सहंक्षत्रिययज्ञमिष्टं वैश्यं हविर्य्यज्ञमुदाहरन्ति ॥
शूद्रस्य यज्ञः परिचर्यमिष्टं यज्ञंद्विजानाञ्जपमुक्तमोक्षः ॥

॥ देव्युवाच ॥

स्वमांसरुधिरन्दानं दानंपुत्रकलत्रयोः ॥
किं प्रशस्यंमहादेव तत्त्वंवक्तुमिहार्हसि ॥
.... (?)
महोशतंहिगर्भे गर्भाशनोच्छिष्टभुजोभवन्ति भुङ्क्त्वामहद्दुःख ॥
दैत्यस्तु यः कुर्व्वतिपापसत्वन्तेपापदोषान्नरकं व्रजन्ति ॥
मन्वन्तरादीन्यनुभूयदुःखं पुनश्च तिर्य्यक्शतशोनुभूयात् ॥
मानुष्यजन्मेषु च दुःखभागी स्तेनेयमायाति पुनश्च मूढः ॥
सुर्वर्णचौरकुनखत्व चिन्हं विशीर्णगात्रो रजतापहारी
ताम्रापहारिस्फटिताग्रपाणी लौहापहारी भुजच्छेदचिन्हम् ॥
कांसापहारी करभग्न चिन्हं हृत्वा चरीति त्रपुसीसकानाम् ॥
नासौष्ठकर्णश्रवणस्यच्छेदः चिन्हं नृणांवस्त्रहरं कुचेलः ॥
धान्यापहारी भवत्येङ्गहीनः दीपोपहारी भवत्यन्ध चिन्हम् ॥
निर्व्वापहा काण भवेतचिन्हम् यः स्त्रीहरेत्सोपिजितः स्त्रियास्यात् ॥
र्सस्यापहारि भवतेन्नहीनः हृत्वायुधयन्त्रहतत्व चिन्हम् ॥
अन्नापहारी परदत्तभोक्ता हृत्वा तु गावः स भवेत् दरिद्रः ॥
हरिहरेत्तध्दरिणा दहन्ति हृत्वा तु मेषानजगर्दभश्च ॥
स भारभृज्जीवमुदाहरन्ति रत्नापहारी अनपत्यता च ॥
छत्रापहारी अपवित्रता च हृत्वा च वीजं सभवेदवीजः ॥
गोधूमशालियवमुद्गमाषान्हृत्वा मसूरं विलयं व्रजन्ति ॥
कामातुरो मातरमातृपुत्री मातृश्वसाङ्गच्छतिमातुलानीं ॥
राजाङ्गनां पुत्रसुतां स्नुषाञ्च प्रव्राजिनीं ब्राह्मणीमन्त्यजाञ्च ॥
अजाश्वमेषसुरभीसुताश्च यत्कामयेत्तेषु विमूढचेतः ॥
स याति कृच्छ्रं नरकं सुघोरं स वर्षकोटीशतशोभ्रमित्वा
तीर्यञ्च भूयः शतशोव्यतीत्य क्रष्टेन वै जायति मानुषत्वं ॥
हीनाङ्गतादीनशरीरताश्च यो मातृगामी स भवेदलिङ्गः ॥
मातृस्वसातल्पगवा नलिङ्गा लिङ्गेपरोधः सुतपुत्रिकामः ॥

स्नुषाञ्च यः सेवति रक्तमेही दौः चर्म्मताश्च द्विजसुन्दरीषु ॥
राजाङ्गनायासु च लिङ्गछेदः प्रव्राजिनीकामुक मूत्रकृच्छ्रम् ॥
सव्याधिलिङ्गलभतेन्त्यजासु विलीनलिङ्गः पशुयोनिगामी ॥
जायन्ति ते मूषिक धान्यचौरी क्षीरं हरेद्वायसतां प्रयाति ॥
हंसापहारी स भवेन्निहंसः श्वानत्वमायाति रसापहारी ॥
हृत्वा च सूचीन्तु भवेत्स दंशः हृत्वा तु सर्पिर्वृषतां प्रयाति ॥
मांसन्तु हृत्वा स भवेत गृध्रः तैलापहारी खगतां प्रयाति ॥
गुडञ्च हृत्वा गुडिका भवन्ति शाकापहारी स भवेन्मयूरम् ॥
हृत्वा पशुं पङ्गुरजायतेहः चित्रत्वमायाति सुवस्त्रहारी ॥
हृत्वा दुकूलं स च सारसत्वं क्षौमञ्च हृत्वा स च दुर्व्वलत्वम् ॥
ऊर्णानि वस्त्राण्यपहृत्य मेषः छुछुन्दरी जायति गन्धहारी
ब्रह्मस्वमल्पमपहृत्य भोक्ता स गृध्र उच्छिष्टभुजो भवन्ति ॥
पादेन यः स्पर्शयते द्विजाङ्घ्रिं तच्छीतरक्तं चरणौ भवेत ॥
पादेन यः स्पर्शयते च गावः स पादरोगान् विविधाँल्लभेत ॥
यो मातरं ताडयते पदेन पादे तदीये कृमयः पतन्ति ॥
पादात्पृशेद्यः पितरं दुरात्मा सूनोन्नपादः सभवेत्परत्रः ॥
पदात्पृशेत्तोयमनादरेणसश्लीपदीपाद युगे भवेत ॥
पादेन य स्पर्शयते हुताशं सचाग्निपादः सततम्भवेत ॥
पादेन यश्चार्यमुपस्पृशेत स पादछेदं वहुशो लभेत ॥
ग्रन्थापहारी स भवेत मूकः दुर्गन्धवक्त्रः परछिद्रवादी ॥
पैशून्यवादी स च पूतिनासामनस्रवक्त्रस्त्वनृतापवादी ॥
पारुष्यवक्ता मुखपाकरोगी असत् प्रलापी स च दन्तरोगः ॥
स्तीक्ष्णप्रदायी स च वक्रनास सम्भिन्नवक्ता स च कण्ठरोगी ॥
क्रुद्धेक्षणः पश्यति यस्तु विप्रं तीव्राक्षिरोगी स तु जायते हि ॥
प्रद्वेषयाऽलोकयतेऽतिथीन्य उत्पादिताक्षिस्सभवेत्परत्र
वैरूप्यचक्षुस्त्वति सूक्ष्मचक्षुः सजायते केकरपिङ्गचक्षुः ॥
गर्त्ताक्षिकादीनि विपाण्डुराणि नेत्रामयान्येव च पापदोषात् ॥
शृण्वन्ति ये पापकथां प्रशस्तां तां कर्णसर्प्पिः परिपीडियेत ॥
शृण्वन्तिनिन्दां हरिशर्व्वयोर्य्यः स कर्णशूलेन तु जीवतीं वा
मातापितृणां शृणुतेऽपवादं स कर्णसाफेन विनाशमेति ॥
शृणोति निन्दां गुरुविप्रजा यः स कर्णपूयंस्रवतेसरक्तं ॥
विरूप्यदारिध्रकुलाधमेषु अनिष्ट कर्म्मभृतिजीवनाश्च ॥
अकीर्त्तनं दर्शन वर्ज्जनञ्च श्वापाकतो श्वादिषु जायते सः ॥
एतानि चिन्हं निरयागतानां मानुष्यलोके कुकृतस्यदृष्टं ॥

समासतः कीर्तित एव देवि यथैवमुक्तस्त्विहकर्म्म भङ्गः ।
मातापित्रोघतोया सुतदुहितृवहा भ्रातृगम्भीरवेगा ॥
भार्याऽवर्त्ता विवर्त्ता कुटिलगतिवधुर्वान्धवोर्म्मीतरङ्गा ॥
कामक्रोधोभकूला करिमकरझषा ग्राहकामाभयन्ते ॥
मृत्योराख्यार्णवेऽस्मिन्नशरण विवशाकालदृष्टोप्रयाति ॥
नित्यं येनविना न यातिदिवसम्पञ्चत्वमापद्यते ॥
त्यक्त्वा देह वनान्तरेषु विषमे श्वानश्रृगालाकुले ॥
बन्धुः सर्व्वनिर्वतते गतदया धर्म्मैक तत्रस्थितः ॥
तस्माद्धर्मपरोनचान्यः सुहृदः सेवेत्परत्रार्थिनः ॥

इति वृषसार संग्रहे पूर्व्वकर्म्मविपाके चिन्हाऽष्टादशोऽध्यायः ॥१८॥

अथ पशुपतिमते शिवधर्म्मशास्त्रे वृषसारसंग्रहे
दानयज्ञविशेषोनामैकोनविंशोऽध्यायः ॥

ॐ नमः शिवाय ॥

॥ विगतराग उवाच ॥

क्रियासूक्ष्मो महाधर्म्मः कर्म्मणा केन प्राप्यते ॥
अल्पोपायं नरार्थाय पृच्छामि कथयस्व मे ॥

॥अनर्थयज्ञ उवाच ॥

अल्पोपायं महाधर्म्मं कथयामि द्विजोत्तम ! ॥
सुखेनलभते स्वर्गं कर्म्मणा येन तच्छृणु ॥
लोकानां मातरो गावो गोभिः सर्व्वंजगद्धृतम् ॥
गोमयममृतं सर्व्वं जातं सर्व्वशिवेच्छया ॥
सर्व्वदेवमयी गावः सर्व्वदेवमयो द्विजः ॥
सर्व्वदेवमयो भूमिः सर्व्वदेवमयः शिवः ॥
तस्माद्गावः सदासेव्या धर्म्ममोक्षार्थसिद्धिदा ॥
परिचर्य्यायथाशक्त्या ग्रासवासजलादिभिः ॥
ताडयेन्नातिवेगेन वाचयेन्मृदुनाचरेत् ॥
पालयन्तर्प्पनाद्येषुभग्नोद्विग्नेषु यत्नतः ॥
व्याधिवनपरिक्लेशओषधोपक्रमश्चरेत् ॥
कण्डूयनञ्चकर्त्तव्यं यथासौख्यं भवेद्गवां ॥
गवां प्रदक्षिणं कृत्वा श्रद्धाभक्तिसमन्वितः ॥

सागरान्तामहीसर्व्वान प्रदक्षिणी कृताभवेत् ॥
पृष्टसंस्पर्शनाद्यञ्च श्रद्धयायदिमानवः ॥
अहोरात्रकृतं पापं नश्यते नात्रसंशयः ॥
लाङ्गूलेनोद्धृतंतोयं मूर्द्ध्ना गृह्णाति योनरः ॥
यावज्जीवकृतं पापं नश्यते नात्रसंशयः ॥
विधिवत्स्नापयेद्गाँश्च मन्त्रयुक्तेन वारिणा ॥
तेनाम्भसा स्वयंस्नात्वा सर्व्वपापक्षयोभवेत् ॥
व्याधिविघ्नमलक्ष्मीत्वन्नश्यते सद्य एव च ॥
मृतापत्याश्चगावश्चस्नानमेवप्रशस्यते ॥
गवां शृंगोदकं गृह्य मूर्द्धिन यो धारयेन्नरः ॥
स सर्व्वतीर्थस्नानस्यफलं प्राप्नोति मानवः ॥
ग्रासमुष्टिप्रदानेन गोषु भक्तिसमन्वितः ॥
अग्निहोत्रंहुतन्तेन सर्व्वदेवाः सुतर्प्पिताः ॥
चत्वारः स्तनधारास्तु यस्तुमूर्द्ध्ना प्रतीच्छति ॥
स चतुःसागरङ्गत्वास्नानपुण्यफलं लभेत् ॥
गवार्थयस्त्यजेत्प्राणान् गोग्रहेषु द्विजोत्तम ॥
कल्पकोटिशतं दिव्यं शिवलोके महीयते ॥
च्युतभग्नादिसंस्कारं सर्व्वं यः कुरुते नरः ॥
भार्य्याकोटिशतन्दानं यत्फलं परिकीर्तितं ॥
तत्फलंलभतेमर्त्यः शिवलोकञ्च गच्छति ॥
शिवलोकपरिभ्रष्टः पृथिव्यामेकराड्भवेत् ॥
समासतः समाख्यातं यथातत्वं द्विजोत्तम ॥
नशक्यंविस्तराद्वक्तुं गोमहात्म्यसमुत्तमं ॥

॥विगतराग उवाच ॥

देवाःरष्टविधाः प्रोक्ताः तिर्य्यक्पञ्चविधःस्मृतः ॥
मानुष्यमेकमेवाहुश्चातुर्व्वर्ण्यः कथंभवेत् ॥

॥अनर्थयज्ञ उवाच ॥

पूर्व्वकल्पसृजत्येष विष्णुना प्रभविष्णुना ॥
एवं वर्णाद्द्विजश्चासीत्सर्व्वकल्पाग्रमग्रतः ॥
सर्व्ववेदविदो विप्राः सर्व्ववेदविदस्तथा ॥
तथाविप्रसहस्राणां यज्ञोत्साहमनोभवेत् ॥
वृद्ध विप्रसहस्राणां मतमाश्रित्यब्राह्मणैः ॥

कर्त्तुङ्कर्म्मसमारब्धकर्म्मश्चापि विभज्यते ॥
ऋत्विजत्वेस्थिंताः केचित्केचित्संरक्षणे स्थिताः ॥
अर्थोपार्ज्जनयुक्तान्ये अन्येशिल्पेनियोजिताः ॥
एवं यज्ञविधानेन कर्त्तुमारेभिरे पुरा ॥
यथोद्दिष्टेन कर्म्मेण यज्ञोत्साहमवर्त्तत ॥
आगता ऋषयः सर्व्वे देवताः पितरस्तथा ॥
अन्योन्यमब्रुवन्तत्र देवर्षिपितृदेवताः ॥
यज्ञार्थम सृजद्वर्ण्णं विधिना पातुहेतवः ॥
एवमेव प्रर्वत्तन्तु भवतिर्द्विजसत्तमाः ॥
इज्याध्ययनसम्पन्ना ब्राह्मणा यत्रकल्पिताः ॥
सुविप्राविप्रतां यान्तु षड्कर्म्मानिरताः सदा ॥
रक्षणार्थन्तुये विप्राः कल्पिताः शस्त्रपाणयः ॥
कृतत्राणाय विप्राणां नित्यं क्षात्रव्रतोद्भवाः ॥
अर्थोपार्ज्जनमुद्दिश्य कल्पिता ये द्विजातयः ॥
ते तुवैश्यत्वमायान्तु वार्त्तो आपणतोद्भवाः ॥
वधवन्धनकर्म्मेषु शिल्पस्थानवधेषु च ॥
कल्पिता ये द्विजातीनां सर्व्वेशूद्राभवन्तु ते ॥
प्राजापत्यं ब्राह्मणानामीज्याध्ययनतत्परां ॥
स्थानमैन्द्रं क्षत्रियाणां प्रजापालनतत्परं ॥
वैश्यानांवासवस्थानं वाणिज्यं कृषिजीविनां ॥
शूद्राणां मरुतः स्थानं शुश्रूषानिरतात्मनां ॥
महर्षिपितृदेवानां मतमाज्ञायनिश्चितः ॥
एष सङ्कल्पितोब्रह्मा पद्मयोनिः पितामहः ॥
सङ्कल्पप्रभवाः सर्व्वे देवदानवमानवाः ॥
पशुपक्षिमृगामुख्या यावन्ति जगसम्भवाः ॥
भूत सङ्कल्पकर्त्ता य कल्पमासीद् द्विजोत्तम ॥
कीर्तितानि समासेन किमन्यच्छ्रोतुमिच्छसि ॥

॥विगतराग उवाच ॥

किन्तपः सर्व्ववर्णानां वृत्तिर्व्वापि तपोधन ! ॥
यज्ञाश्चैव पृथक्त्वेन श्रोतुमिच्छामि तत्वतः ॥

॥अनर्थयज्ञ उवाच ॥

ब्राह्मणस्य तपो यज्ञाः तपः क्षात्रस्य रक्षणम् ॥
वैश्यश्च तप वाणिज्य तपः शूद्रस्य सेवनम् ॥
प्रतिग्रहधनोविप्रः क्षत्रियस्य धनुर्धनम् ॥
कृषिर्धन्तथा वैश्यः शूद्रः शुश्रूषणन्धनम् ॥
आरम्भयज्ञः क्षत्रस्य हविर्य्यज्ञो विशस्तथा ॥
शूद्रः परिचरो यज्ञोजपयज्ञोद्विजातयः ॥
सत्यतीर्थद्विजातीनां रणतीर्थन्तु क्षत्रियाः ॥
आर्य्यातीर्थन्तुवैशानां शूद्रतीर्थन्तुवै द्विजाः ॥
नास्तिविद्यासमोमित्रो नास्तिदानसमः सखा ॥
नास्तिज्ञानसमोवन्धुर्न्नास्ति यज्ञो जपः समः ॥
धर्म्महीनोमृतस्तुल्यो देवतुल्यो जितेन्द्रियः ॥
यज्ञतुल्योऽभयं दाता शिवतुल्यो मनोन्मनः ॥

॥विगतराग उवाच ॥

दानयज्ञस्तपस्तीर्थं संन्यासं योग एव च ॥
एतेषु कतमः श्रेष्ठः श्रोतुमिच्छामि कीर्त्तय ॥

॥अनर्थयज्ञ उवाच ॥

दानधर्म्मसहस्रेभ्यो यज्ञयाजी विशिष्यते ॥
यज्ञयाजीसहस्रेभ्यस्तीर्थयात्री विशिष्यते ॥
तीर्थयात्रिसहस्रेभ्यस्तपनिष्ठो विशिष्यते ॥
तपनिष्ठसहस्रेभ्यः श्रेष्ठः सन्यासिकः स्मृतः ॥
सन्न्यासीनां सहस्रेभ्यः श्रेष्ठो यच्च जितेन्द्रियः ॥
जितेन्द्रियसहस्रेभ्यो योगयुक्तो विशिष्यते ॥
योगयुक्तसहस्रेभ्यः श्रेष्ठोलीनमनः स्मृतः ॥
तस्मात्सर्वप्रयत्नेन आदौ मन विशोधयेत् ॥
निगृहीतेन्द्रियग्रामः स्वर्गमोक्षौतु साधनम् ॥
विशिष्ठेत्विन्द्रियग्रामे तिर्य्यन्नरकसाधनम् ॥

॥विगतराग उवाच ॥

चराचराणाम्भूतानाङ्कतमः श्रेष्ठ उच्यते ॥
कथयस्वममाद्यत्वं छेत्तुमर्हसि संशयं ॥

॥अनर्थयज्ञ उवाच ॥

चराचराणाम्भूतानां तत्रश्रेष्ठोचराः स्मृताः ॥
चराणाञ्चैव सर्व्वेषां वुद्धिमान्श्रेष्ठ उच्यते ॥
वुद्धिमान्षुच सर्व्वेषु ततः श्रेष्ठनराः स्मृताः ॥
नराणाञ्चैव सर्व्वेषां ब्राह्मणः श्रेष्ठ उच्यते ॥
विद्वत्स्वपि च सर्व्वेषु कृतवुद्धिर्विशिष्यते ॥
कृतवुद्धिषु सर्व्वेषु श्रेष्ठः कर्त्ता स उच्यते ॥
कर्त्तृष्वपिच सर्व्वेषु ब्रह्मवेदी विशिष्यते ॥
ब्रह्मवेदिपरं विप्रः नान्यंवेद्मिपरन्तपः ॥
स विप्रः स तपश्वी च स योगी स शिवः स्मृतः ॥

इति वृषसारसंग्रहे दान यज्ञविशेषो नाम उनविंशतितमोऽध्यायः ॥१९॥

अथ पशुपतिमते शिवधर्म्मशास्त्रे वृषसारसंग्रहे पञ्चविंशतितत्व निर्णयो नाम

विंशोऽध्यायः ।

ॐ नमः शिवाय

॥विगतराग उवाच ॥

पञ्चविंशति यत्तत्वं ज्ञातुमिच्छामि तत्वतः ॥
कथयस्वममाद्यत्वं छिद्यते येन संशयः ॥

॥अनर्थयज्ञ उवाच ॥

सर्व्वं प्रत्यक्षदर्शित्वं कथं मां प्रष्टुमर्हसि ॥
पृष्टेनकथनीयोऽस्मि एष मे कृतनिश्चयः ॥
शृणु ते संप्रवक्ष्यामि तत्वसद्भावमुत्तमम् ॥
नादिमध्यन्नचान्तश्च यन्न वेद्यं सुरैरपि ॥
अतिसूक्ष्मोत्प्यतिस्थूलो निरालम्वोनिरञ्जनः ॥
अचिन्त्यश्चाप्रमेयश्च अक्षराक्षरवर्ज्जितः ॥
अजरामर यः शान्तः परमात्मा शिवोऽव्ययः ।
अलक्ष्यलक्षणः स्वस्थो ब्रह्मापुरुषसंज्ञितः ॥
पञ्चविंशः स विज्ञेयोजन्ममृत्युहरः प्रभुः ॥
कलाकलङ्कनिर्म्मुक्तो व्योमपञ्चाशवर्ज्जितः ॥

जलपक्षी यथातोयैर्न्नलिप्यते जलेचरन् ॥
तद्वद्वोषैर्न्नलिप्येत पापकर्म्मशतैरपि ॥
चतुर्विंशतियन्तत्वं प्रकृतिर्व्विधिनिश्चयः ॥
विकृतिश्च सविज्ञेयस्तत्वतः स मनीषिभिः ॥
प्रकृतिप्रभवाः सर्व्वेवुद्ध्याहङ्कारकादयः ॥
विकृतिं प्रतिलीयन्ते भूम्यादिक्रमशस्तु वै ॥
मतितत्वत्रयोविंश धर्म्मादिगुणसंयुतः ॥
सत्वाधिकसमुत्पन्नवोद्धातविधिदेहिनः ॥
द्वाविंशति अहङ्कारस्तत्वमुक्तमनीषिभिः ॥
भूतादिर्नामपञ्चाह रजोधिकसमुद्भवं ॥
एकविंशति यत्तत्वं सुशिरं विद्धि भोद्विज ! ॥
शब्दातीतं सुशिरत्वं स शब्दगुणलक्षणं ॥
सप्तस्वरास्त्रयोग्रामाः मूर्छनास्त्वेकविंशतिः ॥
तानामेकोनपञ्चाशच्छब्दभेदस्तदादयः ॥
एवमादीन्यनेकानिस्वरभेदान् द्विजोत्तम ॥
गान्धर्व्वस्वरतत्वज्ञैर्म्मुनिभिः समुदाहृतम् ॥
वेणुमुरजतन्त्रीणां दुन्दुभीनां स्वनानि च ॥
शंखकाहल (?) कांस्यानां शब्दानि विविधानि च ॥
आकाशधातु विप्रेन्द्र शृणुवक्ष्यामि ते दश ॥
पायुपस्थोदरः कण्ठ श्रोत्रौ च मुखनासिकौ ॥
हृदिश्चदशमंज्ञेयं देहआकाशसम्भवः ॥
पुनरन्यत्प्रवक्ष्यामि तच्छृणुष्व द्विजोत्तमः ॥
दश धातुगुणाज्ञेयाः पंचभूतः पृथक्पृथक् ॥
आकाशस्यगुणाः शब्दोव्यापित्वं छिद्रतापि च ॥
अनाश्रयनिरालम्वमव्यक्तमविकारिता ॥
अप्रतीघातिताचैव भूतत्वं प्रकृतानि च ॥
आकाशधातोविप्रेन्द्र ततो वायुसमुद्भवः ॥
शब्दपूर्व्वगुणंगृह्य वायोः स्पर्शगुणः स्मृतः ॥
शब्दपूर्व्वमयाख्यातं शृणुस्पर्शद्विजोत्तम ॥
कठिनश्चिक्ककरः श्लक्षो मृदुस्निग्धखरद्रवाः ॥
कर्क्कशः परुषस्तीक्ष्णशीतोष्णदशच द्वय ॥
इष्टानिष्टद्वयस्पर्शवपुषा परिगृह्यते ॥
प्राणोपानः समानश्च उदानोव्यान एव च ॥
नागकूर्म्मोथकृकलो देवदत्तोधनञ्जयः ॥

दशवायुप्रधानैते कीर्त्तिताः द्विजसत्तम ॥
धनञ्जयो भवेद्घोषो देवदत्तो विजृम्भकः ॥
कृकर क्षुधकृन्नित्यंकूर्म्मोन्मीलितलोचनः ॥
नाग उद्घाटनंपुष्यं करोतिसततं द्विज ॥
प्राणाः स्वसतिभूतानां निश्वसन्तिच नित्य यः ॥
प्रयाणाकुरुतेयस्मात्तस्मात्प्राण इतिस्मृतः ॥
अपनयत्यपानस्तु आहारं मनुजापवः ॥
शुक्रमूत्रवहोवायुरपानस्तेनकीर्त्तितः ॥
पीतभक्षितमाघ्रातंरक्तपित्तकफानिलं ॥
समन्नयतिगात्रेषु समानोनाम मारुतः ॥
स्पन्दयत्यधरवक्त्रं नेत्रगात्रप्रकोपनं ॥
उद्वेजयतिकर्म्माणि उदानोनाममारुतः ॥
व्यानोविनामयत्यङ्गं व्यङ्गोव्याधिप्रकोपनः ॥
प्रीतिर्व्विनाशकथितं वार्द्धिक्यं व्यान उच्यते ॥
दशवायुविभागेच कीर्त्तितो येद्विजोत्तम ॥
दशधातुगुणाश्चान्यच्छृणु कीर्त्तयमेद्विज ॥
वायोरनियमस्पर्शोवातस्थानेस्वतन्त्रता ॥
वलं शीघ्रञ्चमोक्षञ्च चेष्टाकर्म्मात्मनाभवः ॥
वायुनापि सृजस्तेजस्तद्रूपगुणमुच्यते ॥
शब्दस्पर्शसमज्योतिस्त्रिगुणं समुदाहृतं ॥
शब्दः स्पर्शः पुराप्रोक्ताः शृणुरूपगुणन्ततः ॥
ह्रस्वदीर्घलघुस्थूलं वृत्तमण्डलमेव च ॥
चतुरस्रद्विरस्रश्चतिस्रश्चैव षडस्रकं ॥
शुक्लंकृष्णस्तथारक्तोनीलपीतोऽरुणस्तथा ॥
श्यामः पिङ्गलवभ्रुश्च नवरङ्गः प्रकीर्त्तिताः ॥
नवधानवरङ्गानामेकाशीतिगुणाः स्मृतं ॥
तेजोधातुर्दशंब्रूमः शृणुष्वावहितोभव ॥
कामस्तेजेक्षणः क्रोधोजठराग्निश्च पञ्चमः ॥
ज्ञानं योगस्तपोध्यानं विश्वाग्निर्द्दशमः स्मृतः ॥
दंशतेजोगुणाश्चान्यान् प्रवक्ष्यामि द्विजोत्तम ॥
अग्नेर्दुर्द्धर्षवाप्नोति तापपाकप्रकाशनः ॥
शौचं गङ्गालघुस्तैक्ष्णं दशमश्चोर्द्धभाषितं ॥
ज्योतिः सोपिसृजश्चापि सरसोगुणसंयुतः ॥
चतुर्ग्गुणाः स्मृताआपः विज्ञेयाच मनीषिभिः ॥

शब्दः स्पर्शश्चरूपश्च रसश्च स चतुर्गुणः ॥
रूपादिगुणपूर्व्वोक्तं अधुनाथ रसं शृणु ॥
कटुतिक्तकषायाश्च लवणान्तस्तथैवच ॥
मधुरश्चरसाषड्वै प्रवदन्तिमनीषिणः ॥
षड्रसाषड्विभेदेन षड्त्रिंशगुण उच्यते ॥
आपधातुदशत्वन्या शृणुकीर्त्तयतोमम ॥
लालासिंघानिकाशोष्मारक्तपित्तः कफस्तथा ॥
स्वेदमश्रूरसश्चैव मेदञ्चदशमः स्मृतः ॥
दशश्चापगुणाश्चान्याकीर्त्तयिष्यामिताञ्छृणु ॥
अग्न्यशैत्यरसक्लेदोद्रवत्वं स्नेहसौम्यता ॥
जिह्वानिष्पन्दिनीचैव भौमान्दशगुणाञ्छृणु ॥
आपश्चबीज्यजाभूमिस्तस्यागन्धगुणः स्मृतः ॥
चतुरापगुणान्गृह्यभूमेर्गन्धगुणः स्मृतः ॥
शब्दः स्पर्शश्चरूपश्च रसोगन्धश्च पञ्चम ॥
आपपूर्व्वगुणाः प्रोक्तोभूमिर्गन्धगुणं स्मृत ॥
इष्टानिष्टद्वयोर्गन्धः सुरभिर्दुरभिस्तथा ॥
कर्प्पूरः कस्तूरीकश्च चन्दनागुरुमेव च ॥
कुङ्कुमादिसुगन्धानि घ्राणमिष्टं प्रकीर्त्तितः ॥
विण्मूत्रस्वेदगन्धानि वक्त्रगन्धश्चदुः सहं ॥
जीर्णस्फोटकगन्धानि अनिष्टानीति कीर्त्तितं ॥
भूमेधातु दशत्वन्याकथयिष्यामि तच्छृणु ॥
त्वचामांसश्च मेदश्च स्नायुमज्जाशिरस्तथा ॥
नखदन्तरुहाश्चैव केशाश्च दशमस्तथा ॥
दशत्वन्यान्प्रवक्ष्यामि श्रृणु भूमिगुणान् द्विज ॥
भूमेः स्थैर्य्यंरजत्वश्चकठिन्यं प्रसवात्मकं ॥
गन्धोगुरुश्च शक्तिश्च नीहारस्थापनाकृतिः ॥
गुणन्धातुविशेषश्च उत्पत्तिश्च द्विजोत्तम ॥
यथाश्रुतं मयापूर्व्वं कीर्त्तितं निखिलेन तु ॥
वैकारिकमहङ्कारं सत्वोनुक्तानुसात्विकः ॥
श्रोत्रंत्वक्चक्षुषीजिह्वा नासिका चैव पञ्चमी ॥
वुद्धीन्द्रियाणि पञ्चैव कीर्तितानि द्विजोत्तम ॥
हस्तपादस्तथास्नायुरुपस्थोवाक्च पञ्चमम् ॥
श्रोत्रेण गृह्यते शव्दो विविधस्तु द्विजोत्तम ॥
वेणुवीणास्वनानाञ्च तन्त्रीशब्दमनेकधा ॥

मुरज सौन्द पणवभेरीपटहनिस्वनं ॥
शंख काहल शब्दञ्च शब्दं डिण्डिमगोमुखं ॥
काँसिकाहलमिश्रञ्च गीतानि विविधानि च ॥
त्वचया गृह्यते स्पर्शः सुखदुःखसमन्वितः ॥
मृदुसूक्ष्मसुखं स्पर्शः वस्त्रशय्यासनादयः ॥
तीक्ष्णशस्त्रजलं शैत्यंउष्णतप्तक्षते क्षरः ॥
एवमादीन्यनेकानि ज्ञेयानीष्टं द्विजोत्तम ॥
चक्षुषा गृह्यते रूपं सहस्राणि शतानि च ॥
देवरूप विकाराणि नक्षत्रग्रहतारकाः ॥
मानुषाणाम्विकाराणि ग्रामन्नगरपत्तनं ॥
वृक्षगुल्मलतानाञ्च पशुपक्षिशरीसृपां ॥
कृमिकीटपतङ्गानाञ्जलजानामनेकधा ॥
शैलदारब रोमाणि रूपाणि विविधानि च ॥
धातुद्रव्यविकाराणि रूँपाणि द्विजसत्तम ॥
जिह्वया गृह्यतेस्वादो हृद्याहृद्यो द्विजोत्तम ॥
फलमूलानि शाकानि कन्दानिपिशितानि च ॥
पक्वापक्व विशेषाणि दधि क्षीर घृतानि च ॥
व्रीह्योषधिरसानाञ्च मिश्रामिश्रमनेकधा ॥
षट्कर्मप्रति भेदेन रसभेद शतस्मृतं ॥
घ्राणेन गृह्यतेगन्ध इष्टानिष्टाद्विजर्षभः ॥
गुडाज्यगुग्गुलुभष्मचन्दनागुरुकस्तथा ॥
कस्तूरि कुङ्कुमादीनामिष्टो गन्धमनोहरः ॥
व्रणमूत्रपुरीषाणां मांसपर्युषितानि च ॥
वातकर्म्मादि दुर्गन्ध अनिष्टः समुदाहृतः ॥
हस्ताभ्यां कुरुते कर्म्मविविधानि द्विजोत्तम ॥
माहेन्द्रवारुणञ्चैव वायव्याग्नेयमेव च ॥
आग्नेयपवनादीनि कांस्योलोहस्त्रपुस्तथा ॥
अग्निकर्म्माण्यनेकानि यज्ञहोम क्रियास्तथा ॥
सूर्प्पव्यजनवातेन मुखवातेन वै तथा ॥
चमरचर्म्मवातेन वातयन्त्रं च वायवं ॥
वारुणन्तोयकर्म्माणि कुरुते विविधानि च ॥
रसोपरसकर्म्माणि तस्य पोषणकर्म्म च ॥
स्नानाचमनकर्म्माणि वस्त्रशौचादयस्तथा ॥
कायशौचञ्चकुरुते तृषा नाशन मेव च ॥

नवमानि ह्यनेकानि वारुणं कर्म्म उच्यते ॥
माहेन्द्रं पार्थिवङ्कर्म्म अनेकानि द्विजोत्तम ॥
कुलालकर्म्म भूकर्म्म कर्म्मं पाषाणमेव च ॥
दारुदन्तिमश्रृङ्गादि कर्म्मपार्थिवमुच्यते ॥
चतुष्कर्म्म समासेन हस्ततः परिकीर्तितं ॥
पादाभ्याङ्गमनङ्कर्म्मदिशञ्चविदिशन्तथा ॥
निम्नोन्नतसमेदेशे शिलासङ्कटकोटरे ॥
तोयकर्द्दम संघाते वहुकण्टकसंयुते ॥
पापकर्म्म विसर्ग्गन्तु कठिनद्रवपिच्छिलं ॥
सरक्तफ़ेनिलादीनि पायुशक्ति प्रमुञ्चति ॥
उपस्थकर्म्मआनन्द करोति जननं प्रजा ॥
स्त्रीपुंनपुंसकञ्चैव उपस्थं कुरुते द्विज ॥
वाचा तु कुरुते कर्म्म नवधा द्विजपुङ्गव ॥
स्तुतिनिन्दाप्रशंसा च आक्रोशः प्रिय एव सः ॥
प्रश्नोऽनुज्ञातथाख्यानमाशीश्चाविधियोनयः ॥
एता नव विधावाणी कीर्तितोमे द्विजोत्तम ॥
अधुना कथयिष्यामि मनसो नव वै गुणान् ॥
चलोपपत्तिः स्थैर्यञ्च विसर्गकल्पनासमा ॥
सदसच्चाशुताश्चैव मनसो नव वै गुणाः ॥
इष्टानिष्ट विकल्पश्च व्यवसायः समाधिना ॥
मनसो द्विविधं रूपं मनश्चोन्मन एव च ॥
मनस्त्विन्द्रिय भावत्वे उन्मनस्त्वमतीन्द्रिय ॥
निगृहीतेन्द्रियग्रामः स्वर्गमोक्षौतु साधनं ॥
विसृष्टे इन्द्रियग्रामे दुःखं संसारसाधनं ॥
सकलं निष्कलञ्चैव मन एव विदुर्ब्बुधाः ॥
सकलं मननानात्वे एकत्वे मननिष्कलं ॥

॥विगतराग उवाच ॥

मनः स्ववेद्यं लोकानामुन्मनस्तु न विद्यते ॥
उन्मनः कथयास्माकं कीदृशं लक्षणं भवेत् ॥

॥अनर्थयज्ञ उवाच ॥

उन्मनस्त्वङ्गते विप्र निवोध दशलक्षणं ॥
न शब्दं शृणुते श्रोत्रे शंखभेरीस्वनादपि ॥

त्वचः स्पर्शन्नजानाति शीतोष्णमपि दुःसहं ॥
रूपं पश्यति नो चक्षुः पर्व्वताभ्यधिकोपि वा ॥
जिह्वा रसं न विन्देत मधुराम्लवतोपि वा ॥
गन्धं जिघ्रतिनघ्राणो तीक्ष्णम्वाप्यशुचीन्यपि ॥
उन्मनस्तव मे ख्यातं सर्वद्वैतविनाशनं ॥
भवपारग सुव्यक्तन्निष्कलं शिवमव्ययम् ॥
स शिवः स परोब्रह्मा स विष्णुः स परोक्षरः ॥
स सूक्ष्मः स परोहंसः सोऽक्षरः क्षरवर्ज्जितः ॥
एष उन्मनजानीहि शिवश्च द्विजपुङ्गव ॥
कीर्तितोऽस्मि समासेन किमन्यत् परिपृच्छसि ॥

इति वृषसारसंग्रहे पञ्चविंशतितत्व निर्णयो नाम विंशतितमोऽध्यायः ॥२०॥

अथ पशुपति मते शिवधर्मे वृषसारसंग्रहे कल्पनिर्णयो नाम एकविंशतितमोऽध्यायः ॥

ॐ नमः शिवाय

॥विगतराग उवाच ॥

अहो मतिमना श्रेष्ठ अहो धर्मभृतांवरः ॥
अहो दमः शमः सत्य अहो यज्ञ अहो तपः ॥
अनेनामृतवाक्येन विस्मयो मे परोगतः ॥
प्रीतोऽस्मि च तपाधार ज्ञानाद्भूत रसेन च ॥
किन्ददामि वरं व्रूहि दातास्मि तव चेप्सितं ॥
एतच्छ्रुत्वा ततस्तेन प्रत्युवाच शुभाङ्गिराम् ॥
को भवान् वरदः श्रेष्ठः देवदानव राक्षसः ॥
अथवा भगवान् विष्णुर्मम जिज्ञासुरागतः ॥
व्यक्तत्वं पुरुषश्रेष्ठः जानामि पुरुषोत्तमः ॥
रूपंदर्शयगोविन्द यद्यस्तितपसः फलम् ॥
ततस्तु पुण्डरीकाक्षो दर्शयामास स्वान्तनुम् ॥
शंखचक्रगदापाणिः पीताम्वरधरो हरिः ॥
अनर्थयज्ञस्तन्दृष्ट्वा विश्मयं परमङ्गतः ॥
प्रहर्षमतुलं लब्ध्वाअश्रुपूर्णाकुलेक्षणः ॥
वेपमान स्वरेणात्र उवाच च जनार्दनम् ॥
अद्य मे सफलं जन्म अद्य मे सफलं तःपः ॥
नमोनमस्तेऽस्तु जनादिसम्भवे ॥

नमोनमस्तेऽस्तु च विश्वरूपिणे ॥
नमोनमस्तेऽस्तु जनाभिसम्भवे ॥
नमोनमस्तेऽस्तु पितामहोद्भवे ॥
नमोनमस्तेऽस्तु सहस्रशीर्षिणे ॥
नमोनमस्तेऽस्तु सहस्रचक्षुषे ॥
नमोनमस्तेऽस्तु सहस्रलिङ्गिने ॥
नमोनमस्तेऽस्तु सहस्रवक्षसे ॥
नमोनमस्तेऽस्तु सहस्रमूर्त्तये,
नमोनमस्तेऽस्तु सहस्रवाहवे ॥
नमोनमस्तेऽस्तु सहस्रवक्त्रिणे
नमोनमस्तेऽस्तु सहस्रमायिने ॥
नमोनमस्तेऽस्तु वराहरूपिणे
नमोनमस्तेऽस्तु महीसमुद्धृते ॥
नमोनमस्तेऽस्तु च भूतसृष्टिने
नमोनमस्ते चतुराश्रमाश्रये ॥
नमोनमस्ते नरसिंहरूपिणे ॥
नमोनमस्ते दितिजोरदारणे ।
नमोनमस्ते सुरशक्रसूदने ॥
नमोनमस्ते सुरदर्पनाशने ॥
नमोनमस्तेऽ दितिपुत्र वामने ॥
नमोनमस्ते वलियज्ञ सूदने ॥
नमोनमस्तेऽस्तु षडर्द्धविक्रमे ॥
नमोनमस्ते त्रिदशार्त्तिनाशने ॥
नमोनमस्तेऽस्तु अनन्त अच्युते ॥
नमोनमस्ते जगदार्त्तिनाशने ॥
नमोनमस्तें मधुकीट नाशने ॥
नमोनमस्तेस्तु त्रिलोकवान्धवे ॥
नमोनमस्ते त्रिदशाभिनन्दने ॥
नमोनमस्तेस्तु च दिव्यचक्षुषे ॥
नमोनमस्तेऽस्तु भवान्तपारगे ॥
नमोनमस्तेऽस्तु त्रिलोकपूजिते ।
नमोनमस्तेऽस्तु गदाग्रपाणये ॥
नमोनमस्ते वरचक्रपाणये ॥
नमोनमस्तेऽस्तु च शंखपाणये ॥

नमो नमस्तेऽस्तु च कम्वुपाणये ॥
नमोनमस्तेऽस्तु जलौघशायिने ॥
नमोनमस्ते हरमर्दरूपिणे ॥
नमोनमस्ते खगराजकेतने ॥
नमोनमस्ते शशिसूर्यलोचने ॥
नमोनमस्ते उरगारिबाहने ॥
नमोनमस्तेद्भुतरूपदर्शिने ॥
नमोनमस्तेऽस्तु च सूर्यतेजसे ॥
नमोनमस्ते मृतमन्थन ध्रुवे ॥
नमोनमस्तेऽ मललोक संस्तुते ॥
नमोनमस्ते जगमण्डपाश्रये ॥
नमोनमस्तें जगदेकवत्सरे ॥
नमोनमस्ते शिवसर्वदे नमः ॥
क्षमस्व गोविन्दममापराधं ॥
अतीव पृष्टेन दुरात्मनेन ॥
मयेदं सर्वङ्कथितं स्मयेन ॥
दयाङ्कुरु त्वं त्रिदशेश्वरेण ॥

॥वैशम्पायन उवाच ॥

स्तोत्रेणानेन सन्तुष्टः केशवः परवीरहा ॥
प्रत्युवाच महासेनो गिरयानिरूपस्पृहा ॥
स्तोत्रेणानेन मे तात तुष्टोस्मि भृशमेजितः ॥
दुर्लभान्यपि त्रैलोक्ये ददामि वरमीप्सितम् ॥
अनेन मां स्तौति निराश्रिंतेन त्वयोक्तवेदार्थमनोहरेण ॥
यावन्ति तत्राक्षरसंख्यमस्ति, तावन्ति कल्पं दिवि ते वसन्ति ॥
त्वञ्चापि मे व्रूहि वरं यथेष्टं, त्रैलोक्य राज्यादपि निर्विशङ्क ॥
ददामि किं सप्तमहीश्वरत्वमथार्थंराशीं वहुकन्यकां वा ॥
श्रुत्वैवदिव्यं वरमच्युतस्य प्रणम्यपादद्वयपङ्कजे तु ॥
विज्ञाय विष्णुं वरदं वरेण्यं प्रहृ चेतः पुकान्चितोऽतोऽव्रवीत् ॥

॥अनर्थयज्ञ उवाच ॥

न कामयेऽन्यं प्रवरन्तु देव असंशयवन्धनसारमेकम् ॥
विमुक्त वन्धो भवतः प्रमादाद् भवामि गोविन्दरतञ्च धर्मे ॥

॥भगवानुवाच ॥

यथैव चित्तन्तव सुप्रसन्नं महर्षि देवैरपि नैव दृष्टम् ॥
अकल्मषं दुःखविवर्ज्जितत्वं भवार्णवस्तीर्णमसंशयेन ॥
गच्छामतो सम्प्रति श्वेतद्वीपमगम्य देवैरपि दुर्न्निरीक्ष्यम् ॥
मद्भक्तिपूतं मनसा प्रयाति घोरार्णवे नैव पुनश्चरन्ति ॥

॥वैशम्पायन उवाच ॥

एवमुक्त्वा हरिस्तत्र करेगृह्य तपोधनम् ॥
ततस्ते कर्हितास्तत्र तेनैवसहकेशव ॥
एवं हि धर्मस्त्वधिकं प्रभावाद्गतः स लोकं पुरुषोत्तमस्य ॥
अशेषभूत प्रभवाव्ययस्य सनातनं शाश्वतमक्षरस्य ॥
त्वमेव भक्तिं कुरु केशवस्य जनार्दनस्यामितविक्रमस्य ॥
यथा हि तस्यैव द्विजर्षभस्य गतिं लभस्व पुरुषोत्तमस्य ॥
किमन्य भूयः कथयामि राजन् यदस्ति कौतुहलमन्यशेषम् ॥
पृच्छस्वमान्तात यथेप्सितन्ते भविष्यभूतं भवतो यथेष्टम् ॥

॥जनमेजय उवाच ॥

कियन्तकल्पानि गतानि पूर्व्वं भविष्यकल्पानि कियन्ति विप्र ॥
एकैककल्पं कियदिन्द्रमुक्तं प्रवर्तमानादपि कीर्तयस्व ॥

॥वैशम्पायन उवाच ॥

परार्द्धकल्पं गतपूर्व्वराज्यं चतुर्द्दशैवेन्द्र नरेन्द्रकल्पम् ॥
तथैव मन्वन्तरमेककल्पं भविष्यकल्पञ्चपरार्द्धमेव ॥
वराहकल्पः प्रथमो वभूव गताश्च मन्वन्तरषट्नरेन्द्रः ॥
चतुर्य्युगसप्ततिएकयुक्तं मन्वन्तरासंख्यमुदाहरन्ति ॥
षड्लक्षकल्पेन तु मासमाहुस्तद्द्वादशव्वर्षमुदाहरन्ति ॥
तेनार्द्धेन परार्द्धकल्पगुणितं ब्रह्मायुरित्युच्यते ॥
त्रैलोक्याधिपतिः प्रधानपुरुषो ब्रह्माप्यनित्यः स्मृतः ॥
शेषं भूत चतुर्विधस्यनियतं जीवस्य किं शोच्यते
तस्मान्नास्ति जगत्सुसारविरलमुक्ताशिवं शाश्वतं ॥

इति वृषसारसंग्रहे कल्प निर्णयो नामैकविंशतितमोऽध्यायः ॥२१॥

अथ पशुपतिमते शिवधर्मे वृषसारसंग्रहे

द्वाविंशतितमोऽध्यायः ॥

ॐ नमः शिवाय

॥जनमेजय उवाच ॥

श्रूतो वा त्वन्मुखाद्धर्म्मः सारसंग्रहमुत्तमं ॥
मधुरश्लक्ष्णा वाणीभिः सम्यग्वेदार्थसंयुतं ॥
न्याययुक्तं महासारं गुह्यं ज्ञानमनन्तरं ॥
तृप्तोऽस्मीहामृतं पीत्वा जन्ममृत्युरुजापहं ॥
प्रश्नमेकोन्यपृच्छामि नामहेतु तपोधन ॥
वर्णगोत्राश्रमन्तस्मात् श्रोतुमिच्छामि ते पुनः ॥

॥वैशम्पायन उवाच ॥

शृणु राजन्नवहितो योगेन्द्रस्य महात्मनः ॥
आश्रमं वर्णजातीनां वक्ष्याम्येव नराधिपः ॥
हिमवद्दक्षिणेपार्श्वे मृगेन्द्रशिखरे नृपः ॥
महेन्द्रपथगानामनदितीरे नराधिपः ॥
तत्राश्रमपदन्तस्य पुलिनेषु मनोरमे ॥
वसतिस्म महाभागस्तत्वपारगनिस्पृहाः ॥
शीलशौचसमाचारो जितद्वन्द्वो जितश्रमः ॥
जितमानभयक्रोधो जितसर्व्वपरिग्रहः ॥
सोमवंशप्रसूतास्ते क्षत्रियो द्विजताङ्गताः ॥
तपसाविनयाचारैर्विष्णुना द्विजकल्पिताः ॥
अजिता नाम तत्पूर्व्वं कामक्रोधजितेन तु ॥
सङ्कल्पस्तस्य राजेन्द्र कथयिष्यामि तच्छृणु ॥
अध्यात्मनगरस्फीतः अधिभूतजनाकुलः ॥
अधिदैवत सान्निध्यं देशायतनपञ्च च ॥
दशयज्ञं व्रतं चीर्णदशकामपराजितः ॥
नियमान्दशसंसृत्य दशवायव ॠत्विजः ॥
दशाक्षरेण मन्त्रेण दशधर्मक्रियापदः ॥
दशसंयमदीपाग्नौ जिह्वातेजोजितेन्द्रियः ॥
दशयोगा समासीना दशध्यानपरायणः ॥
वृद्धिर्वेदिमनोयूपः सोमदानमृताक्षरः ॥
दक्षिणाग्नयभूतेभ्यः पशुवन्धस्वयं कृतः ॥

विनार्थं यज्ञमिष्ट्वातु कालाञ्चक्षपयत्यसौः ॥
अनर्थयज्ञं तं प्राहुर्म्मुनयस्तत्वदर्शिनः ॥

॥जनमेजय उवाच ॥

दशयज्ञमिदं श्रोतुन्देहिमां द्विज सत्तमः ॥
दशकामदशध्यानदशयोगदशाक्षरः ॥

॥वैशम्पायनउवाच ॥

ब्रह्मदेवपितृयज्ञो यज्ञ भूतातिथिञ्चयः ॥
जपो योगस्तपो ध्यानं स्वाध्यायश्चदशस्मृतः
पत्नीपुत्रपशुभृत्यधनधान्ययशश्श्रियः ॥
मानभोगं दशराजन्दशकाम उदाहृतः ॥
मानसो योगपद्यश्च संक्षिप्तश्चविशाम्पते ॥
विशालानामयोगश्च ततोविकरणः स्मृतः ॥
रविसोमोहुताशश्च स्फटिकाम्वरमेव च ॥
दशयोगासनासीनौ नित्यमेव तपोधन ॥
अनिलाधमनाः सूक्ष्मं ध्यानं योगः स मानसः ॥
प्राणायामैर्म्मनोरुद्धायोगपद्यः स उच्यते ॥
ब्रह्मादिस्तम्वपर्य्यन्त सर्व्वस्थावरजङ्गमं ॥
प्रलीयमानं ध्यायेत क्रमात्सूक्ष्मंविचिन्तयेत् ॥
संक्षिप्त एवआख्यातः विशालाञ्छृणुतत्वतः ॥
ब्रह्मादिसूक्ष्मपर्य्यन्त चिन्तयीत विचक्षणः ॥
संक्षिप्ता च विशालाच चिन्तयीतपरस्परं ॥
एषा विकरणीनामयोगस्यविधिरुच्यते ॥
देहमध्येहृदिज्ञेयं हृदिमध्येतु पङ्कजं ॥
पङ्कजस्यचमध्येतु कर्णिकांचविशांपते ॥
कर्णिकायास्तुमध्येतु पञ्चविन्दुविदुर्व्वुधाः ॥
रविसोमशिखाचैव स्फटिकाम्वरमेव च ॥
रविमण्डलमध्येतु भावयेच्चन्द्रमण्डलं ॥
तस्यमध्येशिखाध्यायेन्निर्धूमज्वलनप्रभां ॥
अग्निमध्येमणिंध्यायेच्छुद्धधारजलप्रभं ॥
तस्यमध्येऽक्षरंध्यायेत्ससूक्ष्मं शिवमव्ययं ॥
दशयोगमिदं राजन्कथितञ्च मया तव ॥
दशध्यानसमासेनकीर्त्तितं शृणुतद्यथा ॥

घोषणापिङ्गलाचैव वैद्युतीचन्द्रमालिनी ॥
चन्द्रोमनोनुगाचैव सुकृताच तथापर ॥
सौम्यानिरञ्जनाचैव निरालम्वा च कीर्त्तिता ॥
सुशिषिचाङ्गुलौश्रोत्रेध्वनिमाकर्षयेन्नरः ॥
तत्तदक्षरमाकर्ण्यअमृतत्वाय कल्प्यते ॥
पिङ्गलातु शिखाधूमंध्यायेन्नित्यमतन्द्रितः ॥
विमुक्तः सर्व्वपापेभ्यो निर्द्वन्दपदमाप्नुयात् ॥
वैद्युती तु निशामध्येलक्षतेजमनामयं ॥
पञ्चमाससमाभ्यासाद्दिव्यचक्षुर्भवेन्नरः ॥
विन्दुमालान्तुयः पश्येन्नरछायां समाश्रितं ॥
जात्यस्फटिकसंकाशं दृष्ट्वा मुच्यति वन्धनात् ॥
ध्यायेत्मनोनुगानामपक्षीरापीड्यलोचनैः ॥
श्वेतपीतारुणं विन्दुंदृष्ट्वाभूयो नजायते ॥
मनोनुगादिषट्केन ध्यानमुक्तं मया तव ॥
अधुनान्यत्प्रवक्ष्यामि परमाणुचतुर्व्विधं ॥
पार्थिवादिचतुर्भूतैर्यैर्व्याप्तंनिखिलञ्जगत् ॥
लक्षणन्तस्यराजेन्द्रशृणुवक्ष्यामि साम्प्रतं ॥
पार्थिवोर्द्धगतिः सूक्ष्मः परमाणुर्नराधिप ॥
प्रत्यक्षदर्शनं ध्यानं लक्षयन्नियतः शुचिः ॥
मुच्यते सर्व्वपापेभ्यो राहुनाचन्द्रमायथा ॥
तेन योऽभ्यसतेनित्यं स योगीभुवनेश्वरः ॥
अधोगति महाराजपरमाणुजलोद्भवः ॥
अभ्यसेद्यदिदं राजन् सर्व्वपातकनाशनं ॥
आग्नेयपरमाणु श्च तिर्य्यगूर्द्धगतिः स्मृताः ॥
य इदं ध्यायते नित्यमुत्तमाङ्गतिमाप्नुयात् ॥
वायव्यं परमाणुश्च अधोर्ध्वतिर्य्यगास्मृता ॥
न स मुह्यति तंदृष्ट्वा वायुसम्भवभूपते ॥
चत्वार एते राजेन्द्र परमाणुर्निरीक्षते ॥
तेन सर्व्वमखैरिष्टन्तेनतप्तान्तपन्तथा ॥
तेन दत्तामहीकृत्स्नासप्तसागरसंवृता ॥
सर्व्वतीर्थाभिषेकश्च सर्व्वव्रतक्रिया तथा ॥
अनेनैवविधानेन दशध्यानन्नराधिप ॥
कुरुते अव्यवच्छिन्नं सर्व्वकामफलप्रदं ॥
दशाक्षरमहाराजयोगीन्द्रस्यमहात्मनः ॥

कथयामि समासेन शृणुष्वावहितोभव ॥
प्रणवादिस्वरात्रीणि दीर्घविन्दुसमायुतं ॥
पञ्चपञ्चच वर्ग्गे तु वायुवीजमधस्थितं ॥
त्रयोदशस्वरायुक्तं पञ्चमपरिकीर्त्तितं ॥
पञ्चविंशतिमः षष्ठ अक्षरः परिकीर्त्तितः ॥
यादृशं पञ्चमः प्रोक्तं सप्तमेच प्रयोजयेत् ॥
अकारस्वरसंयुक्तंसर्व्वपातकनाशनं ॥
प्रथमं पञ्चमेवर्गे तृतीयस्वरयोजितं ॥
उक्तरेकारसंयुक्तं नवमं परिकीर्त्तितं ॥
दशमः पुनरोङ्कारः मन्त्रश्रेष्ठोदशाक्षरः ॥
जपतोध्यायतो वापि पार्थिवादिक्रमेण तु ॥
मुच्यते सोऽपि संसारे संशयोनास्ति भूपते ॥
आचारमूलोधर्म्मस्तु धर्म्मसूलोजनार्द्दनः ॥
तेन सर्व्वजगद्व्याप्तं त्रैलोक्यंसचराचरं ॥
आचाराल्लभतीहआयुरतुलमैश्वर्य्यवित्तन्तथा ॥
आचारात्सुतमीप्सितञ्च लभते श्रीकीर्तिप्रज्ञायशः ॥
आचाराल्लभतेच लक्ष्मिमतुलं ख्यातिन्तथैवोत्तमं ॥
आचारादिहमन्त्रधर्म्मपरम प्राप्नोति निः संशयं ॥

॥जनमेजय उवाच ॥

आचारत्प्रभवानुसङ्ग कथितं सुश्लिष्टधर्म्माकरं ॥
आचारात्कतिधाऽङ्ग कीर्त्तय पुनस्तृप्तिर्न मे जायते ॥
सर्वज्ञः त्वमहम्शृणोमिवरदङ्किञ्चिन्नं मे शास्वतं ॥
तन्मे किर्त्तय धर्म्मसारशुभदमाचारमूलाश्रयं ॥

॥वैशम्पायन उवाच ॥

नित्यं नम्रशिरोद्विजातिगुरुषु शुश्रूषणदैवतं ॥
तिष्ठेनाचमनेनचाशनकरं वामास्थि मानादरं ॥
सूर्य्याग्निशशिवन्धुरार्यपुरतः कुर्य्यान्नचावश्यकं ॥
शस्येभस्मनि गोव्रजेद्विजजलं कुर्य्यान्न चार्कन्नरः ॥
पादेनाग्निजलं स्पृशेन्नच गुरुं पादेन पादन्तथा ॥
शौचङ्कार्य जलादिनाच नियतंनाधो जलं कारयेत् ॥
कुर्य्यान्नित्यभिवादनं द्विजगुरोर्म्मातापितॄर्द्दैवतं ॥
एताऽचार विधिः समासनियमस्तुभ्यं मया कीर्त्तितं ॥

॥जनमेजय उवाच ॥

स्त्रीणाङ्किं प्रियमस्ति तद्वद विभो संसारसारस्त्रियां ॥
किं सदभाव न वेद्मि तस्य विषये किं द्वेष्य किन्तात्प्रियम् ॥
पश्यामि न च तस्य गर्भकलया प्राप्नोति निःसंशयं ॥
मायाजालसहस्रगाऽपि युवती कुर्व्वन्ति भर्त्ताप्रियम् ॥

॥वैशम्पायन उवाच ॥

राजन् किं प्रियमस्ति अर्थपरतः पश्यामि नान्यन्नृपे ॥
पुत्रार्थैक प्रयोजनं युवतयः स्वायम्भुवोक्ताऽमरैः ॥
कान्ता नित्यकलाप्रवर्त्तनकरी धर्म्मसखायासती ॥
मायावापि करोति सद्य मनुजात्यक्तान्यवा सेवते ॥
स्त्रीसङ्गं परिवर्ज्जयेन्नरपते आयासदं दुःखदम् ॥
मृत्युद्वारभयाकरं विषगृहं आपत्सुघोरालयं ॥
अग्निर्म्मारुतमत्तवारणसम तस्यानुगामी सदा ॥
स्त्रीहेतोर्हतरावणस्त्रिदशप इन्द्रोऽपि विस्थापितः ॥
स्त्रीहेतोरपि चन्द्रमास्त्रिभुवने धिक्तांगतश्चामरो ॥
दण्डक्षोहतराष्ट्रपौरसहितः किम्भूय वक्ष्याम्यहम् ॥

॥जनमेजय उवाच ॥

विप्रोकीदृश लक्षणम्भवति भो ! कीदृग्मुनिश्चोच्यते ॥
केनार्थेन भवेत भिक्षुभगवन् निघ्नन्ति को वा द्विजः ॥
केनार्थेन भवेद्द्विजेन्द्र भगवन् ज्ञेयः परिव्राजकः ॥
ज्ञेयाः किमृषयश्च लक्षणमुनेरिच्छामि ज्ञातुं पुनः ॥

॥वैशम्पायन उवाच ॥

सत्यं शौचमहिंसता दमशमौ भूतानुकम्पी सदा ॥
आत्मारामजितोस्वधर्म्मनिरतः सत्वस्थ नित्यं मनः ॥
कामक्रोधयम स्वदारनिरतः सन्त्यज्य लोभः शनैः ॥
एवं यः कुरुते द्विजातिसुवरः शूद्रोऽपि यः संयमी ॥
तस्माच्छद्मक वर्ज्जितः स भगवान् संसारभी भिद्यकः ॥
यत्तत्स्थानपरं व्रजन्तिपुरुषाः तस्मात्परिव्राजकः ॥
ग्रन्थिदारसुतन्धनंश्च विरति निर्ग्रन्थिक सोच्यते ॥
रम्यन्ते ऋषिराश्रमेधृतिमनस्तस्मादृषिः सोच्यते ॥

कायवाङ्मनदण्डतत्परतरस्ते दण्डिकरूच्यते ॥
सद्धर्म्मश्रवणं वदन्ति श्रवणः सद्धर्म्मब्रह्माक्षरः ॥
पाशप्रक्षिपतं पशुत्वसकलं पाशूपतास्ते स्मृताः ॥
विप्रे पाशुपतादि भिक्षुसकलं पृष्टोस्म्यहं लक्षणं ॥
सर्व्वं तत्कथितोसि लक्षणमया सन्धिश्वनिर्न्नाशनं ॥
प्रज्ञासंग्रहशीतवर्द्धन परं संसारनिर्म्मूलनं ॥
एतज्ज्ञानपरं प्रवोधमतुलं नित्यं शिवंधार्य्यते ॥

इति वृषसारसंग्रहे द्वाविंशतितमोऽध्यायः ॥२२॥

अथ पशुपतिमते शिवधर्म्मशास्त्रे वृषसारसंग्रहे निद्रोत्पतिर्न्नाम

त्रयोविंशतितमोऽध्यायः

ॐ नमः शिवाय

॥जनमेजय उवाच ॥

देवानान्दानवानाञ्च उत्तरारणिमेवच ॥
विद्विषन्ति च तेऽन्योन्यं कारणन्तस्य कीर्तय ॥

॥वैशम्पायन उवाच ॥

पापपुण्यस्वभावाभ्यां देवदैत्यस्य भूपते ॥
धर्म्मपक्षः स्मृतोदेवा दानवोऽधर्म्म पक्षतः ॥
हेतुना तेन राजेन्द्र अन्योन्यं विद्विषन्तिते ॥
देवद्वेष्टासुरः सर्व्वेविवुधाश्चासुरद्विषः ॥
धर्म्माधर्म्म विपक्षतां श्रृणुपरां भूतानुकम्पादयाम् ॥
सत्यं शौचमहिंसता दमशमो निर्म्मानमीर्ष्यारुषा ॥
तृष्णालोभरतस्यकामविषयः सर्व्वेन्द्रियाणां जयः ॥
आध्यात्मेषुरतिः प्रसन्नमनसो निर्द्वन्द्वसर्व्वालयः ॥
पापापेक्षणशश्च पुण्यमुदितो दीनेषुकारुण्यता ॥
दानं शीलधृतिक्षमाजपतपः स्वाध्यायमौनेरतिः ॥
योगभ्यासरतिदिवैकसगणेज्ञाने च सांख्ये तथा ॥
अक्रोधार्ज्जवतेजयज्ञमभयं संतोष अद्रोहता ॥
त्यागोमार्द्दवह्रीरचापलरतिन्यासाभिमानोग्रहात् ॥
मैत्रीभाव सदारपैशुनमतिर्ब्राह्मण्य श्रद्धान्विता ॥
एताऽचारसदा नरेन्द्र विवुधाः संक्षेपतः कीर्त्तिताः ॥

दैत्यानां श्रृणु कीर्तये त्ववहितो संभाव्यतेषान्निजं ॥
दैत्यापापरतिस्वभावचपला निर्ल्लज्जदर्प्पालसाः ॥
कामक्रोधवशाः सुदुष्टमनसस्तृष्णाधिका निर्द्दयाः ॥
शौचाचारविवर्ज्जिता गुरुगिरान्नानित्य कुर्य्युः क्रियाः ॥
नैवाकर्षण जीविनः प्रतिदिनं मोहान्धरागान्विताः ॥
निद्रानित्यदिवा प्रसक्तमशुचिः सूर्य्योदये सुप्यते ॥
आशापाशशतैर्न्निवद्धहृदयो हृत्वा परस्वं पुनः ॥
मांसर्य्यात्परपाक भेदनिरतोमूलस्यदुष्पूरता ॥
नास्तीकत्वपराङ्गनाप्यभिरतो उक्ता च कामः सदा ॥
देवब्राह्मण विद्विषन्ति सततं लोभाच्च कार्य्यक्रिया ॥
धर्म्मन्दूषयते च मूढमनसा आर्य्यञ्च तीर्थन्तथा ॥
हन्तव्यान्यहताञ्च यन्य वहवो विस्फुर्ज्जिते नक्रवत् ॥
दैत्यानाङ्कथितश्च चिन्हकतिचित्सद्भावतः कीर्त्तितं ॥
मर्त्येष्वेव नरेन्द्रमानुषमभूद्देवासुराणां नृपः ॥
यो यँप्रोक्तः स्वभावतामुभयतो मानुष्य लोकन्तथा ॥
यन्मे पृच्छित वान्नरेन्द्र कथितं यत्त्वं पुरागोपितं ॥
विद्वेषोभयकारणं नरपते किम्भूय वक्ष्याम्यहं ॥

॥जनमेजय उवाच ॥

अस्ति कौतुहलंश्चान्यं पृच्छामित्वां द्विजोत्तम ॥
कथं निद्रा समुत्पन्ना सर्व्वभूत विमोहनी ॥
रात्रौ प्रजायतेकस्माद्दिवा कस्मान्न जायते ॥
कस्माच्च कुरुते जन्तो निद्रानेत्रप्रमीलनं ॥
एतन्मे संशयं छिन्धि सर्व्वज्ञोऽसि द्विजोत्तम ॥

॥वैशम्पायन उवाच ॥

देवी ह्येषा महाभागानिद्रानेत्राश्रयो नृणां ॥
तस्यावशङ्गतं सर्व्वं जगत्स्थावरजङ्गमं ॥
सदेवदानवगणा गन्धर्व्वोरगराक्षसाः ॥
यक्षभूतपिशाचाश्च पशुपक्षिसरीसृपः ॥
गुह्यकश्च मृगानागाकिन्नराजलजानगाः ॥
निद्रा वशगताः सर्व्वे पाप्मनात्वभिलंघिताः ॥
देवदानवकर्म्मात्ते तस्मिन्ननृतसम्भवे ॥
मन्दरोत्थापने विष्णुर्द्देवासुरसमागमे ॥

जायते विग्रहेत्वेषा कृतेह्यमृतमन्थने ॥
रजस्तमश्चासुरम्वै सत्वं देवकृतैः शुभैः ॥
ततः सत्वमयी देवी रजस्तमनिवासिनी ॥
क्रोधजा वै स्थिता मध्ये देवदानवपक्षयोः ॥
तामद्भूतमयीन्दृष्ट्वा विस्मितादेवदानवाः ॥
तस्याः प्रभावाभिहता दुद्रुवुस्ते दिशो दशः ॥
तत्र पिताम्वरधरो विष्णुरेकस्तु तिष्ठति ॥
सोभिगत्वा विशालाक्षी नारायणमथाव्रवीत् ॥
देवदानवनाथस्त्वं त्वयि सर्व्वप्रतिष्ठितं ॥
देहि देव ममावासं यत्राहं निवसेसुखं ॥
ततो नारायणस्तुष्टस्तांदेवीं प्रत्यभाषत ॥
शरीरे मम वस्तव्यंविष्णुरेनामथाव्रवीत् ॥
ततस्तां विष्णुवत्तेजः पाप्मनासमतिष्ठत ॥
ततः शेते स वैकुण्ठः पाप्मनात्वभिलंघिताः ॥
तस्मिन् शयाने वित्रस्तादेवासुरगणास्तथा ॥
उचुस्ते परमोद्विग्नाः शयानं विष्णुमच्युतं ॥
त्रातारं नाभिगच्छाम उत्तिष्ठोतिष्ठ केशव ॥
ततः शंखगदापाणिरुत्तिष्ठतमहाभुजः ॥
उत्तिष्ठश्च विशालाक्षिः पाप्मना तस्य पृष्ठतः ॥
ततः सा विग्रहवती स्थितानारायणालये ॥
विष्णुर्देवासुरगणानिदं वचनमव्रवीत् ॥
अस्माकं वै शरीरेषु इयं पाप्मा विनिसृता ॥
एषातिसत्वामसती सत्येन भगिनी मम ॥
विश्रुतो त्रिषु लोकेषु तां पूजयथ मां यथाः ॥
ततो देवासुरगणाः सप्तलोकाः समानुषाः ॥
विभक्ता वैष्णवी पाप्मा तेषु सर्व्वेषु देवता ॥
पर्व्वतेष्वथ वृक्षेषु सागरेषु सरित्सु च ॥
ततो निद्रावशगतं जगत्स्थावरजङ्गमं ॥
एषोत्पत्तिश्च निद्राया यथा वसति तच्छृणु ॥
त्रीणिस्थानानि यस्या वै शरीरेषु शरीरिणां ॥
श्लेष्मपित्तानिलस्थाने त्रीणि पक्षा निवासिनः ॥
तमश्लेष्मा श्रयानिद्रा रजोनिद्रातिवातिका ॥
पित्ताश्रयां स्मृतां निद्रां सात्विकां विद्धि भूपते ॥
आदित्यप्रभवन्तेजस्तस्मिन्सर्व्वप्रतिष्ठितं ॥

निद्रा दिवानभवति तस्मात्सत्वगुणात्मिका ॥
तस्मात्सोमोद्भवानिद्रा तमांसि च रजांसि च ॥
तस्माद्रात्रौ भवेन्निद्रतामसी हरजात्मिका ॥
यदाहि सर्व्वाङ्गगतौ श्रोतांसि प्रतिपद्यते ॥
रजस्तमश्च नियतंस्तदा निद्रा प्रवर्तते ॥
तमस्युर्द्धगतेश्रोत्रोह्याक्षिपक्ष्मासमासृता ॥
तमः प्रवर्त्तते जन्तो तमस्त्वक्ष्णोनिमीलनं ॥
नासाक्षिकर्णश्रोतांसि प्रयुज्यन्तेकफेन तु ॥
हृदयं मुह्यते चापि तमसाचावृतम्मनः ॥
स्पर्शन्नवेदयत्येव नशृणोति नपश्यति ॥
नोच्छ्वासयति नासाभ्यां विवृताक्षिमुखेन च ॥
एषा नृणामन्तकरी निद्रा वै तामसीस्मृता ॥
अकर्म्मण्यप्रवृत्तिश्च मृतवत्स्वपतेक्षितौ ॥
निद्रोत्पत्तिम्विकारश्च कथितोस्मि नराधिप ॥
तस्मान्निद्रान्नसेवेत तमोमोह प्रवर्द्धनी ॥

इति वृषसारसंग्रहे निद्रोत्पत्तिस्त्रयोविंशतितमोऽध्यायः॥२३॥

अथ पशुपतिमते शिवधर्म्मशास्त्रे वृषसारसंग्रहे शास्त्रवर्णनं नाम

चतुर्व्विंशोऽध्यायः ॥

ॐ नमः शिवाय

॥जनमेजय उवाच ॥

देवानान्दानवानाञ्चवैशम्यानि श्रुतानि वै ॥
निद्रासम्भवमाश्चर्यं त्वत्प्रसादेनवेदितं ॥
त्रैलोक्या विस्तरायामं श्रोतुमिच्छामि वै द्विज ॥
कस्मिश्चिन्नरकं ज्ञेयं पातालञ्च द्विजोत्तम ॥
सप्तद्वीपं समिच्छामि सप्तसागरमेव च ॥
मेरुमूर्द्धश्च विपेन्द्र देवालयनिवोध मां ॥

॥वैशम्पायन उवाच ॥

श्रृणुसंक्षेपतो राजन्त्रैलोक्यायामविस्तरम् ॥
कालाग्निः प्रथमोज्ञेयः सर्व्वाधस्तान्नरेश्वर ॥
तस्योपरि नृपश्रेष्ठ ज्ञेया नरककोटयः ॥

रौरवादि अवीच्यन्तं यातनास्थानमुच्यते ॥
उपरिष्टान्तु विज्ञेयाः पातालाः सप्तएव तु ॥
आभासतालः प्रथमः स्वतालश्च ततः परम् ॥
शीतलश्च गभस्तिश्च शर्करश्च शिलावृतं ॥
सप्तमस्तुमहातालं शेषनागकृतालयः ॥
वलिश्च दैत्यराजेन्द्रो राक्षसश्च विशंखणः ॥
इत्येवमादयस्सर्व्वे नागदानवराक्षसाः ॥
ज्योतिस्मान् द्युतिमान्हव्यः सवनः पत्रएव च ॥
अग्निवाहुश्च मेधा च पत्रश्चैव त्रयोजनाः ॥
संसारभयभीतेन मोक्षमार्गसमाश्रिताः ॥
आग्निन्ध्रं प्रथमद्वीपे अभ्यषिञ्चत प्रियव्रतः ॥
प्लक्षद्वीपेश्वरञ्चक्रे नाम्नामेधातिथिन्तथा ॥
वसुञ्च शाल्मली द्वीपे अभिषिक्तो महीपतिः ॥
ज्योतिस्मन्तं कुशद्वीपेराजानमभिषेचयेत् ॥
क्रौञ्चद्वीपेश्वरञ्चक्रे द्युतिमन्तन्नरेश्वरः ॥
साकद्वीपेश्वरं हव्यं पुष्करे सवनस्मृतः ॥
मध्येपुष्करद्वीपस्य पर्वतोमानसोत्तरः ॥
लोकपालाः स्थितास्तत्र चतुर्भिश्चतुरोदिशः ॥
महानीतः स्मृतोवर्षोधातकीच नराधिप ॥
पुष्करद्वीपमन्तश्च क्षीरोदो नाम सागरः ॥
द्वात्रिंशल्लक्षविस्तारैः शाकद्वीपवहवृणे ॥
जलदश्चकुमारश्च सुकुमार मणीचकः ॥
कुसुमोत्तरमोदश्चसप्तमश्च महाद्रुमम् ॥
हव्यपुत्राः स्मृताः सप्त वर्षनामतथास्मृतः ॥
द्वीपान्तं दधिमण्डादि क्षीरोदार्द्धंनिर्द्दिशेत् ॥
क्रौञ्चद्वीपे समुद्रान्ते सप्तवर्षन्तु ते स्मृताः ॥
कुशलोम्नोनुगश्चोष्णः यवनश्चान्धकारकः ॥
मुनिश्चदुन्दुभिश्चैव सुतद्युतिमनस्तु वै ॥
दध्यर्द्धेधृतमण्डोदः कुशद्वीपः समावृतः ॥
तत्रापि सप्तवर्षञ्चनामतः श्रृणु भारत ॥
उद्भिमान्धेनुसाश्चैव स्वैरान्नालम्वनो धृतिः ॥
षष्टः प्रभाकरश्चैव कपिलः सप्तमः स्मृतः ॥
घृतमण्डोतर्द्धेन तस्यान्तेमदिरोदधिः ॥
समन्ताच्छालमलीद्वीपो वर्षाः सप्तैवकीर्तिताः ॥

श्वेतश्च हरितश्चैव जीमूतोलोहितस्तथाः ॥
वैद्युतोमानसश्चैव सुप्रभः सप्तमः स्मृतः ॥
मदिरोदधिनोर्द्धेन ज्ञेयत्विक्षुरसोदधिः ॥
प्लक्षद्वीपो वृतस्तेन सप्तवर्षसमन्वितः ॥
शान्तश्च शिशिरश्चैव सुखदानन्दएव च ॥
शिव शिवक्षेमो ध्रुवश्चैव सप्तमेधातिथेः सुताः ॥
लवणोदधिस्यान्ते जम्वूद्वीपासमावृतः ॥
लक्षयोजनविस्तारो उपद्विपसमन्वितः ॥
अङ्गद्वीपो यवद्वीपोमलयद्वीपएव च ॥
शंख द्वीपकमुद्वीपो वराह द्वीप एवच ॥
सिंहवर्हिणद्वीपञ्चपद्म चक्रस्तथैव च ॥
वज्ररत्नाकरद्वीपो हंसकः कुमुदस्तथा ॥
लाङ्गलो वृषद्वीपश्च द्वीपो भद्राकरस्तथा ॥
चन्द्रद्वीपश्च सिन्धुश्च नन्दनद्वीप एव च ॥
उपद्वीप सहस्राणि एवमादीनि कीर्त्तितं ॥
अग्नीन्ध्रो नववर्षेषु नवपुत्रानभिषिञ्चयत् ॥
नाभिः किंपुरुषश्चैव हरिवर्षइलावृतः ॥
अत्रापि नवभेदोभूद्भारतात्मजसम्भवः ॥
इन्द्रद्वीपकशेरुश्चताम्रवर्णोगभस्तिमान् ॥
नागद्वीपस्तथा सौम्यो गन्धर्व्वश्चाथवारुणः ॥
अयञ्च नवमोद्वीपः कुमारीद्वीपसंज्ञितः ॥
दक्षिणेहेमकूटस्य वर्षः किं पुरुषः स्मृतः ॥
निषधो दक्षिणपार्श्वे हरिवर्ष इति स्मृतः ॥
मेरुमूलेतुराजेन्द्रज्ञेयोवर्ष इलावृतः ॥
उत्तरणेणतु नीलस्य वर्षरम्यक उच्यते ॥
श्वेतउत्तरतोज्ञेयो वर्षरम्यहिरण्मयः ॥
तस्यउत्तरतोज्ञेययस्त्रिशृङ्गवरपर्व्वतः ॥
तस्यचोत्तरपार्श्वेतु वर्षः कुरुवलेस्मृतः ॥
पूर्व्वंभद्राश्वतोज्ञेयः केतुमालस्तु पश्चिमे ॥
हिमंवान हेमकूटश्च निषधोनीलएव च ॥
श्वेतश्च शृङ्गवन्तश्च षडेते वर्षपर्व्वताः ॥
अशीतिनवतीलक्षः वर्षपर्व्वतमायतं ॥
हिमवान्हेमकूटश्च निषधश्चेति दक्षिण ॥
श्वेतश्चैवत्रिशृङ्गश्च नीलश्चैवतथोत्तरे ॥

निषधोनीलमध्ये तु मेरुः शैलमनोरमः ॥
प्रविष्ट षोडशाधस्ताञ्चतुराशीतिमुच्छ्रितः ॥
योजनानां सहस्राणि द्वात्रिंशदूर्द्धविस्तृतः ॥
ब्रह्मामनोवतीनाम पुरेवसतिमध्यमे ॥
देवराजोऽ मरावत्यामग्निस्तेजोवती पुरे ॥
यमः संयमनीनाम नित्यं वसति भूपते ॥
नैऋतिर्व्वसति नित्यं रम्ये शुद्धवतीपुरे ॥
वरुणोभोगवत्यान्तु वायोर्गन्धवतीपुरी ॥
महोदयापुरीरम्या सोमस्यालयतंस्मृतम् ॥
यशोवतीपुरी रम्यान्नित्यमास्ते त्रिशूलिनः ॥
तत्रगङ्गा चतुः भिन्नानिपतन्ती महीतले ॥
उत्तरेपश्चिमेचैव पूर्व्वदक्षिणतस्तथा ॥
पूर्व्वंगङ्गा स्रवत्याच्चाऽलकानन्दाच दक्षिणे ॥
शीतापश्चिमगागङ्गा भद्रसोमा तथोत्तरे ॥
षष्टियोजनसाहस्रन्निरालम्वानिपत्य च ॥
भद्राश्वंप्लावयित्वा तु वनान्युपवनानि च ॥
द्रोणस्थली गिरीणाञ्च अतिक्रम्यार्णवङ्गता ॥
तथैवालकंनन्दा च गताशैलेननिम्नगा ॥
गङ्गाभारतवर्षञ्च प्रविष्टालवणोदधिम् ॥
प्लावयित्वास्थलीन्सर्व्वान्मानुषाकलुषापहा ॥
पश्चिमेनं गतागङ्गासीतानामाच भारतः ॥
प्लावयेत्केतुमालञ्च क्षेत्रशैववनस्थली ॥
अतिक्रम्यार्णवगतास्थलीद्रोणीचनिम्नगा ॥
भद्रसोमनदीत्येवं प्लावयित्वोत्तरं कुरुन् ॥
स्थलीप्रस्रवणद्रोणीमतिक्रम्यार्णवङ्गता ॥
मेरो वै दक्षिणेपाश्र्वे जम्वूवृक्षः सनातनः ॥
तेननामाङ्कितोराजन् जम्वूद्वीप इतिश्रुतम् ॥
कोटीषोडशंभिश्चैव अयुतानित्रयोदंश ॥
अधोर्द्धयामराजेन्द्र क्षित्यावरणमन्ततः ॥
नवलक्षाधिकं राजन् पञ्चकोटी महीस्मृता ॥
योजनानान्तु विज्ञेयः पृथिव्यायामविस्तरात् ॥
स्वादूदकस्य च वहिर्ल्लोकालोकोमहागिरिः ॥
कञ्चनिद्विगुणाभूमि तस्मादिगरि वहिस्मृतः ॥
तस्माद्वाह्यः समुद्रोभूद्गर्भादेतिसमुद्रराट् ॥

अष्टाविंशतिकं लक्षं शतलक्षाणिविस्तरम् ॥
एतद्भूर्ल्लोक विस्तारो ह्यतद्ध्र्वभुवः स्मृतः ॥
स्वर्ल्लोकास्यपरेणैव महर्ल्लोकमतः परम् ॥
जनलोकस्तपः सत्यं क्रमशः परिकीर्त्तितम् ॥
ब्रह्मलोकः स्मृतः सत्यं विष्णुलोकमतः परम् ॥
तस्मात्परेणवोद्धव्यन्दिव्य ध्यानपुरम्महत् ॥
सहस्रभौमप्रासादम्वैदूर्य्यमणितोरणम् ॥
नानारत्नविचित्राणि नानाभूतगणाकुलम् ॥
सर्व्वकामसमृद्धानि पूर्णंतत्र मनोहरैः
तत्र सिंहासनेदिव्ये सर्व्वरत्नविभूषिते ॥
तत्रास्ते भगवान्रुद्रः सोमाङ्कितजटाधरः ॥
त्र्यक्षत्रिभुवनश्रेष्ठस्त्रिशूलीत्रिदशाधिपः ॥
देव्यासहमहाभागो गणैश्चपरिवारितः ॥
स्कन्दनन्दिपुरोगश्च गणकोटिशताकुलः ॥
अनेकरुद्रकन्यभिरूपिणीभिरलङ्कृतः ॥
तत्रपुण्यनदी सप्तसर्व्वपापापनोदनी ॥
सुवर्णवालुकादिव्यारत्नपाषाण शोभिता ॥
पावनीचवरेण्या च वराहावरदावरा ॥
वरेशावरभद्रा च सुप्रसन्नाजलाशिवा ॥
अनेककुसुमारामारत्न पुष्पफलद्रुमाः ॥
अनेकरत्नप्राकारायोजनायुतमुच्छ्रिताः ॥
अहिंसासत्यनिरताः कामक्रोध विवर्ज्जिताः ॥
ध्यानयोगरतानित्यन्तत्रमोदन्ति ते नराः ॥
तत्र गोमातरस्सर्व्वा निवसन्ति यतव्रताः ॥
गोलोकः शिवलोकश्च एकएव विधीयते ॥
तस्मादूर्द्धपरंज्ञेयं स्थानत्रयमनुत्तमम् ॥
स्कन्दगौरी महेशानंनित्यशुद्धं परं शिवं ॥
दिनकृत्कोटिसङ्काससमनोपम्यं सनातनम् ॥
आदित्यादशिवान्तश्चद्विस्थेणोद्धर्वक्रमैः मृस्तः ॥
अत्यन्तरेत्कथितोद्यसारं किमन्यराजन्कथयामिसारं ॥
ज्ञानार्णवं कीर्त्तितधर्म्मसारं पुराणवेदोपनिषत्सुसारं ॥
यथाहिराजापरिचारमध्ये यथान्तवर्त्ती वहिवर्त्तिनेव ॥
भुञ्जन्ति भोगान् सतताान्तवर्त्ती क्लेशाधिकं नित्यवहिः स्थितानां ॥
यथैवराजाकरिणान्तदन्तदत्तं भुञ्जन्ति भोगान् सततं नरेन्द्र ॥

युध्येतराजावहिदत्तभोगैर्य्यदन्तरे पश्य समानजातं ॥
नदानतुल्यंत्वभयप्रदस्यनयज्ञतुल्यं जितइन्द्रियस्य ॥
नचार्थतुल्यं जितकामिनश्च नधर्म्मतुल्यं दमकामिनस्य ॥
वह्वन्तरन्नैवहि धर्म्मयोश्च क्लेशाधिकं वाह्यफलाल्पसारम् ॥
यदत्रधर्म्मं फलनैष्ठिकस्य नतुल्यकोटी शतयाजिनापि ॥
एतत्पवित्रं परमं सधर्म्मं पुरायथोक्तं परमेश्वरेण ॥
मयापितुल्यं कथितं यथावत्पुराणवेदोपनिषत्सुसारं ॥
सदोजसौभाग्यमतीवमेधा निरुत्सुकः सौम्यमनुत्तमञ्च ॥
सुपुत्रपौत्रन्न विछिन्नगोत्रं भवन्ति विद्याधरलोकपूज्यं ॥
यशश्रियं कीर्त्तिरतीवतेजो जनप्रियो धान्यधनायुवृद्धिः ॥
प्रवोधप्रज्ञारुजधर्म्मवृद्धिम्भवन्ति ते शास्त्रसदाभियोगी ॥
यशस्विनी आर्य्यसुवर्णशृङ्गी वेदान्तविप्रद्विजगायनेषु ॥
दत्वाफलं तीर्थमनुत्तमेषु श्रृण्वन्तियेतस्य भवेत्स पुण्यं ॥
दशाधिकम्वाच चतुश्चपुण्यं शताधिकं यः पठतिप्रभाते ॥
सहस्रशः पुस्तकृतस्यपुण्यं परोभ्यस्ते कीर्त्तयतेयुतानि ॥
अधीत्ययस्योरगतं सुशास्त्रं समस्तमध्यायमनुक्रमेन ॥
दशायुतङ्गो ददतुश्चपुण्यं लभत्यसन्दिग्धयथादिनैकं ॥
येनेदंशास्त्रसारमविकलमनसायोभ्यसेत प्रयत्नात् ॥
व्यक्तोसौसिद्धयोगी भवति च नियतं यस्तुचित्तप्रसंन्नः ॥
नित्ययो धीतयोतपूर्व्वं प्रतिदिनशतशोउर्द्धियन्तेचसर्व्वे ॥
आत्मानन्निर्व्विकल्पं शिवपदमसमं प्राप्नुवन्तीहसर्व्वे ॥

इति वृषसार संग्रहे शास्त्रवर्णनोनाम चतुर्विंशतितमोध्यायः ॥२४॥

॥श्री शिवाय नमः ॥

अथ पशुपतिमते शिवधर्मे महाशास्त्रे धर्मपुत्रिकाया संहितायां साधनप्रकरणं नाम

प्रथमः पटलः

ॐ नमः शिवाय

वन्दे देवं पुराणं शिवममरगुरुं भूतलस्थेन मूर्ध्ना
नित्यं शान्तं सुसूक्ष्मं त्रिभुवननमितं सर्व्वलोकैकनाथम् ॥
निस्सङ्गं निर्व्विकारं प्रजननमरणक्लेशदोषैर्व्विमुक्तं
योगाभ्यासैकवेद्यं त्रिगुणविरहितं नप्रसज्यस्वरूपं ॥१॥
शिवार्थं लोकानाममलशिवधर्म्मं शिवकृतं
महाशास्त्रं सारं पशुपतिमतं पाशरहितं ॥
शिवं योगोद्योगं पशुपतिसमीपे निगडितो
विमुक्त्यै सर्व्वेषामनुवदति योगी नरहरिः ॥
योऽसौ पशुपतिः सोऽयं गोरक्षो रक्षको गवाम् ।
शिवयोगिजनान्नित्यं योगाभ्यासेषु रक्षतु ॥

तस्य वाचवः प्रणवः। भनियेका ॐ कारका वाच्य कल्याणमय शिवलाइ नमस्कार। पशुपतिनाथलाइ नमस्कार । शिवगोरक्षनाथलाइ नमस्कार

ती सवैभन्दा पुराना देव शिवलाइ भैंमा माथ राखेर ढोग्छु, जो ३३ कोटि देवताहरुका गुरु छन्, जो नित्य छन् सत्य छन् र शान्त छन्, जो पृथ्वी जल तेज वायु आकाश चन्द्र सूर्य आत्माका अष्ट मूर्तिले प्रत्यक्ष भैकन पनि अन्तर्यामी रूपेण अति सूक्ष्म छन्, तिनै लोकका समस्त प्राणीद्वारा प्रणाम गरियेका छन् र सवै लोक (अनन्त कोटि ब्रह्माण्ड) का नाथ छन तत् सृष्ट्वा तदेवानुप्राविशत् भनिए र जगतको सृष्टि गरेर जगत्को सञ्चालन गरी रहे पनि पानीमा रहेर पानी देखि अलग्ग रहेका कमल झैँ जगत्सित असंलग्न रहेका, जायते अस्ति वर्धते विपरिणमते अपक्षीयते विनश्यति' भनियेका षड्विध विकारहरुदेखि निक्लेर वसेका, जन्म र मृत्युका दोषदेखि विमुक्त रहेका अविद्या, अस्मिता, राग, द्वेष, अभिनिवेशका पञ्च क्लेशहरुका दोषबाट पनि मुक्त रहेका, सत्त्वगुण, रजोगुण, तमोगुणमय त्रिगुणात्मिका प्रकृतिदेखि विरहित रहेर पनि स्वस्वरूपा शक्तिले युक्त भएका शिवस्याभ्यन्तरे शक्तिः शक्तेरभ्यन्तरे शिवः। अन्तरं नैव जानीयाच्चन्द्रचन्द्रिकयो रिव' । भनियेका, जसका स्वरूपमा कुनै प्रकारको अल्झो न भयेका छन् र जो एक मात्र योगाभ्यासद्वारा जान्न सकिन्छन्, ती पशु (ज्ञान) का पति (नाथ) को वारं वार बन्दना गर्छु ।

निर्ब्व्यापारं सुसूक्ष्मं क्षितिजलदहनाकाशवातैर्व्विमुक्तं
प्रत्यक्षादिप्रमाणैः कृतिभिरविदितं हेतुदृष्टान्तशून्यं ॥

रूपादीनामभावादवयवनिकलादिन्द्रियैरप्रमेयं
प्रत्यात्मध्यानगम्यं पटुभिरपि गिरा निष्प्रपञ्च स्वभावं ॥२॥

मनसा. कर्मणा. वाचा. कुनै व्यापार न भयेका, भूमि. जल. तेज. वायु. आकाश. देखि विमुक्त रहेका आकाशभन्दा अतिसूक्ष्म, प्रत्यक्ष. अनुमान. आगम आदि कुनै प्रमाणद्वारा विद्वान्हरुले पनि बुझ्न नसकेका सवै प्रकारका हेतु र दृष्टान्त देखि शून्य रहेका, शब्द. स्पर्श. रूप. रस. गन्धादि विषयको अभाव हुनाले र साकार हस्त पादादि अवयव रहित निरञ्जन. निराकार. निर्विकार हुनाले मन सहित् ज्ञानेन्द्रिय तथा कर्मेन्द्रिय (नेत्र. श्रोत्र. रसना. नासिका. त्वचा र वाक्. पाणि. पाद. पायु. उपस्थ) द्वारा यति यस्ता भनेर जान्न न सकिने, सांसारिक प्रपञ्च देखि पर रहेका निष्प्रपञ्च स्वभावका हुनाले प्रमाणपटु तार्क्किकहरुले पनि तर्क युक्ति प्रमाणमय वाणी बुझ्न नसकेका, केवल प्रत्यभिज्ञालोकमा अन्तर्मुख योगीहरुका ध्यानगम्य ती पशुपतिनाथ शिवको वन्दना गर्छु ।

शास्त्रस्यादिप्रणेतारं सनकं मुनिपुङ्गवं ॥
नमस्कृत्य प्रवक्ष्यामि संहितां धर्म्मपुत्रिकां ॥३॥

यस पशुपतिमत शिवधर्म महाशास्त्रको सार स्वरूप धर्मपुत्रिका संहिता योगशास्त्रका आदिप्रणेता–"नृत्यावसाने नटराजराजो ननाद ढक्कां नवपञ्च वारम् । उद्धर्तुकामः सनकादिसिद्धानेतद् विमर्शे शिवसूत्रजालम्" ॥ इत्यादि भनियेका ब्रह्माजीका मानस पुत्र सनक. सनन्दन. सनातन. सनत्कुमार चार भाइ मध्ये जेठा, आबाल ब्रह्माचारी सिद्ध योगी मुनि-पुङ्गव सनकलाइ नमस्कार गरेर त्यो धर्मपुत्रिका संहिता (पञ्चाशिखले बनायेका विशाल षष्टितन्त्रको सार ७० सांख्यकारिका ईश्वरकृष्णले भनेझैं, म पाशुपत क्षेत्रनिवासी धर्मशीलको अघोषितनामा पितृभक्त पुत्र) संक्षेपमा १६ पटलमा भन्ने छु ।

सिद्धिं प्राप्नोति योगस्य युञ्जन् योगी न संशयः ॥
विदित्वा साधनोपायं षोडशानान्तु निर्णयं ॥४॥

योगसाधनाका उपाय जानेर १६ सोल प्रकरणको निर्णय गरेर युञ्जान योगी योगयुक्तिद्वारा षडङ्ग योगको सिद्धि प्राप्त गर्छन् मुक्त हुन्छन् यस्मा संशय छैन ।

चत्वारि योगप्रकरणान्यन्तरायाश्चतुर्विधाः ॥
तेषाञ्जयचिकित्साश्च द्वे लिङ्गे सिद्धिसूचके ॥५॥
वृद्ध्युपायो विनाशश्च प्रत्यानयनमेव च ॥
सिद्ध्युपायश्च विज्ञेयः साधनोपायसंज्ञितः ॥६॥
तानविज्ञाय यो योगी योगं युञ्जन् प्रयत्नतः ॥
क्लिश्यति केवलं मूढो नास्य सिद्धिः कदाचन ॥७॥

यस योगशास्त्रमा चारोटा योगप्रकरण छन्, चार प्रकारका योगका अन्तराय (विघ्न) छन् ती अन्तरायहरु माथि विजय कसरी प्राप्त गर्ने ? भन्ने चिकित्सा पनि उत्ति प्रकारका छन् योग सिद्धिका सूचक दुइटा चिन्ह (लिङ्ग) छन्, योगाभ्यासको वृद्धि गर्ने उपाय छ र विनाश कसरी हुन्छ ? अनि गयेका वस्तुको प्रत्यानयन (फर्कायेर ल्याउने उपाय) के छ ? योगसिद्धिको उपाय के छ ? साधनको उपाय के छ ? इत्यादि सवै कुरा योगाभ्यासका प्रारम्भमा नै युञ्जान योगीले जानी सक्नु पर्छ । तिनलाइ न जानेर जो मुडे बलले योगाभ्यास गर्ने प्रयत्न गर्छ, त्यो केवल

क्लेश भोग्छ, तेसको सिद्धि कदापि हुन्न । तसर्थ योगाभ्यास प्रारम्भ गर्नु भन्दा अगाडी ती सवै कुरा राम्ररी बुझी सक्नु पर्छ ।

तस्मादेवं विदित्वादौ त्रितत्त्वञ्च यथाक्रमं ॥
दानशीलादिभिश्चित्तं शोधयित्वा विशेषतः ॥८॥
ततो योगः प्रयोक्तव्यस्त्यक्तसङ्गेन योगिना ॥
वीतरागेण शान्तेन शुचिना शुद्धचेतसा ॥९॥

तस्मात् यसरी आदिमा ती सवै कुरा बुझेर अनि त्रितत्त्व पनि जानेर (आफ्ना शरीरमा तीन तत्त्व वात पित्त कफ ३ मध्ये कुन वडी छ ? तेसको साम्य कसरि गर्ने र स्वस्थ शरीरले योगाभ्यास कसरी नर्ने ? इत्यादि बुझेर) क्रमै सँग दान पुण्य . शील. शुचि र शुद्धचित्त भयेर योगीले योगयुक्तिद्धारा योगाभ्यासको प्रारम्भ सावधान भयेर गर्नु पर्छ ।

अथ साधनोपायानां षोडशानां
नामनिर्द्देशलक्षणं व्यारव्यास्यामः ॥१०॥

अव सोल प्रकारका योगसाधकनाकां उपायहरुका नामहरुको निर्देश तथा तिनका लक्षणको व्याख्या गर्ने छौं– (सनक र धर्मशीलपुत्रको भनाइ)

आदौ ताव'च्चत्वारि योगप्रकरणानि ॥
साधनप्रकरणमासनप्रकरणं धारणाबंशप्रकरणं ध्यानमार्गप्रकरणञ्चेति ॥११॥

यस पशुपतिमत शिवधर्म महाशास्त्रका आदिमा ई चारोटा योगप्रकरण छन्:– साधनप्रकरण १ आसनप्रकरण २ धारणावंशप्रकरण ३ ध्यानमार्गप्रकरण ।

षडङ्गः षडुपायश्च षट्साधनमतः परं ॥
चतुस्श्रमो द्विरूपश्च त्रिविधः समनन्तरं ॥१२॥
दशोपसर्ग्गा विज्ञेया अष्टैश्वर्य्यगुणास्तथा ॥
योगस्याशीतिरष्टाभिः साधनप्रकरणं स्मृतं ॥१३॥

योगका ६ अङ्ग छन्, ६ उपाय छन्, ६ साधन छन्, ४ प्राणायाम छन् , २ रूप छन्, ३ प्रकार छन्, १० उपसर्ग छन्, ८ सिद्धि छन्, एवं साधन प्रकरणमा ८८ वस्तु छन् । एकका अनेक भेद गर्दा ८८ हुन्छन् । ती क्रमै संग आउँदै छन्:–

प्रत्याहारस्तथा ध्यानं प्राणायामोऽथ धारणा ॥
तर्क्कश्चैव समाधिश्च षडङ्गो योग उच्यते ॥१४॥

प्राणायाम १ प्रत्याहार २ धारणा ३ ध्यान ४ तर्क ५ समाधि ६ ई योगका छवटा अङ्ग हुन्छन् । पशुपतिमतमा झैं शिवगोरक्षनाथमतमा–आसन १ प्राणसंरोधः २ प्रत्याहारश्च ३ धारणा ४ ध्यानं ५ समाधिरेतानि ६ योगाङ्गानि भवन्तिषट् । अव क्रमशः तिनको प्रतिपादन गरिन्छ –

विषयेष्वतिसक्तानि, इन्द्रियाणि प्रति प्रति ॥
चित्तेनाकर्षणं यत्र प्रत्याहारः स उच्यते ॥१५॥

आकाशगुण शब्दमा कान आसक्त छन्, वायुगुण स्पर्शमा छाला अल्झेको छ, तेजोगुण रूपमा आँखा रोपियेका छन्, जलगुण रसमा जिव्रो लोभियेको छ, पृथ्वीगुण गन्धमा नाक झुण्डियेको छ, इनै पञ्च ज्ञानेन्द्रियका स्वार्थपूर्तिमा आज्ञाकारी कमारा वाक् पाणि पाद वायु र उपस्थ पञ्च

कर्मेन्द्रियहरु तत्पर छन्। सङ्कल्प-विकल्पात्मक उभयात्मक चञ्चले मनोमर्कट पनि काकाक्षिगोलकन्यायेन कैले यता कैले उता दौडी रहञ्छ। हिंस्रहरुको भय देखिंदा साथ कछुवाले सर्वाङ्गप्रत्याकर्षण गरै झैँ, आत्मचेतनाशील चित्तले योगश्चित्तवृत्तिनिरोधः भनेर ज्ञानपूर्वक सबै बहिर्मुख इन्द्रियहरुलाइ प्रत्याकर्षण गरेर अन्तर्मुख गर्ने यौगिक क्रियालाइ प्रत्याहार कहिञ्छ। अन्तर्मुखानि यदि खानि तपस्तत ! किम् ?

शब्दात् कर्णौ रसाज्जिह्वा स्पर्षत्वात्तु त्वगिन्द्रियं ॥
गन्धाद् घ्राणं मनोऽधर्म्माद् दृष्टत्वान्नयनं तथा ॥१६॥
नित्याभ्यासाद् विरागाद्वा तस्मादाकृष्य यत्नतः ॥
एकत्र वर्त्तुलीकृत्य ध्येये वस्तुनि योजयेत् ॥१७॥

योगसिद्धि खोजने युञ्जान योगीले ती आकर्षक सात प्रकारका शब्दवाट कान तान्नु पर्छ, मधुरादि ६ प्रकारका रसवाट रसज्ञा जिव्रो तान्नु पर्छ, मृदु आदिं स्पर्शवाट सर्वाङ्गव्यापी छाला तान्नु पर्छ, सुगन्धादि वाट नाक तान्नु पर्छ, मनोहर रूपवाट आँखा तान्नु पर्छ र अधर्मवाट मन तान्नु पर्छ। यो काम एकै दिनमा साध्य छैन, नित्य अभ्यास गर्नु पर्छ र तत्त्व ज्ञानपूर्वक विषयवाट वैराग्य हुनु पर्छ। अभ्यास वैराग्याभ्यां तन्निरोधः। अभ्यासको खनाइ र वैराग बाँध गरेर समुन्द्रमा जाने खोलाको कुलो खेतमा लाये झैँ, योगयुक्तिले वैराग्यको बाँध बाधनु पर्छ र योगाभ्यासको खनाइ गर्नु पर्छ। अनि मात्र विषमय विषय तिर वग्ने पञ्चाधार चित्तबृत्ति फर्केर आत्माभिमुख हुञ्छ। चित्तनदी नागो, भयतो वाहिनी। वहति कल्याणाय वहति पापाय च। चित्तनदी भनेकी दुवै तिर वग्छ, कल्याणकारी योगाभ्यासमा पनि लाग्छ र अकल्याणकारी भोगाभ्यासमा पनि लाग्छ। कल्याणकांक्षीयोगीले प्रयत्नपूर्वक चारैतिर वाट चित्तवृत्तिहरुलाइ वाटुलो पारेर ध्येय वस्तु आत्मामा लाउनु पर्छ। आत्मध्यानमा नियुक्त गर्नु पर्छ। यसैको नाम प्रत्याहार हो।

को ध्येयः कस्त्वसौ ध्याता किं ध्यानं किं प्रयोजनं ॥
चत्वार्य्येतानि यो वेत्ति स योगी योग उच्यते ॥१८॥

कसको ध्यान गर्नु पर्छ ? ध्यान गर्ने को हो ? ध्यान भनेको के हो ? ध्यानको प्रयोजन के हो ? ई चार कुरा जो जान्दछ, त्यो योगी योग (योगसिद्धिको पात्र) भनिञ्छ। योगसिद्धि खोजनेले उक्त चारै कुरा राम्ररी जान्नु पर्छ।

ध्येयः शिवो ध्यातृ मनो ध्यानमेकाग्रचित्तता ॥
दुःखहानिर्गुणैश्वर्य्ये स्वातन्त्र्यञ्च प्रयोजनं ॥१९॥

शिवको ध्यान गर्नु पर्छ, ध्यान गर्ने मन हो, एकाग्र चित्तताको नाम ध्यान हो , जन्म मृत्यु आदि सांसारिक दुःखको हानि गर्नु (नाश गर्नु) अणिमा महिमा लघिमा. गरिमा. प्राप्ति. प्राकाम्य. ईशित्व र वशित्व अष्ट सिद्धि तथा महापद्म. पद्म. शंख. मकर. कच्छप. मुकुन्द. कुन्द. नील. र खर्व नव निधि आदि गुणको सिद्धिलक्षण देखेर तिनमा न अल्झी स्वतन्त्रतापूर्वक प्रकृतिमाथि विजय प्राप्त गरेर मोक्षप्राप्ति गर्नु शिवसायुज्य लाभ गर्नु नै योगको प्रयोजन उदेश्य अथवा लक्ष हो।

पूरकः कुम्भकश्चैव रेचकस्तदनन्तरं ॥
प्रशान्तश्चैव विज्ञेयः प्राणायामश्चतुर्व्विधः ॥२०॥

पूरक १ कुम्भक २ रेचक ३ प्रशान्त ४ या चार प्रकारको प्राणायाम हुन्छ। पूरक भनेको भर्नु हो कुम्भक भनेको रोक्नु हो, रेचक भनेको रित्त्याउनु हो, प्रशान्त भनेको केवल कुम्भक हो, यस्मा रेचन-पूरक क्रिया हुदैन र अकस्मात् बांहिरको बाहिरै भित्रको भित्रै थुनेर प्रशान्त चित्तले ध्यान गर्ने योगयुक्ति को नाम प्रशान्त अथवा केवल कुम्भक हो। न कुम्भः केवलोपमः। योगसारावलीमा यसको विशदीकरण छ।

वायोर्ब्बहिर्ग्गती रुद्धा नासिकाभ्यां मुखेन वा ॥
देहस्याभ्यन्तरे यत्नाच्छनैराकर्षयेद् बुधः ॥२१॥
पादाङ्गुष्ठतलं यावत् पूरणात् पूरकः स्मृतः ॥
आपूर्य्य धारणं यत्तु कुम्भकः समुदीरितः ॥२२॥
ततो निश्शेषवमनं रेचकः समुदाहृतः ॥
तुच्छदेहे क्षणं स्थानं प्रशान्तः सोऽभिधीयते ॥२३॥

प्राण वायुको बहिर्मुख गति रोकेर दुवै नाकले वा मुखले योगमुक्ति बुझेका युञ्जान योगीले विस्तारै देहभित्र वायुलाइ तानेर पाउका औँठादेखि ब्रह्मरन्ध्र पर्यन्त सम्पूर्ण शरीरलाइ वायुले पुर्ने प्रक्रियाको नाम पूरक हो। यसरी पूरक गरेर सके सम्म धारण गर्नु (रोकी राखनु) कुम्भ (गाग्रा) मा भरियेको पानीलाइ वग्न न दियेर रोकी राखने युक्तिलाइ कुम्भक भनिन्छ। त्यसरी रोकी यो वायु नाक वा मुख अथवा नाक र मुख दुवैवाट वमन गरेर निश्शेष पारी रित्त्याउने क्रियालाइ रेचक कहिन्छ। रेचक पूरक केहि न गरी तेसै यस क्षणभङ्गुर तुच्छ देहमा क्षण भर निर्वात दीप तुल्य प्रशान्त चिन्तले ध्यान गर्ने प्रक्रियाको नाम प्रशान्त वा केवल कुम्भक कहिन्छ।

त्रिर्जानुमण्डलं स्पृश्य छोटिरेकाऽभिधीयते ॥
छोटिकाभिर्द्वादशभिर्म्मात्रिका परिकल्पिता ॥२४॥
मात्राद्वादशभिः प्राणः प्राणायाम इति स्मृतः ॥
प्राणायामैर्द्वादशभिर्धारणेति प्रकीर्त्तिता ॥२५॥
धारणाभिर्द्वादशभिर्य्योजना समुदीरिता ॥
योजनाभिर्द्वादशभिर्योगसंज्ञा कृता पुरा ॥२६॥

मध्यम गतिले तीन पटक घुँडामा हातले मुसारेर एक छोटी हुन्छ। वार छोटीको एक मात्रा हुन्छ। वार मात्राको एक प्राण वा प्राणायाम हुन्छ। वार प्राणायामको एक धारणा हुन्छ। वार धारणाको एक योजना हुन्छ। यसै गरी वार योजनाको यौटा योग हुन्छ। यो संज्ञाकरण पुरातन आदिकालमा योगविद्याका आद्य देशिक आदिनाथ शिवले गरेको हो। तेसको अनुकरण गोरक्षसनक आदिले गरे। यो धारणावेलाको परिवार भनियो।

इत्येष धारणावेलापरिवार उदाहृतः ॥
नानाप्रकारसिद्धान्तनिस्पन्दार्थनिंरूपणे ॥२७॥
आगमान्योन्यविश्लेषे हेयोपादेयसंशये ॥
ऊहयित्वा स्वचित्तेन न्याययुकत्यनुसारिणा ॥२८॥
इदं ग्राह्यमिदं नेति छेत्तुं तर्क्को विधीयते ॥

योगसिद्धहरु द्धारा प्रतिपादित नाना प्रकारका सिद्धान्तहरुको सारोद्धार निचोड अर्थको निरूपण गर्दा, अगाध आगम निगमहरुका अन्योन्य विषमताहरुको विश्लेषण गर्दा हेय र उपादेय (के त्यागने ? के ग्रहण गर्ने ? भन्ने) संशय गर्दा, एवं अरु समस्या आइ पर्दा , सतां हि सन्देहपदेषु वस्तुषु प्रमाणमन्तः करणप्रवृत्तयः । भनेर आफ्नै योगक्रियाद्धारा शुद्ध चित्तले इदमित्थं उभ्यायेर यो कर्तव्य, यो अकर्तव्य भन्ने निर्णय गर्न न्यायोचित योगमुक्ति अनुसार ऊहापोह गरेर परिच्छेद (सत्यानुसन्धान) को नाम योगशास्त्रमा तर्क भनिन्छ । तर्कोऽप्रतिष्ठः । भनियेको निधो न गर्ने कुतर्क हैन ।

काष्ठलोष्ठसुवर्णेषु मित्रोदासीन शत्रुषु ॥२९॥
स्नेहः सर्वेषु तुल्यत्वं समाधिरिति संज्ञितः ॥

काठमा माटाका डल्लामा र सुनमा तथा शत्रुमा, मित्रमा र उदासीनमा समान भाव, समान स्नेह र समान दृष्टिको नाम सगाधि **भनिन्छ**। एवं, खं ब्रह्म । सर्वं खल्विदं ब्रह्म । आत्मा खलु विश्वमूलम् । भन्ने यौगिक भावनाको **नाम समाधि** हो ।

ज्ञानं मौनं व्रह्मचर्य्यं दुर्व्वासेन्द्रियनिग्रहः ॥३०॥
क्रियाऽ प्रादुर्भावनञ्च षडुपायाः प्रकीर्त्तिताः ॥

ज्ञान १, मौन २, ब्रह्मचर्य ३, दुर्वासः ४, इन्द्रियनिग्रह ५, क्रियाको अप्रादुर्भावन ६ ई छ वटा योग सिद्धिका उपाय हुन् ।

वेदोपवेदवेदाङ्गं लौकिकं ज्ञानमुच्यते ॥३१॥
तत्त्वसिद्धान्तयोगस्तु लोकोत्तरमिति स्मृतम् ॥

ॠग्वेद १, यजुर्वेद २, सामवेद ३, अथर्ववेद ४ ई चार वेद । आयुर्व्रेद १, धनुर्वेद २, गान्धर्ववेद ३, शिल्पवेद ४ ई चार उपवेद । शिक्षा १, कल्प २, व्याकरण ३ निरुक्त ४ छन्द ५ ज्योतिष ६, ई छ वेदाङ्ग र इनका आधारमा वनेका अरु समस्त ४ विद्या १८ विद्या लौकिक ज्ञान हुन् । सत्य चैतन्य आनन्दमय आत्म तत्व अनुसन्धान गर्ने सिद्धहरुका सिद्धान्तको योग (योगशास्त्र) लोकोत्तर ज्ञान सूक्ष्मवेद हो ।

मिथ्या पिशुनसम्भिन्नपारुष्यवचनानि च ॥३२॥
जल्पतः सम्भवन्त्येते तस्मान्मौनं प्रशस्यते ॥

मिथ्या, छुल्याईं, फटाई, कठोर वचन, इत्यादि इ दोष बोल्दाखेरी स्वतः प्रायः ह्वै जान्छन् । तस्मात् मौन (धेरै न बोलेर शान्त भैकन योगाभ्यास गर्नु) प्रशंसनीय छ ।

अगम्य्नारीसंसर्गात् परदारानिषेवणात् ॥३३॥
सिद्धिर्न जायते योगः समुत्पन्नश्च नश्यति ॥
तस्मात् तत्परिहारार्थे व्रतमेतदुदाहृतं ॥३४॥
ब्रह्मचारी तदा भूत्वा स्थातव्यं सिद्धिमिच्छता ॥

अगम्य नारीका संसर्गले र परदाराका सेवनले सिद्धि हुन्न । योगसिद्धका लक्षण देखियेका पनि नष्ट हुन्छन् । तस्मात् त्यो दोष त्यागनाको लागि यो ब्रह्मचर्य व्रत राखियेको हो । तसर्थ योगसिद्धिको इच्छा गर्नेले ब्रह्मचारी रहनु पर्छ ।

राग उत्पद्यते पुंसां शोभनेन तु वाससा ॥३५॥
काषायं कुत्सितं वापि तदा वासः समिष्यते ॥

सुन्दर वस्त्र धारण गर्‍यो भने मानिसमा राग उत्पन्न हुन्छ। तसर्थ काषाय (गेरु वा) अथवा न राम्रो फाटे टुटेको तर पवित्र वस्त्र वाञ्छनीय छ।

इन्द्रियाणि शरीर स्थाः शत्रवो नित्यबाधकाः ॥३६॥
तस्मात् तानि विजित्यादौ पश्चाद्योगं समाचरेत् ॥

मन र अहङ्कार सहित कर्मेन्द्रिय र ज्ञानेन्द्रियहरु भनेका आफ्नै शरीरमा वसेका नित्य विघ्न बाधा दिने शत्रु हुन् तसर्थ आदिमा तिनलाई जितेर पछि बाट योगाभ्यास गर्नुपर्छ।

अप्रकाशेन कर्त्तव्या यस्माद् योगक्रियाः सदा ॥३७॥
अप्रादुर्भाव इष्यन्ते तस्माद् योगक्रियास्तथा ॥

योगक्रिया सदा अप्रकाशमा (एकान्त शान्त स्वच्छ स्थानमा) गर्नुपर्छ। यसैलाई अप्रादुर्भाव भनिन्छ र प्रकाशे सिद्धिहानि स्यात्। तेसैले योगक्रियाको प्रदर्शन गर्नु हुन्न। सुपायहरुलाई पनि एकान्तमा अभ्यास गराउनु पर्छ।

उत्साहो निश्चयो धैर्य्यं सन्तोषस्तत्त्वदर्शनं ॥३८
क्रतूनाञ्चोपसंहारः षट्साधनमिति स्मृतं ॥

उत्साह १, निश्चय २, धैर्य ३, सन्तोष ४ तत्त्वदर्शन ५, क्रतूपसंहार ६ ई छ वटा शीघ्र योगसिद्धिका साधन हुन्।

योगाभ्यासेषु या श्रद्धा, उत्साह इति भण्यते ॥३९॥
अवश्यं साधयामीति वृत्त्युत्पादः स निश्चयः ॥
सिद्ध्यसिद्ध्योर्मनोवृत्तिर्तुल्यता धैर्य्यमुच्यते ॥४०॥
यथालब्धान्नवस्त्रेषु प्रीतिः सन्तोष उच्यते ॥

योगाभ्यासमा तत्परतापूर्वक श्रद्धा उत्साह भनिन्छ। योगको साधना अवश्य गर्न शक्छु र सिद्धि प्राप्त गर्ने छु भन्ने दृढ निष्ठापूर्ण चित्तवृत्तिलाई निश्चय भनिन्छ। शीघ्रसिद्धि होस् वा विलम्ब होस योगक्रियामा कुनै शिथिलता न गरेर एकटङ्कार चित्तवृत्ति राखनु धैर्य भनिन्छ। यथालाभ अन्न वस्त्र (दैव इच्छा) भाग्यवश प्राप्त शरीरका साधन भोजन कपडा आदिमा तुष्टि प्रसन्नतालाई सन्तोष भनिन्छ।

आत्मतत्त्वं जयम्प्रोक्तं विद्या तत्त्वं तथा त्विदं ॥४१॥
शिवतत्त्वं नमस्कारैस्तत्त्वत्रयमुदाहृतं ॥
तत्त्वमेकं समभ्यस्य सर्व्वविज्ञानमात्रकं ॥४२॥
ग्राह्यत्वाग्राह्यसंविद्यांकार भेदैस्त्रिधा इति ॥
पञ्च भूतान्यहङ्कारः सूक्ष्म आत्मा महांस्तथा ॥४३॥
एकादशेन्द्रियगणः पञ्च तन्मात्रगोचराः ॥
पञ्चविंशतितत्त्वानि प्रोक्तान्येतानि पण्डितैः ॥४४॥
तेषां गुणविभागज्ञा विज्ञेया योगिनः सदा ॥

आत्मतत्त्व १, विद्यातत्त्व २, शिवतत्त्व ३ ई तीन प्रकारका तत्त्व छन्। वस्तुतस्तु यौटै तत्त्व हो र यौटै शिव तत्त्वको ध्यानाभ्यास गर्दा सवै तत्त्वको ज्ञान हुन्छ। ग्रास्य १, अग्रस्य २, संविद्या ३ का भेदले यौटै शिवतत्त्व त्रिधा भयेको हो। अनि ५ भूत (पृथ्वी १, जल २, तेज ३, वायु ४, आकाश ५) अहङ्कार ६ सूक्ष्म प्रकृति ७ आत्मा महत्तत्त्व ७ एघार ११ इन्द्रियगण (मन ५, ज्ञानेन्द्रिय आँखा १ कान २, नाक ३, जिव्रो ४, छाला ५ तथा ५ कर्मेन्द्रिय हात १, खुट्टा २, पायु ३, उपस्थ ४, वाणी ५ सवै ११ सहित) २० पञ्च तन्मांत्र गोचर (शव्द १, स्पर्श २ रूप ३ रस ४ गन्ध ५) सवै मिलेर २५ तत्त्व सांख्य दर्शन आदिमा सिद्ध कपिल मुनि आदिले प्रतिपादन गरेका छन् र ती २५ तत्त्वका गुणहरुको विभाग गर्ने ज्ञान पनि योगीहरुमा सदा छ।

याज्ञिकैर्व्विहिता धर्म्मा भोगैश्वर्य्यधनावहा: ॥४५॥
स्वर्ग्गमात्रपरा धर्म्मा न तु संसार मोचका: ॥
भोगैश्वर्य्य प्रसक्तानां योगसिद्धिर्न जायते ॥४६॥
तदादि तस्माद्यज्ञानामुपसंहार इष्यते ॥
वेला निद्राऽऽसनंस्थानं चत्वारो नियमा: स्मृता: ॥४७॥
मूत्रविष्ठासमुत्सर्गे भोजने चैव योगवित् ॥
वेलामेतावती त्यक्त्वा शषं युञ्जीत तत्पर: ॥४८॥

कम्मेति मीमांसका: भनियेका याज्ञिकहरुद्वारा विधि विधान गरियेका धर्महरु विषय भोग: ऐश्वर्य र धन दिन्छन्। तिनको परम लक्ष स्वर्ग सम्म छ र तेतं भुक्त्वा स्वर्गलोकं विशालं क्षीणे पुण्ये मर्त्यलोकं विशन्ति। ती धर्म संहार मोचक (जन्म-मृत्युमय संसारदेखि मुक्ति दिने) होइनन्। भोग र ऐश्वर्य मा आसक्त रहनेहरुको योगसिद्धि हुन सक्तैन। तेसैले योगमा यज्ञहरुको उपसंहार (अन्त) गरियेको छ।

वेला १, निद्रा २, आसन ३, स्थान ४ ई चार नियम छन्। मल मूत्र त्यागने बेला र भोजन गर्ने वेला बाहेक अरु शेष सवै बेलामा युञ्जान योगीले योगको निरन्तर तत्पर भएर अभ्यास गर्नुपर्छ। स तु दीर्घकालनैरन्तर्यसत्कारसेवितो दृढभूमि: यसरी चिर कालसम्म अविरल गतिले निरन्तर सत्कार पूर्वक योगाभ्यास गऱ्यो भने योगसिद्धिको भूमिका दृढ हुन्छ।

अन्धवज्जडवच्चैवोन्मत्तवन्मूकवत्तथा ॥
एवं भूत्वा सदा योगी ध्यानासक्तो महीं चरेत् ॥४९॥

त्रिकालदर्शी र त्रिलोकदर्शी भैकन पनि केहि न देखने अन्धा झैं भयेर, आत्मचैतन्यपूर्ण भैकन पनि जड मूर्ख जस्तो भयेर, निरुद्ध चित्तवृत्ति एकाग्र ध्याननिष्ट रहेर पनि उन्मत्त (बौलाहा) समान भयेर, परा र अपरा विद्यामा पारङ्गत वाग्मी भयेर पनि मूक (लाटो) तुल्य भयेर सदा योगी शिवध्यानमा निमग्न भैकन भूमण्डलमा भ्रमण गरोस्। जसरी जड भरत, गार्गी आदि गर्थे। यसरी पदयात्रा गर्दा पाइला पाइलामा पवित्र तीर्थ हुन्छन्।

पूर्वयामश्चतुर्यश्च द्वावेतौ न स्वपेन्निशि ॥
मध्ययामद्वयं योगी निद्रां सेवेत सर्व्वदा ॥५०॥

युञ्जान योगी योगारम्भिक अभ्यास कालमा राति प्रथम प्रहर र चतुर्थ प्रहरमा न सुतोस्। मध्यका २ याममा (२ प्रहर मध्य रात्रिमा) योगी सर्वदा सुतोस्। यसलाई योगनिद्रा भनिन्छ।

षड्रसोपेतसुस्निग्धस्वादुसान्द्रसुगन्धिना ॥
उदरस्यार्द्धभागन्तु भोजनेन प्रपूरयेत् ॥५१॥
पानीयेन चतुर्भागं तच्छेषं शून्यमिष्यते ॥
वायोस्सञ्चारणानार्थमाहारनियमः स्मृतः ॥५२॥

उक्त युन्जान योगीले योगाभ्यास समयमा यस नियमले भोजन गर्नुपर्छ – पेटको आधा भाग, षड्रसयुक्त सुस्निग्ध (गोघृतादिले चिल्लो) हठयोग प्रदीपिकामा भने भैं स्वादिष्ट सान्द्र (रसिलो) सुगन्धयुक्त भोजनले भर्ने, चौथाई भाग पानीय (पानी गोदुग्ध आदि सात्त्विक पेय) ले भर्ने, तच्छेष (चौथाइ भाग) शून्य राखनु पर्छ। किनकि तेतिमा वायुले खेलनु पर्छ र भोजन अजीर्ण हुँदैन , स्वास्थ्य ठीक रहन्छ। योगाभ्यासमा कुनै बाधा हुँदैन। यसलाई योगाद्वहार भनिन्छ।

वल्मीकसन्निकृष्टाग्निशुष्कवृक्षजलाश्रयम् ॥
दंशादिकीटकाकीर्णं स्थानमेतद् विवर्जयेत् ॥५३॥

योगाभ्यासी योगीले, धमिराका गोला लागेको, अग्नि, सुकेका रुख, जलाशयका निकटमा, डाँस, लामखुट्टे, भुसुना, कमिला, प्यूषा, जुका, सर्प, विच्छी आदि भयेका ठाउँमा आत्मा लायेर योगाभ्यास गर्नु हुँदैन। विध्न बाधा र विक्षेप हुन्छ।

विविक्ते निर्जने शान्तेवृक्षमूले शिवालये ॥
नदी तीरे गृहे वापि योगं युञ्जीत यत्नतः ॥५४॥

एकान्त, प्रशान्त, निर्जन, स्वच्छ, शुद्ध, सुन्दर, सुवास भयेका, नदीतीरमा उपवनमा वनमा, पर्वतमा, हरिया वृक्षका मूलमा शिवालयमा अथवा प्रशान्त पवित्र घरमा युन्जान योगीले प्रयत्नपूर्वक योगाभ्यास गर्नुपर्छ। यस्तो ठाउँ खोजेर योगासन लाउनुपर्छ।

मानसो यौगपद्यश्च द्विरूपो योग उच्यते ॥
अकृत्वा प्राणसंरोधं मनसैकेन केवलं ॥५५॥
ध्यायेत परमं सूक्ष्मं स योगो मानसः स्मृतः ॥
संयम्य मनसा प्राणं प्राणायामैर्मनस्तथा ॥५६॥
एवं ध्यायेत् परं सूक्ष्मं यौगपद्यः स उच्यते ॥

यौटा मानस अर्को यौगपद्य, योग द्विप्रकारको छ। प्राणायाम न गरेर केवल एक मनले परम सूक्ष्म शिवतत्त्वको ध्यान गर्ने प्रक्रियाको नाम मानस योग हो र मनले प्राणको संयम (प्राणायाम) तथा प्राणले (प्राणायामले) मनको संयम गरेर परम सूक्ष्म तत्त्व कल्याणमय शिव आत्माको ध्यान गर्ने योगयुक्तिको नाम यौगपद्य योग हो।

संक्षिप्ता प्रथमा ज्ञेया विशाला समनन्तरं ॥५७॥
ततो द्विकरणी चेति त्रिविधो योग उच्यते ॥

प्रथम संक्षिप्त (योगक्रिया) तदनन्दर विशाला, अनि द्विकरणी, यस प्रकार त्रिविध योग हुन्छ। यथा –

ब्रह्मादिस्तम्बपर्यन्तं सर्व्वे स्थावरजङ्गमाः ॥५८॥
स्वर्गा पातालमर्त्येषु यथास्थिति व्यवस्थिताः ॥
चिन्तयित्वा पुनः सर्व्वान् संक्षिप्य परमात्मनि ॥५९॥

प्रलीनमनसा ध्यायेत् क्रमाच्छून्यं भवेज्जगत् ॥
तदा विशिष्यते शुद्धः स्व एकः परमाक्षरः ॥६०॥
एष योगविधिः प्रोक्तः संक्षिप्तो नाम नामतः ॥

ब्रह्मादेखि तृण पर्यन्त सवै स्थावर जङ्गम जीव जन्तुहरु, स्वर्ग, मर्त्य, पाताल पर्यन्त आफ्ना आफ्ना ठाउँमा व्यवस्थित छन् भन्ने ध्यान गरेर पुनः सवैलाई क्रमशः शून्य हुन्छ , त्यस अवस्थामा त्यो केवल एकमात्र शुद्ध परम अक्षर अविनाशी निरञ्जन निराकार शिव तत्त्व अवशिष्ट रहन्छ यस योगविधिको नाम हो संक्षिप्त योग ।

सुसूक्ष्मं चिन्तयित्वादौ परमात्मानमव्ययं ॥६१॥
तस्य तेजसि निर्ञ्जातां शक्तिं योगाद् विचिन्तयेत् ॥
सदाशिवादीस्तान् सर्व्वान् परिपाट्या भवे स्थितान् ॥६२॥
पश्चात् कृत्स्नं जगद् ध्यायेद् विशाला परिकीर्त्तिता ॥
एषा द्विकरणी नाम योगस्य विधिरिष्यते ॥

आदिमा अत्यन्त सूक्ष्म अव्यय परमात्माको ध्यान गरेर, तिनै परमात्माका तेजमा प्रकट भयेर निक्लेकी शक्तिको ध्यान योगले गरोस्, अनिं सृष्टिक्रमस्थ सदाशिवादि सवैको क्रमशः ध्यान गरोस्, त्यसपछि समस्त स्थावर जङ्गम् जगत्को ध्यान गर्ने यौगिक प्रक्रियाको नाम विशाला हो। ई दुवै लाई मिलायेर प्रलय र सृष्टिको परम्परया ध्यान गर्ने योगमुक्तिको नाम द्विकरणी योगविधि हो ।

क्षुन्निद्राऽऽलस्यमैश्वर्य्यं भोगः स्नेहो धनं यशः ॥६४॥
धर्म्मो विद्या च विज्ञेया उपसर्ग्गगणा दश ॥

भोक-प्यास, निद्रा, आलस्यः ऐश्वर्य, भोग, स्नेह, धन, यस, धर्म र विद्या ई दश प्रकारका उपसर्ग गण हुन् ।

अणिमा लधिमा प्राप्तिः प्राकाम्यं महिमा तथा ॥६५॥
ईशित्वञ्च वशित्वञ्च यत्र -कामावसायिता ॥
इत्यैश्वर्य्यगुणा अष्टौ पुरा प्रोक्ता मनीषिभिः ॥६६॥

अणिमा १, लधिमा २, प्राप्ति ३ प्राकाम्य ४, ईशित्व ६ वशित्व ७, यत्र कामावसायिता ८ ई आठोटा ईश्वरको यौगिक सिद्धिगुण हुन् ।

गुणैरमीभिः संयुक्तो भवेद् योगी न संशयः ॥
यस्य प्रभावात् सूक्ष्मत्वं यायाद् योगी यथेच्छया ॥६७॥
दृष्टेरगोचरं यावत् सगुणो भव्यतेऽणिमा ॥

उपर्युक्त ई ८ गुणले युक्त योगी हो, यसमा संशय छैन। जसका प्रभावले योगी यथेच्छ सूक्ष्मतम भयेर आँखाले देख्नै न सकिने हुन्छ, त्यो अणिमा गुण हो (अणिमा भन्ने सिद्धि हो) ।

गुणेन महता येन निर्द्दग्धदुरितो लघु ॥६८॥
यायाद् विहायसा योगी स गुणो लधिमा स्मृतः ॥

सवै पातक प्राणायाम द्वारा दग्ध भैसकेको योगी जुन महान् गुणले लघु (हलुक) भयेर पक्षी झैं आकाशमा उडेर जान्छ, त्यो गुण लघिमा हो लघिमा सिद्धिले योगी रुवा जस्तो हलुको भयेर समस्त ब्रह्माण्डमा पुग्छ ।

यद्यथोक्तं क्षरेद् द्रव्यं तत्तच्चिन्तामणेरिव ॥६९॥
योगिना प्राप्यते यस्मात् स गुणः प्राप्तिरुच्यते ॥

योगीले जुन २ वस्तु जति जस्तो भन्यो, त्यो २ वस्तु तेस्तै तेत्तिनै चिन्तामणि बाट पाये झैं जसबाट पाइन्छ, त्यो गुण प्राप्ति हो र प्राप्ति सिद्धिबाट सवै थोक पाइन्छ ।

अनेकदेहमात्मानं कुरूपं वा मनोरमं ॥७०॥
ऋद्ध्या करोति यद् योगी तत् प्राकाम्यमुदीर्य्यते ॥

जुन गुणले योगी सुरूप वा कुरूप आफ्ना अनेक देह बनाउन र लोप गर्न सब्छ, त्यो ऋद्धिगुण प्राकाम्य हो । प्राकाम्य सिद्धिद्वारा योगी जस्तो बन्न खोज्छ उस्तै आफु हुन्छ र अरुलाइ पनि बनाउँछ ।

गुणेन येन सम्पन्नो देवासुरनरादिभिः ॥७१॥
सर्व्वत्र पूज्यते योगी स गुणो महिमा मतः ॥

जुन गुणले सम्पन्न योगी सर्वत्र देवता. दानव. मानव. आदि द्वारा पूजित हुन्छ त्यो गुण महिमा सिद्धि हो । महिमाले महान हुन्छ ।

योगी सर्व्वानबष्टभ्य करोत्यज्ञानवन्ध्यताम् ॥७२॥
प्रभुत्वं न्यायवत् सौख्यं तदीशित्वमुदीर्यते ॥

जुन ईश्वरीय गुणद्वारा योगी समग्र चराचर प्राणीहरुलाइ थामेर ज्ञान दियेर अज्ञानरहित पारेर चेतनशील राखेर न्यायोचित सौख्य प्रदान गरेर प्रभुत्वस्थापित गर्छ र निष्पक्ष कर्माध्यक्ष हुन्छ, त्यो गुण ईशित्व सिद्धि भनिन्छ ।

यत् सेव्यते सर्व्वसत्त्वैः सौभाग्यगुणमोहितैः ॥७३॥
योगी भृत्यैरिव स्वामी वशित्वं तदिभधीयते ॥

जुन सौभाग्यमय गुणद्वारा मुग्ध भयेर संसारमा सवै स्थावरजङ्गम जीव जन्तुहरु योगीको सेवा सर्वात्मना सेवक भयेर गर्छन जसवाट स्थायी सेव्यसेवकभाव रहन्छ, त्यो गुण वशित्व सिद्धि भनिन्छ ।

यत्र यत्र भवेत् प्रीतिस्तत्र गत्वावसीदति ॥७४॥
मनोजवेन सा ख्याता यत्र-कामावसायितेति ॥७५॥

एकदा नारदो योगी लोकानां हितकाम्यया=एक दिन् नारद सत्य लोक् पुगिगया लोक्को गरौं भनी, भने झैं तथा साधने हि नियमोऽन्यजनानां योगी नान्तु तपसाऽखिलसिद्धिः । भनेर योगी अरु कुनै बाह्य भौतिक साधनको खाँचो न राखी आफ्नै इच्छाअनुसार जुन जुन ठाउँमा एवं जुन जुन लोकमा गएर जे जस्तो काम गर्न खोज्छ मनोजवेन (जति छिटो मन पुग्छ तेत्ति छिटो पञ्च धारणा सिद्धिद्वारा) पुगेर जस्तो आफ्नु प्रीति र आह्वानकर्ता भक्तजनको प्रीति हुन्छ र जता जस्तो जे काम पर्छ त्यो कार्य तत्काल सम्पन्न गर्न शक्त छ, त्यो गुण यत्रकामावसायिता भन्ने माहेश्वर सिद्धि हो ।

इति धर्म्मपुत्रिकायां संहितायां साधन प्रकरणन्नाम प्रथमः पटलः ॥१॥
(नरहरिकृतानुवादे साधननामादिमः पटलः)

अथ पशुपतिमते शिवधर्म्मे महाशास्त्रे धर्मपुत्रिकायासंहितायाम्
आसनप्रकरणन्नाम
द्वितीयः पटलः

ॐ नमः शिवाय

अष्टाभिः साधनै रेभिश्चित्तं कायं च यत्नतः ॥
शोधयित्वा ततो योगी योगाभ्यासं समाचरेत् ॥७६॥

उपर्युक्त इनै आठोटा साधन द्वारा चित्त र काम (तन र मन) प्रयत्नपूर्वक शोधेर सव प्रकार पवित्र एवं प्रशान्त भयेर योगीले योगाभ्यास थालनु पर्छ ।

इष्टदेवं नमस्कृत्य सद्गुरुञ्च प्रयत्नतः ॥
आस्थीयात् प्राङ्मुखो भूत्वा शुचिर्योगी विशेषतः ॥७७॥

श्रद्धा भक्तिपूर्वक आफ्ना इष्टदेवतालाइ नमस्कार गरेर अनि योगको सत्पथप्रदर्शक गुरुलाइ ढोकेर यथोक्त एकान्त प्रशान्त पवित्र स्थानमा विधिवत् चैलाजिनकुशोत्तर आसनमा विशेष पवित्र भयेर योगी पूर्व मुख गरेर योगाभ्यास गर्न पद्मासनादिमा वसोस् ।

पद्मिस्वस्तिकपीठानि स्थलमञ्जलिकासनं ॥
अर्द्धचन्द्रञ्च दण्डञ्च सर्व्वतोभद्रमेव च ॥७८॥
एवं नामभिरष्टाभिरासनप्रकरणं स्मृतं ॥
तेषां संस्थानभेदन्तु प्रवक्ष्यामि यथाक्रमं ॥७९॥

पद्मी आसन वा पद्मासन १ स्वस्तिकासन २ पीठासन ३ स्थलासन ४ अञ्जलिकासन ५ अर्धचन्द्रासन ६ दण्डासन ७ सर्वतोभद्रासन ८ यसरी ई आठ नामका आठै प्रकारका आसनको यो आसनप्रकरण हो र ती आसनहरुका संस्थानभेद (कुन आसन कसरी गर्ने ? भन्ने प्रक्रिया) यथाक्रम (क्रमै सँग) म (सिद्ध सनक मुनि र धर्मशीलसूनु) राम्रो गरी भन्ने छु ।

आस्थित्योत्तान पादाग्रौ ग्रन्थिवच्चेतरेतरौ ॥
ऊर्व्वोरूपरि विन्यस्य शिलष्टपार्ष्णी सुसंस्थितौ ॥८०॥
उत्तानं वामहस्ताग्रं पार्ष्ण्योरुपरि विन्यसेत् ॥
तस्योपरि पुनस्तद्वत् स्थाप्य दक्षिणपल्लवं ॥८१॥
अवक्रस्तब्धनिस्पन्दगात्र शैलावलम्बितं ॥
बाहुयुग्मं तथा कार्य्यं यथा मृदुलताद्वयं ॥८२॥
समुद्भवदथोष्ठाभ्यामागाढपिहितं मुखं ॥
दन्ताग्रे न्यस्य जिह्वाग्रं स्थिरं ग्रीवां च मस्तकं ॥८३॥

नासाग्र मात्रं दृष्ट्यर्द्धं निमीलल्लोनचद्वयं ॥
पद्मासनमिति ज्ञेयं प्रशस्तं सर्व्वयोगिभिः ॥८४॥

पद्मासन १

उपर्युक्त विधिले योगासन माथि वसेर योगाभ्यासीले पद्मासन यसरी लाउनु पर्छः– प्रथम वाञा पाउ दाञा ऊरुमा अनि दाञा पाउ वाञा ऊरुमाथि राखेर दुवै कुर्कुच्चा टप्प मिलाउनु पर्छ, तेसै गरी प्रथम वाञा हात अनि वाञा हात माथि दाञा हात राखनु पर्छ, दुवै पाउ र दुवै हात उत्ताना (माथि पट्टी फर्केका) हुनु पर्छ दुवै घुँडा टप्प भैमा वसेका हुनु पर्छ, सुमेरु दण्ड ऋजु (डँडालनु सोझो साल) हुनु पर्छ, कण्ठकूपदेखि चार अङ्गुल (आफ्नै हातका) माथि चिउडो स्थिर रहनु पर्छ, पहिले वाञा पाउ. अनि दाञा पाउ. अनि वाञा हात. अनि दाञा हात क्रमै सँग फक्रहरु फक्रियेका रांता पद्म (कमल) का दल जस्ता तल्ला ठुला उपल्ला अलि साना हलूका भयेर मिलेर रहुन्, हात पाउ परस्पर ग्रन्थिवत् सम्वद्ध रहुन् तर कसैले कसैलाइ न दबावोस्, जसरी कमलदल हंलूका स्वावलम्बी रहन्छन् तेसै गरी शरीरका सवै अङ्ग प्रत्यङ्ग शुद्ध सरल अटल लघु रहुन्, यसरी हिमाल झैँ अचल गाथमा दुवैतिर अवलम्बित दुइटा कोमल लहरा जस्ता दुबै बाहुली कुमदेखिं पाउसम्म कोखामा नटासियेर स्थिर रहुन्, हलुका भयेर दुवै ओठ टम्म मिली रहुन्, तल माथिका दुवै दन्तपङ्क्तिका अग्र माझमा जिव्रोको टुप्पो मध्यस्थ भएर तर न थिचियेर वसोस् तल माथिका दातको भेट नहोस्, मुख वन्द रहोस् तर नकसियोस्, प्रफुल्ल पद्म (कमल) को मुद्रा रहोस्, गलो र शिर नहल्लोस्,आपाद मस्तक सारा शरीर स्थिर रहोस्, आधा खुलेका दुबै आँखाले यौटै बहिर्लक्ष नासाग्र (नाकको टुप्पो) मात्र हेरुन्, सवै क्रिया स्वाभाविकरहुन् कुनै कृत्रिम नहोस्, केहिवेर पछि स्वतः बहिर्मुख आँखाको आत्मदृष्टि अन्तर्मुख हुन्छ, ज्योतिः स्वरूप आत्मा शिवको दर्शन हृदयमा हुन्छ अथवा ब्रह्मरन्ध्रस्थ सहस्रदल पद्ममा हुन्छ। शिव.पार्वती सरस्वति गोरक्ष, मार्कण्डेय. दुर्वासा. शुकदेव. वामदेव. नचिकेता. सनक. सनन्दन. सनातन. सनत्कुमार. कपिल. पतञ्जलि. नरदादि सवै योगीहरु द्वारा प्रशंसा गरियेको र स्वयं वस्ने आसन गरियेको पद्मासन यै हो।

पद्म भनेको कमल हो, पद्मासन भनेको कमलासन हो। पद्म जस्ता आसनलाइ योगशास्त्रमा पद्मासन भनिन्छ। पुष्पमध्ये पद्म उत्तम मानिन्छ र यस मानव शरीरमा पनि धेरै पद्म छन्– करकमल. चरणकमल. मुखक्कमल. नेत्रकमल इत्यादि। नाक पनि कमल हो. कान पनि कमल हुन्। यसै गरी शरीरभित्र पनि कमल छन्। कमलका दल चक्रका अरा जस्ता हुनाले कमललाइ चक्र पनि भनिन्छ र षड्चक्रं षोडशाधारं त्रिलक्षं व्योमपञ्चकम्। स्वदेहे ये नजानन्ति कथं सिध्यन्ति योगिनः ? भनिन्छ। ती षट् चक्र कमल ई हुन्–मूलाधार चक्र १ स्वाधिष्ठान चक्र २ मणिपूर चक्र ३ अनाहत चक्र ४ विशुद्ध चक्र ५ आज्ञा चक्र ६ सवैं माथि सहस्र दल कमल सहस्रार चक्र मस्तकमा ब्रह्मरन्ध्रमा (माथामाथि) छ। सबै कमलमा न्यूनाधिक मकरन्द मधुमय अमृत हुन्छ। यो अमृत नै जीवको जीवन हो। सर्वोपरि स्थित सहस्रादल कमलवाट सर्वाधिक अमृतको धारा निरन्तर सुषुम्णाका सरस्वतीप्रवाहमा झरी रहन्छ तर खेचरी मुद्रा न गर्दा जठराग्निका ज्वालामा स्वाहा हुन्छ। खेचरी मुद्रा लाउँदा जिह्वाग्रमा पर्छ र जिव्रामा साडे तीन करोड नाडीको मुहान छ. यसै मुहान वाट आपादमस्तक सर्वाङ्गका खेतमा ती अमृतका कुला लाग्छन र सर्वत्र हरियो भरियो तुष्टि र दिव्य दृष्टि रहन्छन्। इत्यादि लाभार्थ यो पद्मासन मानव मात्रले गर्नु उचित छ। पद्मासन लाउदा शिव रूपी आत्माको

सूर्योदय हुञ्छ र भित्र बाहिरका सवै कमल प्रफुल्ल हुञ्छन्। कमल खुले पछि मकरन्द केशर अमृत वद्छ र आयु बद्छ स्वास्थ्य पनि वद्छ। प्रतिपद्दृष्टि १ अमावास्यादृष्टि २ पूर्णिमादृष्टि ३ यसरी योगशास्त्रमा तीन दृष्टि मानियेका छन् र संसारलाइ हेरौं भनेर ट्वाल्ल खुलेका आँखालाइ प्रतिपदा दृष्टिले संसार देखिञ्छ तर आत्मा देखिन्न निद्रा मार. काल संहार भनिञ्छ। निद्रा भनेको काल हो. काली रात हो. काली रातमा उल्लूको राज हुञ्छ। संसार पनि देखिन्न. आत्मा पनि देखिन्न। आँखा बन्द गर्ने (चन्द्र–सूर्यको प्रकाश नष्ट गर्ने औँसीको रात गर्ने) अमावास्या दृष्टि पनि योगशास्त्रमा घनिष्ट मानिञ्छ. जस्ले सांसारिक सुखभोग पनि दिन्न र योग पनि सिद्ध हुन्न। केवल कालको रोग मात्र हुञ्छ। तसर्थ योगीहरुले योगशास्त्रमा अर्धावलोकनं यत् स्यात् पौर्णमासीं बदन्ति ताम्। भनेर पद्मासनका अर्धोन्मीलित लोचनावस्थालाइ पूर्णिमा दृष्टि मानेर उपयोग गरेका छन। यसरी पद्मासनमा वसेर पूर्णिमा दृष्टिले नासाग्र पछि स्वतः अन्तर्मुख भयेर शिवदर्शन गर्ने योगीको अवस्था योगसारावलीमा शिवगोरक्षनाथले भने जस्तो हुञ्छः- उन्मेषः प्रतिपच्चक्षुरमावास्यास्तलोचनम्। अर्धावलोकनं यत् स्यात् पौर्णमासीं वदन्ति ताम्। न जागरस्वप्तसुषुप्तिभावो न जीवनं नो मरणं न चित्तम्। निर्जीवकाष्ठोपमयोगिराजो विराजते सर्वसमो निरीहः। पद्मासनले यस्तो तुरीयावस्था ल्याउँछ. जस्मा जीव र शिवको सत् चित् आनन्दमय योग हुञ्छ।

संस्थायौ भूतले पादावासनस्थेन योगिना ॥
दक्षिणं वामभागे तु वामपादन्तु दक्षिणे ॥८५॥
अन्योन्याभिमुखं धृत्वा मृगशीर्षकरद्वयं ॥
पूर्वोक्तेनैव गात्रेण स्वस्तिकासनसंज्ञितं ॥८६॥

स्वस्तिकासन २

उपर्युक्त विधिवत् आसनमा पूर्वाभिमुख वसेर योगीले यसरी स्वस्तिकासन लाउनु पर्छः– सिद्धासन लाउदा जसरी दुवै पाउ भैमा टप्प राखिञ्छन तेसै गरी दुवै दाञा पाउ राखेर दक्षिणावर्त स्वास्तिक चिन्ह जस्तो पादुमुद्रा दुवै पाउ माथि अन्योन्य अभिमुख दुवै हात मिलायेर (वाञा हात माथि दाञा हात राखेर) दुवै हातका औँला मृगका शिरमा कान ठडिये झैँ ठड्याउने र अरु प्रक्रिया सवै उक्त पद्मासनका जस्तै गर्दा स्वस्तिक चिन्ह जस्तो स्वस्ति (कल्याणकारी) स्वस्तिक आसन हुञ्छ।

आसनस्थेन पादौ द्वौ न्यसनाद् भूतले समं ॥
जानुद्वयोर्हस्ततले थि(कृ)त्वा पीठासनं भवेत् ॥८७॥

पीठासन ३

उपर्युक्त विधानले आसनमा पूर्वाभिमुख वसेर योगीले पीठासन यसरी गर्नु पर्छः– दुवै पाउ स्वस्तिकासन फुकालेर टप्प भैमा टाँस्नु पर्छ र दुवै घुँडामा दुवै हत्केला राखेर अरु सवै क्रिया र मुद्रा पद्मासन कै गर्दा पीठासन हुञ्छ।

अस्मिन्नेवासने भावे भुवि स्थित्वा प्रयोजन ॥
बाहूरुजङ्घासुश्लिष्टं स्थलासनमुदीरितं ॥८८॥

स्थलासन ४

उक्त पीठासनकै मुद्रामा यथाप्रयोजन उसै गरी भैमा वसेर बाहु ऊरुजङ्घाहरुलाइ सुश्लिष्ट राखी अरु क्रिया पद्मासनकै स्थलासन हुन्छ।

भुवि स्थित्वा तु जानुभ्यां सर्व्वगात्रेण योगिना ॥
हृदि हस्तपुटं कार्य्य ज्ञेयमञ्जलिकासनं ॥८९॥

अञ्जलिकासन ५

उक्त विधिले पूर्व फर्केर दुवै खुट्टाका पञ्जा र घुँडा भैमा टेकेर हृदयमा जौँला हात गरी अरु सवै मुद्रा पद्मासनकै गर्दा अञ्जलिकासन हुन्छ।

तल़पादेन वामेन जानुना दक्षिणेन च ॥
स्थित्वा हस्तपुटं कार्य्यमर्धचन्द्रासनं विदुः ॥९०॥

अर्धचन्द्रासन ६

उक्त प्रक्रियाले पूर्व मुख गरी वाञा पाउ र दाञा घुँडा भैमा टेकेर उभियेर जौँला हात गरेर अरु सवै कुरा पद्मासनकै गर्दा आधा चन्द्रमा जस्तो अर्धचन्द्रासन हुन्छ। सवै आसनका नामानुरूप मुद्रा हुन्छन्।

अग्रे प्रसारितौ पादौ सुश्लिष्टौ भूमिसंस्थितौ ॥
उपविश्यार्द्धकायन्ते दण्डासनमिति स्मृतं ॥९१॥

दण्डासन ७

उक्त नियमले आसनमा पूर्व फर्की वसेसर दुवै खुट्टा अगाडी सोज्झै डण्डा झैँ पसारेर भैँमा तथा परस्पर मिलायेर आधा शरीर भैँमा.आधा शरीर आकाशमा राखेर अरु सवै मुद्रा पद्मासनको गर्दा मध्यवक्र दण्ड झैँ दण्डासन हुन्छ।

समपादलब्धभूमि रत्नजानुकलम्बितं ॥
सम्बद्धमसम्बद्धंवा सर्व्वतोभद्रमासनं ॥९२॥

इति धर्म्मपुत्रिकायां संहितायामासनप्रकरणन्नाम द्वितीयः पटलः ॥२॥

सर्वतोभद्रासन ८

उपर्युक्त प्रक्रियानुसार योगी आसनमा पूर्वाभिमुख वसेर संर्वतोभद्रासन गरोसः– दुवै पाउ सम्म पारी भैँमा टप्प टाँसेर सम्बद्ध वा असम्बद्ध दुवै हात दुवै घुँडामा राखेमा सवैतिर भलो सर्वतोभद्रासन हुन्छ। अरु समस्त क्रिया पद्मासन कै जस्तो गर्नु पर्छः सवै आसनमा बाह्य मुद्रामात्र भिन्न हुन्छन्। आन्तरिक यौगिक क्रिया समानै रहन्छन्। स्थिरसुखमासनम्-भनाइ अनुसार अरु आसन पनि लिन सकिन्छन्।

(नरहरिकृतानुवादे, पैठः पटलो द्विंतीयोऽगात्)

अथ पशुपतिमते शिवधर्मे महाशास्त्रे धर्मपुत्रिकायासंहितायां धारणावंशप्रकरणन्नाम

तृतीयः पटलः

ॐ नमः शिवाय

उपविश्य ततो योगी यथोक्तेनासनेन तु ॥
योगस्य धारणावंशे पर्व्वाणि च निरूपयेत् ॥९३॥

पद्मासन प्रमुख उक्त आठ आसन मध्ये यथारुचि यथायोग्य आसन वा अरु आसनमा विधिवत् पूर्व उत्तर मुख गरी वसेर योगीले योगमार्गका धारणावंशप्रकरण मा २८ वटा पर्व पनि सम्यक्तया ध्यानपूर्वक जानी राखनु पर्छ ।

अङ्गुष्ठ प्रथमं पर्व्व द्वितीयं पादमेव च ॥
पार्ष्णिः तृतीयकं पर्व्व चतुर्थं गुल्फमुच्यते ॥९४॥
जङ्घा पञ्चमपर्व्वाहुः षष्ठं जानु विधीयते ॥
ऊरु सप्तममित्युक्तमष्टमं पायुसंस्थितं ॥९५॥
उपस्थो नवमं पर्व्व दशमं नाभिकीर्त्तितं ॥
मनस्त्वेकादशं पर्व्व, उरो द्वादशमुच्यते ॥९६॥
त्रयोदशं कण्ठ उक्तं जिह्वा पर्व्व चतुर्द्दशं ॥
नासिका पञ्चदशकं चक्षुः षोडशमीरितं ॥९७॥
ललाटं सप्तदशकं मूर्ध्न्यष्टादशकं स्मृतं ॥
उपरिष्टादूनविंशमर्च्चिर्विंशतिमन्तथा ॥९८॥
परदेहमेक विंशं द्वीपान्तरमतः परं ॥
कर्णोद्भासित-भोगि-मस्तक-मणि-प्रोन्नद्ध-दंष्ट्राङ्कुरम् ।

जयत्यखिल-खेचर-प्रवर-मौलि-रत्न-प्रभा ।
प्ररोह-परि पीवरी-कृत-नखांशु-पादाम्बुजः ॥
विशाल-नयन-त्रयी-रचित-धाम-धाम-त्रयी-
तिरस्कृत-जगत्त्रयी-परिणतान्धकारो हरः ॥
जय शङ्कर पार्वतीपते मृड शम्भो शशिखण्डमण्डन ।
मदनान्तक भक्तवत्सल प्रियकैलास दया-सुधाम्बुधे ॥
बहवो भवतानुकम्पिता किमितीशान न मानुकम्पसे ।
दधता किमु मन्दराचलं परमाणुः कमठेन दुर्धरः ॥
अपि शूलधरो निरामयो दृढ-वैराग्य-रतोऽपिरागवान् ।
अपि भैक्ष्यचरो महेश्वरश्चरितं चित्रमिदं हि ते प्रभो ॥
शरणं तरुणेन्दु-शेखरः शरणं मे गिरिराजकन्यका ।
शरणं पुनरेव तावुभौ शरणं नान्यदुपैमि दैवतम् ॥
वन्दे देवमुमापतिं सुरगुरुं वन्दे जगत्कारणम् ।
वन्दे पन्नग-भूषणं मृगधरं वन्दे पशूनाम्पतिम् ॥
वन्दे सूर्य-शशाङ्क-वन्हि-नयनं वन्दे मुकुन्द -प्रियम् ।
वन्दे भक्त-जनाश्रयं च वरदं वन्दे शिवं शङ्करम् ॥
त्र्यक्षस्त्रचयव्ययात्मा त्रिसमय-सदृशस्त्रिःप्रतीतस्त्रिलोकी ।
त्राता त्रेतादि-हेतुस्त्रिगुणमयतया त्र्यादिभिर्वर्णितोऽलम् ।
त्रिस्रोतोधौतमूर्धा त्रिपुरजिदजितस्त्रिर्निबन्धस्त्रिवर्गो-
यस्योतुङ्गस्त्रिशूलस्त्रिदशपतिनुतः स्तादरित्रोटनो नः ॥
याः सृष्टिः स्रष्टुराद्या वहति विधिहुतं या हविर्या च होत्री.
ये द्वे कालं विधत्तः श्रुतिविषयगुणा यास्थिता व्याप्य विश्वम् ।
यामाहुः सर्वबीज-प्रकृतिरिति यया प्राणिनः प्राणवन्तः
प्रत्यक्षाभिः प्रसन्नस्तनुभिरवतु वस्ताभिरष्टाभिरीशः ॥
पातालादुत्थितं किं कमलमभिनवं पद्मनाभस्य नाभेः ?
किं ब्रह्मोत्पत्तिपद्मं तलकमलवरप्रेक्षणायोपयातम् ?
लक्ष्म्याः संल्लक्ष्यते प्राक करतल-कलितोत्फुल्ललीलासरोजम् ॥
एषा भाति कुलाचलैः परिवृता प्रालेय-संसर्गिभि-
र्वेदी मेरुशिलेव काञ्चनमयी देवस्य विश्रामभूः ।
शुभ्रैः प्रान्तविकासि-पङ्कज-दलैरित्याकलय्य स्वयं
रौप्यं पद्ममचीकरत् पशुपतेः पूजार्थमत्युज्ज्वलम् ॥
रत्नैः कल्पितमासनं हिमजलैः स्नानञ्च दिव्याम्बरम्,
नाना-रत्न-विभूषितं मृगमदामोदाङ्कितं चन्दनम् ।
जाती-चम्पक-बिल्वपत्र-रचितं पुष्पं च धूपं तथा,
दीपं देव दयानिधे पशुपते हृत्कल्पितं गृह्यताम् ।
सौवर्णे मणि-रत्न-खण्ड-खचिते पात्रे घृतं पायसम्,
भक्ष्यं पञ्चविधं पयोदधियुतं रम्भाफलं पानकम् ।
शाकानामयुतं जलं रुचिकरं कर्पूर-खण्डोज्ज्वलम्,
ताम्बूलं मनसा मया विरचितं भक्त्या प्रभो स्वीकुरु ॥
छत्रं चामरयोर्युगं व्यजनकं चादर्शकं निर्मलम् ,
वीणा-भेरि-मृदङ्ग-काहल-कला गीतं च नृत्यं तथा ।

सर्प-प्रोत-कपाल-शुक्ति-शकल-व्याकीर्ण-वक्षोरगम्,
वन्दे दक्षिणमीश्वरस्य वदनञ्चाथर्व-नादोदयम् ॥

पञ्चमुखी पशुपतिनाथके दक्षिणमुखका ध्यानः — काले आकाश, कालेवादल और काले अभ्रकके समान टल्टल् कर टलकते काले भ्रमरौकं सदृश अथर्ववेदका झङ्कार करनेवाले, अञ्जन पर्वतके जैसी नीली ज्योतिवाले, सहजध्यानावस्थामे आधाखुले ज्योतिर्मय पिङ्गलवर्ण त्रिकाल-त्रिलोकदर्शी तीन नेत्र वाले, दोनों कानोंमें तेजिले नागमणिसे झकाझक उज्वल स्फटिक कुण्डल धारण करनेवाले, फणामें मणि चम्कानेवाले नागोंसे जटाजूट बाँधने वाले, हिमसे ढके हिमशिखर हिमालचुली जैसे मन्द-मन्द हँसते दाँतवाले, हरेवो जैसे लम्बे साँपसे पिरोये हुये कपालकी सिपिके खण्डोंसे जकडे गलेके काले नागवाले, रमणीय; ॐ शन्नो देवीरभिष्टय, ये त्रिषप्ताः परियन्ति कहनेवाले अथर्ववेदकेनादका उदय करनेवाले, पञ्चानन पशुपतिनाथके दक्षिण मुखकी वन्दना करते

ऋग्वेद-नादोदयं तत्पुरुषं पश्चिमं मुखम्-३

प्रालेयाऽचल-चन्द्र-कुन्द-धवलङ् गोक्षीर-फेनप्रभम्,
भस्माभ्यक्तमनङ्गदेह-दहन-ज्वालावली-लोचनम् ।
ब्रह्मेन्द्रादि मरुद्गणार्चित-पदम् ऋग्वेद-नादोदयम्,
वन्देऽहं सकलङ्कलङ्करहितं स्थाणोर्मुखं पश्चिमम् ॥

पञ्चानन पशुपतिनाथके पश्चिम मुखका ध्यानः— वारहों मास एक नास हिमसे टनाटन श्वेत हिमाली शिखर, पूर्णिमाके सोलहकला संम्पूर्ण चन्द्रमा श्वेत कुन्दपुष्प जैसे धवल, गौके दूधके फेन जैसे श्वेतः प्रकाशमानः दग्धदोषकषाय पवित्र चिता भस्मकालेप करनेवाले;कामदेवको भस्म करनेवाले, धप् धप् कर जलती ज्वालाकीमाला निकलनेवाले, चन्द्र सूर्य अग्निके तीन नेत्रवाले, ब्रह्मा विष्णु इन्द्रादि ३३ कोटि देवताओंके समस्त गणोंसे चरणकी पूजा किये गये, ॐ अग्निमीडे पुरोहितम् कहनेवाले ऋग्वेदके नादका उदय करनेवाले (ऋग्वेद प्रकट करनेवाले) सकल कला गुण सहित और समस्त दोषरहित ६४ वर्ण ६४ कला ६४ उपकलाके जन्मदाता सकल कलङ्क रहित सर्वदा सर्वथास्थायी पञ्च परमेश्वरके मुखिया पशुपतिनाथ के पश्चिम मुखकी वन्दना करते है ।

उत्तरमुखं वामदेवं यजुर्वेदनादोदयम्-४

गौरङ्कुङ्कुम-पङ्क-गन्ध सलिलं व्यापाण्डु-गण्ड-स्थलम्,
भ्रू-विक्षेप-कटाक्ष-वीक्षण-लसत्-संसक्त-कर्णोत्पलम् ।
स्निग्धम् बिम्ब-फलाधरम् प्रहसितं नीलालकं सुन्दरम्,
वन्दे याजुष-वेद-घोष-जनकं वक्त्रं हरस्योत्तरम् ॥

पञ्चानन पशुपतिनाथके उत्तर मुखका ध्यान :— सुनहले गोधूमगौररङ्गवाले कुंकुम चन्दनका काँदा लिपकर सुगन्धवाले अङ्गमे वहनेवाली शिरके जटाजूटकी गङ्गाके जलवाले, दायीं ओर स्फटिक जैसे वायीं ओर नारङ्गी जैसे गालवाले, समस्त भक्तजनोंपर कृपाकटाक्षपात करनेवाले, सूर्यरूपी नेत्रके प्रान्तपातसे प्रफुल्ल, कानमें लगाये नीलकमलसे लालित गालवाले, वात्सल्यामृतकी वर्षाकर शरणागत भक्तजनोंका प्रतिपालन करनेवाले, मोतीके समान टल टल टल्कने वाले, नवनीत-कोमल मसृण भलीभाँति पके बिम्बफल तुल्य होठवाले,मन्द मन्द मुस्कराते हुए, शरद ऋतुके निर्मल आकाश तुल्य नीलेकेश वायीं ओर पीली जटायें दायीं ओर होनेवाले, अतिसुन्दर ॐ इषेत्वोर्जे त्वा कहनेवाले, यजुर्वेदका नादोदंय करनेवाले, सर्वपापहर भगवान् हर पशुपतिनाथके उत्तरमुखकी वन्दना करते हैं ।

ऊर्ध्वमुखमीशानं सूक्ष्मवेद-प्रणव-नादोदयम्-५

व्यक्ताव्यक्त-निरूपितञ्च परमं षट्त्रिंश-तत्वात्मकम् ,
तस्मादुत्तर-तत्वमक्षरपदं ध्येयं सदा योगिभिः ।
ॐ कारादि-समस्त-मन्त्र-जनकं सूक्ष्मातिसूक्ष्मात् परम् ,
वन्दे ऽहं परमेश्वरस्य वदनं ख-व्यापि तेजोमयम् ॥

पञ्चमुखी पशुपतिनाथके ऊर्ध्व आकाशमुखका ध्यान :-

सृष्टि स्थितिरूपसे व्यक्त होनेवाले महाप्रलयरूपसे अव्यक्त होनेवाले होनेसे साकार निराकार दोनों प्रकारसे श्रुतिस्मृति दर्शन आदि द्वारा जिसका निरूपण किया जाता है जो शैवागमोक्त छत्तीस तत्वमय जातिवर्णप्रभृतिहैं, तस्मात्- जयत्यमूलमम्लानमौत्तरं तत्वमद्वयम् । स्पन्दास्पन्दपरिस्पन्दमकरन्द- महोत्पलम् । कहे गये औत्तराम्नायद्वारा प्रतिपादित अक्षरतत्व परमपद योगियोंद्वारा सदाध्यानविषयीकृत, तस्य वाचकः प्रणवः कहे गये ॐ कार आदि समस्त मन्त्रोंके जनक ॐ सोऽहम् हंस् अजपा गायत्री प्रमुख मन्त्रोंके आदि गुरु) आत्मा खलु विश्वमूलम् । बुद्धेरात्मा महान् परः । अणोरणीयान् महतो महीयान्, कहे गये, स्थूलातिस्थूल तथा सूक्ष्मातिसूक्ष्मसे भी परेके निरञ्जन निराकार ज्योतिः स्वरुप ज्योतिर्लिङ्ग आकाशव्यापी परमेश्वर महेश्वर पञ्चानन पशुपतिनाथके, ऊर्ध्वमूलमधःशाखं, कहे गये ऊर्ध्वमुखकी वन्दना करते हैं । वन्दे देवमुमापतिम् ।

पशुपति - पदार्थः-

सर्वथायत् पशून् पाति तैश्चयद् रमते सह । तेषामधिपतिर्यश्च तस्मात् पशुपतिः स्मृतः

पशुपतिनाथके नामका अर्थः-

पाशवद्धःसदा जीवः पाश मुक्तः सदा शिवः

कथन अनुसार लज्जा घृणा आदि अष्ट पाशबद्ध आब्रह्मस्तम्बपर्यन्त स्थावर जङ्गम, पश्यन्ति कर्मफलानीति पशवो जीवाः, कथित अपने कियेकर्म के फल भोग्नेवाले, समस्त जीव जन्तु पशु हैं, और सव पशुवोंका सर्वथा जो प्रतिपालन करे और उनके अन्तर्यामी होकर उनके साथमें रमणा करें । उनके अधिपति भी होनेसे पशुपतिनाथको पशुपतिनाथ समझा जाता हैं । ध्यान भजन पूजन और वन्दन किये जाते हैं । जो आशुतोष सवको पाशसेमुक्त करते हैं ।

वेदे पशुपतिनाथः

ॐ भवाय च रुद्राय च नमः शर्व्वाय च पशुपतये च नमो नीलग्रीवाय च शितिकण्ठाय च नमः कपर्दिने ।....... नमः शङ्कवे च पशुपतये च नमऽउग्राय च भीमाय च....... । सद्यो जातम्प्रपद्यामि सद्योजाताय वै नमो नम : । भवे भवे नातिभवे भवस्वमां भवोद्भवाय नमः । वामदेवाय नमो ज्येष्ठाय नमः, श्रेष्ठायनमो रुद्राय नमः कालाय नमः कलविकरणाय नमो बल विकरणाय नमो बलाय नमो बलप्रमथनाय नमः । सर्व भूतदमनाय नमो मनोन्मनाय नमः ।

अघोरेभ्योऽथ घोरेभ्यो घोरघोरतरेभ्यः सर्वेभ्यः सर्व शर्वेभ्यो नमस्तेऽ अस्तु रुद्ररूपेभ्यः । ॐ तत्पुरुषाय
विद्महे महादेवाय धीमहि । तन्नो रुद्रः प्रचोदयात् । ॐ ईशानः सर्वविद्यानामीश्वरः सर्वभूतानाम् ।
ब्रह्माधिपतिर्ब्रह्मणोधिपतिर्ब्रह्म, शिवो मेऽअस्तु सदा शिवोम् । शिवो नामासि स्वधितिस्ते पिता
नमस्ते ऽअस्तु मा मा हि () सीः । निवर्तयाम्यायुषेन्नाद्याय प्रजननाय रायस्पोषाय सुप्रजास्त्वाय
सुवीर्याय

ॐ यस्य निश्वसितं वेदा यो वेदेभ्योऽखिलंजगत् ।
निर्ममेतमहं वन्दे विद्यातीर्थं महेश्वरम् ।

पशुपतिनाथके पञ्चमुखसे पञ्चवेद प्रकट हुये ।

१- पूर्व सद्योजात मुखसे सामवेद । २- दक्षिण अघोर मुखसे अथर्ववेद ।
३- पश्चिम तत्पुरुष मुखसे ऋगवेद । ४- उत्तर वामदेव मुखसे यजुर्वेद ।
५-ऊर्ध्व ईशान मुखसे सूक्ष्मवेद । पाँच वेदोंसे समस्त वाङ्मय प्रकट हुये ।

पञ्चाननः पशुपतिः कृतपञ्चतत्वः पञ्चामृतस्नपितपञ्चसुरप्रधानः ।
पञ्चोपचारपरिपूजितपादपद्मः पञ्चस्थिति प्रकुरुते कुलपञ्चकेन ॥

परम रहस्यमय भव. रुद्र.शर्व.नीलग्रीव. शितिकण्ठ.कपर्दी.शङ्कु.उग्र.भीम. पशुपति. प्रमुख शत सहस्र लक्ष नामवाले शिवको नमस्कार है । सद्योजात के शरणमे जाते हैं । सद्योजातको नमस्कार करते हैं । जगत्में जन्म-जन्ममें जगत्की सृष्टि.स्थिति.प्रलय करनेवाले पशुपतिनाथको नमस्कार करते हैं । मृत्युञ्जय अव मेरा जन्म-मृत्युका यह फेरा अतिशय हो गयाअष्टपाशकाजालकाटदें। वामदेव.ज्येष्ठ.श्रेष्ठ.रूद्र.काल.महाकाल.कलविकरण.बलविकरण.बल. बलप्रमथन.सर्वभूतदमन.मनोन्मन.उन्मनी.मुद्रा.योगनिद्रा वाले.अघोर घोर.घोरसे घोरतर. सर्वरूप.विश्वरूप.विराट रूद्ररूप वाले.शिव पशुपतिनाथको नमस्कार है । ॐ कारके वाच्य तत्पुरूष पशुपतिनाथ शिवको जानें, महादेवका ध्यान करें । वे रूद्रपशुपतिनाथ हमको अच्छा मार्ग दर्शायें । परा-अपरा आदि विद्याके ईशान समस्त प्राणीके ईश्वर, ब्रह्मके अधिपति, वेदके अधिपति ब्रह्म रूप और ब्रह्म रूप शिव सदाशिव ॐकारके वाच्य और ॐकार वाचक स्वरूप हमारे आत्मा रूप,जगतके आत्मा स्वरूपको हमारा सदा नमस्कार है । शिव नामके परम पिता परमात्मा जगत् पिताको नमस्ते करते है हमारी हिंसा न करें । आयुरोग्य अन्न पानी आदिके लिये, ज्ञान धन और सपूत सन्तानके पालन पोषणके लिये. उत्साह और ओजके लिये पशुपतिनाथ शिवको नमस्कार है । सद्योजात प्रभृति पाँच मुख वाले, पृथ्वी प्रभृति पाँच तत्व और गन्धादि पञ्च तन्मात्रा आदि ५/२५ तत्वके कर्ता भर्ता और हर्ता पञ्चामृतसे स्नान करनेवाले पञ्चायनके प्रधान, पञ्चोपचारसे पूजित चरणकमलवाले शिवागमके कुलपञ्चकसे पञ्चतत्वोंकी स्थिति रीति करनेवाले पञ्चानन पशपतिनाथको वारंवार नमस्कार है ।

सामाथर्व ऋचो यजु: पणव इत्येवं क्रमेणाद्वता
वेदा: पूर्वककुप्क्रमात् पशुपतेर्वक्त्रेभ्य ऋद्धा ध्रुवा: ।
सद्योजातमघोरवामपुरुषेशानानि वक्त्राणि ते,
सोमस्याष्टविराट्तनोस्तु तनुषे कल्याणमस्मादृशाम् ॥

अष्टमूर्ति उमासहितसोम पशुपतिनाथके पूर्वक्रमेण सद्योजात. अघोर तत्पुरुष वामदेव.ईशान. मुखोंसे क्रमश: साम अथर्व, ऋक्.यजु: ॐ सूक्ष्मवेद प्रकट होकर सभीका कल्याण कररहे हैं ।

महादेवश्चन्द्रो भवति रविरीशान उदित: श्रुतीवायुश्चोग्रो भवतिदहनो रुद्र इति वै ।
भवस्तोयं पृथ्वी भवति स हि शर्व: पशुपतिस्तथात्मा भीम: खं भवति जगदष्टात्मनि शिवे ॥

महादेव, चन्द्रमा ईशान, सूर्य, उग्र, श्रोत, र वायु, रुद्र, अग्नि, भवजल, शर्व, पृथ्वी, भीमेश्वर, आकाश, पशुपतिनाथ, आत्मा, ये अष्टमूर्ति विराट् भगवान् शिवका संसार स्वरूप है ।

शिवपशुपतिनाथ: साक्षिगोरक्षनाथो, भवति जगति तुल्यं पालनं रक्षणञ्च ।
सुरगरणकिरणाढ्यं स्नेहभक्ति प्रसन्नं, त्रिभुवन भवनान्तर्द्योतते दीपयुग्मम् ॥

पशुपति और गोरक्ष दोनों पदका एक ही अर्थ होता है तथा पालन और रक्षा का भी एक ही अर्थ होता है । पा रक्षणे रक्ष पालने । इस प्रकार पशुपतिनाथ तथा पशुपति शिवके अवतार गोरक्षनाथ ये दोनों ज्योति: स्वरूप अखण्ड जोत स्वर्ग मर्त्य पातालकें त्रिभुवन भवनके भीतर सनातन जाज्वल्यमान हैं । ३३ कोटि देवताके किरण चारोंओर फैले हुये हैं और स्नेहमय भक्तिभावसे सदा प्रसन्न हैं । पश्यन्ति कर्मफलमे पशवो हि जीवा:, पायात् पशूनखिलपाश कलापतो य: । सोऽयं शिव: पशुपति: प्रथित: पृथिव्यां, गोरक्षनाथ इति रक्षति गा: समग्रा: ॥

कर्पूर-गौरङ्करुणावतारं संसार-सारं भुजगेन्द्र-हारम् ।
सदा वसन्तं हृदयारविन्दे भवं भवानी-सहितं नमामि ॥
मन्दारमाला-कलितालकायै.कपाल-मालाङ्कित-शेखराय ।
दिव्याम्बरायै च दिगम्बराय, नम: शिवायै च नम: शिवाय ॥

साष्टाङ्गं - प्रणतिः स्तुतिर्बहुविधा चैतत् समस्तं मया.
सङ्कल्पेन समर्पितं तव विभो पूजां गृहाण प्रभो ! ॥
आत्मा त्वं गिरिजा मतिः सहचराः प्राणाः शरीरं गृहम्,
पूजा ते विषयोपभोगरचना निद्रा समाधिस्थितिः ।
सञ्चारः पदयोः प्रदक्षिण-विधिः स्तोत्राणि सर्वा गिरो,
यद्यत् कर्म करोमि तत्तदखिलं शम्भो तवाराधनम् ॥
इत्येवं हरपूजने प्रतिदिनं यो वा त्रिसन्ध्यं पठेत्,
सेवा-श्लोक चतुष्टयं प्रतिदिनं पूजा हरे मानसी ।
सोऽयं सौख्यमवाप्नुयाद द्युतिधरं साक्षाद्धरे दर्शनम्, ।
व्यासस्तेन महावसान-समये कैलास-लोकं गतः ॥
कर-चरण-कृतं वाक्-कायजं कर्मजं वा,श्रवण नयनजं वा मानसं वाऽपराधम् ।
विहितमविहितं वा सर्वमेतत् क्षमस्व, जय जय करुणब्धे श्रीमहादेवशम्भो ॥
कर-कलित-कपाली कुण्डली दण्डपाणि-स्तरुण-तिमिर-नीलो-व्याल-यज्ञोपवीती ।
क्रतु-समयं-सपर्या-विघ्न-विच्छेद-हेतुर्जयति बटुकनाथस्सिद्धिदः साधकानाम् ॥
क्वाकाशः ? क्व समीरणः ? क्व दहनः ? क्वाम्भः ? क्वा विश्वम्भरा ?
क्व ब्रह्मा ? क्व जनार्दन ? क्वन्दुः तरणिः ? क्वे ? क्व देवासुराः ?
कल्पान्तार भटी-नट-प्रमुदित-श्रीसिद्ध-योगीश्वरः,
क्रीडानाटक-नायको विजयते देवो महाभैरवः ॥
कल्पान्तोल्लासि-हेलाचलदनिल-बलोल्लोल-कल्लोल-माला,
वाचाले नक्र-जालाकुल-कलिल-जले वारिधावुल्ललन्त्यः
आलम्बे यस्य नीलोत्पल-बिमल-महाकुट्टिमालीनलीला-
मालीयन्तेऽलघीयान् स जगति कमली पालनायालमस्तु ॥
गोरक्षस्य कला व्यपाकृतखला सौजन्यमुक्तच्छला,
कारुण्यात् तरला मनोरथफला शश्वज्जगन्मङ्गला ।
व्यक्ताव्यक्तबला विवेकविमला योगाङ्गधौतोज्ज्वला,
कैलासादचला सरोवरजला कैवल्यमेलातुला ॥

हे शिव गोरक्षनाथ ! तिम्रो कला पनि अद्भुत र अनुपम छ । जसले खलहरूको अपाकरण गरेको छ, दुर्जनतालाई हटाई दिएको छ । सौजन्यले छलकपट छटक्क छुटाइ दिएको छ । करुणामय अमृतले तरल र परोपकार गर्न आतुर छ र परहित प्रवण तथा प्रवीण छ । सबै भक्तहरूलाई मनोरथ अनुसार सुफल दिएका छन् । जगत भरिको शास्वतमङ्गल गरेको छ । मैत्री करुणा मुदिता उपेक्षा आदि स्वाभाविक आत्मयोगबललाई ठाउँ अनुसार कतै व्यक्त गरेको छ, कतै अव्यक्तै राखेको छ, जस्तालाई तस्तै गरेको छ । पर वैराग्यले पुरुष - प्रकृतिको विवेक, सत् असत्को विवेक, जड चेतन आदिको विवेक र नीर - क्षीर विवेकले विमल र नित्य निरञ्जन छ । योगका अष्टाङ्गहरूले र षडङ्ग षट्कर्म आदि साधनाले धोइयेर उज्यालो छ । कैलासदेखि अचल र कैलास भन्दा पनि अचल अटल छ । मानसरोवरका जलजस्तो स्वच्छ शीतल मधुर आप्यायन अतलस्पर्श अगम्य छ र वरदानको जल वर्षाउँछ । अनि मोक्षार्थी साधकहरूका लागि कैवल्य मोक्षको मेला गर्ने पनि हुनाले सर्वदा सर्वथा अतुलनीय छ ।

पुष्पाञ्जलिः

सद्-वर्णाः सरसाः प्रतिष्ठित-पदाः, सिद्धाऽचलाऽध्यासनाः ।
सत् - पुष्पाः स-फलाः पुराण-विटपा लोकोपकारोद्यताः ।
किं वेदाः ? किमु पादपाः ? घन-जटा-वल्ली-युताः शाखिनः ।
गोरक्षे कृत-पल्लवाऽञ्जलि-पुटा मुञ्चन्ति पुष्पाञ्जलिम् ! ॥

सद्वर्णा:- राम्रो जात भयेका, राम्रो रङ्ग भयेका, राम्रा अक्षर-नाद र लिपि पद वाक्य पद्यादि भयेकाले राम्रो जस कीर्ति पायेका मान्छे जस्ता वेद र वृक्ष वनस्पति वानस्पत्यहरू । सरसा :- रस भयेका, रसो वै सः भनियेका वाच्यवाचक रूप प्रणवादि शब्द ब्रह्म र परब्रह्म, प्रतिपादक तथा प्रतिपाद्य भयेका, शान्तादि नवै काव्य साहित्यका रस भयेका अनि रसीला, बाह्रैमास छवै ऋतु हरिया भरियाका फुलीफली पल्लवितै रहने सदा पालुवा हाली रहने, हिउँद तातो, वर्षा चीसो घनु र स्वच्छ छाहारी भयेका, सर्वथा अभय आश्रय भयेका । प्रतिष्ठितपदा:- पुरुषविद्याऽनित्यत्वात् कर्मसम्पत्तिर्मन्त्रो वेदे इत्यादि भनेर जगत्प्रसिद्ध अकाट्य सम्मान प्रतिष्ठा पायेका उद्गीथरम्य सुष्ठु पदपाद प्रभृति भयेका बद्धमूल, नियतस्थानले अचल प्रतिष्ठा भयेका, विश्वभरिका समस्त भाषाहरूका जनक हुनाले विश्ववाङ्भयमा ठूलो प्रतिष्ठान्वित पद र उच्चासन पायेका, विश्वविश्वासपात्र अनि वर्षा भल वतास हुरीहरूले हल्लाई नसक्ना गैरा गयेर टाडासम्म पुगेर जननीका काख जस्ती जन्मभूमिमा जरा जमाइ वसेर मातृभूमिका वात्सल्यमय हृदयको अमृतमय रस पयः पान गरीरहेका पादप हुनाले अचलमा अटल पद पायेका, १३ जात ८४ जात आदिका रुखहरूमा पुन्नाग चम्पक पारिजात करवीर खरी अमला वर पिपल धूपी शिलङ्गी चन्दन प्रमुख नामले उदि्भज्जहरूमा उच्च प्रतिष्ठान्वित पद मर्यादा पायेका । सिद्धाचलाध्यासना :- स्वतः प्रमाणतया स्वयं सिद्ध र प्रसिद्ध, अलङ्घ्य शासन विधि निषेधादि धर्म कर्म भयेकाले अचल अटल आनुपूर्वी क्रमस्थैर्य भयेका र सूर्याचन्द्रमसौ धाता यथा पूर्वमकल्पयत्- प्रभृति भनियेका र अपौरुषेयतया प्रख्यात भयेका -को अद्धा वेद ? विसर्जने नाथाः, भन्ने प्रसिद्ध पायेका, भूरिति व्याहरत्, भुवमसृजत्, तत् सृष्टा तदेवानुप्राविशत्, भनेर शाब्दी सृष्टि पछि आर्थी सृष्टि प्रकट हुने हुनाले र ईशावास्यमिदं सर्वं भयेकाले । अध्यासी जगदध्यस्त छ र देहाध्यासी देहीहरूको वास छ, सूक्ष्मतया सारा संसार जस्मा निहित छ र सर्वं वेदात् प्रसिद्ध्यति, भनिन्छ, अनि सकल सिद्धहरूका आदिगुरु आदिनाथशिवले सिद्धादिनाथ सिद्धेश्वर-किरातेश्वर-एकश्रृङ्ग हरिणेश्वर-पशुपति मृगतया चिरकाल पर्यन्त स्वच्छन्द विहार गरेर थलो हालेको हुनाले अद्यापि विरलाकोटी कैलेकाँही मृगदर्शनपाइने हुनाले र सिद्धसिद्धान्तपद्धति-प्रसिद्ध, हिमवत्खण्डादि-प्रख्यात शिवावतार सिद्धाधिनाथ गोरक्षनाथले नागव्यूह समाधिमा द्वादश वर्ष पर्यन्त अखण्ड तपस्या गर्दा नर्जा कपिलासबाट सिद्धानांकपिलो मुनि र कैलास पाताल भुवनेश्वर मेरु मन्दरादिबाट नवनाथ ८४ सिद्ध अनन्त कोटि सिद्धहरूले पनि आयेर उपासना गरी वसेकाले वाग्वती यात्रा हिमवत्खण्डहरूमा सिद्धाचल सिद्धाद्रि सिद्धशैल सिद्धपर्वत प्रमुख नामले प्रसिद्ध भयेका पशुपति मृगस्थली कैलास सिद्धाचलमा, अहिंसा परमो धर्मः, मा हिंस्यात् सर्वाभूतानि, आत्मनः प्रतिकुलानि परेषां न समाचरेत, आत्मा खलु विश्वमूलम् भन्ने परम पावन सर्वोच्च विश्वात्मदर्शन भयेका शिव गोरक्षनाथका सिद्धाश्रमपदले गर्दा दावानल दात्र कुठार प्रभृति भय न हुँदा अविरलतया अचल र अटल भैकन सर्वोच्चताले अध्यासीन भयेका र पत्र पुष्प फलच्छाया आदिको आच्छो खोजने मृग पञ्छी देवमानवहरूले आयेर अध्यासन गरियेको छाहारी भयेका । सत्पुष्पा:- सवप्रकार राम्रा पुष्प भयेका, सवैले रुचायेका वाक्यपुष्प भयेका, स्वर्गकामो यजेत, अहरहः सन्ध्यामुपासीत एकः शब्दः सम्यज् ज्ञातः सुप्रयुक्तः स्वर्गे लोके च कामधुग् भवति, वाचं धेनुमुपासीत, तस्याश्चत्वारः स्तनाः । स्वाहाकारो वषट्कारो हन्तकारः स्वधाकारस्तस्यै द्वौ स्तनौ देवा उपजीवन्तिस्वाहाकारञ्च वषट्कारञ्च हन्तकारं मनुष्याः । स्वधाकारं पितरस्तस्याः प्राण ऋषभो मनोवत्सः । इत्यादि पुष्पित फलगर्भित वाणी भयेका, त्रिवर्गरूप पुष्प भयेका र रूप रङ्ग केशर मकरन्द सुगन्ध प्रमुख गुणगणयुक्त सर्वर्त्तु सुलभ, दिगन्तमा वास फिजाउने, सिद्धर्षि मुनि मनुष्यरुपी भमराले झङ्कार गरियेका दर्शकहरूका नेत्रकमल हृदयकमल मस्तिष्ककमलहरूलाई प्रफुल्ल पार्ने, अनवछिन्न अविरल परम्परा भयेका पुष्प भयेका सफलतासव प्रकार राम्रा फलहरूले सर्वदा सर्वथा युक्त भये का, धर्मार्थकाममोक्षात्मक पुरुषार्थचतुष्टयमय फल भयेका । धर्मज्ञान कर्मज्ञान र ब्रह्मज्ञान प्रमुख सरस मधुरफल भयेका, सपुष्पफल र अपुष्पफल प्रभृति सर्वर्त्तु फलसम्पत्तिले लटरम्मै नुहेका र परहितमय हुनाले सफल जन्म जीवन भयेका । पुराणविटपा:- हज्जारौं वर्ष पुराना अष्टादश पुराण उपपुराण औपपुराण अतिपुराण रामायण महाभारतादि इतिहासरूपी हाँगा विँगा विटप विरुवा भयेका र पुराना हुँदा पनि निरन्तर सञ्चारी

रसले आप्यायित हुँदा सबल र सपत्र पुष्प फल शाखा प्रशाखा भयेकाले शरण खोजेर आश्रयमा आउँने भृङ्ग पन्छी मृग पशु मनुष्यादिको प्रतिपालन गर्ने । लोकोपकारोद्यता:- सर्वलोकहरूको उपकार गर्ने नै भनेर जन्मेका उम्रेका प्रकट भयेका दर्शनमा आयेका र सतत प्रयत्नशील भयेर उद्योगमा लागीरहेका, वेदमूला: प्रवृत्तय: सर्वे वेदात् भने अनुसार विश्वविधानको काम गरी रहेका र लोकोपकार व्रतले नै उन्नति पायेका । किं वेदा: ? - क्या ती वेद हुन् ? ऋग्वेद, यजुर्वेद, सामवेद,अथर्ववेद, धनुर्वेद, आयुर्वेद गान्धर्ववेद, इतिहासवेद, भारतं पञ्चमोवेद:, विश्वकर्म शील्पवेद, इतिहास पुराणाभ्यां वेदार्थमुपबृंहयेत्:- प्रभृति भनियेका, निगमागमादि षडङ्ग षड्दर्शन सहित वेद हुन् कि ? । किमुपादपा: ?- अथवा ई रुख वृक्ष लहरा हुन् ? किन कि दुवैका लक्षण तुल्य छन् , गुण पनि समानैछन्, कर्म पनि उस्तै छन्, यथा- सद्वर्ण, सरस, प्रतिष्ठितपद, सिद्धाचलाध्यासी, सत्पुष्प, सफल, पुराणविटप, लोकोपकारोद्यत, घनजटावल्लीयुत शाखी, पादप कृतपल्लवाञ्जलिपुट भयेर पुष्पाञ्जलि दीरहेका छन् र पादप छन् पादबद्ध ज्येष्ठ श्रेष्ठ अत एव सर्वपेष्ठ ऋगादि छन्दोबद्धमूल गद्योत्पादक पद्य भयेका, पादहरूले पदपदार्थको पालन पोषण संरक्षण गर्छन् र पाद= पाउरूप जरावाटै रस पियेर फेद हाँगा.विँगा पत्र पुष्प गन्धफल बीज प्रभृतिको पालन पोषण गरी रहेछन् र पाउमा शरणागत भयेकाहरूको पालन पोषण आप्यायन संरक्षण अभयप्रदान आदि गरी रहेछन् ।

घन- जटा-वल्ली-युता:- घना अविरल जटिल जटा र वल्लीहरूले युक्त भयेका छन्, अर्थात्- पदक्रम र पाद पद्य पदार्थक्रम श्रृङ्खलाबद्ध अखण्डित तथा अविस्मृत रहोस् भनेर श्रुतिपरम्परागत कण्ठविद्या वैदिकवाङ्मय रक्षार्थ कालक्रमबद्ध संहिता पाठ पदपाठ घनपाठ जटापाठ प्रमुख पुनरुक्ति युक्त भयेका र घना अविरल सघन बट प्लक्ष खनाया शमी समेतमा स्पष्टदृष्ट जटाजूट तथा अरुमा पनि ऐंजेरु सञ्जीवनी हडचूर झ्याउ लेउ र लहराहरू र पल्लवयुक्त अवाग्लम्वित मृदुप्रान्त हाँगाविँगाले युक्त भयेका र लहरा भृगुवल्ली प्रभृति नानाप्रकारका लौकिक र वैदिक वल्ली भयेका । शाखिन:- शाखोपशाखा भयेका एकविंशतिधा वाह्वृच्यम्-एकशतमध्वर्यु-शाखा:-सहस्रवर्त्मासामवेद:-पञ्चाशत्शाखाथर्वणोवेद:,वाकोवाक्यमितिहास: पुराणम् प्रभृति भनियेका माध्यन्दिनीशाखा, राणायनीशाखा, बास्कलशाखा. कठशाखा. कौथुमशाखा उद्गीथ शाखा गोपथ,शतपथ शाखा आदि भेदले विभक्त शाखा प्रशाखा भयेका र सर्वत्र सवैले देखियेका रुख वृक्षहरूका नैसर्गिक शाखा प्रशाखा भयेका, स्वयं शिवगोरक्षानाथले नै- द्विज-सेवित-शाखस्य श्रुतिकल्प-तरो: फलम् । शमनं भव-तापस्य योगं भजत सत्तमा: आत्मा खलु विश्वमूलम्, नन्वात्मन: प्रियार्थं सर्वस्य प्रियत्वं भणति श्रुति: इत्यादि भनेर गुरुसङ्केत गरियेका र 'न वा अरे सर्वस्य कामाय सर्वं प्रियं भवति, आत्मनस्तु कामाय सर्वं प्रियं भवति' भन्ने योगियाज्ञवल्क्यश्रुति प्रभृतिको स्मृति जगाउँने भावनाले कृतज्ञ ती साङ्ग सरहस्य वेद नै वृक्ष भयेर 'यस्य निश्वसितं वेदा यो वेदेभ्योऽखिलं जगत् । निर्ममे तमहं वन्दे विद्यातीर्थं महेश्वरम्' भनेर गोरक्षे-लोकबुद्धिले गोरक्षनाथ तथा देशिकदृष्टया महेश्वरानन्द शिवगो रक्षनाथमा श्रुति स्मृति सुरभि क्षिति प्रभृति गाइहरूको रक्षा गर्ने पनि हुनाले ती वेदवृक्षहरू भक्तिले नम्र भैकन । कृत-पल्लवाऽञ्जलि-पुटा :- पालुवाका अञ्जलि गरेर, अञ्जलिका पालुवा गरेर, करपल्लवाञ्जलि लियेर, हस्ताञ्जलिजस्ताकमला पालुवा भयेका र पालुवारुपी अञ्जुलि बाँधेका, पल्लवमय अञ्जलिमा सुगन्ध केशर मकरन्द रूप रङ्गयुक्त पुष्पहरू लियेर निरन्तर वारै काल । पुष्पाञ्जलिं मुञ्चन्ति - पुष्पाञ्जलि अर्पिरहेका छन्,

सिद्धासनस्थ शिवगोरक्षनाथमा आकाशबाट पुष्प वृष्टि गरी रहेछन्, फूल वर्षाई रहन्छन् । जसरी सगुणोपासक भक्तजनहरू आफ्ना इष्टदेवता कुलदेवता गुरुदेवताको पूजा गरेर भक्तिभावले नम्र भैकन 'नाना सुगन्ध पुष्पाणि यथाकालोद्भवानि च । पुष्पाञ्जलिं मया दत्तं गृहाण परमेश्वर !' भनेर पुष्पाञ्जलि दिन्छन् । उसै गरी सिद्धाचल मृगस्थली गोरक्षपीठका पारिजात चाँप कनेर शिलङ्गी पुन्नाग प्रभृतिवानस्पत्य वृक्षहरू विश्वकल्याणकारी विश्वगुरु पशुपति-शिव-गोरक्षनाथमा पुष्पाञ्जलि सदा गरी रहन्छन् ।

सिंहा: शैल-गुहां सरोवरमिभा,हंसा यथा मानसं !
चन्द्रं कैरव-चक्रवाक-शशका वर्षोदकं चातका: ‼
भोगीन्द्रा मलयं धनं गत-धना: पद्माऽऽकरा भास्करं
स्वातिं शुक्ति-कुलं जलं झष-कुलं मेघ-ध्वनिं केकिन: ॥!
सारङ्गा मृदु-,रागमब्जमलयो दीपं पतङ्गा इव
व्याऽऽपन्ना: शरणं खगा: फल-तरुं बाला यथा मातरम् !
कान्तं प्रोषित-भर्तृका हिम-नगाऽऽवासं च कस्तूरिका
गोरक्षं प्रणिधानत: स्व-हृदये ध्यायन्ति योगीश्वरा: ॥!

यस्ता हेशिव गोरक्षनाथ ! जसरी अठौर परेका सिंहहरू पर्वतका प्रशान्त शीतल गुफाको ध्यान धर्छन् । जसरी भावरमा पसेर ग्रीष्मऋतुका घामले घमायेर आत्तियेका हात्तीका वथान शीतल जल भयेका विशाल सरोवरको ध्यान धर्छन् । जसरी अन्यत्र गयेका नीर क्षीर विवेकी, मुक्ताफलाकाँछी रजहाँसहरू सज्जनका मनजस्ता स्वच्छ शीतल विशाल मानसरोवरको ध्यान धर्छन् । जसरी कुमुद कुमुदिनी चखेवा चाखुरा शशा आदि विकासक अमृतमय आह्लादक चन्द्रमाको ध्यान धर्छन् । जसरी खडेरीमा पानी नपाई तालु सुकेका काकाकुलहरू वर्षाका पानीको ध्यान धर्छन् । जसरी चन्दनादि सुगन्धवाहक वायु न भयेका ठाउँमा पुगेका नाग र सर्पहरू मलयाचलको ध्यान धर्छन् । जसरी धन हरायेका मान्छेहरू धनको ध्यान धर्छन्। जसरी सूर्यका वियोगमा सूर्यमुखी कमल भयेका पद्माकरहरू पद्मका आँखा चिम्लेर सूर्यको ध्यान धर्छन् । जसरी मुक्ताफल फलने शुक्ति (सिपि)हरू अमृतमय स्वातिबिन्दुको ध्यान धर्छन । जसरी जीवनस्वरूप जीवन (जल) बाट बाहिर झिकियेका माछाहरू जलको ध्यान धर्छन् । जसरी नाच हेर्ने र नाचने केका गर्ने मत्त मयूर (मुजुर)हरू मिलिक्क विजुलीका आँखा खोलेर गम्भीर गर्जना गर्ने मेघका ध्वनिको ध्यान धर्छन् । जसरी हरिण मृगादि गीतप्रेमी-सारङ्गने सारङ्ग गहा, सारङ्ग पहुँचा आया, सारङ्गके सारङ्गने सारङ्ग दिया छुडाया, भनेर प्रसिद्ध भयेका सारङ्गहरु मृदु रागको ध्यान धर्छन् । जसरी अन्धकारमा ज्योतिरुपासकपतङ्ग(पुतली प्रभृति)हरू स्वात्म- ज्योतिर्मय दीप (दिया)को ध्यान धर्छन् । जसरी कमलबन्धु मधुकर (भमराहरू सहस्रार तुल्य प्रफुल्ल कमलको ध्यान धर्छन् । जसरी विपत्ति आपत्तिमा परेका शरणार्थीहरू शरण रक्षक आश्रयदाताको) ध्यान धर्छन् । हेमन्त शिशिर आदि फलफूल पातै न पाइने ऋतुमा परेका, तर पलाहारीलाई छोडेर फलाहारी पखेरुहरू, झकमक्क झाँगियेर ढकमक्क फुलेर लटरम्म फलेर गलक्क पाकेर गल्केका र घनु छाहारी भयेका परोपकारी फलवृक्षको जसरी ध्यान धर्छन् । जसरी आमा टाडा गयेका, दुद खान न पायेर भोकायेका, दुदे बालकहरू आमाको ध्यान धर्छन्। जसरी प्रोषितभर्तृका अबलाहरू कान्तको ध्यान धर्छिन् । अनि जसरी पक्राउमा परी चिडियाखाना (पशुसङ्ग्रहालय) का उराँठिला पिंजरामा परेर तिरन न पानी भयेर घमायेका कस्तूरा कस्तूरी मृगहरू, शीतल र स्वच्छ उज्याला हिमाली वासस्थलीको ध्यान धर्छन् । उसै गरी संसारी प्रपञ्चदेखि विरक्त भयेका योगीश्वरहरू निज हृदय मा प्रणिधान (योगसमाधि)ले तिम्रो ध्यान गर्छन् म पनि गर्छु । मालोपमा । युग्मक ।

यस प्रकार लक्ष्यालक्ष व्यक्ताव्यक्त सर्वरूपेण व्यापक्र भैकन पनि” प्रमहसि पदे निस्त्रैगुण्ये शिवाय नमो नम:’ हेशिव ! तिम्रो पूजा हामी कुन सामग्रीले गरौ ?
फूल भमराले सुँघीसके, फल पञ्छीले चाखीसके, जल माछाले जुठ्याइसके, धूप आगाले पोली-सक्यो कस्तुरी मृगले सुघींसके; गाईका दुदमा वाछाले थुम्कालाईसके यसै गरी संसार भरीका अरु समग्र पूजा सामग्री कुनै न कुनैबाट दूषित देखेर हेशिव गुरु गोरक्षनाथ ! हामीं तिम्रो पूजा योगाभ्यासद्वारा पवित्र मनले (मानस विधिले) रच्तै छौं:-

दुर्वक्त्रैर्मुसलैश्च तण्डुलकणा व्यालीकुलैश्चन्दनम् ।
धूपो धूमयुजा मृगैर्मृगमदो वत्सैश्च दुग्धं गवां
तस्मान्मानस-पूजनं शिव ! गुरो ! गोरक्ष ! ते रच्यते ॥

अथवा— अर्घ्यं स्वर्गनदी विधुश्च कमलं पाद्यञ्च सप्ताब्धयो
बिल्वीकोमलपल्लवञ्च गगनं तारागणा अक्षताः ।
सूर्यश्चारु निराजनं तव सुधा नैवेद्यमावेद्यते
वातोऽयं व्यजनं गृहं त्रिभुवनं गोरक्ष ! पूजाविधौ ॥
गोरक्ष-बालं गुरु-शिष्य-पालं, शेषाहि-मालं शशिखण्ड-भालम् ।
कालस्य कालं जित - जन्म - जालं, बन्दे जटालं जगदब्ज - नालम् ॥

गुरुको र शिष्यको पालन गर्ने तथा उल्टी थापना थापेर पनि गुरु-शिष्यपरम्पराको पालना गर्ने, अनि गुरु भैकन शिष्यको पालन गर्ने र शिष्य भैकन गुरुको पालन गर्ने, आदेशात्मक गुरु-शिष्यको एकै काया भयेर सर्व्वव्यापकतया ओतप्रोत रहने,शेषनागको माला शैली लाउने, हिमालझैं उच्चउज्याला र विशाल विराट रूप भयेका, अजर अमर अविनाशी अक्षय अक्षर निर्विकार निरञ्जन ज्योतिःस्वरूप शाश्वत शिद्धाधिराज नागराजव्यूहसमाधिस्थित साक्षात् महेश्वर शिव, निष्कलङ्क चन्द्रमा जस्तो स्वच्छ स्फटिक तुल्य अमृतधवल कलेवरकान्ति भयेका र चन्द्रमाकी सत्रौं अमृतकलालाई आफ्ना भालस्थलमा धारण गर्ने, अलम् पर्याप्तरूपेण अकलङ्क शशिखण्डको भा=कान्ति भयेका र शशि-भास्करादिलाई प्रतिभासित गर्ने, 'तस्य भासा सर्वमिदं विभाति' कालका पनि काल महाकाल, काल=समयको कलन आकलन कालन प्रेरण आदि गर्ने,समय एव करोति बलाबलम्, कालाय तस्मै नमः,इत्यादि भनियेका बलियाकालको र यमराज कालानाग आदि कालहरूलाई वशमा राखेर 'निद्रा मारो कालसंहारो' भन्ने तथा जगत्कोअकालप्रलय गर्ने समुद्रमथनोत्थित कालकूटहलाहल विपलाई पनि नीलमणि झैं कण्ठैमा राखी दिने, शिक्षार्थ सिद्धाचलमाथि वार वर्ष सम्म पण्णवति मेघमालारूपी नव नागराजहरूको आसन ओच्छ्यायेर टनक्क निर्विकल्प समाधि कसेर वसी दिने, सवै प्रकारका कालका काल महाकाल भैरवेश्वर महाकालेश्वर भयेका; जन्ममृत्यु जरा व्याधि आधि आदिका जटिल जगज्जाललाई जितेका, मृत्युञ्जय तथा जगज्जालाई जिताउँने महामृत्युञ्जय भयेका, स्वर्णवर्ण जटाकान्तिले बालकभास्कर झैं पर्याप्त दीप्तिद्वारा सुशोभित भयेका, जगत् संसार विश्व ब्रह्माण्ड रूपी पद्मकमलका नालदण्ड भैरहेका, निजानन्दमय रस दियेर जगत्कापालक, धारण पोपण र विकास गर्ने, वेदादिले 'रसो वै सः' भनियेका, शिवशक्ति सामरस्यस्वरूप भयेका, गो (गौ=गाइ) पदका वाच्य यावत् पदार्थहरूको रक्षा गर्ने, आफ्ना र आफन्त शिष्योपशिष्य भक्त सेवक साधकहरूका विषय गोचरमा चर्न जाने गोरूप इन्द्रियवर्गको प्रत्याहार प्रत्यङ्मुखत्व प्रत्यभिज्ञादिद्वारा रक्षागर्ने र गराउने, गोवृषरूप चतुष्पात् सकल धर्ममय वृषभमाथि यात्रागरेर सर्वलोकरक्षा गर्ने, पृथ्वीरूपा गोमाताको रक्षा स्वयं गर्ने र गोरक्षकहरूको (गाइको रक्षा गर्नेहरूको) रक्षा गर्ने गराउने, गोरक्ष गोपाल, घडी घडीके रक्षपाल भनियेका शाश्वत बाले गोरक्षनाथ स्वरूप शिवको प्रतिदिन वन्दना गर्छौं ।

चन्द्राऽर्क-द्रुहिणाच्युता ऽम्बुज-लसल्लोकेश-कंसाऽरिभिः
काली-भैरव-सिन्धुरास्य-हनुमत्-कोलैः परीवारितम् ।
वन्दे तं नव-नाथ-सिद्ध-सहितं मेघाऽहि-मालाऽऽसनं
माला-पुस्तक-शूल-डिण्डिम-धरं-गोरक्ष-मृत्युञ्जयम् ॥

चन्द्रमा, सूर्य, ब्रह्मा, विष्णु, पद्मपाणि लोकेश्वर, कंसारिकृष्ण, काली, भैरव, गणेश, हनुमान्, यज्ञवराह आदि देवताहरूले परिवारित भयेका (उक्त देवता आदिका परिवारले वरिपरि उपासना गरियेका नवनाथ, ८४ चौरासी सिद्ध, द्वादश सिद्ध, अष्टादश सिद्ध, अनन्तकोटि सिद्ध सहित भयेर मेघमालामय नवनागराजहरूका नागव्यूहका सिद्धसिंहासनमा, पद्मासन कसेर सिद्धाचल मृगस्थली

माथि वसेका, चारै भुजाहरूमा-माला, पुस्तक, त्रिशूल र डमरु धारण गरेका ती समस्त नवनाथनवकोक्त गौ= गाइहरूको रक्षा गर्न गोरक्षनाथको अवतार भयेका मृत्युञ्जय महेश्वरको नित्य वन्दना आदेश गर्छौं ।

यं विष्णुं प्रवदन्ति वैष्णव-गणा:शैवा: शिवं शक्तिका:
शक्तिं भास्कर-भक्तिका: दिनमणिं ब्रह्म-स्वरूपं द्विजा: ।
मत्स्येन्द्रं मुनयो वदन्ति सततं लोकेश्वरं वैदिका:
बौद्धास्तं करुणामयं प्रतिदिनं तन्नौमि सिद्धेश्वरम् ॥

जसलाई वैष्णवगण विष्णु भन्छन्, शैवहरू शिव भन्छन्, शाक्तहरू शक्ति भन्छन् । सौरहरू सूर्य भन्छन्, विप्र क्षत्रिय वैश्य त्रैवर्णिक द्विजहरू ब्रह्मास्वरूप किं ब्रह्मस्वरूप भन्छन्, मुनिजनहरू सदा मत्स्यावतार मत्स्येन्द्रनाथ भन्छन्, वैदिकहरू लोकेश्वर लोकनाथ भन्छन्, बौद्धहरू करुणामय भन्छन्, तथा अरुहरू स्वस्वेष्ट देव भन्छन्, ती सर्वस्वरूप विराटरूप कायव्यूह सिद्धेश्वर सिद्धाधिराज मत्स्येन्द्रनाथको प्रतिदिन स्तुति र नति-नमस्कार आदेश गर्छौं ।

यं शैवा: समुपासते शिव इति ब्रह्मेति वेदान्तिनो
बौद्धा बुद्ध इति प्रमाण पटव: कर्तेति नैयायिका: ।
अर्हन्नित्यथ जैनशासनरता: कर्मेति मीमांसका: ।
सोऽयं नो विदधातु वाञ्छितफलं त्रैलोक्यनाथोहरि: ॥
यं ब्रह्मा वरुणेन्द्ररुद्रमरूत: स्तुन्वन्तिदिव्यै: स्तवै-
र्वेदै: साङ्गपदक्रमोपनिषदैर्गायन्ति यं सामगा: ॥
ध्यानावस्थिततद्गतेन मनसा पश्यन्ति यं योगिनो
यस्यान्तं न विदु: सुरासुरणा देवाय तस्मै नम: ॥
शान्तं पद्मासनस्थं शशधरमुकुटं पञ्चवक्त्रं त्रिनेत्रम्
शूलं वज्रं च खड्गं परशुमभयदं दक्षिणाङ्गे वहन्तम् ।
नागं पाशं च घण्टां डमरुकसहितं साङ्कुशं वामभागे
नानालङ्कारदीप्तं स्फटिकमणिनिभं पार्वतीशं नमामि
शान्ताकारं शिखरशयनं पद्मपीठं सुरेशम्
विश्वाधारं स्फटिकसदृशं चन्द्रमौलिं शुभाङ्गम् ।
गौरीकान्तं विषमनयनं योगिभिर्ध्यानगम्यम
वन्दे शम्भुं भवभयहरं सर्वलोकैकनाथम् ॥
ध्यायेन्नित्यं महेशं रजत-गिरिनिभं चारुचन्द्रावतंसम्,
रत्नाकल्पोज्ज्वलाङ्गं परशु-मृग-वराऽभीति-हस्तं प्रसन्नम् ।
पद्मासीनं समन्तात् स्तुतममर-गणैर्व्याघ्रकृत्तिं वसानम्,
विश्वाद्यं विश्वबन्द्यं निखिल भयहरं पञ्चवन्द्यं त्रिनेत्रम् ॥
चित्तभू-वित्तभू-मत्तभूपालको-पासना-वासनायासनानां भ्रमै: ।
साधुता सा धुता साधिता साधिता, किन्तया चिन्तया चिन्तयाम: शिवम् ॥
राजद्रावणमूर्धपङ्क्तिशिखरव्यासक्तचूडामणि-
श्रेणीसङ्गतिनिश्चलात्मकतया लङ्काम्पुनाना पुरीम् ।
यस्याबन्ध्यपराक्रमा: सुरशिर: श्रेणिषु ये सङ्गता
श्रीबाणासुरशेखरा: पशुपते: पादाणव: पान्तुव: ॥
नाली नालीकमेतन्न खलु समुदितो राजतो राजतोऽहं
पद्मापद्मासनाब्जे कथमनुहरतो मानवा मा नवाभे ।
पृथ्व्यां पृथ्व्यां न मादृग् भवति हृतजगन्मानसे मानसे वा ।

भास्वान् भास्वान् विशेषं जनयति न हिं मे वासरो वा सरो वा ।
इतीव चामीकर केशरालीसिन्दूररक्तद्युतिदन्तपङ्क्त्या ।
राजीवराजीं प्रति जीवलोके सौन्दर्यदर्पादिव सप्रहासम् ॥
राज्यं प्राज्यसुखोर्जितद्विजजनप्रत्यर्पिताज्याहुति-
ज्योतिर्जातशिखाविजृम्भणजिताशेषप्रजापद्रुजम् ।
विभ्रत् कण्टकवर्जितं निज भुजावष्टम्भविस्फूर्जितं
शूरत्वात् परचक्रकाम इति यन्नाम्ना परेणान्वितः ॥
योगक्षेमविधानबन्धुरभुजः संवर्धयन् वान्धवान्
स्निह्यत् पुत्रकलत्र भृत्यसहितो लब्धप्रतापो नृपः ।
दीर्घायुर्नितरां निरामयवपुर्नित्यप्रमोदान्वितः
पृथ्वीं पालयतु प्रकामविभवस्फीतानुरक्तप्रजाम् ॥
नन्दिस्कन्दगणेशपर्वतसुताः शम्भुः स्वयं पञ्चमः
श्रीपञ्चायनदेवता जनमताः सर्वत्र सम्पूजिताः ।
भक्त्या भक्तजनैरनन्यमतिभिः पञ्चोपचारादिभिः
प्रातः सायमनन्तकालमतुलङ् कुर्वन्तु नो मङ्गलम् ॥
चन्द्रोद्भासितशेखरे स्मरहरे गङ्गाधरे शङ्करे
सर्पैर्भूषित कण्ठकर्णविवरे नेत्रोत्थवैश्वानरे ।
दन्तित्वक्कृतसुन्दराम्बरधरे त्रैलोक्यसारे हरे ।
मोक्षार्थं कुरु चित्तवृत्तिमचलामन्यैस्तु किं कर्मभिः ?
चूडोत्तंसित-चारुचन्द्रकलिका चञ्चच्छिखाभास्वरो
लीलादग्ध विलोलकामशलभः श्रेयोदशाग्रे स्फुरन् ।
अन्तः स्फूर्जदपारमोहतिमिरप्राग्भारमुच्चाटयं-
श्चेतः सद्मनि योगिनां विजयते ज्ञानप्रदीपोहरः ॥
वागर्थाविवसम्पृक्तौ वागर्थप्रतिपत्तये ।
जगतः पितरौ वन्दे पार्वती-परमेश्वरौ
दिक्कालाद्यनवच्छिन्नानन्तचिन्मात्रमूर्तये ।
स्वानुभूत्येकमानाय नम शान्ताय तेज़से ॥
यं योगाङ्कुरमादिनाथ उमया युक्तोऽभियुक्तात्मने,
मत्स्येन्द्राय जलन्धराय च ददौ गुप्तं च सिक्तं च तम् ।
गोरक्षोऽ क्षतपत्रपुष्पफलतः कैवल्यकल्पं व्यधाद् ,
योगाचार्यचतुष्टयी विजयते योगप्रचारोज्ज्वला ॥

ॐ 卐 गौः श्रीः शिवो वेदः

स्वागतम्

स्वागतम्! स्वागतम्!! स्वागतम्!!! स्वागतम्!!!!
यस्य सद् दर्शनं लोक- शोकापहम्!
यस्य सत् स्पर्शनं लोक-पापापहम्!!
यस्य सम्भाषणं भूषणं वाङ्मयम्!!!
यस्य सम्बोधनं बोध-संवर्धनम्!!!!
तस्यते स्वागतम्! स्वागतम्!! स्वागतम्!!!
यस्य योगोपदेशा जगन्मेलकाः!
यस्य यागोपदेशा जगतपालकाः!!
यस्य भागोपदेशाः समानादराः!!!
यस्य रागो पदेशाः शिवेष्टादराः!!!!
तस्यते स्वागतम्! स्वागतम्!! स्वागतम्!!!
यस्य कर्मोपदेशाः क्रियाकौशलाः!
यस्य धर्मोपदेशा जगत्कौशलाः!!
यस्य विद्याऽनवद्या जगद्व्यापिका!!!
यस्य वेदागमा लोकभेदापहाः!!!!
तस्य ते स्वागतम्! स्वागतम्!! स्वागतम्!!!
यस्य सत् कर्म सर्वस्य कल्याण-कृत्!
यस्य वागवर्म सर्वाङ्ग-रक्षाकरम्!!
यस्य .वश्याः प्रशस्या गिरः सादराः!!!
यस्य लीला सुशीला जगतपावनी!!!!
तस्य ते स्वागतम्! स्वागतम्!! स्वागतम्!!!
यस्य वेषः सुरेशस्य भूमङ्गलम्!
यस्य वाणी कृपाणी कुसंस्कारहा!!
यस्य बुद्धिर्विशुद्धा विबुद्धा सदा!!!
यस्य गोष्ठी गरिष्ठा गुणग्राहिणी!!!!
तस्य ते स्वागतम्! स्वागतम्!! स्वागतम्!!!
यस्य यज्ञेषु सत्पाण्डिता माण्डिताः!
यस्य वाचो द्विषत्खण्डना मण्डना!!
यस्य शिक्षाच दीक्षाच रक्षाकरी!!!
यस्य चाध्यात्म-विद्याऽनवद्या दिवः!!!!

तस्य ते स्वागतम्! स्वागतम्!! स्वागतम्!!!
यस्य सद्योगे उद्योग-संवर्धकः।
यस्य शास्त्रं सदस्त्रञ्च शास्त्रं समम्!!
यस्य शोभा सभामण्डनाऽखण्डना!!!
यस्य सद्भावना पावनात्मोद्भवा!!!!

तस्य ते स्वागतम्! स्वागतम्!! स्वागतम्!!!
यस्य सम्पत्तिरापत्तिहीना शुभा!
यस्य दानं महानन्ददं सर्वदा!!
यस्य शिष्याः स्ववश्याःप्रशस्या भुवि!!!
यस्य भूमण्डले हिण्डनेऽखण्डनम्!!!!

तस्य ते स्वागतम्! स्वागतम्!!!स्वागतम्!!!
यस्य यात्राः पवित्रा विचित्राः कथाः।
यस्य गात्रं पवित्रं शुभैः कर्मभिः!!
यस्य गोत्रं पवित्रं चरित्रैर्निजैः!!!
यस्य चित्रं पवित्रं दया-धर्मतः!!!!

तस्य ते स्वागतम्! स्वागतम्!! स्वागतम्!!!
यस्य नेत्रं पवित्रं कृपापाङ्गतः!
यस्य वेत्रं पवित्रं च तीर्थाटनात्!!
यस्य वक्त्रं पवित्रं स्वगायत्रतः!!!
यस्य जैत्रो रथः सारथी शुद्धधीः!!!!

तस्य ते स्वागतम्! स्वागतम्!! स्वागतम्!!!
यस्य भावा जगद्भावनाः पावनाः।
यस्य हावा हृदो हृद्यता-द्योतकाः!!
यस्य हर्षो महर्षेरिवोदारधीः!!!
यस्य हेवाकि-देवादि-सेवा-वृषः!!!!

तस्य ते स्वागतम्! स्वागतम्!! स्वागतम्!!!
यस्य सेवा स्वदेवादि-हर्षप्रदा!
यस्य शान्तिः क्षितौ शान्तिदा देहिनाम्!!
यस्य कल्याणकारी गुणो विद्यते!!!
यस्य कल्याणकारी गणो विद्यते!!!!

तस्य ते स्वागतम्! स्वागतम्!! स्वागतम्!!!
यस्य कल्याणकारी पणो विद्यते!
यस्य कल्याणकारी क्षणो विद्यते!!
यस्य कल्याणकारी रणो राजते!!!
यस्य कल्याणकारी कणो राजते!!!!

तस्य ते स्वागतम्! स्वागतम्!! स्वागतम्!!!
यस्य सञ्जीवनं सर्वदा सर्वदम्!
यस्य सञ्जौ करौ सर्व-सत्कर्मसु!!
यस्य लोकोपकारो महान् वर्तते!!!
यस्य शोकापहारो विचारो महान्!!!!

तस्य ते स्वागतम्! स्वागतम्!! स्वागतम्!!!
यस्य सत्यव्रतं सत्यवाणी मुखे!
यस्य सत्या मतिः सत्यसन्धा हृदि!!
यस्य सत्या कथा सत्यशीलं तनौ!!!
यस्य सत्ये पथि स्थायि-पादौसदा!!!!

तस्य ते स्वागतम्! स्वागतम्!! स्वागतम्!!!
यस्य शस्या तपस्या स्ववश्या तनुः!
यस्य सर्वायुरात्मार्थहीनं परम्!!
यस्य सर्वे गुणाः सर्व-दोषोज्झिताः!!!
यस्य सर्बाः क्रियाः सर्व-लोकाय शम्!!!!

तस्य ते स्वागतम्! स्वागतम्!! स्वागतम्!!!
यस्य दृष्टिः स्थिरा पूर्णिमा योगतः!
यस्य गौः खेचरी कुण्डली जाग्रती!!
यस्य सिद्धासनं चित्तवृत्तिः स्थिरा!!!
यस्य शान्तं मनः स्वे समाधौ शिवम्!!!!

तस्य ते स्वागतम! स्वागतम्!! स्वागतम्!!!
नरहरेरिदमेव निवेदनम्!
नरहरेरिदमेव हि जीवनम्!!
नरहरेरियमेव कथा तथा!!!
नरहरेरयमेव मनोरथः!!!!

अष्टादश-स्मृति-स्मृत्यै, अष्टादश-पदी कृता।
अष्टादश-पथाः सर्वाः, विद्याः कष्टहरा नृणाम्॥

सिद्धाचल-मृगस्थली-गोरक्षनाथ-पीठनिष्ठस्य
हिन्दुराष्ट्रस्य गोरक्षस्य हिमालस्य

स्वागत-गीत

सन्त-गुरुजन पण्डित ज्ञानी और धर्मअचारा हम स्वागत करें तुम्हारा!
पण्डित ज्ञानी गुरुजनोंका स्नेह वीरोचितसे चरण परवारा हमस्वगत करें तुम्हारा!
जिसके दर्शनसे सवका शोक हरण होता जाता है।
जिसके पर्सन करनेसे सवका पाप हरण होता जाता है॥
जिसके सम्भाषणसे भवका पार तरण होता जाता है।
जिसके सम्बोधनसे सवका अज्ञान हरण होता जाता है॥
ऐसे सन्त महा पुरुषोंके कर कमलोंसे चरण परवारा ·· हम स्वागत करें तुम्हारा!
जिसके अष्टाङ्ग योगके उपदेशोंसे।
जिसके यज्ञादि पुण्य कर्मोंके निर्देशोंसे।
जिसके सम विभाजनके उल्लेखोंसे।
जिसके नवधा भक्तिके भाव-भजनोंसे।
जिनसे मिटता है जन जनका कष्ट अपारा ··· हम स्वागत करें तुम्हारा!
ॐ गणपति सरस्वती गुरवे नमः जय जय जय महादेव।
सत सत वन्दन दासकी करु स्वागतरूपी सेन॥
झालाणा-मालवीय नगर, जय हो जयपुर राजस्थान।
कोटिहोम यज्ञ सम्पूर्ण हुआ, हितु विश्वशान्ति कल्याण॥
दोहा
जिसके सत उपदेशोंसे सव श्रोता कर्मठ बन ते हैं।
जिससे मानव जीवन सुखी होकर सत पथ पर सारे चलते हैं॥
जिसकी विद्या अनिन्दनीय और विश्व व्यापक है।
जिसके धर्मोपदेशसे हृदय सागर होता गद गद है॥
ऐसे ज्ञान दाताओंका निशदिन करते जयजयकारा ·· हम स्वागत करें तुम्हारा!
जिसके सत कर्म सदा, हैं विश्वकल्याण कारी।
जिसका शब्दमय कवच सदा, हरता विपदा हमारी॥
जिसकी भाषा भद्र भावना, लगती सवको प्यारी।
जिसकी जीवनी सुशील, है जगत पवित्र पावन कारी॥
ऐसे मारग दर्शन करता शब्द हृदय सतधारा ·· हम स्वागत करें तुम्हारा!

जिसका भेष इन्द्र, ब्रह्मा. विष्णु. शिव जैसा है।
महाकाली - लक्ष्मी - सरस्वती आदि जैसा है॥
जिसकी वाणी अमृतसे शत्रु भी मित्र बन जाता है।
जिसकी बुद्धि - शुद्ध आचारोंसे पत्थर भी मोम हो जाता है॥
ऐसे आप यहाँ आकर हम पै जादू सा कर डारा ··· हम स्वागत करें तुम्हारा!
जिसके यज्ञादि सत् कर्म काण्डोंसे, वैदिक धर्मका मण्डन होता है।
जिसकी शब्दावली भद्र भाषासे, असत् पक्षका खण्डन होता है॥
जिसकी शिक्षा दीक्षा समस्त मानव धर्मकी रक्षा करती है।
जिसकी अध्यात्म विद्या ऋषि मुनि, देवी देवताको भी भली लगती है॥
ऐसे शिक्षाचार्योंका हम सब पर है उपकारा ···· हम स्वागत करें तुम्हारा!
जिसके योग उद्योगोंसे धन धान्य समृद्धि सिद्ध होता।
जिसके अस्त्र शस्त्र शास्त्र मिलनेसे मानव निर्भय होता॥
जिसके शुभागमनसे सभाकी शोभा मान सम्मान होता।
जिसकी सद्भावनासे सबका चित्त प्रफुल्लित होता॥
ऐसे सिद्ध महापुरुषोंने हमको आज उबारा ··· हम स्वागत करें तुम्हारा!
जिसकी आध्यात्मिक शक्ति. हर विपदाओंको हरती।
जिसकी दानशीलता महान् जगत्में. आनन्द मङ्गल करती॥
जिसके अनुयायी लोग भी, शिक्षा-दीक्षासे करते शुभ करणी।
जिसकी गति अखण्डित ऋषि मुनियों सी दिन रात कभी न थकती॥
ऐसे अतिथि गण मान्यजनों पर हम छिड़के सुगन्धी फव्वारा - हम स्वागत करें तुम्हारा!
जिसकी यात्रा सर्वत्र पवित्र है।
जिसकी कथा सत्य अद्भुत विचित्र है।
जिसका गात्र शुभ कर्मोंसे पवित्र है।
जिसका गोत्र गोत्रज शुद्ध चरित्र है।
जिसका चित्र दया धर्मकी ओर करता नित्य इशारा ··· हम स्वागत करें तुम्हारा!
जिसके नेत्र कृपा दृष्टिसे पवित्र है।
जिसकी यष्टि तीर्थ यात्रासे पवित्र है।
जिसका मुख मण्डल व जिह्वा गायत्री जपसे पवित्र है।
जिसका रथ विजयी अकुण्ठित सर्वत्र है।
जिसके रथका सारथी ऐसा हो, वह कभी न कहीं भी हारा ·· हम स्वागत करें तुम्हारा!
जिसकी भावनायें पावन हैं और जगत्को पावन करती है।
जिसके अङ्गोंकी चेष्टायें हृदयके सौहार्दकी अभिव्यक्ति करती है।
जिसका हर्षोल्लास महर्षिजनोंकी भाँति, विश्वकल्याणकारी है।
जिसकी स्मृति शक्ति सर्वदा सावधान सबकी हितकारी है।
ऐसे देवी देवताओंके मुख मण्डल हमने आज निहारा ·· हम स्वागत करें तुम्हारा!

जिसकी सेवासे सभी देव मण्डली हर्षित होती।
जिसकी शान्ति समस्त प्राणियोंको शान्ति देती।
जिसके सभी गुण-गणसे मानव को प्रेरणा मिलती।
जिसके सम्पर्कमे रहने वालेकी भी दूरदृष्टि होती।
ऐसे अतिथिजनोंने आज यज्ञमण्डपमें पग धारा ·· हम स्वागत करें तुम्हारा।
जिसका पण सभीका कल्याणकारी है।
जिसका एक एक क्षण जीवनका सर्वसुखकारी है।
जिसका संघर्षमय-जीवन सबकी भलाईका पुजारी है।
जिसके धनके एक-एक कणसे समस्त प्राणी लाभकारी है।
जिसके धन धान्यका कण कण समस्त प्राणी हितकारी है।
ईश्वरसम ऐसे अतिथिजनको सत सत प्रणाम हमारा ·· हम स्वागत करें तुम्हारा!
जिसका सतपथ गामी जीवन सदा सर्व सुखदायक है।
जिसके दोनों हाथ सदा, सत-कर्मों में सहायक है।
जिसका लोकोपकार महान सदा सुर नायक है।
जिसके उच्च विचार सदा सबको आनन्द दायक हैं।
ऐसे सन्त महाजनों पर तन मन धन सब वारा ·· हम स्वागत करें तुम्हारा!
जिसके मनमें सत्यव्रत दृढ जिसके मुखमें सत्य वाणी है।
जिसकी बुद्धि सत्य पर स्थिर. जो हृदयमें सत्य प्रणधारी है।
जिसकी कथा सतसे पार नहीं. जो सत्यानुकूल तनधारी हैं।
जिसके दो पाँव सत पथपर सदा सहते विपदा भारी हैं।
ऐसे सत्य अतिथिगणके प्रति प्रेम रंगमें रंग डारा ·· हम स्वागत करें तुम्हारा!
जिसकी सारी आयु निस्वारथ सेवा परोपकारी है।
जिसके सभी गुण-गण सब दोषोंसे रहित और गुणकारी है।
जिसकी तपस्या प्रसंशनीय शरीर मन सर्वदा निर्विकारी है।
जिसका सारा क्रियाकलाप सर्वलोक हितकारी है।
ऐसे उद्गार-भाव-विचारोंसे हो कल्याण हमारा ·· हम स्वागत करें तुम्हारा!
जिसकी पूर्णिमा दृष्टि योग साधनसे स्थिर है।
जिसकी गऊ खेचरी कुण्डलिनी सदा रही उभर है।
जिसका सिद्धासन दृढ व चित्तवृत्ति निरुद्ध है।
जिसका मन पावन शान्त व सदा अचल है।
ऐसे अभ्यागत अतिथिका अभिनन्दन बारम्बारा ·· हम स्वागत करें तुम्हारा!
इस जयपुर झालाणा महाकालमें, जिसने कोटिहोम करवाया।
योगी नरहरिनाथ आपके हम आभारी, धरतीको स्वर्ग बनाया।
सब सन्त विद्वत्मण्डली सुख दुःख सहकर, नभमें ॐ स्वाहा गुञ्जाया।
उन सबका स्वागत आज करण, जो यज्ञ सम्पूर्ण करवाया।

ज्ञान ज्योति अखण्ड जगे बाजे शङ्ख नगारा ... हम स्वागत करें तुम्हारा !
...हम स्वागत करें तुम्हारा !

२०४८।१९९१। विनीत स्वागताध्यक्ष = करणसिंह शेषावत झालाणा जयपुर राज॰

शब्दानुवाद

स्वागतम्! स्वागतम्!! स्वागतम्!!! स्वागतम्!!!!

जिसके दर्शनसे सर्व लोकका शोक हरण होता है।
जिसके पर्सनसे सर्व लोगोंका पाप हरण होता है।
जिसके सम्भाषणसे समस्त श्रोताओंका मनोरञ्जन होता है।
जिसके सम्बोधनसे बोधकी वृद्धि होती है।१।
जिसके अष्टाङ्ग योगके उपदेशसे समस्त संसारकी मैत्री होती है।
जिसके यज्ञादि पुण्य कर्मोंके निर्देशसे जगत्‌का पालन पोषण होता है।
जिसके संविभाजनके निर्देशसे समस्त मानव परिवारका समान आदर होता है।
जिसके नवधा भक्तिके भजनोंसे अपने-अपने इष्टदेवताओंमें भक्तिभावना जागती है।२
जिसके कर्म कौशलमय उपदेशोंसे समस्त श्रोता लोग कर्मठ बनते हैं।
जिससे मानव जीवन सुखी होता है, जिसके धर्म उपदेशसे मानवधर्मका
मानव-समाजमें जागरण होता है।
सारा विश्व एक परिवार होता है।
जिसकी विद्या अनिन्दनीय और विश्व व्यापक है।
जिसके आगम निगम अज्ञानके भेदोंको हटाते हैं।३।
जिसके सत् कर्म सारे जगत्‌के कल्याणकारी हैं।
जिसका शब्दमय कवच शरीरके अष्टाङ्ग तथा राष्ट्रके सप्ताङ्ग की रक्षा करता है।
जिसकी भाषा भद्र भावना पूर्ण है, सबको आदर देती है।
जिसकी जीवनी सुशील और जगत् पावनी है।४।
जिसका भेष इन्द्रका ब्रह्माका विष्णुका शिवका महाकाली-महालक्ष्मी-महासरस्वतीका है और समस्त भूमण्डलका मङ्गल करता है।
जिसकी वाणी कुसंस्काररूपी कण्टकको काटनेकी कृपाण है और अच्छे संस्कार हृदय भूमिमें उगानेवाली है।
जिसकी बुद्धि, आहार शुद्धि, आचार शुद्धि, अर्थ शुद्धि आदिसे शुद्ध-बुद्ध सावधान है।
जिसकी गोष्ठी देवगुरु बृहस्पतिकी जैसी गुण ग्राहणी दोष हारिणी है।५।
जिसके यज्ञादि कर्म काण्डोंमें सर्वात्मना शुद्ध. पण्डित मण्डली द्वारा सत् कर्म होते हैं और वैदिक धर्मका मण्डन होता है।
जिसकी शब्दावली भद्र भाषामें असत् पक्षका खण्डन एवं सत् पक्षका मण्डन करती है।
जिसकी शिक्षा दीक्षा समस्त मानव धर्मकी रक्षा करती है।
जिसकी अध्यात्म विद्या ऋषि मुनि देवी देवताओंको भी भली लगती है।६।

जिसका योग और उद्योग जगत्‌को धनधान्य समृद्धकर अन्तमें मोक्ष दायक सिद्ध होता है।
जिसके अस्त्र-शस्त्र-शास्त्र मिलेजुले रहते हैं और सवका कल्याण करते हैं।
जिसके शुभागमनसे सभाकी शोभा बढ़ जाती है।
जिसकी सद्भावना आत्मासे उत्पन्न होती है सवकी पवित्रता करती है।७।
जिसकी आध्यात्मिक आधिदैविक आधिभौतिक सम्पत्ति आपत्तियोंसे रहित शुभ-लाभ करती है।
जिसका दान सभी प्रकार महान् आनन्द दायक सर्वदा-सर्वथा सर्वत्र अभिनन्दनीय है।
जिसके अनुयायी लोग भी शिक्षित दीक्षित सभ्य सुशील भद्रभावना सम्पन्न हैं।
जिसकी गति भूमण्डलमें ऋषि मुनियोंकी भाँति अखण्डित है, ऐसे अभ्यागत अतिथि वर्गका हार्दिक स्वागत करते हैं।८।
जिसकी यात्रा सर्वत्र पवित्र है, जिसकी कथा सत्य तथ्य और विचित्र अद्भुत हैं।
जिसका गात्र शुभकर्मोंसे पवित्र है।
जिसका गोत्र वा गोत्रज मनुष्योंके चरित्रोंसे पवित्र है।
जिसका चित्र दया धर्मसे पवित्र है।९।
जिसके नेत्र कृपादृष्टिसे पवित्र हैं।
जिसकी यष्टि तीर्थयात्रासे पवित्र है।
जिसका मुख मण्डल और जिह्वा वेदमाता गायत्रीके जपसे पवित्र है।
जिसके चरण तथा रथ (वाहन:) सर्बत्र अकुण्ठित विजयी हैं।
जिसके रथका सारथी धारणाशील शुद्ध बुद्धि है।१०।
जिसकी भावनायें पावन हैं, और जगत्‌को पावन करती हैं।
जिसके अंगोंकी चेष्टायें हृदयके सौहार्दकी अभिव्यक्ति करती हैं।
जिसका हर्षोल्लास महर्षिजनोंकी भाँति उदार विश्वकल्याणकारी है।
जिसकी स्मृति शक्ति सर्वदा सावधान रहकर देवी देवता मानवता तथा समस्त चराचर जगत्‌की सेवाको परमधर्म मानती है।११।
जिसकी सेवासे इष्ट देवता कुलदेवता ग्रामदेवता समाजदेवता आदि सभी देवी-देवता मण्डलीको हर्ष होता है।
जिसकी शान्ति समस्त भूमण्डलमें सारे प्राणियोंको शान्तिदायक है।
जिसके सभी गुण-गण सवके कल्याणकारी हैं।
जिसके सम्पर्कमें रहनेवाले सहचरगण अनुयायीगण भी वैसे ही विश्वकल्याणकारी हैं।१२।

जिसका पण (प्रतिज्ञा) सभीका कल्याणकारी है।
जिसका एक एक क्षण जीवनका सर्व कल्याणकारी है।
जिसका संघर्षमय जीवन सबकी भलाईके लिये ही है।
जिसके धन-धान्यका एक-एक कण समस्त प्राणी कल्याणकारी है।१३।
जिसका सत्‌पथगामी जीवन सर्वदा सबको सर्व सुखदायक है।
जिसके दोनों हाथ सर्वदा सभी सत्कर्मोंमें तत्पर रहते हैं।
जिसका लोकोपकार महान् है और जिसका उच्च विचार सभी शोक हरण करता है।।१४

जिसके मनमें सत्यव्रत दृढ है जिसके मुखमें सत्यवाणी है।
जिसकी बुद्धि सत्यमें आरूढ है जिसके हृदयमें सत्य प्रतिज्ञा अटल है।
जिसकी कथा सत्यसे बाहर नहीं जाती जिसके शरीरमें सत्यानुकूल शील स्वभाव झलकता है।
जिसके दोनों पाँव सत्-पथमें सदा स्थाई रहते हैं।१५।
जिसकी सारी आयु स्वार्थ रहित्त है और सर्वदा सर्वथा सर्वत्र परोपकारार्थ है।
जिसके सभी गुण-गण सर्व दोषोंसे रहित है।
जिसकी तपस्या सब प्रकार प्रशंसनीय हैं और जिसका शरीर और मन सर्वथा वशमें हैं।
जिसकी सारा क्रिया-कलाप सर्वलोक हितायः है।१६।
जिसकी पूर्णिमा दृष्टि योगसे स्थिर है।
जिसकी गौ खेचरी है और कुण्डलिनी शक्ति सर्वदा जागृत् है।
जिसका सिद्धासन स्थिर और सुखदायक है, चित्त वृत्ति निरुद्ध है।
जिसका मनपावन आत्मा शान्त तथा निर्विकल्प समाधिमें लीन है।
ऐसे अपूर्व अभ्यागत अतिथिका हम हृदयसे स्वागत अभिनन्दन कर वाक्य पुष्पमयी माला आपके हृदयमें अर्पित करते हैं। स्वागतम्! स्वागतम्!! स्वा!!!



तानसेनको राजधानी पालपालो एक दृश्य

ॐ

जय गोर्खा



गुरु गोरखनाथंको अवतारस्थली

गोर्खा जातिको जन्मभूमि, गोर्खा कैलासकूट भवन
विश्वका नौ कोटि गोर्खाको एकता केन्द्रबिन्दु हो ।

विश्वकल्याणकोटिहोमः



हे हिन्दुराष्ट्र ! गोरखो !!
तेरो मुख हेरेर ॐ गो संस्कृतम् भन्ने
विश्वका कोटि-कोटि हिन्दूहरु आफ्नो शिर ठाडो पार्दैनन्।
'आत्मा खलु विश्वमूलम्' भनेर विश्वलाई आत्मा ठानेर 'वेदोऽखिलो धर्ममूलम्' भनेर वेदलाई विश्वमानव धर्मको मूल मानेको हुनाले तँलाई विश्वले हिन्दु धर्मको एकताको केन्द्रबिन्दु मानेको हो। यसको ध्यान नराखेर, विवेकहीन भएर आज तैंले हिन्दुत्व त्यागिस् भने भोलि तँलाई कसैले पनि मान्ने छैनन्। तेरो अस्तित्व पनि रहने छैन साथै विश्वका हिन्दुहरुको पनि अस्तित्व मेटिने छ। सो जानी पूर्वजहरूको ऐतिहासिक आदर्श 'हिन्दु हम वीर' 'जम्बूद्वीपका हिन्दुनामा एक' असल हिन्दुस्थान हो' भन्ने इतिहासका सुनौला पानामा कालो मोसो घसिने छ। सगरमाथा झुक्ने छ। हिन्दुजाति उदासीन भई समाप्त हुने छन् फलस्वरूप पातालदेखि आकाशसम्मको कैलाशमुकुटको मुकुट पनि मेटिने छ।

॥ सावधान ॥

धारणाद् धर्ममित्याहुर्धर्मो धारयते प्रजाः ।
यत् स्याद् धारणसंयुक्तं स धर्म इति निश्चयः ॥
धर्म एव हतो हन्ति धर्मो रक्षति रक्षितः ।
तस्माद् धर्मो न हन्तव्यो मा नो धर्मो हतो वधीत् ॥



धृतराज खनाल
सह-प्राध्यापक
शिक्षाशास्त्र केन्द्रीय विभाग
कीर्तिपुर
फोन : ९८४६०५०९९०
9846050990